ति निमयः तत्कर्तेत्यर्थः ईषत्प्रमयः सुप्रमयः प्रमयो वर्तते प्रमयः ईषद्विलयः सुविलयः विलयो वर्तते विलयः ॥ विभाषा
लीयतेः ॥ णावात्वं वा स्यात् एकार्यनिर्देशो न लक्षणा लिनाते यग्रहणा यजेः नचश्चिपः कर्मवाचित्वाभावात् तदनुपपत्तिः
कर्तृवाचित्वाभावेन अप्राप्तत्वात् शीन्व सामर्थ्यसाम्यविशिष्टत्वात् विलापयति आत्वाभावपक्षे तु गल्लकावागमौ

सि॰
बृ॰
१५

14

वद्धेते ॥ विदेश्छंदसि ॥ एवञ्चात्वंवास्यात् ववाद विविदेत्यर्थः ॥ अपगुरो णमुलि ॥ अपपूर्वस्य गुरतेर्णमुल्यात्वंवास्यात् गुरी
उद्यमने अपगारं अपगोरंवा ॥ चिस्फुरोर्णौ ॥ आत्वंस्यात् चापयति पक्षे चाययति स्फोरयति ॥ प्रजनेवीतेः ॥ प्र
जनार्थस्य वेधातोर्णावात्वं वा स्यात् प्रजनकाम्यसनखादनेषु । वापयति गाः पुरोवातः गर्भं ग्राहयतीत्यर्थः प्रजने किं वायय
ति ॥ बिभेतेर्हेतुभये ॥ भियो णौ वात्वं स्यात् प्रयोजकस्य भयापादनत्वे मुंडो भापयते भीरिति आत्मनेपदं हेतुरिति किं कुंचिकये
नं भाययति चैत्रः भयशब्दः उपादान उत्पन्नः हेतुना सह कर्मधारयः हेतुभिन्नं भयोपादानमित्यर्थः अन्यथा प्रयोजकव्या
पारेणैवो विधानात्र नन्वपवसिद्धो हेतुभयमत्र स्पष्टैवैयर्थ्यात् ॥ नित्यंस्मयते ॥ णौ वात्वंस्यात् प्रयोजकात्स्मयश्चेत् स्मापयति
हेतुरिति किं कुंचिकया विस्माययति विस्मापयन्विस्मितमात्मवावेति न प्रथमे व्याख्याने ॥ स्फजिटशोर्केलमकिति ॥ अनयोर्के
लादावकिति प्रत्यये परे ऽमागमः स्यात् मिदचोन्त्यात्परः यणादेशः स्रप्स्यति अस्राप्सीत् द्रप्स्यति अद्राप्सीत् कलिकिं स्र॰
जति अकितीति किं स्पृष्टः स्पृष्टं अमि सङ्ग्रहणं कर्तव्यं अकितीति पर्युदासे प्रतिषेधे वा प्रतिप्रसंगस्तत्रापस्तनादारम्भः स
नः सकारमारभ्य महिङो ङकारेण सङ् प्रत्याहारः तेन रज्जुसृड्भ्यामित्यादौ सृड्भ्यामित्यादौ नेति भावः बहुलतो धातोः स्वरूपग्रहणे न त्र
स्येषार्थ्यविज्ञानात्सिद्धं ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्यां ॥ उपदेशेऽनुदात्तस्य ऋदुपधस्य झलादावकिति प्रत्यये ऽमाग
मो वा स्यात् स्रप्ता अस्राप्सीत् त्रप्ता अत्राप्सीत् पक्षे गुणो लघूपधत्वात् सर्प्ता तर्प्ता असार्प्सीत् अतार्प्सीत् ॥ शी
र्षंछंदसि ॥ शीर्षशब्दः शिरसा समानार्थः छंदसि शीर्षन् शब्दो निपात्यते शीर्ष्णो जगतः शिरः शब्दस्य न दादेशविधाने न शिरोमस्ती
र्षशोभावः छंदस्येव शिरोभिः न श्रीतिनदाग्रवेणाः शिर इत्यादौ शिर इति प्रयोगो न स्यादिति भाष्येन च स्यादिति निर्देशाभावादेवना
देशान्नशोकादिशब्दवणादिशब्दैर्विग्रवइत्यादीनामिव समानार्थकस्यानिन प्राप्तेप्राप्तेः न चान्यतरस्यामित्यनुवृत्त्या उभय
सिद्धिः उत्तरत्राप्यनुवृत्त्यापत्तेः ॥ ये च तद्धिते ॥ शिरस इति वक्तव्ये यकारादौ तद्धिते परे शिरः शब्दस्य शीर्षन्नादेशः स्यात्

स्फारयति

स्मयो

शीर्षण्यः स्वरः यकारादौ किम् शिरोऽर्थ्येन ङिने किं शिरस्यति वाके शेषु इति वक्तव्ये शीर्षण्याः केशाः शिरस्याः शीर्षण्य
शब्दस्यार्थान्तरस्यापारणात्केशशब्दप्रयोगोऽपि शिरस्यशब्दस्य केशमात्रविषयकत्वात्तत्र न केशशब्दप्रयोगस्याङ्गः अविशीर्ष
इति वाच्ये वार्तिकं टेखे देशस्त्रमध्ये प्रतिममिति कैयटः अज्ञादौ न ङिनेऽप्रयमादेशः हस्तिशिरसोऽपत्यं हास्तिशीर्षिः स्थौलशी
र्षिः पैलशीर्षिः न ङितमिन्ने ण्यजादौ इदं विधाने । छन्दसि वशिरसः शीर्षभावो वक्तव्यः शिरःशब्दस्य वाक्यादिना केवलस्य
तस्यापत्ययोगाभावात्सामर्थ्यात्तदन्तविधिः देवशीर्षं ननु हास्तिशीर्षिर्हास्त्यादौ शिरःशब्देन ग्रहणाच्छीर्षन्स्यात् न वन स्तङि
त इति टिलोपेन निर्वाहः येवाभावकर्मणोरिति प्रकृतिभावापन्नेः ननु येऽचि न ङित इति वाच्यं तेन इस्मि शीर्षन्नादेशे टिलो
पे वष्यङादेशात्सिद्धिरिति वाच्यं स्थूलशिरस इदं स्थौलशीर्षमित्यत्र इनण्यनपत्य इति प्रकृतिभावापन्नेः सैवं प्रतिज्ञो रना
पि योरित्यत्र ष्यङ्न योरादेश इति पदे उक्तदोषाद्वन्तरोऽपि ताभ्यां पर इति पदे दोषाभावात् प्रतिज्ञायां व्यवहितत्वात् ॥ पद्
प॰ न्नोमासहृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ इह स्थानिनामनिर्देशोऽपि यथासंख्यवशादर्थसाम्याद्वादे
पः पाद दन्त नासिका मास हृदय निशा असृज् यूषन् दोषन् यकृत् शकृत् उदक आसन् इत्येषां शसादौ पदादय आदेशाः क्रमा
त्स्युः हृदयस्य शब्दस्य हृन्नादेश इत्युक्ते न चिन्त्यं ग्रीवायां बद्धोऽपि कण्ठ्यासन्नीत्यादिविरोधात् अपर्हेममासन्ये प्राणान्सुरिसा
दीवासे भवमासन्य आस्यशब्दस्योपलक्षणतया मुखनासिकादेः सर्वं तमिति व्याख्यानात् इह छन्दसीत्यनुवर्तत इति वृ
त्तिः सर्वविषयश्छन्दसि विकल्प इति पादादयोऽपि छन्दसि प्रयुज्यन्त इति कैयटः इत्थं च विकल्पा वृत्तिर्निर्मूला इति वाच्यं न वै
वं भाषायां पदाद्यादेशप्रयोगानुपपत्तिः आपो भीति सूत्रे मासश्छन्दसीति वार्तिके छन्दोग्रहणात्स्वयोगानुसारेण भाषायामपि
न सिद्धेः प्रभृतिशब्दोऽत्र प्रकारार्थः दोषणीयाचते महादेव मांसपचन्या उखाया इति भाष्यउदाहृतत्वात् औदि दोःशब्दस्य दोष
न्नादेश इति कैयटः । परादिषु मांसमहत्सूनामुपसंख्यानं । मांसपृतनासानूनां मेनतेऽप्यादेशाः स्युः पन्नीत्वर्णा मांसपचन्या उ।

सि॰
ष॰
१५

15

त्वाया: षष्ठमर्थे षष्ठनासमर्थे नतेद्विवोनष्टथियाश्रपिस्तुष नासिकायायत्नसस्रुद्वेषितिवक्तव्यं नसमूभवार्थेहितार्थेवा
शरीरावयवाद्यत्नस्तः अपादानेवाहीयरुहोरितिनस् । नःक्षुद्रः नासिकयाक्षुद्रइतिसहसुपेतिसमासः अवर्णान्नगरयोरिति
वक्तव्यं नेह नासिक्योवर्णः नासिक्यंनगरं क्रमेणपरिमाणादौसंकाशादौचपाठात्सिद्धमितिभाष्यं नन्वयमितिनात्वविनत्वंभ
वतिज्ञापयोक्तश्चाद्युदात्तत्वंनोदात्तत्वेस्यात्नामितिचेत्सत्यंराजन्यसांकाश्यकाम्पिल्यनासिक्यदार्वाघाटनामादिवोनोवेतिवि
शेषविधानात्पर्यायेणस्वरद्वयस्येष्टत्वात् अनासिक्यमित्यत्र यत्प्रत्ययेष्वययतोश्चानदर्थेइत्युत्तरपदांतोदात्तत्वेस्यादिष्यते
त्वषायष्टर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमितिप्रत्याख्यानस्यैवयुक्तत्वात् दक्षिणंदोर्निशाचरइतिरघुःदोषंतस्यतथाविधः
स्यभजत इतिश्रीहर्षः दोर्दोषाचभुजोबाहुरितियनेजयनिघंटुः आर्षंचैवबहुलंनानामितिदोःशब्दादाप् इत्थंचत्रिलिंगत्वेसि
द्धे अन्येषामप्यलिंगेनोदाहरणमूह्यं ॥ धात्वादेःषःसः ॥ षिचक्षरणे सिंचति उपदेशग्रहणस्यनिहत्वाद्धातुग्रहणंप्राति
पदिकादेःषस्यसकारादेशवारणार्थं ननुषिषादीनांषस्यसत्वेषिआदेशप्रत्यययोरितिषत्वेनसिद्धं लषादीनामपिषका
रोपदेशसामर्थ्यादित्यादिग्रहणंव्यर्थमितिचेन्नैवं षेदयतीत्यत्रषत्वस्यासिद्धत्वान्षढोःकःसीतिकत्वानापत्तेः षकारोपदे
शस्यचप्रतिलषतीत्यादौषोषेविभाषाकषादावषांतउपदेशइत्यादौनेर्णत्वनिषेधेनचारितार्थ्यात् । सुब्धातुष्ठिवुष्वष्क
तीनांप्रतिषेधोवक्तव्यः । षोडीयतिषीवतिषष्कते षड्दंतायस्यासौषोडन् तमाचष्टइतिणिचि टिलोपेषचायविषोडमिच्छ
तीतिक्यच् अन्यथाषोडयतीत्यापत्तेःअत्रभाष्यं । सुब्धातूनामुपदेशग्रहणान्नहस्यैवनप्रसंगः एवंचधातुग्रहणमपि
व्यर्थंप्रातिपदिकानामुपदेशाभावात् षिवेस्तसत्वेकृतेपिष्टुत्वेनषत्वं । नन्वेवंतेष्ठीवतेइतिनसिध्येत् अभ्यासेटकारप्र
संगात् नचथकारोद्वितीयवर्णः ष्ठुष्ठवतिटेष्ठीवतइत्यनयोरसिद्धेः नचष्ठिवुधातुरूपेस्वीकृत्यपकस्यद्वितीयोवर्णप्र
कारइतरस्यतुथकारइतिवाच्यं । द्वितीयसंबंधिषकारस्यसादेशवारणार्थमेवप्रतिषेधस्यावश्यकत्वापत्तेः तत्रष्ठिव

स्याऽनवकाशात्। न च ष्ठिवुष्वष्कसोरादितो द्विषकारतया आश्रयस्य सत्वेपि द्वितीयषकारस्योपाज्जत्वेन षत्वं भविष्यतीति
वाच्यं ष्ठिलिङ्गृह्णीयादिति मधुलिट्षष्ठे इत्यत्र ष्टुत्वस्यासिद्धत्वात् ऊः सिषुदिति ष्टुट्प्रसंगात्। तस्मात् अयोः सत्वप्रतिषेधश्राव
णकरत्वेनैवं लोपो व्योरिति आदेयकारप्रश्लेषेण सर्वनिर्वाहात् उपदेशे षादित्वाभावात् ष्ठिवेर्द्वितीयो वर्णः षकार
इति पक्षे टेष्ठीव्यते इति रूपं थकार इति पक्षे तु तेष्ठीव्यत इति एवं च आसिद्धोपमद्विर्वचन इति पक्षे कृतष्ठत्वस्यैव द्विर्वचने वि
शर्पूर्वाः खय इति शरो लोपे कर्तव्ये ष्टुत्वस्यासिद्धत्वात् ष्टुत्वनिवृत्तेः न चैवं षत्वमिष्यते तेन सादय एव षोपदेशा नामिति
वाच्यं येषां षत्वमिष्यते तेषां तत्र तत्र विशिष्योपादाने गौरवापत्तेः आदेशप्रत्यययोरित्येकेनैव लक्षणेन षत्वविधाने ला
घवात् षोपदेशाश्च भाष्य उक्ताः अजन्त्यपराः सादयः षोपदेशाः स्मिङ्स्वदिस्विदिस्वञ्जिस्वपयश्च सृपिसृजिस्तृस्त्यासेकृ
स्ववर्जमिति सिंचतीत्यादौ लक्षणसमन्वयः स्पष्टः आदौ सकारस्य सकारो जरेव अजन्त्यान्यतरस्य सत्वात्। न च स्मिङः
अन्त्यान्यतर परो यः सकारस्तदादित्वाभावात् स्पष्टमुपादानेपि स्वदीत्यादिचतुष्टयस्य सूत्रेऽवलक्षणेन संगृहीतत्वात् स्म
ष्टमुपादानं वैयर्थ्यमिति वाच्यं। दंत्यपदेन केवलदंत्यपवर्गस्य तेन त दंत्योष्ठ्यस्यापि शंकावारणार्थत्वात् अजन्त्यपराः
सादय इत्यस्यातिव्याप्तिवारणाय सृपीत्यादि तथा च सृपिसृजिस्तृस्त्यासेकृस्वभिन्नत्वे सति अजन्त्यान्यतरपरसकारादिः
स्मिङ्स्वदिस्विदिस्वञ्जिस्वपयश्चेत्येतदन्यतमत्वं षोपदेशत्वमिति पर्यवसन्नम्। केचित्तु स्मिङादिमध्ये ष्वष्कतिम
पि पठन्ति तत्र सादेशोपयोगिनामेव षोपदेशानां भाष्ये संगृहीतत्वात् ष्वष्केश्चात्रोपादानात् षकारादित्वोक्तेश्च षका
रवत्त्वज्ञानमात्रस्य षोपदेशत्वे लषादीनामव्याप्तेः ॥ णो नः ॥ धात्वादेर्णस्य नः स्यात् णमप्रह्वत्वे नमति अत्र भाष्ये
सर्वे नादयो णोपदेशा नृतिनन्दिनर्दिनक्किनाटिनाथृनाधृनॄवर्जं प्रयोगे नकारादय उक्ता यत्तु अन्ये धातवो णोपदेशा
वोध्याः नाटीति दीर्घनिर्देशो चटादिव्यावृत्त्यर्थः। मैत्रेयादयस्तु नाथतिपर्युदासवाक्ये त्रथीत्यनस्य णोपदेशत्वमेव

उपसर्गादसमासेपीतिणत्वंप्रणायतेइत्यादि: शाकटायनस्यमतादयमर्थस्तथातोरवरथिणोपदेशत्वमादि: । ततश्चैवंनिर्मूले
हन्निकारादिविरोधादितिकाश्यपादय: ॥ लोपोव्योर्वलि ॥ वलिपरेवकारयकारयोर्लोप:स्यात् जीरदानुः रेफेपरेधातो
र्वकारलोप: जीवेरदानुकप्रत्यय: पचेरन् इत्यादौ यकारस्यलोप: व्योर्लोपेकण्ड्वादेरुपसंख्यानं कंडू: । कंडूयते: क्विप् । त
स्यसर्वलोप: अतोलोप: ततोवस्यरत्वाभावादप्राप्तावारंभ: नचकंड्वादिसूत्रेणैतेभ्य:क्विप्प्रत्ययइत्युक्तत्वात्तद्विरोध:
कंडूमिच्छतीतिक्यजेतान्नसंभवात् धातुप्रातिपदिकभेदेनकंड्वादीनांद्वैविध्याङ्गीकारात्धातुभ्योयगुत्पन्नावपिप्रातिपदिकेभ्य
क्यजाद्युत्पत्ते: यत्तुभाष्येनचात्रवलादिपरग्रहणमित्युक्तं तत्रयद्यपिविशेष्यसंनिधानाभावात्तदादिविधानंनास्ति प्रत्य
याप्रत्ययसंबंधिसाधारण्येनवर्णमात्रस्यापेक्षितत्वात् तथापिकूपीशहेइत्यस्मात् ऊतमित्यादौप्रत्ययस्यापिवला
दे: संभवात्संभवमात्रमभिप्रायं नचक्विलोपात्पूर्वमेवयलोपोस्तिअतोलोपस्ययलोपेकर्तव्येस्थानिवत्त्वनिषेधादिति
वाच्यं परत्वान्नित्यत्वाच्चक्विलोपस्यप्राथमिकत्वात् नचप्रत्ययलक्षणेनयलोपप्राप्ति: वर्णाश्रयेतन्निषेधात् स्यादे
तत्ततोलोपोत्तरप्राप्तिकस्ययलोपस्यक्विलोपेनसमंविप्रतिषेधानुपपत्ति: अतोलोपस्यपरनिमित्ततयावहिरंगा
त्वात्तत:प्रागेवांतरंगस्यक्विलोपस्यप्रवृत्ते:सत्यं आर्द्धधातुकइतिविषयसप्तम्याश्रयणादतोलोपस्यक्विबुत्पत्ते:
प्रागेवप्रवृत्ते:ततकंडूप्रादुस्ययात्वात्यकारलोपोत्तरमकारस्यापिप्रत्ययत्वादतोलोपस्यस्थानिवत्त्वाद्बड्वडूस्या
त् सत्यं इत्यापत्ते: क्विपमाश्रित्यतदीयवकारस्यऊठ्संभवात् नस्यत्राप्यतोलोपस्यस्थानिवत्त्वं यकारस्यानादिष्टाद
च:पूर्वत्वाभावात् अतोलोपोत्तरकालमेवऊठ्प्रवृत्ते: ऊठउवङिकर्तव्येवोक्तरीत्यातोलोपस्यस्थानिवत्त्वाभावाद्विभ
क्त्याश्रयउवङ्भवत्येवकंडुव इत्यादिप्रातिपदिकाद्विभक्तौतु कंड्वौ कंडूइत्यादि तस्मात्कथयलोपोवचनसाध्य इति
प्राप्तेइष्यते यथाहलादौपितिसार्वधातुकेपरेविधीयमानस्तृणहइमागमोऽन्तरंगोऽपिइत्यत्रातिपिलुभेपिभवति न

कंड्वौ

इदि हयलोपोपि ननु तत्रार्द्धधातुकत्वस्य प्रत्ययमात्रवृत्तित्वयाहलादित्वस्य सार्वधातुकविशेषणत्वात्प्राधान्येन वर्णा
श्रयणं नास्तीति भवत्येव प्रत्ययलक्षणमित्युक्तं यलोपस्तु वर्णमात्रनिमित्तको न त्वत्र प्रत्ययाश्रयणमिति कथं प्रत्यय
लक्षणमिति वक्तव्यं उत्तरसूत्रे वेरिति योगविभागः वेरित्यस्य च प्रत्ययग्रहणपरिभाषया अंत्यस्येत्यर्थः व्योरित्यस्य त
द्विशेषणत्वात्तदंतविधिः वकारयकारांतस्य विप्रत्ययांतस्य अलोंत्यस्य लोप इति वाक्यार्थः विप्रत्ययांतत्वेन प्रत्ययल
क्षणेन भवत्येवेति नानुपपत्तिः ननु स्त्रिवेमीति न लोपो व्योरिति वलोपे गुणे च प्राप्ते माणमितीष्यते नन्वत्र वलोपं वा
धित्वा हलो सूडित्स्य इट् प्राप्नोतीति परत्वात् एवं हस्यनोवीहिवर्ण इत्यादौ वकारलोपः स्यात् न च वकारोपदेशसामर्थ्यं सं
प्रसारणहलादिशेषानंतरं श्रवणार्थत्वात् हकाः विहस्विवतीति अत्र वलपरत्वाभावेन लोपप्रसक्त्यभावात् मै
वं संप्रसारणहलादिशेषाभ्यां प्रागेवांतरंगत्वाद्वलिलोपस्य प्रसंगात् न च श्रवणार्थतायाद्युर्घटत्वात् उपदेशसा
मर्थ्यादेव हस्वादावनतिप्रसंगात् प्राप्ते माणमित्यत्र छांदसत्वाद् इडभावात् वस्तुतस्तु वलोपो नारभ्यः छांदसत्वादे
वोक्तस्थले वकारलोपोपपत्तेः गयस्फायनो गयस्फान इत्यादिवत् यलोपस्तु गौधेरः पचेरन्नित्यादाद्युपयोगादारभ्य
एवेति सिद्धांतः ॥ वेरपृक्तस्य ॥ अपृक्तस्य वेर्लोपः स्यात् क्विवादौ कपयोरिकारस्य च इत्संज्ञया लोपे नेन वस्य लोपः अ
पृक्तस्य किं दर्विः जागृविः दर्विजागृव्योः प्रतिषेध इति वार्तिकं तु प्रौढिमात्रं अपृक्तस्येत्यनु[illegible]कापिडक्[illegible]रीत्या प्रति
षेधसंभवाद्धि निगमकाभावादित्यभिप्रायेण प्रवृत्तेः अत्र भस्येचेवेरित्यनुनासिकपरस्य विशाहस्यानिर्देशाद्विरिमा
दौ च तथात्वाभावादेव नातिप्रसंगः यस्य विशाहस्य परः इकारोनुनासिकोगत इवेत्संज्ञकस्तस्यैवात्र लोपविधौ स्यादिति
त्वेनानुकूतत्वात् परशाहस्य विशिष्टदेशावयववाचित्वात् एतेनानुनासिकः परो यस्मादिति पंचमीवज्ञ्रीहिभ्रमे
ण हतस्यागीत्यादौ क्विनो नकारस्य लभ्यत्वाद्दलोपो न स्यादिति परास्ते त्रिपादविर्यस्तत्र त्रिपदविंश्रात्राणो प्रत्यस

स्यानुनासिक इति ईकारस्यानुनासिकत्वेपि न वलोपः नत्र इकारस्य इत्संज्ञाविरहात् अननुनासिकस्याः सिद्धत्वाच्च नन्वेवमपि इ
विधिविधीणानेइत्यादि यान्तवकाराणां इत्संज्ञको अनुनासिकश्च यकारस्तत्परत्वाल्लोपापत्तिः सिद्धान्तेन प्रत्ययत्वाभावादपृक्त
संज्ञाविरहाच्च न तल्लोप इति चेन्न अर्थवद्ग्रहणपरिभाषयैव तद्वारणात् क्विबादौ नान्तकर्तरि कृदिति प्रतिज्ञयाः र्थवत्त्व
सिद्धेः यद्वा वेरिति अननुनासिकस्य वकारस्यानुकरणं क्विबादावपि नान्तशाप्यवकारादत्यपृक्तस्येति प्रत्याख्यानं ॥ ह
ल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल ॥ हलन्तात् दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते राजा गौरी
खट्वा ङ्यापोर्दीर्घत्वविशेषणान्नेह निः कौशाम्बिः अतिखट्वः परस्परसाहचर्येण विभक्तीनामेव सुतिसीनां ग्रहणान्नेह
अभैत्सीत् अपृक्ते किं बिभर्ति हल् किं बिभेद तिबादेशस्य लोः पृक्तत्वाल्लोपः स्यात् ननु प्रथमे हलि तिप्यर्थे राजन् स् इत्य
त्र संयोगान्तलोपादेव सिद्धेरिति चेन्न तस्याः सिद्धत्वया पदस्य सकारान्तत्वापत्तौ नस्य पदान्तत्वाभावान्न लोपस्यानुपप
त्तेः पचन्नित्यादिवत् ननु अजादिसर्वनामस्थानभिन्नस्यैव स्वादिष्विति पदसंज्ञायां निवेशितत्वात् उक्तस्थले सर्वनाम
प्रत्ययपदसंज्ञायां नकारान्तत्वपपत्तावपि सोपरतो या पदसंज्ञानामेवादाय नलोपो भविष्यतीति चेन्नैवं संयोगान्त
लोपस्याः सिद्धत्वया उर्वत्वादन्तःपूर्वमेव नलोपे । संयोगान्तत्वाभावात्सलोपानुपपत्तेः । एकं सेपिन्नतीपरं प्रत्य वत्
इति प्रसंगात् नङिसंबुद्ध्योरिति संबुद्धौ नलोपनिषेधेन सिद्धः संयोगान्तलोपो नलोप इति ज्ञाप्यत्वाद्धल्ङ्यादिवैयर्थ्ये । सं
योगान्तलोपस्यैव स्वीकारे हे राजन्नित्यत्र तस्याः सिद्धत्वान्नलोपप्रसंग एव नास्ति किं निषेधेन कृतस्तत्क्रमं ज्ञापयति
तेन राजेत्यादौ संयोगान्तलोपस्यासिद्धत्वान्नलोपासिद्धिः ननु एवं त्रिपाद्यत्र कथं नकारस्य संयोगान्तलोपः सलोपस्याः सि
द्धत्वात् मैवं स्वस्य स्वस्मिन्नसिद्धत्वाभावात् नन्वेवमपि राजेत्यत्रैव नलोपः स्यादिति चेत् मैवं तुल्यजातीयविषयकत्वा
त्रापकस्य विभक्त्यव्यवहितपूर्ववर्तिनकारलोप एव सिद्धत्वात् अत्र च नकारेण व्यवधानात् मैवं उवासन्तपणि

प्र

धत् इत्यसिद्धेः तथाहि उखास्रत्सत् इत्यादौ स्थिते संयोगांतलोपं बाधित्वा तदपवादत्वात्संयोगादिलोपः स्यात् न चाऽपवा
दस्याऽसिद्धत्वे वचनप्रामाण्यात् अत एव काष्ठतक्षतीति काष्ठतडित्यत्र ककारस्य संयोगादिलोप एव न तु संयोगांतत्वान्त
कारलोपः तत्तस्य विभक्तिसकारस्य संसत्पदवयवत्वाभावात्तद्वत्वे न स्यात् न च वचनसामर्थ्यं उखास्रद्भ्यामित्यादौ चरितार्थत्वा
त् न च संसेः सकारस्य दत्वे कृते न संयोगादिलोपप्रसक्तिः तस्याऽसिद्धत्वात्स्य विद्यमानत्वात् न च सिद्धकांडे वस्वादिषु दत्वे सौदीर्घत्वं
इत्यवश्यं पठनीयत्वात् तत्र च सौदीर्घत्वं इत्यंशस्य परिभाषागां संयोगादिलोपं प्रत्यपि दत्वस्यासिद्धत्वात्रोक्तदोष इति वाच्यं
संयोगांतलोपस्यासिद्धतया पदांतत्वाभावेन दत्वानुपपत्तेः न यस्मात् पि पदसंज्ञेत्याश्रित्य निर्वाहः राजेत्यादौ विभक्ति
श्रवणापत्तेः नन्वविभर्भवानजागर्भवानित्यत्र तिसिपोः संयोगांतलोपसंभवात्ति सोर्थे हणो वर्ण्यमिति चेत्र रात्सस्येति नि
यमात्तकारलोपानुपपत्तेः न नु तत्र नकारं प्रश्लिष्य रेफात् यौ सकारयोर्लोपविधानात्रानुपपत्तिः न चैवं कीर्तयतेः क्विपि
कीरितिस्यात्कीर्तं इति विध्यत इति वाच्यं यथालक्षणमप्रयुक्त इति सिद्धांतात् अथ अभिनो अत्र भित्वत्र भिदेर्लङ्. सिप् श्नम्
संयोगांतलोपः तस्य रुत्वात् स्वैत्वेनासिद्धत्वाभावात् हल्ड्याबिति रुत्वं अतो रोरिति उत्वं प्राप्तं तु संयोगांतलोपस्याऽसिद्धत्वादुत्वं
न स्यात् अनेन लोपेन दत्वं यानाभावादुत्वसिद्धिरिति चेत्र संयोगांतलोपो रोरुत्वे सिद्धो वक्तव्य इत्यस्यावश्यकत्वात् हवि
षो मेदिन्वा इत्यत्र रोयात् ॥ पङ्क्ष्वात्संबुद्धेः ॥ पङंतात् ह्रस्वांता त्त्वाणाय वेसंबुद्धिहल्लुप्यते हरे शंभो राम ॥ इतरादि
भ्यः प्रतिषेधो वक्तव्यः ॥ हे कतरत् हे कतमत् कतरस् इति स्थिते संबुद्धिलोपाद्भावयोः प्राप्तौ परत्वादद्भावः संबुद्धिलोप
स्य शास्त्रांतरप्राप्तौऽद्भावस्य त संबुद्धिलोपो न रम अप्राप्याद्धयोरप्यनित्यत्वात् पुनः प्रसंगविज्ञानात्संबुद्धिलोपप्रसंगः नवाऽ
द्भावानुहत्यासिद्धिः तस्य निहतत्वात् अन्यथा हे कंड हे पीठ इत्यादावमो लोपानुपपत्तेः न चात्र कार्यकारतिहत्वा वपि लोप
स्य समुदायप्रतियोगिकत्वाभावादलोप्यपरिभाषया मकारमात्रलोपः स्यादिति वाच्यं अतो अमङ्इत्यकारद्वयस्य परस्य

शि॰
ष॰
१८

18

रूपसंभवादिष्टापत्तेः न चादेः परस्येति वचनादकारस्यैव लोपे तस्यापरनिमित्तकत्वाद्दीर्घे विधेयोऽस्थानिवद्भावनिषेधाद्वाऽतोदी
र्घो यञीति दीर्घे कुंडाम् इति रूपापत्तिरिति वाच्यं हल्पदमनुवर्त्य ङ्स्यादिति पंचम्यास्तस्य बहुत्वं तत्त्वं प्रकल्प्य हलो लोपविधा
नाददेः परस्येत्यप्रवृत्तेः न चैवमपि अकारद्वयस्य प्रथमयोरिति पूर्वसवर्णदीर्घापत्तिः असिद्धत्वेन संभवात् एकदेशवि
कृतस्यानन्यत्वात् यद्वा मकारलोपात्पूर्वमेकादेशः ततो मकारलोप इति चेन्न एकादेशोऽन्तरंगः स च संबुद्ध्योः पौर्वापर्याभावे
न संबुद्धिहलो लोपानुपपत्तेः उभयत आश्रयेणादिवत्त्वप्रतिषेधात् पूर्वं प्रवृत्तेन तद्भावेन ङ्स्यान्तत्वसंपत्तेः संबुद्ध्यादिमा
याः प्रकृतेरेऽङ्स्याभ्यां विशेषणेन तदंतविधिसद्भावात् तस्मादुत्तरादिभ्यः प्रतिषेधो वक्तव्यः ननु अदादेशे तु नासिक
त्वादकारो लुप्यते दकारमात्रत्वादेशस्य तस्येतदाभावात् संबुद्ध्यवयवत्वाभावान्नो ङ्स्लोपापत्तिरिति चेन्न व्यपदेशिवद्भावेन
हृदेस्यादावेव लोपस्य दुर्वारत्वात् यद्वाऽङ्गेव कर्तव्यः स्वमोरिति स्वमोर्लुक् सिद्धान्तस्तु अद्ड्डतरादिभ्य इत्यत्र अद्ड् इति छेदा
द्ददादेशो डित्त्वात् टेः प्रकृतेष्टिलोपः न चैवमपि अदादेशावयवाट्टकारात् ङ्स्यान्तस्य दकारस्य लोपापत्तिर्नादवस्था ङ्
स्यान्तादंगात्परस्य संबुद्धिसंबंधिनो हलो लोपविधानात् सामर्थ्याच्च ङ्सस्य प्रकृत्यवयवस्य ग्रहणात् यमादाय ङ्स्यान्ताद
गात्संबुद्धिर्विहिता तस्मादेव ङ्स्यात्परस्य हलो लोप इत्यर्थः इहत्तु टिलोपे कृते अंगस्य ङ्स्यान्तत्वाभावान्न दकारलोपः अ
पृक्तसंबुद्धिलोपाभ्यां लुग्विप्रतिषेधेन गोमान् चम्प्रत्यय इत्यत्र सावकाशयोरपृक्तलोपस्वमोर्लुकोस्तद्धालणाजलसिंत्र
प्रसंगे स्वमोर्लुक् अग्रे त्वत्र इत्यत्र सावकाशयोः संबुद्धिलोपलुकोः हे त्वत्र इत्यादौ प्रसंगे लुक् इदं च लुग्लोपयणयवायावे
कादेशेभ्य इत्यत एव ज्ञातार्थं अनडुह्यते इत्यत्र अपृक्तलोपं वाधित्वा स्वमोर्लुगिति लुक् तेन प्रत्ययलक्षणेन नुमाडेवेति स्त्री
कारात् ॥ शेश्छंदसि ॥ जसादेशस्य शेर्वेदे लोपः स्यात् अग्रे वीते वाजिराजीसपक्ष्या वीणि वाजिनानि सपक्ष्याणीत्यर्थः
भाषेत्तु सर्वसवर्णीनैवेदं सिद्धं नवनमाख्यवचनेन छंदसि नपुंसकस्य पुंवद्भाव इति वाच्यत्वात् मधोस्त्माइवासते अत्र न

त्रम् नन्वेवमपितानानापिंगनामितिनस्यात् नड्स्यत्रनादिचीतिह्रस्वेसवर्णानिषेधात् मैवं ह्यपांस्त्रलुगितिइकारस्यांऽकारा
देशेऽकः सवर्णेदीर्घइतिसिद्धेः नचैवमपिअग्नेग्नीतष्यत्रजसियणःस्यादितिवाच्यं जसादिषुछंदोवावचनेप्राङ्णौचङ्युप-
धाया इतिवक्ष्यमाणत्वात् ॥ ह्रस्वस्यपितिकृतितुक् ॥ पितिकृतिपरेह्रस्वस्यतुक्स्यात् प्रकृत्याग्निचित् ननुतुकः पूर्वान्त
त्वेप्राग्गणिछिन्नमित्यादौनपुंसकोपसर्जनह्रस्वः पंचारत्निछत्रमित्यादौऽङ्गेतेतिद्विरुक्तस्यनस्यात् मैवं असिद्धंबहिरंग
मन्तरंगेइतितुकोऽसिद्धत्वात् स्वरह्रस्वयोरंतरंगत्वात् पतेनग्रामणिपुत्रइत्यादौतुकप्रसंगोप्यपास्तः ह्रस्वस्यबहिरंगत्वा
त् नचतुङेवपरादिरस्त्वितिवाच्यं अपच्छायादिप्यादौवान्यस्ययोगादेरतिप्रसंगात् अग्निचिदित्यत्रवेर्लोपानुपपत्तेः पदान्त
दित्यत्रवलादिलक्षणस्येटः प्रसंगात् अभक्तपक्षेतुदधिछादयतीत्यादौतिङ्ःतिङ इतिनिघातोनस्यात् ॥ संहितायां ॥
अधिकारोऽयं तेनाऽसंहितायांनयणादयः एतत्सूत्रमर्थमितिभाष्ये व्यापकमौपश्लेषिकंवैषयिकंचाधिकरणंत्रैविध्यात्
व्यापकमनवच्छिन्नवृत्तित्वात्व्यापकं तिलेषुतैलं निरवछिन्नवृत्तौ नस्यातत्रसत्वात् द्वितीयमवछिन्नावछिन्ननिरूपके क
टेतिष्ठति अवयवावछिन्नत्वात्वृत्तेर्नाधिकरणत्वस्य व्यापकत्वंतृतीयं विषयतादिवृत्तिनियामकसंबंधावछिन्नवृत्तेर्ज्ञानेवे
शाकनयः ग्रामेवसतीति भेदानामानेनेषूपदर्शनमात्रमेतत् तत्राद्योत्यौपश्लेषिकमधिकरणं आद्यायाःसंहितायाह्रतेः
व्यावयानेसत्युपश्लेषाभावात् यद्यप्यार्द्धधातुकइत्यत्रविषयसप्तम्युक्ता तथापिसामान्यविवक्षायांतस्यपरत्वासंभवा
त् इहतुव्यक्तिरेवविवक्षितेति नदोषः ॥ छे च ॥ ह्रस्वस्यछेपरेतुगागमःस्यात् स्वच्छाशिवच्छायाइहतुकिक्कनेश्रुतुज
न्त्वयोःप्रसंगेषुतस्याऽसिद्धतयाड्वलत्वाऽजशत्वेतदः ततश्चुत्वस्यासिद्धत्वात्ष्टुत्वेनतज्जः तस्यचत्वेनचः तच्चतस्यऊत्वाप
त्तिः तुकस्यासिद्धत्वात् ॥ आङ्माङोश्च ॥ आगत् पदांताद्वेतिविकल्पापवादः आच्छादयति माच्छिदत् इतितोवेतिज्ञेरडः
सानुवंधग्रहणंक्रमेणागतिकर्मप्रवचनीयत्वयोः प्रतिषेधार्थकत्वस्यचसंप्रत्ययार्थं तेनईषदर्थेसायाऽङोग्रहणं

सि॰
प्र॰
१९

19

दीर्घात्छायापाश्वाछायेतिनिर्देशस्तु क् वाक्यस्मरणायोस्त्याकारस्येहास्त्रपदान्ताह्वमाणोविकल्पः आच्छायामानयति आच्छायां
माछेदः ॥ दीर्घात् ॥ छेपरेतुक् चेछियते पदांतेविकल्पस्यवक्ष्यमाणत्वात् ॥ पदांताद्वा ॥ दीर्घस्यपदांतात्छेपरेतुग्वाल
क्ष्मीछायालक्ष्मीछाया दीर्घस्यानावयवोपंनतछ्ठस्यस्वराछ्ठायेतिज्ञापकात् छकारेऽजत्तंतांकिंछकारस्यचर्त्वप्रसंगा॰
त् ॥ इकोयणचि ॥ इकोयणादेशः अचिपरेसंहितायांदध्यत्र मध्वत्र धात्रंशःलाकृतिः यथासंख्यातरनम्पाम्या मत्राद
शावयवष्या अत्रवार्त्तिकं जस्त्वनसिद्धंयणमत्रपश्य यस्मात्पदांतोहलवश्यवं पूर्वः दीर्घस्ययणाज्जस्त्वमितिप्रवृत्तंसंवेध
हस्याग्रणाहड्दिवार्थं निसेवयः शाकलभाक्समासेनदध्यमेनज्ञगवांश्वकार सामर्थ्ययोगान्नहिकिं विदत्रपश्यामि
शास्त्रेयदनर्थकंस्यात् तथाहि इणितिवाच्ये अग्निविदत्रेत्यत्रपरत्वात्यणाबाधित्वाजश्त्वप्रवृत्तेः यणःशत्वांतरप्राप्त्याज
शत्वस्यचयणउत्तरमप्राप्त्याहयोरप्यनित्यत्वात् अत्रसमाधानमाह जश्त्वनसिद्धमिति पूर्वत्रसिद्धीयत्वया जश्त्वस्यसिद्धा
सिद्धयोस्तुत्वबलत्वाभावेनविप्रतिषेधानुपपत्त्यायणमेवात्रप्रसक्तं पश्येत्यर्थः किंच अचःपूर्वस्मिन्पदांतेहलि
पचतीत्यादावतिप्रसंगः पदांतस्यैवजश्त्वविधानादिग्रहणंविनातत्रहलोयणादेशास्यद्वर्वीरत्वादित्याह यश्चेति
नत्रदीर्घादित्यतोदीर्घग्रहणमनुवर्त्यनस्मिन्निति निर्दिष्टे पूर्वस्येतिवचनादचीतिसप्तम्यादीर्घादितिपंचम्याःषष्ठीत्व
प्रकल्पनादीर्घस्ययणविधेयः नचतस्मादित्युत्तरस्येतिवचनादीर्घादितिपंचम्येवाचीतिसप्तम्याःषष्ठीत्वकृतोनका॰
स्येतविनिगमकाभावादितिवाच्यं अचीतिसप्तम्याअकृतार्थत्वात् दीर्घादितिपंचम्यास्तुपूर्वः पौर्वापर्यकल्पनेनकृता
र्थत्वात् नचैवंछेचेत्यत्रकृतार्थायाःछेइतिसप्तम्या अपिदीर्घादित्यकृतार्थयापंचम्याषष्ठीत्वकल्पनात् दीर्घात्परस्यछ॰
स्यतुगितिवाक्यार्थापत्तिरितिवाच्यं तत्रतदकल्पनेज्ञापकस्योक्तत्वात् तहलेतसप्तम्येवदीर्घादितिपंचम्याःषष्ठीत्वप्र
कृमेः नचैवंऊमार्येत्रेत्यादेःसिद्धावपिदध्यत्रेत्यादेनासिद्धिरितिवाच्यं ह्रस्वस्यापिनीत्यतोह्रस्वस्यापनुकर्षात् नचैवं

पदांताद्वेत्यत्रापिह्रस्वात्परहृत्तौह्रस्वपदान्तस्यापित्तग्विकस्यापत्तेः विशिष्टस्यैवतत्स्त्वस्यात्त्वहृत्तेः पितिकृतीत्यादेश्वम

ध्यवाकेष्वन्वयानर्हत्वात् नत्वद्विधेयविशेषैः समममस्यैकवाक्यत्वाभावात् यणिवपौतुपितीत्यादितिहृतेह्रस्वस्येत्यनु

वर्त्तनइतिदोषाभावात् तेनहलत्याहृत्यर्थनेग्रहणमितिसिद्धं ननुअक्षिपत्येप्रतिलक्षलक्षणग्रहणाचयनेवा॥

यकइत्यादावपिअयादयोयणादेशस्यपर्यायेणप्रवर्त्तेरन्निति चेन्न अयादीनांअपवादत्वात् अक्षिपत्येपिमेधिपत्यास्

धिपत्वाभ्यामुत्सर्गापवादभावस्वीकारात् नववृद्धेदः वृद्धेलकेत्यादिवारणार्थमिमितिवाच्यं उक्तरीत्याग्रणाहेद्या

वीधकत्वात् इतिसर्वं पत्तः सिद्धान्तस्तुनिषेधवयइति अयमर्थः उक्तरीत्यैवयणाइवस्थानिकत्वसिद्धौपुनरिग्ग्रहणांशा

कलयणादेशयोरेकविषयकत्वाद्वैकल्पिकयोर्व्यवस्थितविभाषार्थंव्याख्येयं तेनसिन्नित्यसमासयोर्यणादेशाप

वप्रत्ययत्तभयंतेनसिन्नित्यसमासयोःप्रतिषेधइतिवार्त्तिकेऽरूकार्थस्पष्टीकरणमात्राभिप्रायं यणादेशःप्लुतसर्वस्य

निवर्त्तकत्वं तथाहि अग्नेइदंपटोउदकं इत्यत्रपर्यवोअगृह्यस्याहराद्दुतेसर्वस्याइस्याउन्तरस्यइतावितिसर्वीइमात्रायाःप्लु

तस्याकारः उत्तराईस्यतुइकारोकारौ तयोरकारस्यवअगृह्यद्दुतेः अग्ना ३ इदं पटा ३ उउदकं एवंअग्ना ३३ आशान

त्वप्लुतोत्तरस्यइकारस्ययणादेशविधानं तयोरसिद्धत्वात् आरंभेत्वाप्रयान्सिद्धत्वं ननु एतदर्थं तयोर्भाववदिसंहिता

यामित्येवसिद्धेः सवर्णदीर्घशाकलयोरपितेनैवनिषेधात् मैवं प्लुतसर्वयोरप्लुतविकारयोरिद्वतोर्यणार्थमस्याव

श्यकत्वात् भा३इंद्रं भो यिंद्रं भो ३ इइह भो ३ यिह भोषाद्ह्रस्वर्णव्यत्ययेन छांदसः प्लुतः इकारोनिपातः तस्यनि

पातनपकाजिति प्रगृह्यत्वात्प्रकृतिभावप्राप्तौवार्त्तिकेनयणविधानात् नत्वत्रतयोर्भावितस्यप्रवृत्तिः तस्यपर्वोऽप्रग

त्वस्येतिसूत्रेणविहितोप्लुतसहितोयोइउतौतन्मात्रविषयकत्वात् नचैवंव्यापकत्वादिदमेवास्त्वितिवाच्यंउदात्त

स्वरितयोर्यणइतितत्परस्यानुदात्तस्यस्वरितत्वापत्तेः तत्रह्यारंभेतुयणादेशस्यतत्स्वरेकर्त्तव्येऽसिद्धत्वात् तद

सि॰
प्र॰
२॰

20

प्रहृते । अत्र भाष्यं छंदसि सर्वविधीनां वैकल्पिकत्वात्प्रकृतिभावमवगणी दीर्घयोरप्रहृष्टमेव यणा सिद्धिः नच भो ३ यिंदेति सामगा
यति भो ३ दिंदेति सामगा गायतीति लोके कथमिति वाच्यं अस्यापि छांदसानुकरणस्य साम्नो नामधेयत्वेन प्रसिद्धेः गीतिरहि
तस्य तु प्रमाद्यानुकरणान्नगीतिविभ्रमपदेतत् ॥ एचोऽयवायावः ॥ अचिपरेऽय् अव् आय् आव् एते क्रमात्स्युः चयनं चाय
कः लवनं लावकः यवयोर्लोपस्तु नोच्चारणसामर्थ्यात् तेनेत्यं ज्ञापितमप्रयोजनाभावात् अन्यथा ङ्यीस्यादिति निर्देशानुप
पत्तेः ॥ वान्तो यि प्रत्यये ॥ यकारादौ प्रत्यये परे ओदौतोरवावौ स्तः गव्यं नाव्यं गोपयसोर्यदिति नौवयोधर्मे ॥ इत्यादिना यत्
ननु पूर्ववत्र यथासंख्यसंबंधात्स्थानिविशेषलाभोऽत्र तु तदभावादेज्मात्रस्य वान्तादेशप्रसंग इति ओदौतोरिति वक्तव्य
मिति चेन्न वान्त इत्यस्यापि परिमाणात् एचोऽचीत्यतो यादयः स्युरित्यर्थः नच चेयं जेयमित्यादावतिप्रसंगः क्षय्यज
य्यावित्यस्य नियमार्थत्वात् अनयोरेवैचोर्वान्तादेश इत्यर्थः न चानयोरन्यार्थेऽपि तदापत्तिः योगविभागेन शक्यार्थ एवा
नयोर्वान्तादेश इति नियमोपगमात् नच लव्यमवश्यपलाव्यमित्यादावपि तदनापत्तिः नियमस्य तत्तुल्यजातीयपरतया
एकारमात्रविषयकत्वात् नन्वेवमपि राय्यमिच्छतीति रैयतीत्यत्रातिप्रसंगः इति चेदत्र भाष्यं रायिछांदस इति एवं च भा
ष्ययोरैशाद्गप्रयोगोऽसाधुरिति केचित् कात्यायनपरवैशाहृस्तयेत्यन्ये ॥ गोर्यूतौ छंदस्युपसंख्यानं आ नो मित्रावरुणा[illegible]तै
र्गव्यूतिमुक्षतं भाष्यादौ गोर्यूतिः ऊतियूतीत्यादिना निपातितं प्रातिपदिकमेतत् अध्वपरिमाणे चेति वक्तव्यं गव्यूतिः स्त्री
क्रोशयुगमित्यमरः ननु अत्र हलि सर्वेषामिति वलोपः स्यादिति चेत् अत्राहुः वान्त इत्यत्र वकारात् छंदसीत्यत्र छकाराद्वा
पूर्वं लोपो व्योरिति लोपेन वकारप्रश्लेषात् अपमाणवकारान्त आदेश इति व्याख्येयं वकारलोपनिषेधस्य पर्यवसाना
त् ॥ धातोस्तन्निमित्तस्यैव ॥ नियमार्थोऽयमारंभः धातोरेव चेद्वान्तादेशस्तर्हि यादिप्रत्ययनिमित्तकस्यैव नान्यस्य लव्यं अ
वश्यलाव्यः यप्रत्ययनिमित्तको गुणः एतत्प्रत्ययनिमित्तिका वृद्धिः तदिति किं ओयते औयत आङ्गणास्याटश्चेति वृद्धे

प्र॰

दू

२॰

यप्रत्ययनिमित्तकत्वाभावः एवकारद्वयनियमार्थः अन्यथा तन्निमित्तस्यैवैकादेशस्तर्हि यातेरेवेति नियमे शंक्यं
तारुपि चयः कार्यो सहत्यादौ न स्यात् ॥ क्षय्यजय्यौ शक्यार्थे ॥ क्षेतेर्जेश्च वा शक्यार्थे क्षय्यं जय्यं शक्यार्थे किं क्षेयं जेयं तद
हमित्यर्थः ॥ क्रय्यस्तदर्थे ॥ ननु तत्पदेन प्रत्ययार्थपरामर्शः र्थपदेन च कर्म धार्यते क्रय्यशब्दस्य स्वार्थिकत्वनियमा
त्तदर्थ इत्यर्थे अयमेवार्थो यस्मात्तेन तदर्थः शब्दः तदा क्रय्यशब्दस्य क्रय्यशब्दवाविवात् तदानर्थक्यमिति चेन्न प्रत्यान
स्यापि प्रकृत्यर्थस्य विक्रिमयात्मकस्य परामर्शात् तस्मै क्रयाय यद्यापणे गवादिव्यवस्थापितं तत्रायं निपातः नेह क्रे-
यं तोयान्यं न चास्ति क्रय्यं मूल्येनोपादानत्वं तत्वापणे विक्रयाय प्रसारितमित्यर्थः केचित्तु क्रय्यमिति विक्रयेति पातः तेना
पणे विक्रयार्थं प्रसारितं द्रव्यं क्रय्यमित्याहुः ॥ भय्यप्रवय्ये च च्छन्दसि ॥ बिभेतेः प्रपूर्वाद्वेतेश्च यति यान्तादेशनिपातो यं भय्यः
किलासीत् प्रवय्येति स्त्रियामेव वत्सरी प्रवय्या । हृदय्या उपसंख्यानं । हृदे भवा इति भवे छन्दसीति यत् अनेनायं कार
स्यायादेशः हृदय्या आपः अवश्रयस्य चेति वक्तव्यं शरहृदयोः यतो वान्तादेशश्चेत्यर्थः हृदय्या आपः शरव्यस्य पशूनभि
वानकः स्यात् । शरहव्या हा सिद्ध । हुज नीश रु रितिवदेशरु हलवदिति लोके च शरुशब्दोपि शरपर्यायः सुस्व ही
स्वोणादिक उप्रत्ययः तस्माद्यत् गोर्गणः वान्तादेशश्चेति तात्पर्यं ॥ इति श्रीसिद्धान्तकौमुदीव्याख्यायां प्रथमे पादे तृतीय
माह्निकम् ॥ श्रीः ॥ एकः पूर्वपरयोः ॥ अधिकारोयं वक्ष्यमाणश्चादेशः पूर्वपरोभयस्थानिक एक एव स्यात् स्थानिभेदे
नादेशभेदवारणार्थमारंभः अत्रैकग्रहणमर्थं स्थानितावच्छेदकावच्छिन्नादेशेन आदेशतावच्छेदकावच्छिन्नो विधीय
त इति हि आदेशवाक्यार्थः स्थानित्वं च स्थानितावच्छेदकपर्याप्त्याश्रयत्वं स्थानितावच्छेदकं चात्र हद्वान्तरं स्थानषष्ठी
निर्देशादुभयत्वमिति तदुभयत्वावच्छिन्नस्य स्थानित्वान्न तत्स्थानिभेदः न चोभयत्वस्य समवायेन प्रत्येकवृत्तित्वात् स्था
निभेद इति वाच्यं तस्य पर्याप्त्यैवान्वयसम्बन्धत्वस्वीकारात् प्रत्येकस्य च पर्याप्त्यनाश्रयत्वात् नत्वग्रहणं सम्माष्टीति वदन्तु

वाच्यविशेषणस्याः विवक्षितत्वादुभयत्वं न स्थानितावच्छेदकं किंतु पूर्वत्वं परत्वं च तत्तत्प्रत्येकपर्याप्तमेवेति चेन्न सम्बन्धेन
स्थानिनिर्देशस्थलेऽभयत्वस्यैव स्थानितावच्छेदकत्वस्वीकारात् अन्यथा ज्वरत्वरश्रिव्यविमवामुपधायाश्च अह्नोरोपध
योरमन्यतरस्यामित्यादौ स्थानिभेदेनादेशभेदापत्तेः नचाद्येऽजदोः सवर्णदीर्घस्य द्वितीये च अह्नोरोपधयोर्लोपश्चागमो
रम्विधीयत इत्यस्वीकारान्न दोष इति वाच्यं वाक्यभेदकल्पनप्रसंगात् आद्ये यानकस्येङ्गलादेरित्यादौ अनुवाच्यविशेष
णस्यापि वलादित्वादेर्विवक्षितत्वाच्च ननु स्थानिभेदनिबन्धनादेशभेदवारणार्थमेकग्रहणमास्तु तत्किं तस्यानेकोऽप्यादे
शभेदवारणार्थमेवास्तु । रदाभ्यां निष्ठातो नः । पूर्वस्य च द इत्यत्र नकारस्य विधेयत्वेऽपि तत्र नैकत्वस्य विवक्षितत्वात्तृण
इत्येकत्वस्य विवक्षितत्वमशक्यत्वात् मैवं अत्र एकत्वविवक्षायां बाधकाभावात् तत्र तत्स्थानितावच्छेदकयोस्तत्त्वदत्त्वेया
रपि करणाकारसान्तपयमापत्त्येकमेव स्थानित्वात् उद्देशभेदेन वाक्यभेदांगीकारेण भिन्न इत्यादौ नकारद्वयसिद्धेः अन्यथा
दकारेण नरमेव आदेशनिर्देशापत्त्या मध्ये तन्निर्देशस्यासंगतत्वापत्तेः अत एवोपेयिवाननाश्वानित्यादावुपेत्यविवक्षि
तेन नाऽदिकं तद्विवक्षितमेवेति स्वीकारः ननु भोभ्यामस्येत्यत्र स्थानिभेदात्कथमादेशभेद इति चेन्मैवं तत्रोपसर्गो
न रस्य न स्थाः इति निरित्यनेन णत्वसिद्धौ भ्यामस्येत्येतावतैव नकारद्वयरूपस्थानिनिर्देशसंपत्त्या उभाविन्यस्यादे
शनिर्देशपरत्वांगीकारात् भ्यामस्थानिने भोऽणकारावादेशौ भवत इत्युभयत्वस्यादेशविशेषणत्वस्यैवांगीकारात्
तस्माद्बाधकाभावे विधेयसंख्याया विवक्षितत्वान्नातिप्रसंगः नदविवक्षास्थले तल्लक्ष्यानुसारो नियामक इत्येकग्रह
णप्रत्याख्यानं स्यादेतत् पूर्वपरयोरित्यपि मास्तु नवाऽवर्णात् द्विपरे एणः स्यादित्यत्र स्थानिनो नभियाना नहामा
ष्यमिदमिति वाच्यं आदिति पंचम्याश्च वीतिसप्तम्यास्तथा चादिति पंचम्याः तस्मादित्युत्तरस्य तस्मिन्निति निर्दिष्टे पूर्वस्ये
निवचनाभ्यां षष्ठीत्वकल्पनात् द्वयोः स्थानित्वसिद्धेः मैवं द्वयोः प्रयोगापत्त्यकल्पकत्वेनास्तीतिज्ञापनार्थत्वात् तेन स

ममीपंचम्योरुभावाद्भयत्र षष्ठी प्रकल्पितेत्युभयकार्यप्रसंग इति दोषो निरस्तः आने मुक् ईदास इत्यादौ आसः परस्य
आने परे ईत्वविधानेऽकृते माहयोः षष्ठी प्रकल्पकत्वे सकाराकारयोरीत्वप्रसंग इति तस्यार्थः स्पष्टं चेदं तस्मादित्युत्तरस्ये
ति सूत्रे ॥ अन्तादिवच्च ॥ उभयैकादेशः पूर्वस्यान्तवत् परस्यादिवत्स्यात् पूर्वपरयोरपि कार्यतोलाभात् ननु तत्र पू
र्वपरत्वं स्थानिनिर्दिष्टं कृतेन तत्र्येति चेन्मैवं एकादेशानन्तरयोः पूर्वपरयोस्तयोरप्यत्रग्रहणात् क्वचिन्मेकादेशात्प्रागेव यौ
पूर्वपरौ तयोरुपादानं यथाहस्ताविमपत्र तत्र स्वपमोकारं प्रत्येकदेशस्यादिवद्भावाभावेन तत्त्वेन पदसंज्ञाप्रवृत्तेः नव
स्थानिवद्भावेन निस्तारः स्थानित्वस्य समुदाये पर्याप्त्या प्रत्येकस्य तदभावात् न चैवं वृक्षेष्वपि इत्यादौ अकारस्थानिकत्वा
भावादपदत्वानुपपत्तिः तत्र वर्णागमस्य स्थानित्वाश्रयत्वमात्रेणान्यतरतो व्यपदेशप्रवृत्तेः स्थानिवद्भावेनैव तद्रूपेण
स्थानीनिर्दिष्टस्वरूपावच्छिन्नस्थानित्वपर्याप्तमेवातिदेशात् नन्वेवं हरिस्यादौ नेकारस्य ग्यौगीकारादावानुमानिकस्याप्यादे
शस्य ग्रहणमिति चेन्मैवं अन्तादिवद्वचनसामर्थ्यस्यादेशवचनादिप्रवार्तिके प्रौढिमात्रेण तत्रादेशपदमानुमानि
कस्याप्यादेशस्य संग्रहार्थमित्युक्तत्वात् किंत्वनल्विधावेव स्थानिवद्भावविधानादल्विध्यर्थमेतदारंभः तस्य चः परस्मिन्निय
माऽप्रवृत्तिः एकादेशस्य पूर्वपरोभयस्थानिकत्वेन परनिमित्तत्वाभावात् तेन ह्रीरये णोऽप्यत्र पकाज्जव्यपदेश इति ण
त्वं प्रातिलिपिरपि अन्तवद्भावाद्भवतीति न दोषः युगपत्पूर्वान्तत्व परादित्वयोर्न प्रवृत्तिः तेन परीयादिमादौ पतेर्लिङि
ति ऋस्यान उपसर्गान्तरत्वाभावात् तदर्थं उभयत्राश्रयेणान्तादिवदिति लौकिकपवार्थन्यायः एकस्य युगपद्विरु
द्धोभयावयवत्वानुपपत्तेः पूर्वान्तत्वपरादित्वयोर्विरोधात् अथान्तवद्भावप्रयोजनानि द्वादशान्यानिकर्मीण्यध्ययने
स्वहनानिश्वतिद्वादशान्तिकः तद्धितार्थविवक्षायां समासः वृक्षाच्च पूर्वपरादितिटच् एकादेशस्य पूर्वान्तत्वेनाश्रयणा
त् पूर्वपदस्य वृक्षत्वं न च वचनसामर्थ्यं अन्तवद्भावव्यतिरेकेणैव वृक्षाच्च पूर्वपदे त्रयोदशान्तिक इत्यादौ चरितार्थत्वा

त् प्रत्ययैकादेशः पूर्वविधौ पिवतीत्यत्र पाधातोर्ङस्यान्तादेशो शपो ऽकारेण सह पररूपे वांतरंगत्वात् प्रवृत्ते तस्य शपं प्रत्यन्तवद्भा
वात्पिवादेशः अन्यथा शानः परत्वाभावान्न स्यात् पिवतीत्यादौ चरितार्थत्वात् इदं च वाणिदांगमित्यनाश्रित्योक्तं उत्तरपदविभ
क्त्योरेकादेश उत्तरपदस्य ह्रीरपेण सहरूपेण अंतवद्भावेनोत्तरपदस्यैकाच्त्वात् मत्वं अन्यथा ह्रीरपाणामित्यादौ चरितार्थत्वात्
अदस ईत्वोत्वे अमीअत्रअमूआसाते अदसस्य दाद्यत्वमुत्वोगुणो इति पररूपे जसः शी आद्गुणः अदे इति स्थिते एत ईद्बहुवचने इ
तीत्वमनेआदिः अदौ इति स्थिते ऊत्वमत्वे अदस इति पंचम्या आनंतर्येण द्वाबाश्चीकारेण अमीभिरमूभ्यामित्यादावेकादे
शाभावस्थले चरितार्थत्वात् स्वरितत्वे कार्यी हार्यी यत्स्वत्ययदापोरेकादेशस्य यन्तं प्रत्यन्तवद्भावान्नित्स्वरितमित्यस्य प्रवृत्तिः
अन्यथा कार्यो हार्य इत्यादौ चरितार्थत्वात् कार्यआ इति विभज्यान्वाख्याने चेदं स्वार्थमभिधायेति क्रमस्वीकारे लब्धसंस्कारा
त्स्वरितोनादेव कार्यशाह्हा हा ब्रुत्पत्तेः न च परत्वात्स्वरितत्वं एकादेशस्य कृताकृतप्रसंगित्वेन नित्यत्वात् स्वरितस्यैवैकादेशो
त्तरमनवकाशत्वेन प्राप्त्यभावात् न च स्वरभेदेन शब्दभेदादेकादेशोऽपि शब्दांतरप्राप्तेरनित्य इति वाच्यं तथाप्येकादेशस्य व
र्णाश्रयतयांतरंगत्वात् स्वरितस्य च पदापेक्षतया बहिरंगत्वात् वस्तुतः स्वरितत्वमप्यंतरंगं पदग्रहणं परिमाणार्थमि
त्युक्तत्वात् तथा च परत्वस्यापि कार्यास्यागेव स्वरितत्वं लिंगविशिष्टग्रहणाद्वा तित्स्वरितमित्यत्र प्रत्ययग्रहणस्य वक्ष्यमाण
त्वात्प्रत्ययग्रहणे च प्रकृतिप्रत्ययसमुदायस्य ग्रहणात्तस्य च प्रातिपदिकत्वाद्भवति प्रातिपदिकग्रहणे लिंगविशिष्टस्या
पीति परिभाषाप्रवृत्तिः न चेयं स्वरूपविधिमात्रविषयिकेति वाच्यं यथाकथंचित्प्रातिपदिकग्रहणपरायाः प्रवृत्तिरिति
स्त्राप्रवृत्तेरुक्तत्वात् पूर्वपदान्तोदात्तत्वं च गडोदकं मथितोदकमित्यत्र पूर्वोत्तरपदयोरेकादेशस्य पूर्वं प्रत्यन्तवद्भावात् उद
के केवल इति पूर्वपदान्तोदात्तत्वं न चोभयत आश्रये कथमंतवद्भावः परादिवत्वेनैवोदकशब्दस्य परत्वोपपत्तेरिति वाच्यं
एकदेशविकृतन्यायेनोदकशब्देनोदकशब्दस्याप्युपादानात् पूर्वपदान्तवद्भावस्यैवात्रोपयुक्ततया परादिवद्भावस्यान

पेक्षतयाऽभ्येयतयाश्रयभावात् वस्तुतस्तु उदश्वित्कुदकमित्यत्र पूर्वपदान्तोदात्तत्वस्य दंडाग्रमित्यादौ सावकाशत्वात् शुद्धोदक
मित्यादौ परत्वात्पूर्वपदान्तोदात्तत्वे एकादेशोत्तरं अंतवद्भावेन पूर्वपदान्तोदात्तत्वस्वीकारे ओकारस्योदात्तत्वसिद्धावपि स्वरि
तत्वासिद्धेः पूर्वमन्तोदात्तत्वप्रवृत्तौ तु शेषनिघातेन उकारस्यानुदात्तत्वे स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितसिद्धेः कृदंत
प्रकृतिस्वरत्वं प्राशितां प्राटिनेत्यत्र कृदंतगत्योरेकादेशस्य गतिं प्रत्यंतवद्भावाद्गतिकारकोपपदात्कृदिति गतेः परस्योत्तर
पदस्य कृदंतस्य प्रकृतिस्वरत्वं अन्यथा पौर्वापर्याभावान्न स्यात् प्रकारकदुत्पादौ च विनार्थित्वात् तज्जन्नबोधः इति तन्नि
व्याप्तादौ च निर्विकृतितां विना पूर्वपदप्रकृतिस्वरापत्तेः वस्तुतस्तु एकादेशात्पूर्वमेवोक्तस्वरप्रवृत्तिः परत्वात् अन्यथा उभ
यतआश्रयत्वात्कृदंतस्योत्तरपदत्वानुपपत्त्या तदसिद्धेः नचैकदेशविकृतन्यायेन कृदंतस्य परत्वं गतेः स्वंतवद्भावेन पूर्वत्वा
मिति वाच्यं प्राश्नानमित्यादौ अशनशब्दस्य लित्स्वरेणाद्युदात्तत्वादेकादेशस्य पूर्वं प्रत्यंतवद्भावे लित्प्रत्ययात्पूर्वमुदात्तभावि
नः प्रकृतिभागस्याभावादुत्तरपदप्रकृतिस्वरानुपपत्तेः उत्तरपदवृद्धिरेकादेशाद्विप्रतिषेधेन उत्तरपदवृद्धेरवकाशः पू
र्वकामशमिकः यत्तु भाष्ये पूर्वत्रैगर्तक इत्युक्तं तच्च करणमात्राभिप्रायं तत्र दिशोऽमद्राणामिति वृद्धेः पूर्वेषुकामशम
इत्यत्र एकादेशस्य तयोः समं विप्रतिषेधो भेरसंगतत्वापत्तेः इषुकामशमीत्यस्य ग्रामवाचितया जनपदवाचकत्वाभावा
त् प्राचां ग्रामनगराणामिति वृद्धिरेव प्रवृत्तेः पूर्वस्यामिषुकामशम्यां भव इति तद्धितविवक्षायां तद्धितार्थेति समासः तत्र
भव इत्यण् पूर्वमुत्तरपदवृद्धिः तत एकादेशः वैपरीत्ये ग्रामवाचकस्य इषुकामशमीशब्दस्य दिग्वाचकपूर्वशब्दात्परत्वा
भावाद्वृद्ध्यनुपपत्तेः न तु वर्णमात्राश्रयस्यैकादेशस्यांतरंगतया तस्य च परादपि बलीयस्त्वात्कथं विप्रतिषेधः न चाद्येकादे
शः अंतादिवद्भावेन वृद्धिसंभवादिति वाच्यं दिक्शब्दे प्रत्यंतवद्भावेन तस्मात्परत्वस्य आदिवद्भावेनोत्तरपदादित्वस्य च युगप
दनुपपत्तेः उभयतआश्रयेऽन्तादिवद्भावानंगीकारात् सत्यं नेंद्रस्य परस्येति प्रतिषेधेन वृद्धेर्बलवत्त्वस्य ज्ञाप्यत्वात् अन्यथे

सि॰
घ॰
२३

23

कादेशयस्येतिलोपाभ्यांहयोरथ्यवोर्निहत्रोहइरेवप्रसक्त्यभावात् आदिवत्त्वेप्रयोजनंप्रगृह्यसंज्ञायां आग्नीअत्रवाप्रसत्र अथ
मयोरितिसवर्णवीसवर्णदीर्घः तस्यविभक्तिप्रत्ययादिवद्भावादीदूदेद्द्विवचनमितिप्रगृह्यसंज्ञा अन्यथाद्विवचनतद्भिन्नेमया
देशान्तात् द्विवचनत्वंनस्यात् नचसामर्थ्यं अग्नीइत्यादौचरितार्थत्वात् हरिभिःविधिप्रहरीतिहरितिइत्यत्रसवर्णपो
रेकादेशस्यसुप्प्रत्ययादिवद्भावः पचेयजेइत्यत्रतिङ् तिङ्रेकादेशस्यतिङ् प्रतीत्युभयत्रसमिङ्तमितिपदसंज्ञा अन्यथा
हन्तःपचतीत्यादौसावकाशत्वान्नस्यात् खट्वामालेत्यादावावनापोरेकादेशस्याप्प्रत्ययादिवत्त्वात्तदन्तत्वप्रयुक्तः हलो
पः तस्यकृत्वाअस्मिहेत्यादौहलंतप्रकृतिकेटापिचरितार्थत्वात् अतःपरंवाक्यसंस्कारपक्षाश्रयेणप्रयोजनद्वयं आङ्
ग्रहणोपरविधौ अघाहते कदाहतेइत्यत्रआङ्नाऊरेकादेशस्याङ्प्रत्ययादिवद्भावादाङोयमहनइत्यात्मनेपदं आहतेइ
त्यत्रचरितार्थत्वात् आटश्चवृद्धिविधौ ऐक्षिष्टेत्यादावेकादेशस्याट्प्रत्ययादिवद्भावादाटश्चेतिवृद्धिः ऐक्षिष्टेत्यादौच
रितार्थत्वान्नकृदंतप्रातिपदिकत्वेच धारयःपारयःअत्रउपसर्गाल्लिंपविंदेतिशःकर्तरिशप् तयोरतोगुणेइतिपररूपं
तस्यशप्प्रत्ययादिवद्भावेनधारयादेःकृदंतत्वात्प्रातिपदिकत्वे अन्यथाकृत्तद्धितेत्यस्यकारकइत्यादौचरितार्थत्वात् अभ्या
सेह्रस्वार्थंनदीनद्युपसर्जनानांह्रस्वत्वेतदादिवद्भावप्रतिषेधोवक्तव्यः उपेयाज उपोवास उपेइयाजइत्यादौस्थि
नेगुणस्यपरप्रत्ययादिवद्भावेनह्रस्वइत्यभ्यासह्रस्वःस्यात् प्रोत्तनइत्यत्रउपसर्गोह्रस्वऋहतेरितिस्यात् अणग्रहणात्तु
ह्रस्वाउभयत्राश्रयत्वाद्धप्रसंगाभावेपितदनाश्रित्येदमुक्तं अंबाऽत्रअंबार्थनद्योरितिसंबुद्धिह्रस्वः ततःसवर्णदीर्घः त
स्यपूर्वंप्रत्ययवद्भावात्तुनह्रस्वःस्यात् एवंकुमारीदेइत्यत्रापियोज्यं आग्राआग्रसीदेइत्यत्रनपुंसकह्रस्वोत्तरं निःकौशांबी
इत्यत्रगोपसर्जनह्रस्वोत्तरं सवर्णदीर्घःतस्यपूर्वंप्रत्ययादिवद्भावात्तुनतदुभयंस्यात् वस्तुतस्तुगौरवसिद्धंवहिरंगमंतरं
गइत्येवसिद्धं ह्रस्वस्यांतरंगत्वात् उक्तविधीनांचवहिरंगत्वात् वर्णाश्रयेचविधौनेतादिवद्भावप्रतिषेधोवक्तव्यः

अस्य पावहाभिरित्यादौ एकादेशस्य पूर्वं अन्तवद्भावादतो भिस ऐस स्यात् नपरस्यादिवत्त्वस्य कीलालपाभिः अमेणाभिरित्यादिव्याप्त
भावविनाशित्वात् न हाविमन्वहृयते लिटि णलि अभ्यासस्य चेति संप्रसारणे संप्रसारणाच्चेति पूर्वरूपेण स्याकारं अन्त्यादिवद्भा
वाद्धातेतत्त्वसत्त्वादातऔणलः स्यौत्वं स्यात् अस्या अभ्यस्यत्वञ्च इदमस्य राद्यन्तवत्परत्वूपं टाप् सर्वनाम्न इति स्याडागमश्च स्यौ हृदिवे
वीति हृडिः हलि लोपः इमीदो लोपः एवश्मायादेशः लोपः शाकल्यस्येति यलोपः तत्र हृहडेः अस्य अप्रस्थस्य पत्त्वस्यायां हृहडेः प
रादिवद्भावादेङः सत्त्वादेङ पदान्तादिति पूर्वरूपं स्यात् न वाहुल्यातिदेशात् उक्तप्रतिषेधप्रसाव्यानं कार्यातिदेशायं नतु
रूपातिदेशः वर्णस्वरूपविशेषाश्रया ये ते विषयो नातिदिश्यन्ते अत्र वन्नकासिद्धत्ववचनं लिंगं असवर्णाश्रयविध्यतिदे
शत्वे अर्थी ये मारा वेकादेशस्य ङस्वप्रत्यादिवद्भावादेवत्तकः सिद्धान्तहेयणिप्रसंगात् ॥ षत्वतुकोरसिद्धः ॥ एकादेशउ
भयत्राऽसिद्धः स्यात् कोसिंचत् कोऽस्येमारो इणः परत्वादादेशप्रत्यययोरिति षत्वं स्यात् अधीत्येमादौ ङ्खस्याभावात् ङ्खस्
स्यापि तिकृतीति तुक् न स्यात् असिद्धत्वे तु इणः परत्वाभावान्न षत्वं ङ्खस्वाच्च न तुक् स्यादेतत् एकादेशस्याऽसिद्धत्त्वयाप्य
त्ववारणेपि तदसिध्यति नहि कार्यस्याऽसिद्धत्वे तस्यानिरूपप्रतापन्निर्भवति आदेशानां स्थानिनो निवर्तितत्वात् नहि
देवदत्तस्य हन्तरि हते देवदत्तस्य पुनरुद्भावः तथा च तुकि स्थानिवदिति कार्यातिदेशाएव विषयः तत्र षत्वेपि स्थानि
वदितीवाच्यं वेधस्येपीक्षाभावादिति वाच्यं अतिदेशस्य स्थान्याश्रयकार्याऽनिवर्तकत्वात् यथात्र तत्नि[illegible]न्यासिद्धेः सेवं पुणस्याप्ति
ङत्वे दोषाभावात् पूर्वं तु कृशास्य स्यपश्चादेकादेशास्यापृहत्नेः एतदन्तारंभेनत्तकः पत्वेपि एकादशस्येवान्तरंगा
भावादापतेः संप्रसारणङीण् इत्यसिद्धोवक्तव्यः संप्रसारणेऽङ्गुटि च षत्वतुकोरेकादेशानासिद्धइत्यर्थः शकान् हूयं नीति
किप् संप्रसारणं आकारस्य पूर्वरूपं हलइति दीर्घः तत्र पूर्वरूपस्याऽसिद्धत्वे शाकहूश्शब्दस्य त्रषत्वं न स्यात् हृते ह्यत्रापि
त्रणस्यासिद्धत्वात् छेचेति ह्रस्वाश्रयो नित्यस्तुक् स्यात् पदान्ताद्वेति वैकल्पिकस्ते वक्ष्यमाणत्वात् एवं अपवेक्षत्रापि

घ

यत्रयोऽन्त्यं उत्तमपुरुषैकवचनस्य इटः शपा सह गुणादेशस्यासिद्धत्वात् नन्वपदान्तपदाद्योरेकादेशस्याऽसिद्धत्वे उक्तस्थलेत्वन
तथेति प्रसक्त्यभावान्निषेधवैयर्थ्यं नचोक्तवचनस्योक्तनियेयस्य वारंभे विनिगमकाभावः वाचनिकत्वस्योभयत्रापि तुल्यत्वादिति
वाच्यं उक्तसूत्रे पदस्येत्यन्तर्वार्तिकस्याभिधानात् अन्तादिपदयोश्च पूर्वसूत्रादनुवृत्त्या यथोक्तार्थसिद्धेः निषेधारंभेणो रूवस्य स्पष्ट
त्वात् नन्वेवं जोषिषीष्ठ पिबन्त्यत्र पृषमयोर्द्वित्वैकादेशस्याऽसिद्धत्वादिणः षइति वचनात् समस्य षत्वे स्यात् नचतत्केऽप्येवपदां
तपदाद्योरेकादेशोऽसिद्धः षत्वे त्वेकादेशमात्रमिति वाच्यं शाकहृषिम्यत्र षत्वानापत्तेः मैवं ककाद्रिग्राग्रहणादणुत्रशाहृपाठेन
एकादेशनिमित्तात्षत्वं न भवतीति ज्ञापितत्वात् अत्र पायाइइडपयस्येवासिद्धेः नचैवं शाकहृषिम्यत्र षत्वासिद्धितादवस्थ्या
ज्ञापकस्य तत्स्वजातीयविषयकतया कुषोः पदान्तत्वेन नैव प्रहतेः अस्त्येवं वेञः क्विपि ऊडिति रूपं न स्यात् संप्रसारणे
आकारस्य पूर्वरूपे च प्रथमैकवचने सोः परेऽपदसंज्ञास्वीकारात् उकारः पदादिराकारश्च पदान्तः तयोरेकादेशस्यासिद्ध
त्वात् ततो ह्रस्वान्तत्वाभावान्न कोडुलें भवत्यत्र मैवं यथालक्षणमप्रयुक्ते इति नुगभावेऽप्यापत्तेः यद्वा परस्य पदादेः पूर्व
स्य पदान्तस्यैकादेशोऽसिद्ध इत्यर्थः पूर्वपरयोरित्यस्याप्यनुवृत्तिस्वीकारात् पूर्वस्य पदस्य यश्चादिः परस्य पदस्य यश्चादिः त
योरेकादेश इति पर्यवसानात् अत्र तु आकारोकारयोः पदादित्वपदान्तत्वयोरभावान्नासिद्धत्वमिति न कः सुरूपत्वात् स्यादे
तत् सूत्रमेवेदमास्तु असिद्धं बहिरंगमित्यनेन गतार्थत्वात् एकादेशस्य पदद्वयाश्रयतया बहिरंगत्वात् मैवं राजानं त
यैवहि षुष्प्रक्षु इति ज्ञाप्यत्वात् तेनान्तर्यमत्र ऊठोऽसिद्धत्वाभावाद्यणादेशः तत्राश्रयानन्तर्यस्योपदर्शनीयत्वात् एत
न्त्वेवाति रूपेऽन्तमचः परस्मिन्निति सूत्रे ॥ आद्गुणः ॥ अवर्णान्तादचि पूर्वपरयोरेकोऽन्तरतमो गुणादेशः स्यात् खट्वेन्द्रः मालो
दकं खट्वर्षः उपल्कारः उरणरपर इति ऋकारलृकारयोरलावादेशौ अत्र वार्तिके आदेकश्च गुणः केन स्थानेनान्तरतमो हि
सः पदैनाने विना कुतोऽकारो नोभयान्तरः अकारो न तियातो सः श्वनत्र विषयेऽस्तु ततः आनर्थात् त्रिचतुर्मात्रत्वात् पर

वान्तेस्मिन्नाः अयमर्थः आदित्यैवसत्र मस्तु नवैवेगुणलाभः कथमिति वाच्यं एवैपरयोः केयतालव्ययोस्तथाविषयो
रैवैदैतोरंतरतमत्वात् नचैदैतोरपिनाटशान्यायापत्तिः हृद्धिरेवीतिनियमात् यथैवहृद्धिरितितदर्थः नचैवमेचिपरे
एदैतोरण्यनेनापत्तिः वृद्धिरेवैवीतिनियमस्याप्यभ्युपगमात् नचतथापि ऋकारस्य ऋकार आदेशः स्यादिति वाच्यं अत्य
न्तरान्तर्यैपि उभयोस्तथोभावात् आकारस्यतत्र हृत्तिवेलायामेवरपरत्वविधानादरिन्सोभयान्तरतमत्वात् नचआकार
स्यादितिवाच्यं उपसर्गाद्गृतिधातावित्यस्याकरीत्यानियमार्थत्वात् नचप्लुतः स्यादिति वाच्यं तथासतिहियत्राविषये
प्लुतोविहितस्तत्राप्यनेनैवभाव्यं अस्मिन्कर्तव्ये आहमिकस्यप्लुतस्यासिद्धत्वात् नत्रपात्तिकानवादप्रसंगात् नैवं प्लु
ताप्लुतयोस्त्र अपवप्लुतस्यविषये स्थित इति न्यायग्रहणात् प्लुतमात्रप्रसंगेनदभावात् एदैपरयोर्हिमात्रत्वेचतमात्रैव
चानाटशादेवयदैतोस्ततो नचगुणग्रहणेपितदोषतादवस्थ्यं तत्रापिसंज्ञायांतात्परत्वेन द्विमात्रयोरेवएदैतोर्गु
णसंज्ञाविधानात् इति ॥ ओड. सूत्रेअपंचितत्वात् गुणोडि. शीरास्वपसंख्याने अत्यपाहदेइंडरस्वत्रहदन्तइंद्रदमिति
स्थितेगुणसवर्णदीर्घयोः प्रसंगेशाहपरविप्रतिषेधेनसवर्णदीर्घप्रसंगात् एवंयरइंद्रस्यपदरइंद्रइत्यत्रापियोज्यम
वकृतलक्षणसिद्धंवाहिरंगमितिवसिद्धं गुणस्यैकपदाश्रयत्वेनांतरंगत्वात् सवर्णदीर्घस्यपदद्वयाश्रयत्वेनवहिरंग
त्वात् ॥ हृद्धिरेचि ॥ अकाराद्देचिपरे एवैपरयोर्हृद्धिः स्यात् खट्वैलका खट्वौदनः श्लापिएवैवव्याख्येयं ॥ यतेयत्स्वदृस ॥
अकारादेप्परे अहृद्धिः स्यात् उपैति उपैधते प्रष्ठोहः आह्वाद्वेयपरहृपस्यश्रेय्येवगुणस्यप्रसंगेतदपवादोयं स्पपाति
देशापत्येयस्योनेतवतिडं तानकरणं यथतेरात्मनेपादित्वादेयतीतितिपत्तुपपत्तेः नन्वेवमुपेतइत्यादावपिहृद्धिः स्यात्
मैवमुपवीत्यन्तहत्स्यायस्मिन्विधिस्तदादावितिपरिभाषितत्वादेजादित्वेनविशेषणत्वात् नन्वेवमुटापितेनविशेषणा
पत्तिः ईंहनिर्देशेनहहिभीवस्यकर्तमशक्यत्वादिष्टापत्तेस्संभवेनउर्वचनात्स्यात्यं एत्येधत्यूठ्सु रितियोगविभागादे

सि॰ व॰ २५

25

जादित्वेन तयोरेव विशेषणीयत्वात् नन्वेयतावप्युक्तविशेषणं व्यर्थं व्यभिचाराभावादिति चेन्मैवं माभवान्प्रेदिधदित्यत्र व्यभि
चारात् द्विःप्रयोगो द्विर्वचनमिति सिद्धांतात् न चांतरंगत्वाच्चङीति यिशाह्वस्याद्वित्वे एकारस्याऽनुपपत्त्या कथं तस्य ह्रस्व इति वा
च्यं ओतोर्श्वदित्वेन बहिरंगस्याप्युपधाह्रस्वस्य प्रथमं प्रवृत्तिरिति ज्ञापितत्वात् द्वित्वस्य प्राथमिकत्वे ओकारस्योपधात्वाभावाद
ह्रस्वप्रसक्त्यभावेनाग्लोपिशास्वृदितामिति उपधाह्रस्वनिषेधार्थस्य ऋदित्त्वस्य वैयर्थ्यापत्तेः यत्तु माधवेनोक्तं ण्पेतस्य श-
ब्दांतरत्वादेयतीति ग्रहणेन ग्रहणं नास्ति अत एव न माम्लुचकमिगामिण्याथीवेपामित्यत्र ण्पेतभादीनामनुपसंख्याने शब्दांतर
त्वादप्राभावारंभ इति कैयटन्यासहरदत्ताद्युक्तं च संगच्छते अत एव वाभिघावयतीत्यत्र ण्पेनेनाभेर्योगेस्तु नोतिप्रत्यन्तु पस
र्गत्वात्कथं षत्वमित्याशंक्य प्रकृत्यर्थविशेषकत्वेन समाहितं भाष्ये न वह्रीरचङीति चङ्प्रतिषेधात् प्रकृतिग्रहणे ण्पेन
स्यापि ग्रहणमिति वाच्यं ज्ञापकस्य कुत्वमात्रविषयकत्वायावसमाणत्वात् अज्ञाङः शापेतस्य शब्दांतरत्वेपि प्रकृतिभाग-
स्यपभूपत्वमस्त्येव अन्यथाप्रभेः प्रकृत्यर्थविशेषकत्वपरभाष्यादिविरोधत्वात् पयतइनिति ङंतेपि प्रकृत्येशमादायैव प-
भूपतायावाव्यतात् णिजंतेपि वैषम्यस्पष्टर्ववत्त्वात् नाप्युपसंख्यानविरोधः विशिष्टस्य शब्दांतरत्वेन प्रकृत्येशस्य च णिचा
व्यवधानेन तदावश्यकत्वात् अत एवात्र योगविभागेन तयोरप्येजादित्वविशेषणं भाष्यकृद्भिरुक्तमिति दिक् स्यादेतत् आ
इतः एतः उपएत उपेत इत्यत्रापि वृद्धिर्दुर्वारा न च ओमाङोश्चेति पररूपमत्र बाधकमिति वाच्यं बाध्यसामान्यचिंतायामु
भयोरप्यनेन बाध्यत्वात् मैवं एङि पररूपेणाप्राप्तेऽस्या वृद्धेर्विधानात् आङि पररूपे च उपेत इत्यादौ प्राप्तत्वेप्युपेतीत्यादाव
प्राप्तत्वात् पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति न्यायाच्च उपस्थितबाधेन चरितार्थे शास्त्रेऽनुपस्थितस्य बाध्यत्वा
नुपपत्तेः तत्र परत्वादाङि पररूपप्रवृत्तेः अत एवावेहीत्यादौ वृद्धिरस्त्विष्टेतीयं अक्षादूहिन्यामुपसंख्यानं अक्षानूहते व
श्यमिति प्रावश्यके णिनिः साधनं कृतेति कर्मणा सह समासः पूर्वपदादिति णत्वं अक्षौहिणी सेना प्रादूहोढोढ्येषैष्येषु

र्च

वृद्धिरिति वक्तव्यं । प्रौहः प्रौढः प्रौढिः प्रैषः प्रैष्यः गुणपररूपयोरयमपवादः प्रैष प्रैष्य शब्दौ तु ईषयातो[illegible]जिल्पेति च प्रशब्देन
समासे बोध्यौ तत्र वलवृद्धिपरत्वाभावेन गुणप्रवृत्तेः प्रौढेति प्राङ् ऊढयोः समासे ओमाङोश्चेति पररूपे सिद्धे प्रौढ वा नित्यं तत्र न वृ
द्धिः कृतवत्त्वे नैकदेशस्यानर्थकत्वात् । स्वादीरेरिणोरिति वक्तव्यं । स्वैरं स्वैरी स्वेनात्मनार्थे गच्छत्यवश्यमिति णिनिः ईरिग्रहणं श्वा
कयमकर्त्ते स्वैरशब्दमत्यर्थीयेन इति नासिद्धेः नच णिनौ गुणापत्तिः उक्तभाष्यबलादनभिधाननिर्णयात् णिनेरनुत्पत्तेः
ईरेरिण्योरिति पाठस्तु निर्मूलः स्वैरीत्यस्यासिद्धेः स्वैरिणीत्यस्य लिंगविशिष्टपरिभाषया ङीप्रकृतेः शमादाय वासिद्धेः । ऋ
ते च तृतीयासमासे इति वक्तव्यं । सुखेन ऋतः सुखार्तः ऋत इति किं सुखेतः तृतीयेति किं परमर्तः कर्मधारयोयं समासे
किं सुखेनर्तः । प्रवत्सतरकंबलवसनानां च ऋणे इति वक्तव्यं । प्रार्णं वत्सतरार्णमित्यादि वत्सवत्सरयोरप्यत्र पाठो निर्मू
लः भाष्यानारूढत्वात् । ऋणदशाभ्यां चेति वक्तव्यं । ऋणार्णं ऋणापनयनार्थं मृणमित्यर्थः दशार्णेति नदीदेशविशे
षयोः संज्ञा ऋणशब्दस्य जले दुर्गभूमिश्चार्थः ॥ आटश्च ॥ अचिपरे आटो वृद्धिरेकादेशः स्यात् आ[illegible]नयाः आड्जादी
नाऽभयोरप्युपादानमविशेषात् गौर्ये प्रेहिष्ठ वृद्धेरधिकारादेव लाभेपि चकारः पररूपबाधनार्थः एवकारसमा
नार्थकत्वात् तेन उस्योमाङ्‌ आटः पररूपप्रतिषेधस्य इति स्पष्टार्थं ॥ उपसर्गादृति धातौ ॥ अकारान्तादुपसर्गादृकारादौ धा
तौ परे वृद्धिरेकादेशः स्यात् उपार्छति प्रार्छति धातौ किं प्रगता ऋषभा प्रर्षभा स्मादिति प्रर्षभं वने उणादीनामव्युत्पन्नत्वादृष
भशब्दे धातोरभावात् ननु इदमुपसर्गग्रहणादेव सिद्धं क्रियायोगं विनोपसर्गत्वानुपपत्तेः नचोपसर्गपदे प्रादिमात्रप
रमस्तु उपसर्गाच्चेति । नासिकायानसादेशविधानादिति वाच्यं तत्रासंभवात् तथात्वेपि इह क्रियायोगासंभवेन तथात्वा
नुपपत्तेः नच धातुग्रहणेपि प्रर्छक इत्यादावतिप्रसंगोऽङ्गवीर इति वाच्यं यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसं
ज्ञा गीकारात् प्रगता ऋच्छकाः अस्मादित्यत्रर्च्छति क्रियायोगतद्योगादित्युभयसमाधेयत्वात् मैवं धातोरादित्योगवि

नृ

सि॰
प॰
२९

भागेनपुनर्विधानेनशाकलनिवृत्त्यर्थत्वात् तेनऋत्यकइतिप्राकृतिकप्रकृतिभावस्यापिनेहप्रवृत्तिः तेनह्रस्वादुपसर्गाद्वृद्धिपू
र्वविप्रतिषेधेनेतिगतार्थं ह्वेतुकः संबुद्धिगुणोविप्रतिषेधेन अग्नेत्रमित्यत्रहि अग्नित्रमितिस्थिते संबुद्धिलोपोन्तरं
तुकिकृते ह्रस्वांतत्वाभावाद्गुणोनस्यात् पूर्वंगुणेतु ह्रस्वांतत्वाभावात्तुक्नस्यात् अतोविप्रतिषेधानुसारः अग्नेत्रमी॰
त्यादौद्वयोःसावकाशत्वात् वस्तुतस्तु सिद्धंवहिरंगमित्येवसिद्धं पदद्वयाश्रयत्वेनतुकोवहिरंगत्वात् ननुसंबुद्धिलोपात्पू
र्वमेवपरत्वात्संबुद्धिगुणेकृतेतदातुकः प्राप्त्यभावात् मैवं कृताकृतप्रसंगितयासंबुद्धिलोपस्यानित्यत्वात् गुणस्यचसंबुद्धि
लोपोत्तरमप्राप्तेः संप्रसारणदीर्घत्वयल्लोपाभ्यासगुणादयस्तुतुकोविप्रतिषेधेन परिवीयशाकहृत्वइत्यत्रसंप्रसारणेपू
र्वरूपेकृतेह्रस्वस्यापितिकृतितीतितुकोहलइतिदीर्घस्यप्राप्तौपरत्वाद्दीर्घः हृतोग्निचिदित्यादौद्वयोःसावकाशत्वात् प्रकार्यप्रहार्ये
त्यत्रउकतुकोणिलोपस्यप्राप्तौपरत्वाण्णिलोपः कारणाहारणेत्यत्रणिलोपस्यसावकाशत्वात् प्रचिकीर्षित्यत्रअकतुकोः
तोलोपस्यचप्राप्तौपरत्वादतोलोपः चिकीर्षितेत्यादावतोलोपस्यसावकाशत्वात् अभ्यासगुणादयइत्यस्याभ्यासस्यानिका
ह्रस्वत्वावोत्वगुणाइत्यर्थः अपचच्छतुरित्यत्रछोछेदनेइत्यस्य आतेशृतुस्थि आतोलोपइटिचेत्याल्लोपेद्विर्वचनेचीनिस्थाति
वद्भावेनछाशाहृस्यद्वित्वेछाछइतिस्थितेदीर्घादितितुकोभ्यासह्रस्वस्यचप्रसंगेपरत्वादभ्यासह्रस्वः वेपयतइत्यादौतुक
स्यसावकाशत्वात् तुकिकृतेत्वजंतत्वाभावात् ह्रस्वोनस्यात् अपचच्छदतुरित्यत्रअपचच्छदतुरित्यत्र गोह्व्दिदीमिदेव
नयोरित्यस्यद्वित्वेहलादिशेषेछच्छइतिस्थितेछेचेतितुकउरदित्यस्यचप्राप्तौपरत्वादत्वंचकृतुरित्यादावत्वस्यसावका॰
शत्वात् तुकिकृतेतुसिद्धंतत्वाभावादत्वंनस्यात् चिच्छादयिषतीत्यत्रछच्छाद्इतिस्थितेतुकः सन्यतइतीत्वस्यचप्राप्तौपरत्वा
दित्वेपिपतीत्यादावित्वस्यसावकाशत्वात् तुकिकृतेत्वदंतत्वाभावादित्वंनस्यात् चेछियतइत्यत्रतुकोगुणोयङ्लुको
रित्यभ्यासगुणस्यचप्राप्तौपरत्वाद्गुणः लोलूयतइत्यादौगुणस्यसावकाशत्वात् तुकिकृतेत्विगंतत्वाभावाद्गुणोनस्यात्

यणादेशाद्गुणो विप्रतिषेधेन हृस्वो ऽचेत्यत्र हृस्वस्य चेति स्थिते कृते ऽन्ते च सवर्णेन सह गुणस्य परेण सवर्णदीर्घस्य च-
प्राप्तौ परत्वाद्गुणः । वृक्ष्णेरीदृश्येत्यादौ ह्रयोः सावकाशत्वात् इकुरूपेण हृडि विषयस्य यणादेशाद्विप्रतिषेधेन नन्त्वरिजेय
रिरित्यत्र त्वस्य हृभ्यो प्राद्गोकिरतीत्यत्र हृह्मनीति स्थिते यणादेशस्य हृन इह्ममोरिति त्वस्य च प्राप्तौ परत्वादित्वं प्राश्नीणिमिथा
दावित्वस्य सावकाशत्वात् मेत्यादिना किकिनोरभ्यन्तरस्मिन्नत्यये लिड्वदित्यतिदेशात् द्विवेतन्त्व इति स्थिते यणादेशस्य
हलेंबंदसीत्यत्वस्य च प्राप्तौ परत्वाडत्वे रपरत्वं च निष्पूर्तीइत्यादौ उत्वस्य सावकाशत्वात् चयनेचायकोलवनेलावकश्य
त्र यणादेशस्य गुणस्य ह्रओश्च प्राप्तौ परत्वाद्गुणहडी चेतालोतागौरित्यादौ तयोरपि सावकाशत्वात् भलोपयान्तुप्रातिप
दिकप्रत्ययसमासान्तोदात्तनिहन्तिस्वरापकादेशयणादेशाभ्यां विप्रतिषेधेन दात्रीत्यत्र यजेतादादिशाह्वादिनो मन्तु-
ष्यजातेरितिङीषि सवर्णदीर्घं बाधित्वा परत्वाद्यस्येति लोपः दर्वीदो गार्ग्य इत्यादावुभयोः सावकाशत्वात् गांरोयो गारा
इत्यत्र श्रभ्रादित्वशिवादित्वाभ्यां ढग्गणोः कृतयोर्ढस्य यादेशो हृडिरे वी निष्ट इहिनीये सवर्णदीर्घस्य च प्राप्तौ यस्येति च
ति भसंज्ञानिमित्तको लोपः परत्वात् दाक्षीदेंअग्रमित्यादौ हयोः सावकाशत्वात् श्रार्थश्रीषित्यत्र धातुस्वरस्य यणादेशस्य सव
र्णदीर्घयोश्च प्राप्तौ एर्वं धातुस्वरः परत्वात् पचतीत्यादौ चतस्य सावकाशत्वात् ॥ ईषन्तेरिगुपधत्वात्कः ॥ श्रीईषायस्या
इति बहुव्रीहिः तथा च पूर्वपदप्रकृतिस्वरेण श्रीशब्दस्योदात्तत्वे शेषनिघाते च श्रार्थमित्यत्र उदात्तस्यानिकयणादेशात्य
रस्यानुदात्तानत्यस्याऽकारस्य उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति स्वरितत्वे द्वितीये पकादेशस्य स्वरितो वानुदात्ते प-
दादाविति स्वरितत्वमनुदात्तत्वं वा प्रग्निसहितमुदकमप्युदकमित्यत्र प्रग्निरूपं उदके यत्रासुदकतयादाहकत्वादित्ति व
हुव्रीहौ यणादेशस्य पूर्वपदप्रकृतिस्वरेण प्रातिपदिकत्वादन्तोदात्तत्वे च प्राप्ते परत्वादन्तोदात्तत्वम् प्राश्व इत्यादौ प्रातिप
दिकस्वरस्य सावकाशत्वात् ततो यणादेशे पूर्ववत्स्वरितत्वे प्रग्निना सहितमुदकं इति तत्पुरुषे उदके केवल इति पूर्वं

सि॰
सु॰
२७

२७

पदांतोदात्तत्वेपिप्रातिपदिकस्वरेणुक्तिविरोधात् चिकीर्षितेर्थेउपगवार्थमित्यत्रयणेकादेशयोःप्रत्ययस्वरस्यचप्राप्तौपरत्वा
त्प्रत्ययस्वरः चिकीर्षुरित्यादौसावकाशत्वात् ननुयणादेशे एवंवत्स्वरितत्वं द्वितीयेस्वरितोवानुदात्तेपदादावितिविकल्पः
राजवेद्यर्थे राजवेदीहत इत्यत्रराज्ञोवेदीतिसमासेसमासांतोदात्तस्ययणेकादेशयोरप्राप्तौपरत्वात्समासांतोदात्तत्वं न
स्वराजपुरुष इत्यादौसावकाशत्वात् एवंवत्स्वरितत्वंतद्विकल्पौ ईहत्यतीकारस्य तिङ्ःतिङ इति निघातेनानुदात्तत्वात् वि
कीर्षकइत्यत्रअतोगुण इतिपररूपस्यातोलोपइत्यत्रलोपस्यचप्राप्तौपरत्वादतोलोपः पचेतिविकीर्षितेत्यादौद्वयोःसा
वकाशत्वात्तेनानुदात्तस्यचयत्रोदात्तलोपस्तदुदात्तनिहन्तिस्वरउदात्तत्वं ययनिरित्यादौसवर्णदीर्घंबाधित्वापरत्वादतोलो
पः पपिःसोमंदधातीत्यादौद्वयोःसावकाशत्वात् इयङ्उवङ्गुणवृद्धिटिकितिसर्वपदोत्तरपदविकाराद्येकादेशय‸
णादेशाभ्यांचेतिपिबेत्यत्रलिटिक्कादिनियमादिट् सवर्णदीर्घंबाधित्वाइयङ् लुलुवतुरित्यत्रयणंबाधित्वाउवङ् यणय
वाद्योरियङ्उवङोःसवर्णदीर्घंप्रतिपरत्वाद्बाधकत्वं श्रियौभ्रुवौ इत्यादावियङ्उवङोःएवंकस्थलेचयणेकादेशयोःसा
वकाशत्वात् स्ववायीनरौभावुकइत्यत्रसमानाविति णौकर्मेरिभुवइतिखुकञिचपरत्वाद्वृद्धिःस्वपीत्यनुवर्तमानेस्व
ग्रहणंस्वमात्रपरिग्रहार्थमितिसिद्धान्तात् एवंशायितेत्यत्रगुणोवोध्यःहन्तारामित्यादौसवर्णदीर्घात्परत्वान्नुट् नचनु
टोऽनवकाशत्वं नचपंचानामित्यादिरवकाशः कृत्स्वलक्षणसनुटोनांनेऽनवकाशत्वापपत्तेः सत्यं लक्षणभेदानपेक्ष
मानुडागमत्वेनावकाशोक्तेः अग्नीनामितिपाठेऽनुप्रयोगविषयकस्यणप्रवापवादेनुट् परत्वान्नदीर्घस्यबाधकइत्यर्थः
दायकइत्यत्रसवर्णदीर्घात्परत्वाद्युक् येननाप्राप्तन्यायेनप्राप्तंगोपप्रत्ययापवादत्वात् प्रतिसव्वीतिवालक्षणंफलानीत्यत्र
सवर्णदीर्घात्परत्वान्नुम् त्रपुणी इत्यादौनुमःसावकाशत्वात् नुमोयणादेशापवादत्वात् नेष्टोहोतारौ अग्नेंद्रमित्यत्रय
णेकादेशाभ्यांपरत्वादानङ् होतापोतारावित्यादौसावकाशत्वात् नीपदीपंवपंपरीपमित्यत्र ‸ · · · · · · · · काटेशाभ्यां

परत्वादीत्वम् ईत्वमनवर्णानादित्यस्यानिमित्तत्वात् ॥ वा सुप्यापिशलेः ॥ ऋकारादौ सुब्धातौ अकारान्तादुपसर्गात्परस्य वृद्धि
रेकादेशो वा स्यात् पूर्वेणनित्यप्राप्ते विकल्पारम्भः आपिशलिग्रहणं पूजार्थं प्रार्षभीयति प्रर्षभीयति प्राल्कारीयति प्रल्कारी
यति न परत्वेपि ह्रस्वानां स्वभेदानामिव ऌकारभेदानामपि सवर्णत्वेनोपादानं ॥ ओतोम्शसोः ॥ आ ओत इति छेदः ओदन्तस्या
त्वं स्यादमि शसि च गां गाः पूर्वत्वपूर्वसवर्णयोरपवादः तद्धितस्य शसो नेह ग्रहणं तस्यानजादित्वात् किंतु सुपः तस्माद्ह
वर्णादमोपि तिङोऽनुपादाने तेनाचिनवमित्यादौ विकरण[illegible]गुणेन तत्रं नास्य प्रवृत्तिः ओत इति ङिः प्रतिषेध इति तस्यार्थं स
पीत्यनुवृत्त्यापि तत्सिद्धेः नचैवं विकल्पोप्यनुवर्तेतेति वाच्यं वेत्यस्य निवृत्तेः नह्येकयोगनिर्दिष्टानामसभयानुवृत्तिरिति य
मः अलुगुत्तरपदे इत्यत्र अलुगपि कारः आङो नाऽ उत्तरपदाधिकारः आङो गाधिकारादिति वक्ष्यमाणत्वात् नन्वा गोत इत्येवा
स्तु मैवं योऽस्य सिद्धेः विवृत्युपशेषत्वप्रसंगाच्च सिद्धान्ते ह्रस्वस्यान्तरंगत्वादात्वात्प्रागेव प्रवृत्तेः न च गोत इति न्यासेपि तथे
ति वाच्यं ह्रस्वे कृतेपि स्थानिवद्भावेन आत्वप्रसंगात् ओत इत्यत्र त्वल्विधित्वात् स्थानिवत्त्वमिति वैषम्यं न च गोः पूर्वेणै
वात्वस्वरेण स्थानिवत्तस्यत्रापि निषेधात् दोष इति वाच्यं तथापि द्योः रूपसंख्यानस्यावश्यकत्वात् न तु तथापि गामित्या
ात्वं न स्यात् परापाणिहलन्तणहद्धेः प्रसंगात् नचात्वमनवकाशमिति वाच्यं यामित्यत्र सावकाशकत्वात् मैवं गोतो णिद
त्यत्र ओत इत्येव पठितव्यं यद्वा गोत इत्योकारान्तत्वोपलक्षणं व्याख्येयं तपरत्वसवर्णनिर्देशानियतत्वात् अन्यथा यत्
यावदिदं नेशान्तमित्यसिद्धेः तथाच द्यामित्यत्रापि हल्ङ्यादिप्रसंगसत्वादात्वस्यानवकाशत्वसिद्धिः ॥ एङि पररूपं ॥ अकारान्ता
दुपसर्गादेङादौ धातोः पररूपमेकादेशः स्यात् प्रेजते उपोषति एजृकंपने उषदाहे लघूपधगुणः वृद्धौ प्राप्तायामेतदार
म्भः ॥ न्वन्वोर्विति निपातउपसंख्यानं ॥ न्वन्व इत्यनयोर्वकारादौ निपाते पररूपं वाच्यमित्यर्थः न्वे इति स्थिते न्वे न्वे इत्यत्र न्वे
वकारादौ किं न्वेवं न्वेवं निपाते किं तु वाति नु वाति वातेर्लोडुमम एकवचने वातीति रूपं न वा निपातेकैत्वात् अर्थभेदाभावा

सि

सि॰
षं॰
२८

28

एवं इमिव इवैवे इति निपातो हि इतिवदिष्टकपररूपविधानप्रत्याख्यानम् । एवे चानियोगे इति वक्तव्यं । नियोगोवधारणं तदन्यत्र
त्वर्थे पररूपं क्वेव भोक्ष्यसे अनवक्लृप्तावेव शब्दोयं अवधारणे तु इहैव भव मा स्म गाः अद्यैव त्वमिह वयं स्म शेवाः । शकन्ध्वादिषु प
ररूपं वक्तव्यं । शकानामन्धुः शकन्धुः कर्कन्धुः कुलटा अटतीत्यटा पचाद्यच् कुलस्य अटेति समासः कुले अटतीति विग्रहे क
र्मण्यणः प्रसंगात् । सीमंतः केशवेशे इति वाच्यं । अन्यत्र सीमान्तः मनसईषा मनीषा दे: पररूपमत्र वोध्यं लांगलीषा हलीषा
प्रभृशकन्ध्वादयोरीषाः स्त्रियां लांगलदंडकं इति तालव्योपपर्येन्तु आकृणो हलेषा यतैनौ जलयोयत्रवंयनात्मपतंजलिः । पशौ
पतिणिच । सारंगः अन्यत्र सारंगः । मार्तंडोप्यत्रेति केचित् । मार्तांड इति च वैदिकप्रयोग इत्यन्ये । ओत्वोष्ठयोः समासे वेति
वक्तव्यं स्थूलोतुः स्थूलौतुः ओतु बिडालो मार्जारः । बिंबोष्ठः बिंबौष्ठः अभेदान्वयश्च लुप्तवाये नेह ह्रस्वलोष्ठः समासे किं तवो
ष्ठः ॥ एमन्नादिषु छंदसि पररूपं वक्तव्यं । अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयामि ॥ ओमाङोश्च ॥ अकारांतादोमि आङि
च पररूपं स्यात् शिवायोनमः शिव एहि शिवेहि आ ईहीत्यत्र गुणः आ ऋश्यात् अर्श्यात् अद्य अर्श्यात् इत्यत्र प्रतिपदविधि
त्वात् पररूपमेव न तु परोपि सवर्णदीर्घः न च चकारेणास्य एङीत्यनुकर्षादेङः दावेवाङि पररूपविधानादत्र सवर्णदीर्घप
वाप्युक्त इति चेन्न एङीत्यस्य अनितिहृतेः तथा च सोनागाः पठंति वाङ् नर्थको नधिकारादेङ इति ङसो माङ् त्वाट: प्रतिषेधो वक्तव्यः
ओस्त्रीयत् ओठीयत् ओंकारीयत् उस्त्रशब्दात् क्यचि लुङ् आडजादीनामित्याट् आउस्त्रीयदित्यत्र उस्य पदांतादिति प्राप्तस्य पररू
पस्यायं निषेधः द्वितीये आडू ऊढौ ऊढशब्दात् तृतीये ओंकारशब्दाच्च क्यचि लुङ् ओमाङोश्चेति प्राप्तस्य पररूपस्य निषेधः तेन
सर्वत्राप्याटश्चेति वृद्धिः वक्तव्यस्य तत्रत्यवकारस्य पररूपनिषेधार्थत्वात् सिद्धमिति तत्त्वबोधिन्यां ॥ उस्यपदांतात् ॥ अपदांता
दकारादुसि पररूपमेकादेशः स्यात् गुणापवादः भिन्द्युः फेर्जुसादेशः भिन्द्यात् उस इति स्थिते लिङः सलोपोनंत्यस्ये
ति सलोपः ततोनेन पररूपे अपदांतात्किं का उस्त्रा को स्त्रा नन्वर्थवद्ग्रहणपरिभाषयैवात्रान्न तिप्रसंगः उस्त्र शब्दस्याव्युत्प

तिपदेऽसिद्धस्यानर्थकत्वात् नन्वेवंभित्सुरित्यादावपि न स्यात् अनागमकानां सागमका आदेशा इति न्यायेन याहृद्धिशिष्टस्ये
वडसोऽर्थवत्त्वात्केवलस्य तदभावात् न वार्थवतो लागमस्य ग्रहणे भूतस्य ग्रहणे न तस्येति न्यायात् डसोऽर्थवत्त्वमिति वाच्यं अ
पातिपदिके वसेः स्फायितंचीति रक्प्रत्यये संप्रसारणे न रपरे तिवचनेन शासिवसीति षत्वनिषेधे च डसेः वसग्रहणे सोऽर्थवत्त्वात् वक्त
तस्त्वर्थवत्परिभाषा अनित्या तत्र च लिंगं अर्वणस्त्रसावनञ इत्यर्वादेशात् तशाद्‌निहत्यर्थमर्वादिस्त्वेत् नत्रचोः पृथगुपादाने अ
न्यथा नस्यानर्थकत्वादेव वारणात् अन्यनेनैवोभयसंग्रहसिद्धेरुनिकैयटादयः केचित्तु सामान्यनिर्देशस्यापि कचिद्विशेष
परत्वमित्यत्र न हि लिंगं तेन नकोपयप्रतिषेधे न डितत्ग्रहणं कर्तव्यमिति सिद्धं अर्थवद्ग्रहणपरिभाषायास्त्वनित्यत्वे आनिलो
डित्यत्र लोटो ग्रहणं लिंगं अन्यथा प्रकृतिवपायेष्वनानि प्रवपानि मांसानीत्यत्र आनीत्यस्यानर्थकत्वादेव व्यावृत्तिसिद्धेरि
त्याहुः तत्कथं कोऽहेत्यत्रातिप्रसंगवारणमिति चेत्सत्यं तथापि लक्षणप्रतिपदोक्तपरिभाषया तत्सिद्धेः तस्मादपदान्तादि
मत्तरार्थं देङयमित्यादावतो गुण इति पररूपं मा भूत् सवर्णदीर्घस्य दीर्घे परे सर्वेवाप्यनवकाशत्वात् ॥ अतो गुणे ॥ अपदा
न्तादकाराद्गुणे पररूपमेकादेशः स्यात् भवंति शपोऽकारस्यान्यकारेण सह पररूपं न परः किं यान्ति गुणे किं भवेयुः इया
देशो परे प्राद्‌ग्रहणोपयाऽस्यात् भवे इटपन्त्वेशपोऽकारस्य पररूपं ॥ अव्यक्तानुकरणस्यात इतौ ॥ अव्यक्तस्येति कर्मणि षष्ठी
अनुकरणस्येत्यवयवावयविभावे ध्वनेरनुकरणस्यावयवस्यादिति शाद्भलस्य इति शब्दे पररूपमेकादेशः स्यात् पटत् इति
प,टिति इत्यत्रावनेकाच्ग्रहणं अदर्थे नेह श्रदिति अनुकरणत्वं किंचिदंशसाम्येन बोध्यं ध्वनेर्वर्णानात्मकत्वात् ॥ नाम्रेडितस्या
न्त्यस्य तु वा ॥ द्विरुक्तस्य पररूपमाम्रेडितसंज्ञमिति वक्ष्यते तदवयवस्यातः आर्गुकेन स्यादंत्यस्य तकारमात्रस्य तु वा स्यात् प
टत्पटेति पट पटिति नन्वेवं घटद्घटितिवर्मणिक्वमिति वोक्कल क्काणितेत्यगडागिनिमेदसिस्फुटरवोस्यनिश्वागितिम
योगानुपपत्तिः प्रथमतृतीययोरत्यस्य पररूपनिषेधात् । सत्यं । नेदमाम्रेडिते । किंतु । घटघटदित्येवमव्यक्तकमनुक

सि॰
मु॰
२५

डा॰ व॰

29

रणं अनुकार्यानुकरणयोरभेदविवक्षायामर्थवत्त्वाभावाद्विभक्तेरनुत्पत्त्या पदत्वाभावान्न जश्त्वं तृतीये तु भेदविवक्षाणां तमे
वचानुकरणं बोध्यं नित्यमाम्रेडिते डाचीति वक्तव्यं सूत्रे च ग्रहणपाठो नार्थ इति कैयटः । अच् परो यस्मात् तस्मिन्नाम्रेडिते परे पूर्व
परयोर्वर्णयोः पररूपमेकादेशो भवतीत्यर्थः अव्यक्तानुकरणाद्व्यजवरार्धादिति डाच् पटत् पटत् इत्यस्मात् डाचि टिलो
पः प्रथमे तकारपकारयोः पररूपेण पकारः पटपटायति पटपटा करोति भाष्यकृतस्त्वाहुः अकारान्तानुकरणादेव सि
द्धे न वतकारान्तानुकरणस्यारम्भः ततोऽप्वानुत्पत्तेः नहि तद्धितमीमांसा वैविध्यात् ॥ अकः सवर्णे दीर्घः ॥ अकः सवर्णेऽ
चि पूर्वपरयोर्दीर्घ एकादेशः स्यात् दैत्यारिः श्रीशः विष्णूदयः होतॄकारः अकः किं हरये सवर्णे किं दध्यत्र अचि किं कुमारी शे
ते अग्रहीतसवर्णानामेव नाज्झलाविति निषेधात् दीर्घस्य ईकारस्य शकारेण सह तुल्यस्थानप्रयत्नतया सावर्ण्यसत्त्वा
त् न त्वत्र भाष्यरीत्या प्रयत्नभेदस्वीकारेण चवीति नानुवर्तनीयं यत्तु अको कि दीर्घ इत्येव सुवचं यथासंख्यप्रसङ्गाशङ्का
रेति प्रसङ्गाभावादिति तच्चिन्त्यं ग्रहीतसवर्णानां यथासंख्ये अग्रहीतसवर्णानां वा नाद्यः चतुरशीतिव्यक्तीनां तावतीभिर्य
थासंख्ये ह्रस्वोदात्तस्य ह्रस्वोदात्त इत्यादि पर्यवसानात् ह्रस्वादीनामप्युदात्तादिगुणभेदे ह्रस्वदीर्घादीनां चैकादेशानुप
पत्तेः नान्त्यः ऋकारलृकारयोः तदनुपपत्तेः ग्रहणकशास्त्रं विना तयोः परस्परं ग्राह्यग्राहकभावाभावात् केचित्तु तथापि स
ति ऋति ऋ वेति वार्तिके सवर्णग्रहणं कर्तव्यमिति न लाघवावकाश इत्याहुः अन्ये तु तस्यास्य सूत्रे न हानिः कदृयस्य प्रत्या
ख्यानान्नायं दोष इत्याहुः । ऋति ऋ वा लृति लृ वेति वक्तव्यं । होतॄकारः होतॢकारः अत्र विधेययोः संवृतत्वात् विवृताभ्यामृ
कारलृकाराभ्यां न सावर्ण्यं नापि दीर्घसंज्ञा अइउण्सूत्रीयमात्रव्याहकालत्वाभावात् अनुग्रहणेनाग्रहणादिति कैयटोक्तिस्तु
यथाश्रुताभिप्राया तयोरच्त्वं वक्ष्यामीति तत्पास्य सूत्रीयभाष्यप्रामाण्यादयोगवाहत्वाङ्गीकारावश्यकत्वात् ॥ इति श्री
सिद्धांतव्याख्यानिधौ बहलप्रथमपादे चतुर्थमाह्निकं ॥ प्रथमयोः पूर्वसवर्णः ॥ अकः प्रथमाद्वितीययोरचि पूर्वसवर्ण

दीर्घःस्यात् अग्नी वायू इत्यत्र प्रथमापदं साहचर्येण प्रथमाद्वितीयोभयलक्षकं स्यादेतत् प्रथमयोरिति प्रत्ययग्रहणमेवा-
स्तु न च धात्वनिपातादीनामपि प्राथम्यसंभवात्प्रत्ययग्रहणे नियामकाभावः दीर्घाज्जसि चेति लिंगात् अन्यथा जसि पूर्व
सवर्णे दीर्घप्रसक्त्यभावात् प्राथम्यस्य संनिवेशविशेषापेक्षतया सामान्यतः प्राथम्यस्य दुर्ग्रहत्वात् तावता विशेषा
णोपरागपक्षद्वावनारोहात् न च प्रातिपदिकार्थमात्रेस्यादौ प्रथमापदं विभक्तिपरत्वेन निर्णीतमिति वाच्यं प्रथमयोरिति
निर्देशस्य प्रथमशब्दे साधारणात् किंच त्रिकस्य बहिरंगे प्रथमत्वे अवयवपौर्वापर्यग्रहाधीनग्रहत्वात् अन्तरंगत्वा
त्प्रत्यययोरेव प्रथमयोर्ग्रहणमुक्तं न च द्वितीयस्य प्राथम्याभावः आरोपात्तदुपपत्तेः अग्नीवी इत्यादिवत् विभक्त्योरपि ग्रह
णे एवमेव वाच्यत्वात् यद्वा तृतीयाद्यपेक्षं मुख्यमेव द्वयोः प्राथम्यं एवं जसाद्यपेक्षं सौरैकारस्य चेति न दोषः मैवं अवीत्य
ग्रहणेन प्रथमयोर्विशेषणे अजाद्योः प्रथमयोरिह उपादाने स्वशब्दस्य तत्त्वजादिना भावादन्वयापत्तेः सम्बन्धजाद्यन्वयि
तावच्छेदकं सत्वविशिष्टेतदन्वयबोधात् न च प्रथमे त्रिके स्वशब्दस्याजादित्वाभावाद्विभक्तिग्रहणपक्षेपि दोषसाम्य
मिति वाच्यं अवयवान्तरहारकस्याऽजादित्वव्यपदेशस्योपपत्तेः तथापि प्रथमात्वरूपविशेष्यतावच्छेदकसामानाधिकर
ण्यनिर्वाहात् द्वितितेजसोर्नैमित्तिकद्रवत्वमित्यादौ द्वितित्वाद्यवच्छेदेन नैमित्तिकद्रवत्वाभावेपि सामानाधिकरण्येनान्व-
यबोधोत्पत्तेः द्वितितेजसोर्गंधइत्यादेश्चाऽयोग्यत्वात् स्यादेतत् अजादित्वं प्राथम्यं अजादित्वं च औजसोरस्तीति तयोरेव ग्र
हणमस्तु यद्वा अवीति निर्धारणसप्तम्या निर्धारणस्य च तत्सजातीयविषयतया अजादीनां मध्ये प्रथमाव अजादी प्रत्य
यौ तावेव तयोर्निर्धारणविषयतयान्वयात् न्नाजादिप्रथमौ वाच्छिन्नापेक्षया प्राथम्यस्याग्रह्यत्वात् तत्पक्षे विभक्तिग्रहणो वी
स्यत्वनिर्लिंगमिति चेत् सत्यं तस्माच्छसो न इत्यत्र पूर्वसवर्णदीर्घस्य तच्छहेमनिर्देशस्य विभक्तिग्रहणाज्ञापकत्वात् औ
जसोरेव ग्रहणे शसि पूर्वसवर्णदीर्घानुपपत्तेः परत्वात् प्राप्याङ्कः सवर्णे इत्यस्यापि तत्र इलभत्वात् यद्वा प्रथमयोरित्य

२८

सि॰
कौ॰
३॰
३०

त्रदीर्घाज्जसिचेतिलिंगात्सुपःपरिग्रहसिद्धौवासरूपाधिकारेविभाषितःस्वरूपीत्यनुहत्यात्सुपःप्रसिद्ध्यमेविशेषोलभ्यते सव
र्णयोर्विभक्तित्वेविभक्तिरेवत्रचौगिचीणीत्यनुहत्यात्रिकस्यतत्राप्रसिद्धेः नहिस्वसमानात्राज्ञापकं प्रत्ययत्वंतत्सुस्वव्याप
कविभक्तित्वव्यापकमपिस्वस्यास्येनाभाववतितिऊदावपिहत्यानस्पयोःसाधारणमित्याकरः तस्मात्तृतीयाद्यपेक्षया
प्रथमयोर्विभक्त्योरिहग्रहणंसिद्धं नत्वेवंहेकुमारीमित्यादौपूर्वसवर्णदीर्घेऽसिद्धवत्त्वेचाविशेषाभावः नचहेहत्तम
ग्निमित्यादौविशेषइतिवाच्यं दीर्घग्रहणस्यात्रनिवर्तनीयत्वात् नचसवर्णग्रहणस्यात्रसत्वाद्दीर्घापत्तितादवस्थ्येन
स्यापिपरित्यागात् प्रथमयोःपूर्वइत्येववाच्यत्वात् तेनहत्तमग्निंकुमारीवृक्षःकुमारीवृक्षरित्यादिसिद्धेःमैवं पूर्वइ
त्यत्रयत्नाश्रयणे ग्रामणीवामूइत्यादावपिकस्वप्रसंगात् .... मित्यादावपिदीर्घापत्तेःनचैतर्पी
ष्ठवत्वेतिवाच्यं ग्रामणीइत्यादौविप्रात्रस्यहत्तमित्यादौहिमात्रस्यवापत्तेः प्लुतस्यविषयेऽस्तनइत्यस्यप्लुतात्प्लुतोभयप्रसं
गमात्रविषयकत्वात् तथात्वेत्रसवर्णग्रहणादीर्घानुहत्योरावश्यकत्वात् हत्तमित्यादौदीर्घवारणायाःऽसिद्धवत्त्व
स्यापितथात्वात् स्यादेतत्प्रमिचेत्यप्यत्रैवपठनीयेपुनःपूर्वपदानुपादानेलाघवात् मैवं हत्तमित्यादौदीर्घप्रसंगा
त् नवामिचेत्यत्रादीर्घग्रहणंनिहत्तमितिवाच्यं कुमारीमित्यादौत्रिमात्रापत्तेःनचसवर्णग्रहणमपहायपूर्वोदीर्घ
इत्येवविधेयमितिवाच्यंप्रथमयोरित्यत्रयोगेपूर्वव्यक्त्यभिन्नोदीर्घइत्यर्थेग्रामणीइत्यादेरसिद्धेःतत्रपूर्वव्यक्तेर्दीर्घत्वाप्र
सिद्धेः पूर्वव्यक्तिसजातीयमित्यर्थेतुप्रमिचेत्यनेनहत्तायमित्यादौदीर्घप्रसंगात् ननुप्रथमयोःपूर्वसवर्णइत्येवा
दीर्घानुहत्त्यापूर्वजातीयोदीर्घोविधेयःप्रमिचेत्यत्रतुदीर्घनिहत्त्यापूर्वोव्यक्तिर्विधेयासाचकुमारीमित्यादौदीर्घाहत्तमि
त्यादौतुह्रस्वेतिनदोषइतिचेन्न एतादृशवैषम्यस्यैकयोगेऽलभत्वात् तस्मादुभयस्यापिपृथग्ग्रारंभोयुक्तः नन्वेव
मपिअत्रसवर्णग्रहणमास्तुदीर्घानुहत्त्यापूर्वजातीयविधानादेवग्रामणीइत्यादिसिद्धं मैवं व्यक्तिपक्षेकुमारीत्यादिविरोधा

मा॰

३॰

पत्तेः प्रथमयोरिति योगविभागः सवर्णदीर्घार्थः प्रथमयोरकः सवर्णदीर्घो भवतीत्यर्थः तेन हन्ता हन्तानिति सिद्धं अत्र त्वा
ङ्गणा प्राप्तः ततो दीर्घः ततः परत्वात् पूर्वसवर्णदीर्घः ततो ऽप्यपवादत्वात् पररूपं स्यात् न च सवर्णदीर्घत्वे पररूपबाधकमि
ति वाच्यं आङ्गणपणादेशौ उत्सर्गौ तयोर्हि सवर्णदीर्घपूर्वसवर्णादेशावपवादस्तेषामपि पररूपमपवाद इति वि
भागात् तत्र च हन्त्रादीनां द्वितीयकत्वायोः पररूपस्य तत्तृतीयकत्वायोः प्राप्तेः ननु योगविभागेऽपि कथं निर्वाहः एवं
तीत्यादौ सावकाशस्य पररूपस्य हन्तारित्यादौ यथा योगविभागेन बाधस्तथाग्निमित्यादौ सावकाशस्याप्यमि पूर्वत्वस्या
पि हन्तामित्यादौ बाधापत्तेः पररूपमात्रबाधे बीजाभावात् किं च पररूपस्य सवर्णदीर्घपूर्वसवर्णोभयबाधकत्वे योगः
विभागेऽकृतेऽपि निर्वाहकत्वापत्तेः मैवं योगविभागादन्यशास्त्रानिहतेः चतुर्थैकत्वाप्राप्ते नेतेन तृतीयकत्वाप्राप्तस्य पर
रूपस्य बाधात् नन्वेवं पररूपवदमि पूर्वत्वस्यापि तेन बाधापत्त्या हन्तामित्यादि न सिध्येत् हन्तानित्यादौ च नत्वं न स्यात्
योगद्वयस्वीकारे तस्माच्छसो न इति नत्वेनानन्तरस्य पूर्वसवर्ण इति द्वितीययोगेन विहितस्य गौरीः वाधून् इत्यादिस्थ
लीयपूर्वसवर्णस्य परामर्शप्रसंगात् प्रथमयोरिति योगविहितस्य व्यवहितस्य सवर्णदीर्घस्य तु ग्रहणत्वात् न चैकादे
शमात्रस्य तच्छब्देन परामर्श इति वाच्यं एतानाः पश्येत्यत्र औतोऽम्शसोरित्यनेन विहितादाकाररूपादेकादेशात्परस्या
पि नत्वप्रसंगात् मैवं अमि पूर्वश्चेत्यत्रापि योगविभागस्वीकारात् अमीति योगेनेत्यनुवर्तते प्रथमयोरित्यनेन प्राप्तस्य स
वर्णदीर्घस्य निषेधात् पूर्वश्चेति योगे चामीत्यनुवर्त्य पूर्वरूपविधानात् नापि हन्तानित्यादौ नत्वानुपपत्तिः तस्मादि
त्यनेनाकस्मात्निकसवर्णदीर्घस्य त्रिसूत्रीविहितस्य परामर्शात् न चाकः सवर्ण इत्येतद्विहितस्य परामर्शो व्यर्थ इति
वाच्यं प्रथमयोरित्येवं विहितेन न रूपेणोक्तयोगद्वयविहितस्यापि परामर्शोपपत्तेः वस्तुतस्तु मध्येऽपवादन्यायेन
योगविभागः पररूपमात्रबाधनेन नत्वमि पूर्वत्वमिति नेह योगविभागः एवं च प्रथमयोरिति योगविभागोऽपि नात्र

णीयः पुरस्तादपवादा इति न्यायेन पररूपस्याकः सवर्णे इत्येतद्बाधकत्वेपि प्रथमयोः पूर्वसवर्ण इत्येतद्बाधकत्वानुपपत्तेः वा
ध्यानो हि लक्षणानां भेदेनापेक्षायां प्रथमोपस्थित लक्षणबाधेन बाधकशास्त्रस्य चरितार्थत्वाङ्क्रमन्याययोः प्रवृत्तिः लक्षण
समुदायस्यापेक्षायां तु तस्यैकत्वान्न तथेति विवेकः नादिचीत्यत्रैच ग्रहणमपि जस्शसोः पररूपं नेत्यत्र लिंगं तत्र पररूप
प्रवृत्तौ हि नादित्येव ब्रूयात् पूर्वसवर्णदीर्घस्य छन्दोमात्रविषयकत्वेन तत्र च निषेधपर्यवसानोपपत्तेः जस्शसोरपि पूर्वसव
र्णदीर्घनिषेधो माभूदित्येतदर्थमिचीत्युक्तत्वात् तत्रापि पररूपप्राप्तौ तु पूर्वसवर्णस्य प्राप्तेरेवानुपपत्त्या निषेधस्य वैयर्थ्या
देव प्रवृत्तिसिद्धेरिचीत्यस्य प्रयोजनाभावात् न च दीर्घो जसि चेत्युत्तरार्थं तदिति वाच्यं तत्रैव दीर्घादिजसोरिति वाच्यत्वा
पत्तेः वस्तुतो दीर्घाज्जसीत्येव ब्रूयात् नियमार्थं चेदं दीर्घाच्छसि वा पूर्वसवर्णदीर्घो नान्यत्रेति तेन गौर्यौ वियादित्सिद्धं तस्मा
त्पूर्वसूत्रे इग्ग्रहणं जस्शसोः पररूपं नेति ज्ञापयति यत्तु समसमे अतो दीर्घो यञि सुपि च बहुवचने झल्येत् इति पठन्ति
तत्र बहुवचने इति योगो विभज्यते तत्र चातो दीर्घ इत्यनुवर्त्य बहुवचने अतो दीर्घो भवतीति व्याख्येयं ततप्रकारस्य भवति बहु
वचने झलीति द्वितीययोगस्यार्थः एवं च पूर्वयोगेन वृक्षास इत्यत्र प्रातिपदिकाकारस्य दीर्घे पररूपप्राप्त्यभावादकः स
वर्णे इति दीर्घः शसि तु प्रथमयोरित्यनेनेति विशेषः नन्वेवं वृक्षाम् इति स्थिते परत्वान्नित्यत्वाच्च बहुवचने इत्यत्वे कृ
ते नत्वाभावान्नुमन स्यात् सत्यं आज्जसेरसुगित्यत आदित्यनुवृत्त्या प्रकारेणादपि तु द्विधानानुग्रहणकशास्त्रेणाका
रेणादपि न त्विसिद्धेः न च कीलालपा इत्याकारेणादप्यापत्तिः आतो लोपस्य तद्बाधकत्वात् न च कीलालपानो ब्राह्मणकुला
नीत्यत्र नपुंसकलक्षणो ह्रस्वे बहुवचने इत्यात्वे कीलालपाम् इति स्थिते आतो लोपप्रसंग इति वाच्यं ह्रस्वनयापत्ति
ह्रस्वे सम्भोरित्यतो नपुंसकादित्यस्यानेनैव राक्छन्दसीत्यतो नेत्यस्य चानुवृत्त्या आतो लोप इत्यस्य चानुवृत्त्या नपुंसकस्यातो या
तो लोपो तस्यादिति व्याख्यानात् नुटः स्थलभवात् ॥ तस्माच्छसो नः पुंसि ॥ पूर्वसवर्णदीर्घात्परस्य शसो नकारोन्तादेशः

प॰

३१

स्यात् पुंसि हस्तात् पुंसि किं कुमारीः नन्वत्र पुंसमवेतसंख्यावाचकस्य शस इत्यर्थ उत पुंशब्दप्रकृतिकस्येति नाद्यः अकुंसा
न्यशेषत्वादेरसिद्धेः स्तनकेशवतीनर्तकस्य प्रातिभासिकस्त्रीत्वरूपस्य तत्र प्रतीतेः दाराच्छेदान्यशेषत्वादेरप्यसिद्धेः स्त्रीत्वेन न॰
पुंसकत्वेन च संख्यायाः प्रतीतेः वेषा वध्रिकाः खरकुटीश्च पशेषत्वादावतिव्याप्तेश्च वेदादिसहशब्दरूपबहुत्वसंख्याप्रतीतेः न
पुंकेनत्वे पुंसां वक्तृत्वे वेंसुशब्दादिष्यते स्त्रियो नपुंसकेन तथैवेह स्त्रीशब्दत्वं प्रसज्यते इति न द्वितीयः सूत्रायाः कुंडिन्या अरर
कायाश्चापत्यानि सूत्रान् कुंडिनान् अररकान् वापशेषत्वादावव्याप्तेः सर्वत्र गर्गादिभ्यो यञ् इत्यायनयो यञञोश्चेति यञो लु॰
क् लुकि इतलकीति टापो लुक् द्वितीये त्वागस्त्यकौंडिन्ययोरगस्तिकुंडिनच् इति यञो लुक कुंडिनीशब्दस्य च कुंडिनजिसा
देशः एषां च शब्दानां स्त्रीलिंगता तथा च तत्परस्य शसः पुंप्रकृतिकत्वाभावात् पुंत्वनिसंख्यावाचकत्वान्न त्वमिसृक्तो न पूर्वोक्तदो
षाणामाहमे; तदुक्तं पुंशब्दादिति चेदिह सूत्रापत्येन सिध्यति कुंडिन्या अररकापत्यं न सिध्यति पुंस्त्वापात्येन एव...ये

सुं

दोषाः पूर्वं चोदिताः इति प्राप्ते सिद्धांतमाह वार्त्तिककारः तस्मादर्थे भवेन्नेत वध्रिकादिषु युक्तवत् पकार्थ्यालिंगभेदान्न
गुणो वा लुप्यपि युक्तवत् अयमर्थः अकुंसादयोपि पुंशब्दा एव पुंसि वर्तमानत्वात् एवं षंडादयोपि नपुंसको भवतीत्यादि॰
भ्योपि पुंस्त्वानुगतस्यैव नपुंसकरूपार्थस्य प्रतीतेः स्त्रीसूत्रे पारिभाषिकस्यैव लिंगस्य सिद्धांतितत्वाभावात् स्वरादयोपि प्रत्य
यलोपे तत्रं पुंशब्दा एव पुंसि वर्तमानत्वात् वध्रिकादीनां तत्तथात्वेपि स्यापि युक्तवद् व्यक्तिवचने इति पुंसः स्त्रीत्वानिर्देशान्न
त्वाभाव इति ॥ नादिचि ॥ अवर्णान्तादिचि परे पूर्वसवर्णदीर्घो न स्यात् हरौ सहौ हरिरेवैति हरिः ॥ दीर्घाज्जसि च ॥ दीर्घा
ज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात् गौर्यौ गौर्यः प्राप्ति पूर्वसवर्णो भवत्येव गौरीः ॥ वाछंदसि ॥ दीर्घाज्जसि
इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो वा स्यात् पं नो देवी रभिष्टये ॥ अमि पूर्वः ॥ अकोऽमि परतः पूर्वरूपं स्यात् हरिं कुमारी
वधू ग्रवीत्यत्र हरिं नामी विशेषणं अजादावमीत्यर्थे प्रसंगो विशेषणं वैयर्थ्यात् मकारविशिष्टस्यैव पूर्वरूपापत्तेश्च किंच

सि॰ ब॰ ३२

3✓

दीर्घत्वमेव विशेषणं अभिप्रवीति अमवयवेऽचीति यावत्तथा चाऽकारमात्रस्य षष्ठीप्र[illegible]स्य पूर्वेण सह एकादेश इति दीर्घिताः
अन्यथा त्वजादावित्युपरंजकमात्रं प्रकरणसामर्थ्यात् नच मकारसहितस्य पूर्वरूपापत्तिः आदेः परस्येति अमाद्यकारस्यैव पर्यवसा
नादित्याहुः। वाछंदसीति वक्तव्यं। विकल्पविधानमेतत् नतु सूत्रे शेषः भाषायां पूर्वरूपानापत्तेः यमीं च यम्यं च शमीं व शम्यं
च नवेदं पूर्वरूपनिषेधादुत्सर्गस्य पूर्वसवर्णदीर्घस्यापत्तिरितिवाच्यं फलभेदाभावे विकल्पवैयर्थ्यापत्तेः तत्सामर्थ्याच्च
णादेशस्यैव ग्रहणात्॥ संप्रसारणाच्च॥ संप्रसारणादचि परे पूर्वरूपं स्यात् विद्ध इत्यत्र यकारादेश इकारः तेन सह तदुत्तरस्य
अकारस्य पूर्वरूपे एकादेशः वाछंदसीति वक्तव्यं मित्रा यत्र वरुणो ऽयजमानः मित्रा यत्र वरुण इज्यमानः संप्रसारणं पूर्वं यस्य
मानो गणग्रहणं कर्तव्यं यस्मिन्नंगे संप्रसारणं तत्रैवास्य प्रवृत्तिः पूर्वत्वं नतु भिन्नांगवर्तिनोऽपि तेन शकह्वर्थं वा रैरव्यर्थमित्या
दावर्थादिशब्दाकारस्य संप्रसारणात्परत्वेऽपि न पूर्वरूपं तत्र हि ह्विकिपप्रतिशकह्वशब्दोऽंगं अर्थप्रतिनर्थशब्द इत्यंगभेदः ह्वा
यानेरणकारस्य तु वकारस्थानिकसंप्रसारणेन सममेकांगावयवत्वाद्भवत्येव पूर्वरूपं अत्र वार्तिके सिद्धमसंप्रसारणादि
ति अस्यार्थः वाक्यस्य संप्रसारणसंज्ञा न तु वर्णस्य संप्रसारणशब्देन विहितत्वादौपचारिकस्यैव संप्रसारणव्यपदेशस्य त
त्र ग्रहणात् शकह्वर्थमित्यादौ तु उकाराकारयोः स्थाने पूर्वरूपेण उकारनिर्वृत्तिनैतत् संप्रसारणशब्देनेति नास्मिन्नौपचारिक
स्यापि संप्रसारणव्यपदेशस्याभावात्तदुत्तरस्य पूर्वरूपापत्तिः वर्णस्य संप्रसारणसंज्ञेति पक्षेऽपि यणः स्थानिकस्यैवेकः
संप्रसारणत्वेन तत्र ऽह्वयस्थानिकस्य नाप्यनवकाशत्वात् वर्णाश्रयेणेतद्ग्रहणात् अन्तरंगत्वाद्धलइति दीर्घस्य प्राप्त्यभावाच्च तथा च
संप्रसारणस्थानिके पूर्वरूपे तत्स्थानिके च दीर्घत्वमिति तत्रौपचारिकस्यापि संप्रसारणत्वस्यानुपपत्तेः हलइत्यत्र तु वव
न सामर्थ्यादेकादेशस्य पूर्वान्तत्वेनाश्रयणात्तथा व्यपदेश इति वै[illegible]स्य यत्तु सकृत्प्रवृत्त्याचरितार्थस्य शास्त्रस्य न पुनः प्र
वृत्तिरिति समाधानं तदपेक्षं व्यक्तं तरे प्रवृत्तेरवशक्यत्वात् तस्मात्समानांगग्रहणं विनापि समाधानं सिद्धं यत्तु पूर्वत्र स्या

दैनसंप्रसारणमितिनिषेधेनप्रवर्तेत हर्वंन्दृपस्तोभयस्यानिकत्वेनाऽसंप्रसारणत्वादिति तन्न निषेधसामर्थ्यादेतद्वद्भाव
स्यतत्रापिसत्त्वबत्वात् तत्रापिसमानांगग्रहणेसंप्रसारणग्रहणमिमात्रस्यापेक्षितत्वाच्चेतिदिक् आटोहृड्डेरियड् विप्रतिषेधेन
६४ अपिआ॒आतामित्यत्रआट्श्रेतिहृड्डिंवाधित्वापरत्वादियड् ततोवृद्धिः पुनःप्रसंगविज्ञानात् लादेशोऽन्तरंगः आटोविधानमित्या
श्रित्यायंविचारः लावस्थायामित्यस्यसिद्धान्तयिष्यमाणत्वात् येतिप्रश्रयीयतइत्यादौहयोरपिरितार्थत्वाद्विप्रतिषेधः नत्ववा
णिदंरामित्यस्यानपेक्षायामपिवृद्धिरंतरंगावर्णमात्राश्रयत्वादितिचेन्मैवं परत्वादियडःशाक्यत्वात् नत्वपरत्वादीटंवा
धित्वाइयडःस्तइति आटमादायैवविप्रतिषेधोपपत्तेः नचकृताकृतप्रसंगित्वादाटोनित्यत्वमितिवाच्यं [illegible]योपिनित्यत्वात् ६४
नचवृद्धेःकृताकृतपोरप्यडोनप्राप्तिरितिवाच्यं वृद्धेस्त्विद्विषातकत्वेप्याटस्तदभावात् यस्यचलक्षणांतरेणनिमित्तंविहन्यतेनत
दनित्यमितिस्वीकारात् अयंचात्रनिःकर्षः लक्षणयोर्नित्यानित्यत्वविचारोयस्यचेत्यादिन्यायः कस्मिन्कार्येप्रवृत्तेकिंका
र्यंप्रवर्ततेकिंनेतिविचार्योत्रनेति अतएवत्यदादिभ्योलुक्वक्तव्यइत्युक्तं नह्यालुस्णजलमित्यादौहिङ्क्त्यायप्रवृत्तौलु
कोपिनित्यत्वं अनोमितिलक्षणांतरेणलुकोनिमित्तविघातेपित्यदाद्यत्वमात्रेणविघाताभावात् प्रकृतमनुसरामः उभयोर्नि
त्यत्वेपिपरत्वस्याधिक्यादियड् ततआदृइतिअधीयातामित्यादिसिद्धं आङ्गुणादाऽभ्यासयोःसवर्णदीर्घत्वं अथआहूछाइत्य
त्रप्रथमंसवर्णदीर्घः ततआङ्गुणः उपेत्यरूपोपयत्तिरित्यादावप्येवं अन्यथापूर्वंगुणेअयावादेशप्रसंगात् वस्तुतोऽभ्यवा
देशोऽन्तरंगपरादिवद्भावेनअभ्यासग्रहणेनोपादानेहलादिशेषस्तुतोऽगुण इतिनदोषः नचोपसर्गाभ्यासयोर्गुणादेशास्यान
धा. व[illegible]वेननिपातनग्रहणेनग्रहणात् उपोऽस्त्यस्यगोदंतनिपातनत्वात्प्रकृतिभावापत्त्याऽवादेशोनस्यादितिवाच्यं पदांतत्वाभा
वात् सर्वांतत्वेनग्रहणेपिलक्षणप्रतिपदोक्तपरिभाषयाओदितिप्रगृह्यसंज्ञानुपपत्तेः नचाभ्यासकृतस्यपदोतोःस्यादि
तिवाच्यं नाभ्यासादि[illegible]त्यंतादिवद्भावनिषेधात् ननन्वेवमयोध्येत्यत्रापिपूर्वंगुणेओमाङोश्चेतिपररूपंगासिद्धं सत्यं स्वरे

पु

सि॰ ष॰
३३

33

देवप्रसंगात् अयमाशयो हि प्रत्ययस्वरेणोतोदात्तः आङ् उदात्तः गतिरनंतर इति पूर्वपदप्रकृतिस्वरोक्तेः अन्यदनुदात्तं सवर्णदीर्घे
सर्वोदात्तस्थानिकत्वादेकादेश उदात्तेनोदात्त इत्युदात्तत्वे तत उदात्तानुदात्तोभयस्थानिकस्य गुणस्य स्वरितो वानुदात्ते पदादावि
ति उदात्तस्वरितयोर्विकल्पः स्यात् आङ्गुणेनांतरमोमाङोश्चेति पररूपे तत्र तस्मिन्कर्तव्ये एकादेशस्वरयोरुदात्तस्वरितयोरसि
द्धत्वात्स्वरहीनस्यैव गुणैकादेशस्य उदात्तेन आङा सह पररूपप्रवृत्तेर्नोन रतस्याउदात्तत्वमेवे[illegible]तीति सिद्धमिष्टं किंच विप्र-
तिषेधांगीकारे आङि पररूपवचनमेव व्यर्थं स्यात् न त्वेतदंतरंगं बलीय इति ज्ञापनार्थं तत् न चात्र गुणसवर्णदीर्घयोः पदद्व
याश्रितत्वसाम्यान्नांतरंगबहिरंगभाव इति वाच्यं यान्त्युपसर्गयोः कार्यमंतरंगमिति गुणस्यैवांतरंगत्वात् आद्येत्यस्याधिक
रणार्थं तया क्रियान्वयित्वादाङा समन्वयाभावेन स उआदित्यवस्यार्थमेव यान्त्युपसर्गयोः पृथग्भावकल्पनं वस्तुतः संग्रा-
मयतीतिवद्यान्त्युपसर्गसमुदायस्यैवाङ्ग्रहेरस्य क्रियाविशेषवाचित्वमिति सिद्धांतात् पूर्वमाङ्गुणप्रवृत्तौ हि हडि वा य-
नार्थं पररूपवचनोक्तज्ञापनसमर्थं विप्रतिषेधाश्रयेतु सवर्णदीर्घेणांतरंगेण न सिद्धे पररूपवचनेन गुणस्य प्रथमप्रवृ
त्तिं विनानुपपद्यमानेन सङ्कार्यं ज्ञापकं भवति प्रयोजनं पूर्वं सवर्णपूर्वत्वतहिलोपोनङ्थे ङिसि नुङि णलोमम अंतरं
गबहिरंगलक्षणाहर्णिविकारात् तथाहि अयिजैश्चेति स्थिते आवादेशं बाधित्वा पूर्वं सवर्णदीर्घः एकपदाश्रयत्वा-
दंतरंगत्वात् शाकम्र्धमर्थाभिरत्यत्र सवर्णदीर्घं बाधित्वा संप्रसारणं चेति पूर्वत्वं अहारि तन्मन्येत्यत्र सवर्णदीर्घं बाधि
त्वा विणो लुगिति णिलोपः पचहि इदं इत्यत्र सवर्णदीर्घं बाधित्वा अतो हेरिति हिलोपः हलन्तमाप्रवेत्यत्र सवर्णदीर्घं बा-
धित्वा इनादेशः हलपप्रवेत्यत्र पूर्वरूपं बाधित्वा उ.यं: । ऊौत्यदाद्यत्वे कृते तत इदं इत्यत्र सवर्णदीर्घं बाधित्वा यिनादेशः
अग्नि इदं इत्यत्र सवर्णदीर्घं बाधित्वा डेरौत्वं यानेणिलियाश्रमप्रवेत्यत्र सवर्णदीर्घं बाधित्वा आनडौणल इन्यौत्वं इति चेत् मै
वं विप्रतिषेधादेव सिद्धेः उक्तज्ञापनानुपयोगात् न तु हलाप्रवेत्यत्र नडपयोगः हलप्रस प्रवेति स्थिते पूर्वं सवर्णदी

वेस्यात्तेरेरिम्नत्वस्य च प्राप्तौ अंतरंगस्य पूर्वसवर्णदीर्घस्यैव प्रवृत्तेः विप्रतिषेधेन परत्वाङुत्वमेव स्यात् अतः परस्यैरेः सत्वा
त् मैवं कृतेऽत्र रमेवोत्वप्राप्तेः पूर्वसवर्णदीर्घं प्रतिकृतत्वस्याऽसिद्धत्वाद्वत्वात्पूर्वमेव पूर्वसवर्णदीर्घप्रवृत्तेः नचैवं हृद्योत्र
सुत्वेऽपि कृत्वमसिद्धं स्यादिति वाच्यं तत्रवचनप्रामाण्यात्तत्प्रवृत्तेः ॥ एङः पदान्तादति ॥ पदान्तग्रहणमुत्तरार्थं ङसिङसोरित्या
रंभाद्येवास्य पदान्तविषयकत्वसिद्धेः पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् हरेऽत्र हरोऽत्र एङः किं दध्यत्र पदान्तात्किं हर
यः गोपगावः जसि चेत्यो गुणः इति चग्रणे कृते माभूत् अतीति किं विष्णावह नपरः किं वायवायाहि ॥ ङसिङसोश्च ॥ पदान्तत्वा
भावादप्राप्ताविदमारम्भः एङो ङसिङसोरति पूर्वरूपं स्यात् हरेः शंभोः घेर्ङितीति गुणः नतोनेन पूर्वत्वम् अतीति किं सका
रविशिष्टस्य माभूत् वस्तुतस्त्वादेः परस्येति सिद्धं ॥ ऋत उत् ॥ ऋकारान्ताङ्ङसिङसोरति पूर्वपरयोरुत्वं स्यात् पितुर्मा
तुः अत्र रपरत्वाडरित्यादेशः रात्सस्येति विभक्तिसकारलोपः रेफस्य विसर्गः नन्वेवमातः कृपेत्यादाविड्डपथस्य चेति
सत्वापत्तिः विसर्गस्य प्रत्ययसंबंधित्वाभावादिति वाच्यं कस्कादिष्वभ्रातुष्पुत्रशब्दपाठेन तदप्रवृत्तेर्ज्ञापितत्वात् ॥ ख्य
त्यात्परस्य ॥ कृतयणादेशयोरिदमनुकरणं सख्युर्यः पत्युर्न इति लिंगात् तेन ह्रस्वदीर्घसाधारणं तेन सुख्योदय्यादिसा
दौ नातिव्याप्तिः नचासखीयति सुतीयतिभ्यां क्विपि सख्युः सुत्युरित्यादावव्याप्तिः कृतयणादेशाभ्यां खितिखीतीशब्देभ्यः
परस्य ङसिङसोरकारस्य उत्स्यात् यणादेशविशिष्टानुकरणं किं अतिसखेरागच्छामि अतिसखेः स्वमित्यादौ माभूत् स
खिपतिभ्यामित्युक्ते त्वत्रापि स्यात् बहुव्रीहिः कथं कर्मधारयो वा नञ्जनादिति समासान्तनिषेधात् नचात्रप्रसखीति पि
सेत्वानिषेधप्रसंगः ग्रहणवता प्रातिपदिकेन तदन्तविध्यभावात् ननु सखिपतिभ्यां विहितौ यौ ङसिङसाविति व्याख्याना
न्नात्रातिव्याप्तिरिति चेत्सत्यं सखीयतोरिभ्यः किं वेतेभ्यो ङसिङसोरव्याप्तेस्तथापि समत्वात् लून्युः प्रस्तोम्युरित्यादय उदाहा
र्यं नत्वस्याऽसिद्धत्वाद्यान्यशब्दसत्वात् शुकीयति पकीयतिभ्यां तु प्रसंयोगपूर्वस्येति यणो निषेधात् शुकियः पकियः

तीयङः पूर्वस्य ह्रस्वानोत्वं स्यादेतत् सत्वीयत्यादिभ्यः क्विपि अल्लोपे यलोपे वा नोलोपस्य स्थानिवत्त्वादिको यणवीतियत्वीत्लोपो
वो र्वलीति यलोपप्रसंगः न वात्रापि स्थानिवत्त्वं यलोपे तन्निषेधात् अनादिष्टादचः पूर्वत्वाभावाच्च प्रत्यययकारस्य तथा
त्वेपि इकारस्यानिकस्य तदभावात् मैवं कौलमंतस्थानिवदिति तन्निषेधात् ॥ अतो रोरप्लुतादप्लुते ॥ अप्लुतादतः परस्य
रोरुत्वं स्यादप्लुतेऽति परे वृक्षोत्र अतः किं हरिरत्र तपरः किं वृक्षा अत्र अप्लुतात् किं सुस्रोता३ अत्र न्वसि इह ऐतु३ तेचेति प्लु
तः रोः किं प्रातरत्र अति किं शिव इह तपरत्वे किं तिष्ठतु पय आ३ अग्निदत्त गुरोरनृत इति प्लुतः न त्वत्र तपरत्वेनैव दीर्घव्यावृ
त्तस्यापि व्यावृत्तेरुभयत्राप्यप्लुतग्रहणं व्यर्थं न च प्रकरणे प्रकृतिभावविधानेन ज्ञापकेन प्लुतस्य स्वरसंधौ प्लुतस्यासि
द्धत्वात्तत्परत्वेन तद्वारणमिति वाच्यं सिद्धत्वज्ञापनात् न च प्रकृतिभावमात्रविषयकं ज्ञापकमिति वाच्यम् संहि
ताधिकारविहितकार्यसामान्यविषयकत्वात् अन्यथा अप्लुतपदोपादानेपि दोषतादवस्थ्यात् मैवं प्रकृतिभावस्यैव
स्वरसंधिमात्रे वा तदसिद्धत्वमित्यंगीकारात् अप्लुतवचनसामर्थ्यादेवात्रासिद्धत्वानुपपत्तेः तपरत्वस्य तद्दीर्घव्यावृ
त्त्याचरितार्थत्वात् यद्वाप्लुतभावित्वमेवात्राप्लुतपदार्थः नन्वेवं पयो ३इ इ आयेहगा३ तेचेति प्लुतो द्वितीयगुरोरनृत इति
प्रयोग परत्वयायकारा कारस्य गुरुत्वादिति परं विशेषः ॥ पयोदित्यादौ उत्वं तत्स्यात् अदति ददाति भ्यां किंवो प्रकृ
तसूत्रेण हशि चेत्यनेन चोत्वं ब्राह्मणाः यऽ इति पूर्वरूपं उभयत्रापि प्लुतभावित्वात्प्रतिषेधप्रसंगात् मैवं असिद्धं बहि
रंगमिति प्लुतस्यासिद्धत्वात् उत्वस्यैव प्रथमं प्रवृत्तेः न चैवं सुस्रोता अत्रेत्यत्राप्युत्वापत्तिः तत्र प्लुतस्यैवांतरंगत्वात् नन्व
सिद्धत्वे प्रमाणाभाव इति चेन्मैवं नन्वत्र पूर्वत्रासिद्धत्वेनैव समाधानमस्तु अथाश्रयात्सिद्धत्वेन तद्दोषस्तु हितनो॰
बहिरंगासिद्धत्वस्यापि बाधोक्तविनिगमकाभावात् मैवं प्रत्यासत्त्याप्लुतादिति प्रतिषेधेन पूर्वत्रासिद्धत्वस्यैव बाधा
त् बहिरंगासिद्धत्वस्य विप्रकृष्टत्वात् ज्ञापकलभ्यत्वात् पयो इत्यादौ त्वनाश्रयात्सिद्धत्वं बहिरंगपरिभाषयाप्लुतस्या

सिद्धमित्यस्य चाग्रहणे: किंच येननाप्राप्तिन्यायेन हल्वर्ज्जं प्रसिद्धत्वस्यैव बाधा यत्रोत्वं तत्र बहिरंगपरिभाषाप्रसंग इति नि
यमाभावात् ॥ हशिच ॥ अप्लुतादप्लुतस्य रोरुत्वं स्याद्धशि परे शिवोवंद्यः नचउत्वस्य स्थानीयतयाप्राप्त्यमयोरितिसूर्वस
वर्णदीर्घापत्तिः नादिचीतिनिषेधात् आङ्गत्वस्यैवग्रहणे: एवं सर्व्वसूत्रेपि बोध्यं हशि किं हत्तालिशति ॥ प्रकृत्यांत:
पादमव्यपरे ॥ इह प्रकृत्यांत:पादमित्यपि पाठ: इकोसवर्णे इत्यत्र प्रकृत्येत्यनुकृष्यत इति भाष्योक्ते: नेत्यपि पाठ: आमा
णिको भाष्यानुरूपत्वात् पादशब्द ऋक्पादपर: भाष्यव्याख्यानात् वाछंदसीत्यतो मंडूकप्लुत्याछंदसीत्यनुवृत्ते: ऋक्पाद
मध्यस्थस्यैङोन संधि: स्यात् वकारयकारान्यतरान्यंतरपरत्वाभावे नतस्मिन् गतिपरे उपप्रयंतो अध्वरं सुजाते अश्वसूनृते
निमित्त
अध्वर्यो अद्रिभि: सुतं शुक्रं ते अन्यत् नवयचीत्येवास्त्विति वाच्यं इज्यवन: एतेनाषाडयुध्योसाकेसेना अवत प्रयुक्त इत्या
दावतिव्याप्ते: पादग्रहणसामर्थ्यानुनिमित्तनोरेकपादस्थत्वलाभ: एते द्रवेड: पूर्वं पादांते अस्माकमित्यकारस्थत्व पर
पादादौ वत्वेनैदोष: अव्यपरे किं ते वदन् नतु प्रकृत्येत्येव पादोप्युक्त: अप्यादेशादेरपि निवृत्ते: नेत्यत्र तु किं निषेधे सर्व
रूपं वाच माश्रित्य पत्वाभेन दा अकारे पररेयत्वाभेन दा नाय: उपप्रयंतो अध्वरमित्यादौ पवोपवाया व इत्यस्य प्रसंगात्
नद्वितीय: अनवग्रि रुषसामग्र मख्यो दित्यादौ यणादेशस्यापि निषेधापत्ते: नतृतीय: कालोपपस्य: शातयारोपयम णिरित्यादा
वुत्वस्यापि निषेधप्रसंगात् नैवं पडो: गतिपरे यत्वाभंनस्यानिषेधात् नवत्र पड: इत्यनुवृत्तौ अतो रीत्यत्राप्यनुवृत्ति: स्यात्
तथा च अग्रे रत्व वायो रत्वेत्यत्राप्येङ: अपरस्य रोरुत्वं स्यात् अतन पड: अपरस्य रोरुत्वं स्यादिति वाक्यार्थप्रसंगात् नैवं पदांत सेव
इत्यपडोनुवृत्ते: पदांतादेङ: अपरस्य रोरप्रसिद्धेस्तत्रायोग्यतया नानुवृत्यातिप्रसंगानापत्ते: ॥ अव्यादवस्यादवक्रमुरवत्ताय
मवंतवस्यच ॥ अतोवकारयकारपरत्वात्सर्व्वसूत्रस्याप्रवृत्तावारंभ: एषु परेषु पड: संधिर्न स्यात् वसुभिर्नो अव्यात् अ
वरुणे आशीर्लिङ् मित्रमहो अवद्यात् पंचम्येकवचनांते माशिवासो अवक्रमु: अवसर्व्वस्यक्रमेर्लिटि उस् छंदसिवेति

नह्निवे अवक्रमुरिति पाठो लक्ष्यविरोधादुपेक्ष्यः तेनो अव्रत ह्रुडो ह्वृज्ञो वा लङ् ॥ मंत्रे यसेति ह्वे लुक ॥ कस्माद्वादेशः ऋकार
स्य यणादेशः शानयारो अयं मणिः तेनो अवेत ऋशिकासो अवस्यवः अवीरमनंतात् कश्चित्काश्छंदसीत्युःजसि रूपं नत्वने
नो वेत्वपितरोह वेपुइत्यादिकमपि मिति चेत्तस्य छांदसत्वात् पतेन नैकृणोभिरित्यादिकमपि व्याख्यातं ॥ यजुष्युरः ॥ यजु
षि पादाभावात् प्राप्त्यभावारंभः उरो अंतरिक्षं ॥ आपोजुषाणोवृष्णोवर्षिष्ठेअम्बेअम्बालेअम्बिके ॥ वालिके पूर्वे यजुषि आप इत्यादीनां वत
र्णां अंबिके पूर्वे योऽम्बे अंबाले इत्येनयोरेङः तिपरे प्रकृत्या स्यात् आपो असमान्मातरः जुषाणो अग्निराज्यस्य वृष्णो अश्वस्य रेतः
वर्षिष्ठे अधिनाके अंबे अंबिके अंबालिके अत एव निपातनादंवार्थनद्योर्ह्रस्व इति ह्रस्वस्याप्यभावः ॥ अंग इत्यादौ च ॥ अंगशब्दे य
एङ् सोऽतिपरे प्रकृत्या अंगशब्दादौ योऽकारस्तस्मिन्परे च एङ् प्रकृत्या स्यात् यजुषि अंगे अंगे हवीं हषा प्राणो अंगे अंगे दिवामव
त् ॥ अनुदात्ते च कुधपरे कवर्गधकारौ परौ यस्मात्तस्मिन्ननुदात्ते अति परे एङ् प्रकृत्या स्याद्यजुषि अयं सो अग्निः अयं सो अध्वरः
अनेनोदात्तावेतौ शेषनिघातात् अकारोऽनुदात्तः अनुदात्ते किं अधो अग्ने रुद्रे अग्रशब्द आद्युदात्तः कुधपरे किं सोऽयं ॥ अवपथासि
च ॥ अवेत्यविकृत्यास्य अवपथासृ इत्यस्यानुकरणं समर्प्यते अनुदात्ते अकारादौ अवपथाःशब्दे परे एङ् प्रकृत्या यजुषि त्री रुद्रे
भ्यो अवपथाः लिट् तिङ् इति निघातः अनुदात्ते किं यद्रुद्रेभ्यो अवपथाः निपातैर्यद्यदीति निघातप्रतिषेधः ॥ सर्वत्र विभाषा गोः ॥
लोके वेदे च गोरति प्रकृतिभावो वा स्यात् गो अग्रं गोऽग्रं नेति पाठेन सर्वत्र पूर्वस्यैवायं विकल्पः सर्वत्रेति प्रक्रमात् छंदोमात्रवि
षयकत्वशंकावारणार्थं एङंतस्य गोरिति व्याख्यानात् चित्रग्वग्रमित्यादौ न प्रसंगः हे चित्रगो अग्रं इत्यत्रापि न प्रतिपदोक्तस्ये
ङोऽग्रहणात् ॥ अवङ् स्फोटायनस्य ॥ एङंतस्य गोरचि परे अवङ् वा स्यात् स्फोटायनग्रहणं पूजार्थं विकल्पस्य प्रकृतत्वात् ङि
त्वादंतादेशः गवाग्रं गोरच्यवचने स्वरसिद्ध्यर्थं अपमर्थः गोशब्दो ह्यसुप्तिपदे किं यइत्येनोदात्तः सुप्तिपदे तु प्रत्ययस्वरे
ण प्रकृत्या उभयथाप्योकारस्योदात्तत्वात् तदादेशस्याववङोऽपि तथात्वे अशब्दस्याप्याद्युदात्तत्वादंतरतमत्वात्सवर्णदीर्घस्यो

दात्तत्वे गवाग्रशब्दो मध्योदात्तः स्यात् अकि कृते त्वकित्वादंतावयवत्वे आगमत्वादनुदात्तत्वे च सर्वं भक्तत्वादोकारस्यापदान्तत्वा
भावादवादेशे सवर्णदीर्घः इत्याद्युदात्तत्वं सिद्धं न च गोशब्दव्यपदेशिवद्भावेनाद्युदात्तत्वमप्यस्तीति वाच्यं प्रातिपदिकस्यांतो
दात्ततायाएव शास्त्रे प्रसिद्धत्वात् न च सुप्यनिपद्ये ओकारस्य प्रत्ययस्वरेणाद्युदात्तत्वमस्त्वेवेति वाच्यं आदेशस्य प्रत्ययान्यत्वात् डो
कारे चाद्युदात्तत्ववदंतोदात्तस्यापि सत्वात् आयनवादिसूत्रस्य शास्त्रातिदेशत्वे हि आद्युदात्तत्वमिति शास्त्रेणैवोदात्तत्वविधाने भव
दुक्तं स्यात् मतु कार्यातिदेशएव आदित्वोतत्वव्यतिरेकेपि ओकारस्य उदात्ततायाएवातिदेशात् ओकारस्यादित्वव्यपदेशाभा
वे च तदादेशस्याद्युदात्तत्वनियमस्य हरापालनात् पूर्वीयेणान्तोदात्तत्वस्यापि प्रसक्तेः भाष्यकृतस्तु प्रवडि स्याद्युदात्तनिपात
नेकरिष्यते तेन प्रकृतिस्वरबाधः एकश्रुत्या स्वराणां पाठात् आद्युदात्तस्य विवक्षितत्वात् इत्याहुः नन्वेवमपि गवाक्षि गवा
क्षीत्यादौ समासस्वरेणांतोदात्तत्वेन स्यात् निपातनस्वरेण प्रकृतिस्वरस्येव समासस्वरस्यापि बाधप्रसंगात् समासस्वरस्य
परत्वादवङः पूर्वमेव प्रवृत्तेः सत्यं उपदेशिवद्भावस्य वक्तव्यत्वात् पूर्वमवङि ततः समासस्वरः तस्य सतिशिष्टत्वाद्बल
वत्वादंतोदात्तत्वविधानात् ॥ इंद्रे च ॥ गोरवङ् स्यात् गवेंद्रः नित्यमेतदारंभसामर्थ्यात् नन्वजादाविंद्रशब्दे परे इत्यर्थे गवेंद्र
यज्ञे वीहीत्यत्र न स्यात् इंद्रयज्ञशब्देंद्रशब्दयोर्भिन्नत्वात् तस्मादिंद्रादाविति वक्तव्यं इंद्रशब्द आदिर्यस्य तस्मिन्परत इत्यर्थः
न चैवं केवले इंद्रशब्दे परे न स्यादिति वाच्यं व्यपदेशिवद्भावेन सिद्धेः व्यपदेशिवद्भावो प्रातिपदिकेनेत्यस्य प्रत्ययविधिमात्र
विषयकत्वात् सत्यं इंद्रशब्दस्याद्यो च तस्मिन्परे इति विशेषणविशेष्यभावव्यत्यासेन व्याख्यानात् ॥ प्लुतप्रगृह्या अचि नित्यं ।
प्लुताः प्रगृह्याश्चाचि नित्यं प्रकृत्या स्युः सुश्लोका३ अत्र न्वसि हरी एतौ विष्णू इमौ गंगे अमू इत्यादि नित्यग्रहणं शाकलनिवृ-
त्त्यर्थं प्लुतप्रगृह्यरूपा एव प्रकृतिभावभाजो भवंतीति न तु रूपांतरापन्ना इत्यर्थात् यद्वा एषामयमेव प्रकृतिभावो न तु कार्यां
तरविशिष्टः सूत्रांतरप्रसक्त इत्यर्थः एवं च पूर्वसूत्र एव नित्यपदपाठो भाष्यविरुद्धः ननु चीति व्यर्थमधिकारादेव तल्लाभ-

भात् मैवं आदेशनिमित्तेः विपरन्तपक्षे प्रकृतिभावो न त्वंतरे पीत्येतदर्थत्वात् तेन ग्रानूऋस्य कृजनीति सिद्धं ज्ञानुऽऋस्यद्
तिष्यितेऽज्ञ इति गत्यसंत्ता अत्र प्रकारे सवर्णेण सह सवर्णादीर्घोपि न स्यात् अनुपादाने त्व यस्मिन्नादेशे यस्याचोः निमित्तत्वं तस्मि
न्न विसन्नादेशो न भवतीत्यर्थः अत्र च सवर्णदीर्घं प्रत्यकारस्यानिमित्तत्वात्संभवत्येव एकादेशस्य परादित्वेन ग्रहणात्स्वर
त्वात्त्वयणादेशः प्रकृतिभावप्रवृत्तेः मयउञोवो वेति वकारपदेशान्वस्य कृजनीति न तु लुप्तस्यासिद्धत्वात्तत्त्वमेव स्वर
संधिप्रसंगः मैवं प्रकृतिभावविधानसामर्थ्यादसिद्धत्वाभावे परत्वाल्लुप्तस्यैव प्रथमं प्रवृत्तेः नन्वेवं शाले देत्यत्रापि गुणो वा
धित्वा परत्वाल्लुप्तः स्यात् मैवं बहिरंगपरिभाषयाल्लुप्तस्यासिद्धत्वात् न च बहिरङ्गाय यथोपेतत्वात् नन्वेवं देवदत्तात्र अत्र त्व
मीत्यत्र लुप्ते कादेशयोर्विप्रतिषेधो न स्यात् एकपदाश्रयस्य लुप्तस्यांतरंगत्वात् उवर्णादीर्घस्य पदद्वयाश्रयतया बहिरंग
त्वात् सत्यं चिंत्यमेवैतदिति कैयटः ॥ आङोनुनासिकश्छंदसि ॥ अभ्र आँ अपः अनर्थकस्येति वक्तव्यं वाऽऽलकसिद्धार्थकथ
नं चैतत् नेह ईङ्ङोवाङ्ग्भामानवत् समस्मुत्काधिकरणाहृतित्वान्नत्राङो नर्थकत्वं अत्र तत्क्रियाविशेषणत्वात्सार्थकत्वं ॥ इको
सवर्णे शाकल्यस्य ह्रस्वश्च ॥ इकोऽसवर्णे चि परे प्रकृत्याः स्युर्वा । वक्तव्यः चक्रि अत्र चक्र्यत्र पदेचकात्र वकारोऽत्र ह्रस्व
पक्षेपि प्रकृतिभावसमुच्चयार्थः अत्र भाष्ये ह्रस्वविधिसामर्थ्यादेव तत्सिद्धिः दीर्घह्रस्वयोर्यणादेशविशेषाभावात् तद्वै
यर्थ्यापत्तेः नच दध्यत्रेत्यादौ प्रयोजनाभावेन ह्रस्वविधेरप्रवृत्त्यानत्र प्रकृतिभावार्थश्चकार इति वाच्यं स्वरसंधिबाधा
र्थं तत्रापि प्रवृत्तेर्बाधकाभावात् सिन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्यः अयं नेयो निर्देशत्वियङ्स्तोर्थं सत् चस्य स्था
देशः सिद्धत्वात्पदसंज्ञायां भत्वाभावाद्दोर्गुणाभावे यणि नित्याधिकारविहितोऽस्वपदविग्रहो वा नित्यसमासः व्याकरणे स्वश्चः
नित्यग्रहणपरित्यागात्समासमात्रेयं निषेध इति भाष्ये वाप्यश्वः नद्यातिः स्थूलस्थपेति समासः संज्ञायामित्यस्यानित्यत्वा
त् ईषा अक्षादिषु छंदसि प्रकृतिभावमात्रं वक्तव्यं ईषा अक्षा का ईमेरेपिशागिला ॥ ऋत्यकः ॥ ऋतिपरे अकः प्रकृत्याः

सवीचकस्यः सवर्णदीर्घमनिरोगार्थं चारंभः होतृलृकारः खट्वलृकारः इति ऋत्यकः स्वाउपसर्गाद्वृद्धिर्विप्रतिषेधेन ऋत्यकस्यावका
शउक्तः उपसर्गादृतीति वृद्धिलृकारस्याभावपक्षे सावकाशा ऋत्यकः प्रसंगे पूर्वविप्रतिषेधेन वृद्धिः उपार्च्छति वस्तुतोपार्हय
हणेनैवेदं सिद्धं ॥ अप्लुतवदुपस्थिते ॥ उपस्थितोऽनार्षइतिशब्दः तस्मिन्परे प्लुतोऽप्लुतवद्वा सुश्लोका३ इति सुश्लोकेति
वदुवनेप्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधेहिप्रगृह्यप्लुतप्रतिषेधप्रसंगोन्येन विहितत्वात् अयमर्थः प्लुतएवातिदिश्य
तोकिमप्लुतवदित्यतिदेशेन मेवं अग्नी३इतीत्यत्रापि प्रतिषेधापत्तेः अप्लुतवदित्यतिदेशात्त्वत्र प्लुताश्रयस्य प्रगृह्याश्र
यस्य च प्रकृतिभावस्य प्राप्त्याप्राप्यस्याने न विधेयेपि द्वितीयस्य प्रगृह्यत्वेऽप्लुतश्रवणंसिद्धेः ॥ ई३ चाक्रवर्मणस्य ॥ ई३ इति प्लुतः
स्यानुकरणे ई३प्लुतोऽप्लुतवद्वा चिनुही३ इदं चिनुहीदं सुनुही३ इदं सुनुहीदं यद्यपीहोपस्थितपदान्तर्गमो प्राप्तविभा
षात्वं न त्विहनैवं पूर्वविप्रतिषेधात्प्राप्तविभाषात्वं परविप्रतिषेधादुभयत्रविभाषात्वं चेतिपक्षत्रयं संभवति तथापि
त्ततीयपक्षएव सिद्धान्तः तदुक्तं भाष्ये ऽत्रानुपस्थितार्थमिति पूर्वविप्रतिषेधापेक्षया परविप्रतिषेधस्यैवौत्सर्गिकत्वात्
चिनुही३इति चिनुहीत्यादावपि परत्वादयमेव विकल्पः अत्र भाष्ये ईकारग्रहणेन नार्थः अविशेषेण चाक्रवर्मणस्या
चार्यस्याप्लुतवद्भवतीत्येव । वशाः३ इयं वशेयमिति एतेन यं प्रब्रजेन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातरआज
हाव पुत्रेतीति भागवतमपि व्याख्यातं ॥ दिव उत् ॥ दिव उकारोन्तादेशः स्यात् पदान्ते द्युभ्यां द्युभिः वकारस्योठि कृतेऽय
मादेशः क्विनीत्यत्र हन्तेस्तत्रानेगीकारात् अन्यथा व्यंजनस्याऽर्धमात्रिकतया मात्रिकस्य ह्रस्वस्यान्तरतमत्वान्नपरत्वे वे
यर्थ्यात् नचतत्यापि विधीयमानत्वादेवन दीर्घग्राहकत्वमिति वाच्यं उकारस्य विधीयमानस्यापि सवर्णग्राहकत्वमि
त्यस्य ज्ञापकत्वात् तेनाद्युभ्यामित्यादौ दीर्घस्य दीर्घ इति सिद्धं ॥ एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ॥ अककारयोर
नयोर्यः सुस्तस्यलोपस्याद्धलि परे नतु नञ्समासे एषतेरुद्रभागः सएषोरुद्रयातिनः अकोः किं एषकोरुद्रः सको

सि॰ प॰ ३२

37

विस्तः नचात्र शास्त्रान्तरत्वादेव न प्रसक्तिः तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति ज्ञाप्यत्वात् ननु नेदमदसोरकोरिति ज्ञाप
कमस्तु अन्यथा इमकैरित्यत्राकज्ञेतस्य शास्त्रान्तरत्वादेव भिसऐसादेशनिषेधप्रसक्त्यभावात् सत्यं इदमदसोः कादिति न्या
सेकृत्वाऽनयोः कात्परस्यैव भिसऐसादेशो भवतीति नियमस्यैव तत्र भाष्यकृता वक्ष्यमाणत्वात् अनञ्समासे किं अनेषः
अनीयते संप्रतिसोऽप्यसः परैः हलि किं एषएवमनलः किमिमौ दे कश्चित्सएवासियनेजयस्तु अत्र सुः स्यलुप्तविभक्ति
कत्वात् एतत्तदर्थगतसंख्याभिधायिनः सोरित्यर्थः नाम्योविहित इति व्याख्याने परमसद्दातीत्यादावव्याप्तेः अत्र वाः
नञ्समास इति लिंगं अर्थद्वारकसंबंधानाश्रयेन तत्र प्रसक्त्यभावात् इत्याहुः ॥ स्यश्छंदसि बहुलं स्यदेः सोर्बहुलं लोपः
स्यात् छंदसि एष स्य वाजी क्षिपणिं तुरण्यति ॥ सोचि लोपे चेत्पादपूरणं ॥ सइत्यस्य सोर्लोपः स्यादचि लोपे सत्येव पाद
पूरणं चेत् बहुलग्रहणस्यैव कारार्थकत्वमाश्रित्यायमर्थो लभ्यते सेमामविड्ढि प्रभृतिं पादोत्र ऋच एवेति हरिः श्लोक
स्यापीत्यन्ये सैष दाशरथी रामः लोपे चेदिति किं स एव जातः स जनिष्यमाणः पचेति किं सोहमाजन्मशुद्धानां प्रायि
केचैतत् सास्मा अरमित्यादौ लोपव्यतिरेकेणापि पादस्यैव दृश्यमानत्वात् ॥ सुट्कात्पूर्वः ॥ वक्ष्यमाणः सुट् ककारा
त्पूर्वः स्यात् ॥ आदेनेन । करोतेः किरतेश्च ककारादित्वात् सुट् श्रुतिश्चेनायवयवत्वादेव सिद्धे नच संचस्करतुरित्यादौ च
द्विर्वचने कृते अभ्यासात्पूर्वं प्राप्तिनिवारणाय कात्पूर्व इत्युक्तमिति वाच्यं परत्वात् द्विर्वचनात्पूर्वमेव सुट् प्रवृत्तिः विभे
दसंस्करोतीत्यादौ द्वयोः सावकाशत्वात् सुटि कृते पुनः प्रसंगविज्ञानात् स्कृ इत्यस्य द्विर्वचने शर्पूर्वाः खय इति ककार
शेषे कृते च रूपसिद्धेः नचैवं स्थाने द्विर्वचनपक्षे स्कृ इत्यस्य शास्त्रान्तरत्वात् पुनः सुट्प्रसंगः जातिपक्षे पुनः प्रसंगावि
ज्ञानात् एवं द्विर्वचनस्यापि अनभ्यासस्येत्यस्य प्रत्याख्यानत्वात् साभ्यासायः प्रत्ययो विधीयते न तत्र तन्निषेधप्रवृत्ते
श्च तथा च सुटि कृते द्विर्वचने कृते सुडिति च ककापत्तिरिति चेन्मैवं सकृत्प्रवृत्तस्यैव लक्षणस्य चरितार्थत्वात् व्याकि

पदे सकृद्गतिन्यायावतारात् न किं कात्स्न्र्येन ग्रहणेनेति प्रामेभिर्धीयते पदद्वयाश्रयत्वेन सुटो बहिरंगत्वात् एकपदा
श्रयत्वेन हि द्विर्वचनस्यान्तरंगत्वात् असिद्धं बहिरंगमन्तरंगे इति तत्स्य बलत्वविरहाद्धि प्रतिषेधानुपपत्तेः अभ्यासात्पूर्वं
तदापत्तिवारणाय कात्स्न्र्येन ग्रहणस्यावश्यकत्वात् अडभ्यासव्यवायेऽपि संख्याने अडभ्यासव्यवायेपीति सूत्रपाठाभावप
क्षेयमारम्भः परत्वाद्विकरणान्तरस्याऽङामेकृते तस्यथान्ते प्राप्यनवयवत्वात् तेन व्यवधानात्समोऽन्तेतरः करोत्यादिने
भवतीति वचनमेतत् समस्करोत् समस्कार्षीत् संचस्करतुः संचस्करुः द्वित्वस्य प्रथमं प्रवृत्तेः सकृत्त्वात् स्यादेतत्
यत्र कात्स्न्र्येन भवति तस्मिन्करोतौ सुड्भवतीति पदे कात्स्न्र्येन ग्रहणमडभ्यासविषयतिहृत्यर्थं इति देशप्रक्लृप्तिमिप्रश्नः
अनेकलक्षणसंनिपाताभावे कात्स्न्र्येन ग्रहणस्यानर्थक्यादनेकलक्षणसंनिपाते कात्स्न्र्येनः सुट्कृते व्य इत्यर्थां कार्यान्त।
रापेक्षयाऽपूर्वं सुडिति पर्यवसानात्कात्स्न्र्येन ग्रहणे कालावधारणार्थं इति विशेषविधिपक्षः तत्रायेक स्योद्विः प्रयोगस्य
च द्विर्वचनत्वे प्रत्युच्चारणं शब्दभेदादभ्यासेन व्यवधानात्संपरिभ्यां परः ककारादिः करोतिर्न भवतीति सुड्न स्यात् न
चोपसंख्यानसामर्थ्यं तस्य सुट्मनुद्रा देशप्रक्लृप्तिमात्रार्थत्वात् सत्यं विशेषविधिपक्षे द्विर्वचनात्पूर्वमेव सुट्प्रवृत्तेः
स्थाने द्विर्वचनपक्षे स्थानिवद्भावादेकस्यैव करोतेः संपरिभ्यामव्यवहितत्वात् चकारात्पूर्वं प्राप्नुवन्स्सुडः कात्स्न्र्येन वि
धीयत इति देशप्रक्लृप्तिपक्षेऽपि दोषाभावात् यद्वा संपरिभ्यामिति तृतीया ताभ्यामुपसृष्टस्य करोतेर्विषयः द्विःप्रयोगे
द्विर्वचनमिति पक्षे द्वयोरप्यर्थवत्त्वाद्द्योतकस्योपसर्गसंबंधस्य परस्मिन्नपि स्त्युपपत्तेः उपदेशिवद्भाववचनं लि
टि गुणे चङि दीर्घप्रतिषेधार्थं अस्यार्थः यथाऽपदेशे हलन्तयवतो कार्यं तथा सस्वरीनामपीति वक्तव्यं अन्यथा सेच
स्कर्तित्यादौ ऋतश्च संयोगादेरिति गुणो न स्यात् समचिस्करदित्यत्र चङि दीर्घो लघोरिति दीर्घश्च स्यात् पदद्वयाश्र
यत्वेन बहिरंगस्य सुटोऽसिद्धत्वात् भाष्यकृतस्त्वाहुः संयोगोपधग्रहणमिति वस्यमाणत्वान्न गुणानापत्तिः वचनाद

सि॰
व॰
३८

38

सिद्धत्वबाधात् चट्टिदीर्घस्यापि नापत्तिः तिङ्युत्पत्तेः पूर्वमेव धातूपसर्गसंबंधे सट्टङ्न्यत्तेः सुटः पदद्वयाश्रयत्वाऽभावात् पर
संज्ञायास्तिङ्युत्पत्त्यनन्तरप्रवृत्तिकत्वात् न चातिरंगत्वे तौ च प्रत्ययइति च प्रत्यय[illegible]ग्रहणेन धातुग्रहणे तदादिविधे
र्ज्ञापितत्वात् करोत्यादेः पदस्य सुड्विधानमिति वाच्यं तदंतविध्यपवादतया विशेष्यसंनिधावेव तदादिविधिप्रवृत्तेरत्र वावि
शेष्यसंनिधेरभावात् अतः कृकमीत्यत्र समासादिमस्योत्तरपदस्य विशेष्यत्वयात्त्वकृतो विशेषणात्वे कृत्त्वादावुत्तरपद
स्यार्थस्वीकारेण वैषम्यात् ननु क्रियायाः साधनसंकोचत्वत्याप्रथमं तदन्वयेन भाव्यं ततो लब्धस्वरूपाया विशेषणाकां
क्षायां तदन्वयेनेति प्रथमं साधनार्थकैस्तिङादिभिर्योगं ततो विशेषणसमर्पकोपसर्गयोगेनेति पूर्वं धातोः साधनेनान्व
यस्ततः पश्चादुपसर्गेणेति पक्ष एव युक्त इति चेन्न विशिष्टाया एव क्रियायाः साधनसाध्यत्वात् लब्धस्वरूपायाश्चान्यतो विशे
षणालाभानुपपत्तेः विशेष्यांशे विशेषणांशे च साधनभेदानुपलंभात् तदुक्तं पूर्वं धातुरुपसर्गेणायुज्यते पश्चात्साधने
नेति अन्यथाऽध्यासितेऽग्रहणा उपास्यतेऽग्रहरितिव्यवस्था न स्यात् प्राप्तेः प्रथममेव भावे लकारोत्पत्तौ तदनन्तरमुपसर्ग
योगेन सकर्मकत्वेऽनर्हतया कर्मणि लकारानुपपत्तेः तथा च धातुसंज्ञापेक्षयापि उपसर्गसंबंधस्य प्राथमिकत्वे धा
तूपसर्गसमुदायस्य विशिष्ट[illegible]क्रियाप्रतिपादकत्वात् पृथक्त्वकल्पनस्य वाक्याद्यादिव्यवस्थामात्रार्थत्वात् संस्कृतरूपणा
मेव दशायां सुटि कृते समुदायस्य धातुसंज्ञेति सर्वापेक्षया सुडंतरंग इति न बहिरंगपरिभाषावकाशः एवं च कात्सर्वे
ग्रहणमपि व्यर्थं द्विर्वचनादीनां प्रत्ययोत्पत्तेरनंतरं प्रवृत्त्यानेभ्यः पूर्वमेव प्रवर्तमानस्य सुटो देशांतरे प्रसक्तेरेवाभावात्
तस्मात्सुडिन्येवापि कर्तव्ये ननु सुटः परादित्वे संस्कृषीष्टेत्यत्र उःऋतः संयोगादेरितीट् स्यात् संस्क्रियतइत्यत्र गुणोर्तिसं
योगाद्योरिति गुणः स्यात् नच सुट्षितिककारमध्यवर्त्यंकृत्वा पूर्वांतएव विधास्यतइति वाच्यं समः सुटीति समोऽन्त्यावय
वस्य सकारस्य पदांतत्वानुपपत्त्यापत्तेः मकारस्य रुत्वानापत्तेश्च नवाऽभक्त एवास्त्विति वाच्यं संस्करोतीत्यत्र तिङ्गः तिङ्

इति निघातानापत्तेः अतिङ् समित्यस्मात् तिङः पूर्वत्वाभावात् न च सुट मेवातिङ् माश्रित्य निघातोऽस्त्विति वाच्यं अतिङ इति पर्यु
दासेन तिङ्भिन्नस्य पदस्यैवोपादानात् न च स्वरविधौ व्यंजनमविद्यमानवदिति वाच्यं हल्स्वरप्राप्तौ व्यंजनमविद्यमानव
दित्येवं स्वरूपत्वात्परिभाषायाः [illegible] परादित्वपक्षे इट् गुणयोः प्रतिषेधस्य वक्तव्यत्वान्न दोषः यद्वा एकाच उपदेशा इम
स्मादुपदेशा पदात्तु इस्मादुपदेशे संयोगादेर् ऋ इति व्याख्येयं गुणोर्तिसंयोगाद्योरित्यत्रापि नित्यं छंदसीत्यतो नित्यग्रहणात्तु
इस्मान्नित्यं यः संयोगादिस्तस्य गुण इति व्याख्येयं प्रकृते सुट्कृतसंयोगादित्वान्न दोषः एवं सर्वोऽतत्पदोऽपि निर्दोषः पू
र्वात्यासेऽपि संप्रकानां सत्वं स्वविधौ स्वनिष्ठस्य संग इति वक्ष्यमाणत्वात् समस्तकीति द्विसकारकनिर्देशमाश्रित्य सकारादे
स्सुटि परे विधानादेव सुट्त्वदनापत्तेः ॥ संपरिभ्यां करोतौ भूषणे ॥ संपरिपूर्वस्य कृञः सुट् स्यात् भूषणेऽर्थे संस्करोति
कन्यां भूषयतीत्यर्थः परिष्करोति परिनिविभ्य इति षत्वं भूषणं वैशिष्ट्यसंपादनमात्रं संस्कृतं भक्ष्यास्संस्कृता व्रीहय इति
प्रयोगात् ॥ समवाये च ॥ प्राग्वत् संस्कुर्वन्ति संघीभवन्तीत्यर्थः अत्राकर्मकत्वे ॥ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु
च ॥ उपपूर्वस्य कृञ एष्वर्थेषु सुट् चकारः प्रागुक्तार्थद्वयसमुच्चयार्थः प्रतियत्नो गुणाधानं वैकृतं विकारः साध्येनदि
विज्ञानात् वाक्यस्याध्याहारः आकांक्षितपदेन पूरणं एधोदकस्योपस्कुरुते गुणाधानं करोतीत्यर्थः कर्मणः शेषत्ववि
वक्षायां षष्ठी उपस्कृतं भुंक्ते विकृतमित्यर्थः उपस्कृतं ब्रूते वाक्यं शाब्दान्तरेणाहरयिता ब्रूत इत्यर्थः उपस्कृता कन्या भूषिते
त्यर्थः उपस्कृता ब्राह्मणाः समुदिता इत्यर्थः ॥ किरतौ लवने ॥ उपपूर्वस्य कॄ विक्षेप इत्यस्य सुट् छेदनेऽर्थे उपस्किरति छि
नत्तीत्यर्थः ॥ हिंसायां प्रतेश्च ॥ चकारादुपसमुच्चयार्थः उपस्किरति प्रतिस्किरति हिनस्तीत्यर्थः ॥ छेदोऽवयवविभागः ।
हिंसा तु प्राणवियोगफलको व्यापारः ॥ अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यं
हर्षादय एवात्रोपाधयो न चतुष्पाच्छकुनयः आत्मनेपदविधानेऽपि तथादर्शनात् । न चातिप्रसंगः सुडात्मनेपदयोर्हर्ष

विशेषादिविषयत्वात् प्रयोगस्यैव नियामकत्वात् अपस्किरते वृषभो हृष्टः अपस्किरते कुक्कुटो भक्ष्यार्थी अपस्किरते श्वाश्रयार्थी
॥ कुस्तुम्बुरूणि जातिः॥ सुटो निपातः कुस्तुम्बुरु धान्याकं जातेरन्यत्र कुस्तुम्बुरूणि कुत्सितानि तिंदुकीफलानीत्यर्थः अपरस्प
राः क्रियासातत्ये॥ नरा गोकिरणायामं चातिक्रमादपरस्पराः निर्दिष्टं कर्म सातत्येन सुधीभिरपरस्परमिति भागुरिः सातत्ये किं
अपरे परे च सकृदेव गच्छन्ति ननु संततशब्देन कारलोपनिपातनाभ्युपगमे संततशब्दस्य साधुत्वेन स्यात् सत्यं समो वा हित
ततयोर्लोपो वक्तव्यः संहितं सहितं संततं सततं संततस्य भावः सांतत्यं वाक्यमेव संहितायां समासे चैव [illegible] लोप इष्टो ना
न्यत्रेति कैयटः। संतुमनसोः कामे लोपो वक्तव्यः। सकामः भोक्तकामः मनसि वेति वक्तव्यं समनाः भोक्तमनाः अवश्यमः
कृत्ये लोपो वक्तव्यः अवश्यभाव्यं॥ गोष्पदं सेवितासेवितप्रमाणेषु॥ सुट् तस्य षत्वं च निपात्यते। गावः पद्यन्ते यत्र गोष्पदो
देशः गोभिः सेवित इत्यर्थः। अगोष्पदान्यरण्यानि गोभिरसेवितानीत्यर्थः गोष्पदमात्रं क्षेत्रं तत्परिमाणमित्यर्थः सेवि
तेत्यादि किं। गोपदं गोः संबन्धि पदमित्यर्थः॥ ननु नञैव सेवितप्रतिषेधप्रतीत्युपपत्तेरसेवितग्रहणं सूत्रे व्यर्थमिति चेन्न
गवां संभवस्थल एव पञ्चगवात्यन्ताभावस्थलेऽपि वा अगोष्पदशब्दप्रयोगापत्तेः असेवितग्रहणसामर्थ्यात्तु [illegible]
गवामत्यन्तासंभवस्थल एव अगोष्पदशब्दप्रयोगादिति केचित् असेविते गोष्पदशब्दासंभवाद्गोष्पदशब्दार्थमसेवित
ग्रहणमविशेषेणैव तत्प्रयोग इत्यन्ये गोष्पदपूरं वृष्टो देव इत्यादौ वर्षादेः परिच्छेदः प्रतिपाद्यते तत्र गोष्पदशब्दस्य
स्वार्थमुपादाने चैलक्नोपं वृष्ट इत्यादेरिव सार्वीभावाभावेऽपि प्रयोगात्॥ आस्पदं प्रतिष्ठायां॥ अधिकरणेऽयं निपातः आस्प
दं स्थाने किं। आपदादिस्थापदं पदपर्यन्तमित्यर्थः॥ वर्चस्केऽवस्करः॥ कुत्सितं वर्चो वर्चस्कं अन्नमलं। तत्रावस्कर इति नि
पात्यते अवकीर्यते तत्र छन्नत्वादित्यर्थः वर्चस्के किं। अवकरो [illegible]॥ अपस्करो रथांगं॥ अपकरोऽन्यः॥ विष्किरः
शकुनिर्वा॥ ननु विष्किरः शकुनौ विकिरो वेति वक्तव्यं। यथान्यासे। शकुनौ विकल्पेन प्रयोगोऽन्यत्रापि प्रसंगात् सि

डस्य शाकस्य विकल्पानुपानर्हत्वात् मेध्यः पशुर्विभाषितः इत्यादौ त्वालंभनस्यैव विकल्पो न तु पशुत्वस्य विकल्पस्य वस्तुन्यनु
पपत्तेः नैवं शाकनिग्रहणादेवार्थे शकुनौ वा न तत्सजातीयो वार्थे इत्युपपत्तेः सत्यं सुटेव समं विकल्पान्वयात् आवाभि
निपातेन तु न शकाय सुट् त्रैवार्तिकवदेव सूत्रं परित्वावाग्रहणात् सुटो विकल्पे सिद्धेऽपि विकिरोपादानं तस्यापि शकुनावे व
प्रयोगलाभार्थमित्युक्ते तद्रूपे संभाष्यविरोधस्य स्पष्टत्वात्॥ आश्चर्यमनित्ये॥ अद्भुते विस्मयहेतु रूपेऽनित्ये सुट् आश्चर्य
मद्भुताहतस्य आनित्ये किं आचर्यं कर्म शोभनं। अनुष्ठेयमित्यर्थः। अनित्यत्वमत्र तज्जातीयान्यव्याहतत्वं बोध्यं॥ ह्रस्वा
च्चन्द्रोत्तरपदे मन्त्रे॥ ह्रस्वादुत्तरपदस्य चन्द्रशब्दस्य सुट् मन्त्रे। हरिश्चन्द्रो मरुद्गणः सुश्चन्द्रो युष्मान् पुरुश्चन्द्रैः नन्वेवं महिश्चन्द्रे
पुरुश्चन्द्रे विविद्वान् इष्टुश्चन्द्रमवसेवर्णाद्याः अपिश्चन्द्रेहस्तु इति कथं पदकारैर्विभज्य पाठादुदात्तद्वयपाठाच्च समासाभा
वादुत्तरपदत्वाभावात् अत्राहुः बाहुलकात्सिद्धं प्रातिशाख्ये तु विशिष्य विधानं पुरुश्चन्द्रपि सूत्रैश्शाकार उपजायते ह्रस्वा
वसर्वपर्यायेनेव चन्द्रशब्दे परेऽन्तरा अंतरेण भक्तस्य लाभः सूत्रे ईमात् पञ्चमीनिर्देशाच्चन्द्रशब्दागममप्येवेति बोध्यं॥ प्रतिष्कश
श्च कशेः॥ कशगतिशासनयोः प्रतिपूर्वात् पचाद्यच् सुट् तस्य षत्वं च निपात्यते प्रतिष्कशः सहायः पुरोयायी वा कशेः किं
प्रतिगतः कशां प्रतिकशोऽश्वः न च कशाशब्दस्यापि कशधातुप्रकृतिकत्वात् कथं व्यावृत्तिः कशेरिति धातुग्रहणे न तन्निरू
पितोपसर्गत्वलाभात् अत्र च गतक्रियां प्रत्येवोपसर्गत्वात्॥ प्रस्कण्वहरिश्चन्द्रावृषी॥ प्रस्कण्वस्य सुट् पूर्वं हरिश्चन्द्रग्रह
णमसमस्तार्थं मन्त्रे ह्रस्वादित्यनेन न सिद्धेः ऋषी किं प्रकण्वो देशः हरिचन्द्रो माणवकः॥ मस्करमस्करिणौ वेणुपरिव्राज
कयोः॥ यथाक्रमं निपात्येते मकरशब्दोऽव्युत्पन्नः तस्य सुट् न च वेणुदण्डयोगादिनिने वसिद्धौ द्वितीयनिपातनवैयर्थ्यं
मा कृत कर्माणि काम्यकर्मपरिहाणिः श्रेयसीत्युपदेष्टरि यनिपातनस्वीकारात् माङ्पूर्वात्कृञ इनिः सुडागमो माङो
ह्रस्वत्वं च निपात्यते॥ कास्तीराजस्तुन्दे नगरे॥ नगरे किं कातीरं अजतुन्दं कुत्सितं तीरं अजस्येव पीनं तुन्दं चेत्यर्थः नगरे इति

ग्रामोपलक्षितं कार्स्तीरं नाम वाहीकग्राम इति वृत्त्यर्थे भाष्यप्रयुक्तेः ॥ कारस्करो वृक्षः ॥ नहिशेषः कारस्करोऽन्यः केचित्तु कस्कादे
नगणसूत्रमेवेत्याहुः ॥ पारस्करप्रभृतीनि संज्ञायां ॥ सुड्शिहानिति निपात्यन्ते अविहितलक्षणः सुडत्र द्रष्टव्य इति
भाष्ये पारस्करो देशः । ऋषिविशेषश्च । रथस्पा नदी किष्किन्धा गुहा । किष्कु ॥ तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्त
लोपश्च तकारात्पूर्वं चत्वेन दकारस्यापि प्रश्लेषः तच्छब्दः प्रसिद्धचोरकर्मपरः तस्करः बृहस्पतिः चोरदेवतयोः समुदायवा
च्यत्वे प्रायस्य चित्तिचित्तयोः सुडस्कारो वा अस्य अस्कारः आदेशः शाकंधादित्वात्पररूपं प्रायश्चित्तिः प्रायश्चित्तं वनस्पतिरि
त्यादि ॥ इति श्रीसिद्धान्तसुधानिधौ षष्ठस्य प्रथमे पंचममाह्निके ॥ अनुदात्तं पदमेकवर्जं ॥ यस्मिन्पदे यस्य उदात्तः स्वरि
तो वा विहितस्तमेकमचं वर्जयित्वा शिष्टं तत्पदमनुदात्ताच्कं स्यात् स्वरविधिविषया परिभाषेयं । तेनोदात्तस्वरितविधि
श्रुतत्वात्तत्रानुदात्तं पदमेकवर्जमित्युपस्थितं बोध्यं अधिकारत्वेन ध्यायान्तरविहितेषु स्वरेषु तत्प्रवृत्तिर्न स्यात् एकप
दं यावतामनुदात्तत्वविधानेन तावतामुपलक्षणम् तेन न वैवानत्स्युगापदित्यादौ द्वयोर्वर्जनं इन्द्राबृहस्पती इत्यादौ देव
ताद्वन्द्वे चेति पदद्वयस्य प्रकृतिस्वरविधानात् बृहस्पतिशब्दस्य चोभे वनस्पत्यादिषु युगपदिति आद्युदात्तत्वात् इन्द्रशब्दस्य चा
द्युदात्तत्वात् त्रयाणामिति बोध्यं स्यादेतत् यस्मिन्पदे उदात्तस्वरितान्यतरविधानं तद्वर्जयित्वा वाक्यस्थानि पदान्यनुदा
त्तानि इति सूत्रार्थप्रसंगः पदस्य संस्कार्यतया ग्रहणात् एकत्वस्याऽविवक्षितत्वात् न चानुदात्तत्वस्याम्नात्रयमेतया स्वरव्य
जनसमुदायरूपपदसामानाधिकरण्यानुपपत्तिः उदात्तं पदमनुदात्तं पदमिति व्यवहारात् व्यंजनस्यापि साहचर्येणातद्धर्मि
त्वोपपत्तेः एकशब्दस्यापि अन्यासंख्यापदपरत्वात् मैवं अवयवावयविनोरभेदोपचारादर्श आद्यजंतत्वाद्वा अनुदात्तश
ब्दस्य तद्रूपपरत्वात् अत एव विंडुत्रयात्मकप्रथमकपोगोहिउलेषु प्रथमका इति वेदे चतेद्योगार्नेद इति व्यवहारः पदा
नुवादेनोचामनुदात्तविधानादुणोचपसुवचनं ख्यापयाविवक्षितत्वात् कृत्रिमाकृत्रिमन्यायाच्चानुदात्तशब्दस्याभूपरत्वात्

एकशाहस्यापि तथात्वात् पदपरत्वे नियामकाभावात्पर्यायेण सर्वपदवर्णेनैस्वराः नियमप्रसंगात् अक्षरत्वे तु यस्यावः स्व
रो वक्तव्यस्तद्वर्जितइति नियमोपपत्तेः तथाहि गोपायतेइत्यत्र गुपधातुस्वरेणोनोदात्तः आयः प्रत्ययस्वरेणाद्युदात्तः सनाद्यं
ता इति गोपायशाहस्य धातुत्वेनोदात्तः इति त्रयाणामुदात्तत्वप्रसंगे यकाराकारोदात्तस्य शिष्टत्वेन बलवत्त्वे शेषोऽका
रःपिन्नादनुदात्तः तेन सहपरस्य पकादेशउदात्तेनोदात्तः पसत्वमादेशो लसार्वधातुकस्वरेणानुदात्तः उदात्तादनुदात्त
स्येति तस्य स्वरितः अतश्चायमनुपङ्क्तपरिभाषयानुदात्तेइतीष्टसिद्धिः न तु तन्मिति स्वरितमाश्रित्य यकाराकारस्याश्विति
वानोक्त न चोदात्तात्परत्वमुपजीव्यप्रवृत्तः स्वरितो न तस्यानुदात्तत्वमापादयति संनिपातपरिभाषाविरोधादिति वाच्यं ।
स्वरविधौ न स्याग्रहत्तेः । अन्यथा तोदात्ताङ्गत्रपदादन्यतरस्यामिति स्वरेऽकृते पि शेषनिघातानापत्तेः मैवं । स्वरितव
दुदात्तमपि वर्जयित्वैव शेषनिघातविधानात् स्वरविधौ संनिपातपरिभाषानंगीकारे मानाभावात् यथोद्देशपक्षः
माश्रित्य समाधानेन तु कार्यकालतयैनत्स्वहनिदर्शकभाष्यविरोधाऽपेक्ष्यमिति दिक् पर्यायेण योगपद्येन वाऽदात्त
वारणार्थमेतत्सूत्रं ॥ तथा च वार्त्तिकं ॥ आगमस्याविकारस्य प्रकृतेः प्रत्ययस्य च पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पद
स्वरः । चत्वारः ॥ अनड्वाहः चत्वारः इति चतुःशाहस्याद्युदात्तः अनो वहतीत्यनड्वान् अनसि वहेः क्विप् उश्चान स इति कि
प् अनसित्यस्य न्नंतत्वादाद्युदात्तं गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरेण धातुरंतोदात्तः वहतेरनडुहो आमुदात्त
इति आमुदात्तः अस्मादभ्यासि संजिभ्यां विधान्नित्यस्य शाहस्याद्युदात्तः दधिशाहेन पिबयस्येत्याद्युदात्तः अक्षि दधि स
कृष्णवर्णामित्यनड्डुदात्तः प्रकृतिर्व्याख्याता तैत्तिरीयः अत्र युगपदनुदात्तप्रसंगो माभूत् अत्र वार्त्तिकं । यौगपद्यं तु वैस
दृपर्याययोरिकणासनात् उदात्ते ज्ञापकं त्वेतत्स्वरितेन समाविशेत् अस्यार्थः तयौगपद्यवारणार्थमारंभोऽप्युक्तः न
वैतन्नयुगपदिति ज्ञापकात्सिद्धेः तेन हि गतेः सर्वपदस्य प्रकृतिस्वरः तत्र प्रत्ययस्य चांतोदात्तत्वं विधीयते तत्रवि

रोधाभावादेव यौगपद्यसिद्धेः युगपदुपादानमन्यत्र यौगपद्याभावं ज्ञापयिष्यति नापि पर्यायवारणार्थं त्रिकेति विभाषेत्यने
न तदभावस्य ज्ञाप्यत्वात् धातुप्रत्ययस्वराभ्यामेव पर्यायेणाद्यन्तोदात्तत्वसिद्धेः नच स्वरितोदात्तयोः समावेशवारणा
र्थं ज्ञापकस्योदात्तश्रुतिमात्रविषयकत्वात् स्वरितेप्युदात्तश्रुतिसत्वात् उदात्तसमावेशनिषेधादेव स्वरितोदात्तस-
मावेशनिषेधात् किंच आरंभपक्षेपि यावता विशिष्टोदात्तस्वरितविधानेनावनामनेनानुदात्तत्वविधानेन तत्स्यात् ये
षामेवाविशिष्टस्वरविधिर्नोत्सिनत्रास्यसावकाशत्वात् तथाहि आमलकीजइत्यत्र ङीष्प्रत्ययस्वरेणाद्युदात्तत्वे प्राप्ते
कारकोपपदादिति जशब्द उदात्तः दीर्घकाशतुषभ्राष्ट्रवटं जे इति पूर्वपदाद्युदात्तत्वे अंत्यात्पूर्वं बह्वच इति लकाराऽ
कार उदात्तः एवं मकाराकारभिन्नानां चतुर्णामुदात्तत्वे मकाराकारस्य शास्त्रेणैकस्यापि स्वरस्याविहितत्वात्तस्यैवानुदा
त्तत्वमनेन न स्यात् येषामुदात्तस्वरितविधानेनैषां वर्ज्यत्वेनोक्तानिघातानामनर्हत्वात् अत एव तवैवांतश्चेत्यत्र द्वयोर्वर्जे
नमित्युक्तं तथा च जे दीर्घाद्बह्वच इति वक्ष्यमाणविप्रतिषेधानुपपत्तिः दीर्घकाशेत्यनेन लाकारस्योदात्तत्वं विधीयते अं
त्यात्पूर्वमित्यनेन तु लकाराकारस्येति विरोधाभावात् यदि हि नोदात्तं पदमिति पठितास्येषामुदात्तत्वं निषिध्येत यदि वा
उदात्तं पदमेकवर्जमिति पठितं स्यात् एकमेव पदे उदात्तमिति नियमः क्रियेत तदा स्यादेव प्रतिषेधः नत्वेवमस्त्यनुदात्ता
स्यानेनाविधानात् तस्य चाविहितोदात्तभावान्नचोऽपहायप्रहरन्तैः लक्षणसद्भावेऽनेकेषामप्युदात्तत्वे बाधकाभावात्
नन्वधिकारोयं तथा च स्वातन्त्र्याभावादुत्तरवाक्यैः सहैकवाक्यत्वे दीर्घकालेत्यत्रापवादस्थाने आकारभिन्नानामनुदात्तत्वं वि
धीयते अंत्यात्पूर्वमित्यत्र लकाराकारभिन्नानामिति कस्यैकस्यानुदात्तत्वे वर्जनमिति विप्रतिषेधोपपत्तिः मैवं आनु
दात्तस्य अ[illegible]स्थितेरपि स[illegible]कस्यहृणामनुदात्तइत्यादौ शेषनिघातानापत्तेः तेषामेतदधिकारेणान्तर्भावयितुमशक्यत्वा
त् इति चेदुच्यते सिद्धत्वेकानुदात्तत्वात् एकमनुदात्तं पदमिति परिभाषणीयं यस्याचः स्वरो विधीयते स एवाः

विद्यमानोदात्तो न भवतीति न ह्यत्रास्ति विद्यमानोदात्ताभावेनीत्स्वरदात्तनिषेधसिद्धेः | आमलकीजत्स्यत्रयोगाद्दृष्टेष्वेनतु
पस्थाने पुंक्तो विप्रतिषेधः बलवत्त्वस्य पथ्यामास एव परिभाषात्वमाश्रयणीयं स्वरविधिष्वात्र लिंगेपरिभाषायालि
गवत्त्वनियमात् एकपदेन संक्षेपवाविनासाक्षादुपात्तानुदात्तविरोधिन उदात्तस्वरितत्वप्रसंक्षेपस्य प्रतीतेः स्व॰
नुदात्तस्यैव विधिवर्जनयोरनुपपत्तेः | तथा यजेदीर्घान्तस्यादिरुदात्तः अनुदात्तं पदमेकवर्जं अस्मात् सर्वैवद्ध्वः अनु
दात्तं पदमेकवर्जं इत्युभयत्रोपस्थाने आकारभिन्नानामनुदात्तत्वे लकाराकारभिन्नानां चेति विप्रतिषेधे परत्वाल्लु
कारयकारभिन्नानामिति सिद्धे यद्यनात्रपारिभाषिकस्यानुदात्तस्योपादाने किं तूदात्तनिषेधो ऽत्र विधीयते एकवर्जमि
तिवन्निषेधस्यापर्युदासः यस्योदात्तः स्वरितो वा विधीयते न ह्यत्रस्य पदे ऽनुदात्तत्वं न स्यादिति वाक्यार्थः नचैवं स्वरि
तविधौ न ह्यत्रानां स्वरितनिषेधो न स्यादिति वाच्यं तत्राप्युदात्तभागसद्भावेन प्रतिषेधप्रवृत्तेः | स्यादेतत् ह्यत्रादीना
मुदात्तप्रसंगे कस्यैकस्य वर्जनमित्यत्र नियामकाभावः नच निरवकाशत्वेन व्यवस्था प्रकृतिप्रत्यययोः स्वरह
यस्यापि सावकाशत्वात् तथाहि धातुस्वरस्यावकाशः पचति पठतीति प्रत्ययस्यापित्वादनुदात्तत्वात् प्रत्ययस्वरस्याव
काशः समत्वं क्षिमत्वं प्रकृतेरनुदात्तत्वात् कर्तव्ये तैत्तिरीय इत्यादावुभयप्रसंगे व्यवस्था न स्यात् नवात्राप्येवं विप्रति
षेधाज्ज्ञात्वे तोदात्तत्वे बाधित्वा प्रत्ययाद्युदात्तत्वमेवेति वाच्यम् प्रत्रकाम्यति गोपायति ऋतीयते इत्यादौ प्रत्ययस्वर
स्यैव प्रसंगात् नचेष्टापत्तेः धातुस्वरेणान्तोदात्तत्वाया इष्टत्वात् तदर्थं काम्यादीनां चित्त्वारंभे तु गौरवापत्तेः अत्रोच्य
ते सतिशिष्टस्वरो बलीयानिति वक्तव्यं सतिशिष्टत्वं च तत्स्वरोत्तरप्रवृत्तिकत्वं कर्तव्यमित्यादौ हि धातोरंतोदात्तत्वान
तरं प्रत्ययोत्पत्त्या तस्य नित्योगाशिष्टमाद्युदात्तत्वं अन्तोदात्तानंतरप्रवृत्तिकमिति तदेव बाधते इष्टे गोपायतीत्यादौ तु
आयस्य प्रत्ययस्वरोत्तरं तदन्तस्य धातुसंज्ञा धातुस्वर एव सतिशिष्ट इति सिद्धं नच काम्यजादीनां विकरणस्य उक्त

वचनस्य चारितार्थे नियामकाभावः सतिशिष्टेत्यादेरन्यार्थमावश्यकत्वात् तेनौपगवइत्यत्र प्रकृतिस्वरं बाधित्वाऽणस्व-
रेणाद्युदात्तेनांतोदात्तत्वे औपगवत्वमित्यत्र त्वप्रत्ययपरे केनैव लक्षणेनोदात्तत्वप्रसंगो विप्रतिषेधानवका-
शात् उकारीत्यात्तत्वप्रत्ययस्वरस्यैवावस्थानात् एवं राजपुरुषो राजपुरुषपुत्र इत्यादौ योज्यं नन्वेवं चिनुतः सुनु-
तः इत्यत्र सार्वधातुके परे श्नुप्रत्ययादीनां विधानात् तत्स्वरेण सार्वधातुकस्वरबाधापत्तिः विकरणस्वरस्य सतिशि-
ष्टत्वात् सत्यं तासेः परस्य लादेशस्य सार्वधातुकस्यानुदात्तविधानेन सतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरे-
न बाधत इति ज्ञापितत्वात् अन्यथा तासिस्वरस्य सतिशिष्टत्वात्तासेरुदात्तत्वे लसार्वधातुकस्य शेषनिघातेनैवा-
नुदात्तत्वसिद्धेः लकारमात्रापेक्षायांतरंगत्वात्स्वप्यमेतिवादयोः लादेशोत्तरं तासिरिति प्रक्रियाश्रयणात् लस्यतिम
सुजीत्यादेरनुदात्तङित इत्यादिप्रकरणेन सहैकवाक्यतया विधिरिति पक्षे लादेशानां बहिरंगत्वाल्लावस्थायामेव
तासिरिति पक्षे तु सार्वधातुकस्वरस्यैव सतिशिष्टत्वात्तद्बाधनायैवानुदात्तविधानोपपत्तेः ज्ञापकाभावात्सतिशि-
ष्टोपीत्यादिवाचनिकमिति ज्ञेयं सतिशिष्टस्वरस्य बलीयस्त्वमित्यपि वाचनिकमेव कास्यादयश्चित्क्रियेतत्सति-
शिष्टस्वरबलीयस्त्वं वाच्येनेति कैयटग्रंथस्वारस्यात् केचित्तु न्यायसिद्धमेवेदं तत्तत्स्वरविधिरनुदात्तं पदमित्यस्यै-
कवाक्यतया चरमप्रवृत्तस्यैव लक्ष्यव्यवस्थानादित्याहुः तच्चिंत्यं चरमप्रवृत्तेर्व्यवस्थापकत्वे बीजाभावात् ननु
गोपायेत्यस्यामवस्थायामकृतपरिभाषायाः कथं प्रवृत्तिः असमासः पदसंज्ञाघटितत्वात् तस्याश्च तदानीमभावात् मैवं
पदग्रहणं परिमाणार्थं यावतोऽवधेः पदसंज्ञा भविष्यति तावत एवानुदात्तत्वं न त्वधिकस्येति तदर्थः तस्मात्स-
तिशिष्टमेव स्वरं वर्जयित्वान्येषामनुदात्तत्वं विधीयत इति सिद्धं यद्वा औपगवत्वमित्यादौ लक्षणेकेपि शब्दपर-
विप्रतिषेधपक्षाश्रयणीयः एकलक्षणाविहितयोरपि कार्ययोर्विप्रतिषेधे परं कार्यमित्यस्य स्थापितत्वात्तत्राश्रित-

स्यादेनत

त्वात् नचैवंपुत्रकाम्यतीत्यत्रप्रत्ययस्वरापत्तिः अप्रत्ययस्येकोनशाहुपरविप्रतिषेधानवकाशादितिवाच्यं गोपायतीत्या
दौक्रियात्प्रत्ययस्वरयोर्न पुणापत्त्यसंगः किंतुप्रत्ययस्वराऽनंतरं धातुसंज्ञायां ततोधातुस्वरस्येति विप्रतिषेधाभावा
मतिशिष्टस्यायेनैवोभयत्रधातुस्वरस्यव्यवस्थाप्यत्वात् तिसृभ्योजसइति विभक्त्युदात्तस्यतिस्रश्चिकेहतीत्यवकाशः त
युरुषेत्तस्यार्थेतिनञ्जुदात्तस्यानाबालणइत्यादिः अतिस्रइत्यत्रविभक्त्युदात्तत्वमेवस्यात् नञ्समासेहर्षंपदप्रकृतिस्व
रेवकृतेनञुत्तरंविभक्त्युत्पत्त्यानन्तरस्यसतिशिष्टत्वात् एवंअचत्वारइत्यादौविभक्तिनिमित्तकेपियोज्यं अकरणि
र्हितेहबलभूयात् आक्रोशेनञ्यनिः अत्रनञः सप्तमीनिर्देशादुपपदत्वात्कृतिकारकोपपदादितिप्रकृतिस्वरेणप्रत्य
याकारस्योदात्तत्वंस्पष्टयेन नञ्स्वरोत्तरपदप्रकृतिकतयासतिशिष्टत्वात् अव्ययीजिहदीविशीर्णऽवमाव्ययाभमेत्यादिनात
स्यवाद्यपेरिति: अत्रापिप्रत्ययस्वरःस्यात् सत्यं विभक्तिस्वराद्विभक्तिनिमित्तस्वरोऽत्रनञ्स्वरोवलीयानितिवक्तव्यं एवं
नञ्युपपदेयःकृदुत्तरपदप्रकृतिस्वरास्ततिनिर्दिष्टनञ्स्वरोवलीयान्इतिवक्तव्यं सहनिर्दिष्टस्यनञःस्वरोवलीया
नितिवचनेनचतुर्थदोषःपरिहार्यः नत्रनञःसप्तमीनिर्देशाभावादुपपदत्वाभावात्तृतीयवचनेनानुपग्रहादेतदारं
भः ॥ कर्षात्वतोघञोऽन्तउदात्तः ॥ कर्षतेर्धातोराकारवतश्चघञंतस्यांतउदात्तःस्यात् त्रित्वात्प्राप्तस्याद्युदात्तस्यापवादःक
र्षतिशपानिर्देशात्तौदादिकव्यावृत्त्यर्थः तेनभौवादिकाद्घञिकर्षइत्यंतोदात्तः तौदादिकात्वाद्युदात्तःहलस्यकर्षः अ
त्वतोयथापाकः नवाऽकारान्तस्यघञोऽसंभवादनर्थकमवपितहेतोलाभोपपत्तिःघञादिनमस्यधातोरनाविशेषणेः
देनाहातोविहितोयोघञन्तदंतस्येत्यर्थापत्तेः मतुपातुसर्वसंग्रहसिद्धेः ॥ उंछादीनांचश्चनउदात्तःस्यात् उञ्छः म्लेच्छः ज
ल्पः एतेघञंताःजपवधावजंतौअयेतिकेचित् युगोतिघञेनः निपातनाद्गुणाभावः कालविशेषेरथाद्यवयवेचायं
वैश्वानरःकुषिकेभिर्युगे अप्नञयोगेयोगेतवस्तरमित्याद्युदात्तः गरशब्दोऽवंतः हृष्यार्थस्यात्रपाठः गरोविषं वेग

युगे

सि॰
ध॰
५३

वेदवेष्वेधाः करीषं च जनाः भावेन्नाद्युदात्ताः कृष्णद्वन्द्वं दक्षिपरिक्षिप्तसुपुतपरिहुत् वर्तनिशब्दः समासस्यापवाद एव दर
शब्दः स्वप्नार्थोऽवेतः । भावनापो भावगर्हाया उत्तमशाश्वतमौ सर्वदे । उत्तममेवड्डणा शाश्वतममालभते भद्रमेषमो
गदेह्यश्च जनाः गावः सोमस्य प्रथमस्य भक्षः ॥ अनुदात्तस्य च यत्रोदात्तलोपः ॥ यस्मिन्ननुदात्ते परे उदात्तस्य लोपो भव
ति सोऽनुदात्त उदात्तः स्यात् देवीं वाचं पचादौ देवट् इति पाठात् टिड्ढाणञिति ङीप् देवशब्दश्चित्स्वरेणान्तोदात्तः ङीपि
त्वादनुदात्तः तस्मिन् परे यस्येति चेत्यकारलोपात् ङीप उदात्तः अनुदात्तस्य किं प्रसंगो वहति प्रासंगः आसज्यत इति आ
संगः कर्मणि घञ् थाथादिस्वरेणान्तोदात्तत्वं तद्वहतीति यत् तित्स्वरितः यस्येति चेत्यकारलोपः अत्र स्वरिते परे
उदात्तलोपे स्वरितस्योदात्तत्वं माभूत् अत्राभाष्ये अनुदात्तस्येति व्यर्थं उदात्ते स्वरिते वा परेऽचोप्युदात्तलोपाभावात्
शेषनिघातस्य प्रवर्तिष्यमाणत्वात् न चन स्याद्यागेव परत्वाद्धल्लोप इति वाच्यं तथापि शेषनिघातस्य सर्वस्वरापवा।
न॰ दायात्तद्विषये स्वरान्तराणामप्रवृत्त्याऽकारादेरुदात्तत्वानुपपत्तेः अलङ्डोदात्तभावानामेवाऽकारादीनां लोपात् स्यादेतत्
लोपनिमित्तस्यानुदात्तस्यात उदात्त उदात्तादिः अन्तग्रहणानुवृत्ता वा यः उदात्तमात्रान्तवर्ती प्रथमोपस्थितस्येति द्वि
तीयः तत्र नाद्यः विंदाते खिंदाते इत्यत्रयकारस्योदात्तत्वप्रसंगात् आकारस्य तिष्यमाणत्वात् विदि विचारणे खिद
दैन्ये रुधादिभ्यः श्नम् तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे श्नमः प्रत्ययाद्युदात्तत्वं श्नसोरित्यल्लोपः अत्रोदात्त
स्य श्नमोऽकारस्यानुदात्ते आतामिपरे लोपात् न च श्नमो भिन्नादागमत्वादनुदात्तत्वं तन्मध्यपतितन्यायेन धातुस्वरेण
परत्वात्तद्बाधात् माहिधुक्षातां माहिधुक्षाथां दुहे माङि लुङ् आत्मनेपदं शल इगुपधादिति क्सः क्सादेशः अदुपदेशा
दिति लसार्वधातुकयोरातामाथामोरनुदात्तत्वे तयोः परयोः प्रत्ययस्वरेणोदात्तस्य क्सप्रत्ययाकारस्य क्सस्याचीति लो
पात् अन्तोदात्तः स्यात् माङ्प्रयोगोऽडागमनिवृत्त्यर्थः तत्सत्वे पदस्याद्युदात्तत्वप्रसंगात् माशब्दप्रयोजने नाभ्यका

रेणैवाद्युदात्तः सर्वस्वरापवाद इति ज्ञापितत्वात् हियाद्वो हि चेति निघातप्रतिषेधार्थः पुष्पमयं पुष्पसमं पुष्पदृशे दोः प्रातिप
दिकस्वरेणान्तोदात्तः भ्यामिति सुप्स्वरेणानुदात्तः भ्यसो भ्यमित्यभ्यमादेशः शेषे लोपः टिलोप इति पक्षे ऽनुदात्ते ऽभ्यामि परे
प्रकृत्यकारस्योदात्तस्य लोपादन्तोदात्तत्वं स्यात् इयान् कियान् किमिदंभ्यां वो घ इति वतुप् घश्च पित्वादनुदात्तः वस्य घादे
शः घस्य इयादेशः इदं किमोरीश्की इतीश्कीत्यादेशौ यस्येति चेतीकारस्योदात्तस्य लोप इति अन्तोदात्तः स्यात् न द्वितीयः इयी
ते यत्र ईकारस्योदात्तत्वापत्तेः अतस्य च श्रूयमाणत्वात् इयो लिङः अनुदात्तेतः परत्वात् सार्वधातुकमनुदात्तं सीयुडागम
त्वादनुदात्तः आन्तलोप इति न लोपः अतो लोप इत्यकारस्योदात्तस्य लोपात् इयमिमं त्रुढावववयवाव स्येति संख्याया
अवयवे तयप् द्वित्रिभ्यामित्ययजादेशः सत्वपित्स्यादिति कत्वादनुदात्तः नमि न्यरेयस्येति चेतीकारलोपादाद्युदात्तत्वं स्या
त् न च चित्स्वरेणापित्स्वरबाधः अन्तपदान्तह्रस्वत्तौ तत्राऽयादेशमात्रविधानेप्युपपत्तेः अत्र सिद्धान्तः द्वितीयपक्ष एव युक्तः
विदीपिस्विदिभ्यो लसार्वधातुकानुदात्तत्वप्रतिषेधस्य विधेयत्वात् प्रत्ययस्वरेण तशब्दस्योदात्तत्वात् सीयुट् आगमनया
नुदात्तत्वात् यद्वा विकरणस्वरो लसार्वधातुकस्वरान्न बाधत इति वर्तमानस्वरेणाभ्यमोनुदात्तत्वं इत्युदात्तनिहन्निस्वरा
नापत्तेः इयमित्यत्रापि चित्स्वरेणान्तोदात्तत्वसिद्धेः विकरणस्यैव वा अन्तपदान्तह्रस्वभावज्ञापकत्वात् ॥ धातोः ॥ अन्तउ
दात्तः स्यात् पचति पठति तिपः पित्स्वरेणानुदात्तत्वादन्तोदात्तश्रवणम् क्विबन्ताः सर्वे धातव उदाहार्याः नन्वनेनान्त
स्योदात्तत्वं विधीयते आदेवो नायः ददातीत्यत्र धातुस्वरेणान्तोदात्तत्वप्रसंगात् अभ्यस्तानामादिरित्यस्याज्जादिलसार्वधा
तुकविषयकत्वात् अनुदात्ते चेति वचनमारभ्याद्युदात्तस्य विधाने गौरवात् पिबतीत्यत्र पिबादेशस्य लघूपधगुणनिह
त्यर्थमदन्तत्वात् अन्तोदात्तत्वप्राप्तौ आद्युदात्तार्थं वचनारम्भप्रसंगाच्च चिकीर्षति जिहीर्षतीत्यादौ धातोराद्युदात्तार्थं सनो
नित्त्वस्य कर्तव्यत्वाच्च अन्यथान्तोदात्तप्रसंगात् न द्वितीयः ऊर्णोति गोपायतीत्यादावन्तोदात्तानुपपत्तेः मैवं अन्तग्रह

नेनात्रान्तपदान्त
हृस्वा

सि॰
घ॰
५५ ति

स्यैवपृक्तत्वात् अनुदात्ते चेति वचनस्यारम्भेनयाऽनापादनीयत्वात् पिबादेशस्य चाद्युदात्तनिपातनेन सिद्धेः सनोनित्त्वस्य च
हेस्मोवत्सइत्यादौ द्वित्ववारणार्थमन्यङोरित्यत्र विशेषणार्थमावश्यकत्वात् नचोणादीनामव्युत्पन्नत्वात् द्वित्वविधौ
धात्वग्रहणाद्ग्रहणानातिप्रसंगः स्वरार्थमेव नित्त्वविधाने दोषाभावात् अतएव परत्वान्नित्स्वरे कृते नन्देतस्य धातुसंज्ञा
यां धातुस्वरस्य सतिशिष्टत्वेपि नंदतोदात्तत्वं किंत्वाद्युदात्तत्वमेव नित्त्वसामर्थ्यात् ननु द्वित्वात्पूर्वमेव परत्वान्नित्स्वरप्रवृ
त्तौ ननु तो द्वित्वे पर्यायेणाभ्यासनदं तर भागयोरुदात्तत्वं स्यात् विशेषवचनेन विना यौगपद्येनापादयितुमशक्यत्वात् यत्र
सनः पित्त्वेपि धातुस्वरान्नेनतरं द्वित्वेऽप्याद्युदात्तमध्योदात्तयोः पर्यायसिद्धौ नित्त्वमाद्युदात्तनियमार्थमिति नद्वित्वे जा
गरप्रभृतिष्वभ्योत्वेनेकाऽभ्यः स्थपि कृते धातुसंज्ञायामंतोदात्तत्वे जाग्रशाहस्य द्वित्वे पदस्यानुदात्तादित्वं स्यात् सतिकृते
तत्करीत्या पर्याय इति विशेषात् अत्राहुः अंतरंगत्वात्पूर्वं द्वित्वे नन्नेनोनित्स्वर इति नोक्तदोषः अतएवाशाश्यत इत्यादौ
धातोरंतोदात्तत्वमेव नतु कदापि मध्योदात्तत्वं नवधिष्मतीत्यादावाद्युदात्तानेनतरमभ्यासलोपेऽनुदात्तत्वापत्तिरितिवा
च्यं अंतरंगत्वादभ्यासलोपे कृतएव नित्स्वरप्रवृत्तेः ॥ चितः ॥ अंतउदात्तः स्यात् प्रकृत्यादेः प्रत्ययस्यकुंडिनजादेरप्रत्य
यस्यचेहग्रहणं भंगुरः कुंडिनाः स्वप्रकृतेरितिवक्तव्यं बहुपरवः विभाषाबह्वपइतिबहुच् उच्चकैः अव्ययसर्वनाम्नाम
कच्टकाराकारस्यैकारस्य चोदात्तत्वं अन्यथा बहुशब्दो कारस्य वकाराकारस्य च तत्स्यात् तावन्मात्रस्य चित्त्वात् ननु
पटवइत्यतो जसंताद्बहुविभक्तेंतस्यैव प्रकृतिता बहुकाराकारस्योदात्तत्वं स्यात् मैवं विशिष्टस्य प्रातिपदिकसंज्ञायां
प्रथमजसो लुकि बहुपटुशब्दस्यांतोदात्तत्वे पुनर्जसि सिद्धत्वात् भाष्यकृतस्त्वाहुः चित इत्येव सिद्धे मत्वर्थलक्षणया
तद्वतोऽप्युपादानात् लस्यानुरोधेन गौणस्याप्यर्थस्य ग्राह्यत्वात् अकचश्चित्त्वमेव चात्र लिंगं अन्यथा प्रकाश्यत्वेन चिद्वा
त्वप्रयोगात् यद्वाऽकारो मत्वर्थीयः नचैवमकारांतत्वाच्चितस्येति निर्देशापत्तिः अर्थमयाकार्षीत् निर्दिश्यत इति ष

वीचार्यरीत्याचितइत्यस्यप्रत्ययमांतत्वेनैवोपपत्तेः तथाचचित्वात्समुदायोंतोदात्तत्वंप्रतिपद्यतइत्यर्थः ॥ तद्धितस्य ॥ वि
तस्तद्धितस्यांतउदात्तःस्यात् गोत्रेकुंजादिभ्यश्च्फञ् कौंजायनाः जित्स्वरस्यपरत्वात्प्राप्तौतदपवादोयं अनेनत्वारंभसामर्थ्या
त्स्वरस्यापिजित्स्वरस्यबाधः ॥ कितः ॥ कितस्तद्धितस्यांतउदात्तः । नडादिभ्यःफक् नाडायनः अग्नेर्ढक् आग्नेयः ॥ तिसृभ्यो
जसः ॥ अंतउदात्तःस्यात् तिस्रोयावः आर्धतिसृवक्तृत्वेशाद्वारोप्यवतिसृभ्यइतिनिर्देशः त्रिशब्दस्यांतोदात्तत्वात्तदादे
शस्यतिसृशब्दस्यापितथात्वात् ततःपरस्यजसोनुदात्तौसुप्पितावित्यनुदात्तत्वस्यायमपवादः नचोदात्तयणोहल्पू
र्वादित्यनेनगतार्थत्वं असर्वनामस्थानइत्यस्यानुवृत्तेः जसिकिंतिसृकानामग्रामः तिसृभावेसंज्ञायांकन्नुपसंख्या
नमितिकन्प्रत्ययस्याभूत् बहुलतस्तजसीतिव्यर्थं नित्यबहुवचनांतत्वेएकद्विवचनयोरभावात् शसितूदात्तयणोह
ल्पूर्वादित्यनेनविभक्तेरुदात्तत्वस्यसिद्धत्वात् बहुवचनांतत्वरक्लादित्वात् षट्त्रिचतुर्भ्योहलादिरित्यस्यप्रवृत्तेःअर्थवशाद
स्यजसेवपर्यवसानात् तित्स्वरेणैवांतोदात्तत्वबाधात् नचस्ववत्त्वदात्तत्वसेवतित्स्वरस्याप्यनेनबाधःस्यादितिवाच्यं ये
ननाप्राप्तिन्यायेनस्ववत्त्वदात्तत्वेसुप्पितावितिस्वरंप्रत्येवास्यबाधकत्वात् तिसृकेत्यत्रापिटावेकादेशस्यादिवद्भावात्पि
त्स्वरप्राप्तिसत्वात् तित्स्वरस्यतुजसादेशप्राप्त्यभावात् अथवामध्येपवादन्यायेनानुदात्तौसुप्पिताविस्यैवतिसृभ्यइत्यं
तोदात्तेनबाधोनित्स्वरस्तुपरत्वादस्यबाधकइतितिसृकेत्यत्रसिद्धमाद्युदात्तत्वं उपसमस्तार्थमेके अयमर्थः तिस्रोति
कांतावतितिस्राविभाषाद्यनेनकृत्यदेश्यत्राऽनेङीत्युलोपइतिवक्तव्यमितिवचनाम्नाममंतोदात्तत्वंबाधितानाविभक्ते
रुदात्तत्वंस्यात् उदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येत्युदात्तस्यस्वरितत्वं अतिसृइत्यादौतुजसउदात्तत्वमिष्यतए
वेतिउदाहृतंभाष्ये ॥ चतुरःशसि ॥ चतुरित्यस्यांतउदात्तःशसिपरेषट्त्रिंशांश्वतरःकस्ययेतः ३ःसंख्यायाअस्याद्यु
दात्तस्यापवादः स्त्रियांप्रतिषेधोवक्तव्यः चतस्रःपश्य स्थानिवद्भावेनप्राप्तस्यांतोदात्तस्यायंनिषेधः वस्तुतस्तुचतः

सि॰
सु॰
५५

h5 सू१

ऋशाहेश्चाद्युदात्तनिपातनं कर्तव्यं स्थानिवद्भावादेवाद्युदात्तसिद्धेश्चाद्युदात्तनिपातनमस्य स्वरस्य बाधकं भविष्यति
न चैवं चतसृणामित्यादौ विभक्त्युदात्तत्वं न स्यात् शासि स्वरस्यैव तस्यापि निपातनस्वरेण बाधापत्तेरिति वाच्यं षट्त्रि
चतुर्भ्यस्त्यत्र हलादिग्रहणेन तदभावात् तथाहि षडादिभ्यो हि द्विबहुवचनेन स्तः बहुवचनविषयकत्वात् ष
ड्भ्यस्तकेभ्यः परयोर्जश्शसोर्लोपविधानात् बहुवचनात् त्रयाणां च हलादित्वनियमात् त्रिचतुर्भ्य इति ऋशाहाच्च जः
सि न भवितव्यं असर्वनामस्थानमित्युक्तेः शासितत्रिषादेकादेश उदात्तेनोदात्त इत्यनेन भाव्यं च तत्त्वं दित्यस्मात् चतुरः शसी
त्यनेन न प्रवर्तितव्यमिति ऋ[illegible]शाहात् जसि तिसृभ्यो जस इत्युदात्ते न भवितव्यं शासिन्नुदात्तयणो हल्पूर्वादित्यनेन तस्माच्च
तसृशाहादेवाजादिरसर्वनामस्थाने विभक्तिः शासाति तच्चाहस्यर्थे हलादिरित्युक्ते यदि च निपातनस्वरेण विभक्ति
स्वरो बाध्येत तदा हलादिरित्यस्यैव यर्थ्यं चेत्तस्तः पक्षे त्यत्रानिपातनस्वरेण बाधादेव षट्त्रिचतुर्भ्य इत्यस्य विभक्तिस्व
रस्यां प्रहृत्तेः श्चतो हलादिग्रहणं विभक्तिस्वरस्य निपातनस्वराद्बलवत्त्वं ज्ञापयतीति चतसृणामित्यत्र विभक्त्युदात्त
त्वसिद्धिः वस्तुतस्तु प्रविरकस्त इति यणादेशे कृते ऋकारस्यापहारात् शासः पूर्वभावी उदात्तो नास्तीति चेत्तस्तः पक्षे
त्यत्र चतुरः शासीत्यस्य प्रसंग एव नास्ति न च तकारा कारस्यैव स्वरोऽस्त्विति वाच्यं अचः परस्मिन्निति स्थानिवद्भावाद्धः
कारेण व्यवधानात् न च स्वरविधौ न स्थानिवद्भावमिति वाच्यं तन्निषेधस्य लोपत्वपाजादेशमात्रविषयकत्वमिति सि
द्धान्तात् एवं चाद्युदात्तनिपातनमपि न कर्तव्यं प्रयोजनाभावात् ॥ सावेकाचस्तृतीयादिर्विभक्तिः ॥ सप्तमीबहुवच
ने सौ य एकाचस्ततः परा तृतीयादिर्विभक्तिरुदात्ता स्यात् वाचा त्विषा सौ किं राज्ञेत्यादावेकाचोऽपि राजशब्दात्परस्या
मा भूत् तृतीयादिः किं तद्दर्शी वाचमित्यादौ मा भूत् विभक्तिः किं वाक्तरेत्यादौ मा भूत् ननु सावितिप्रथमैकवचन
स्य सप्तमीबहुवचनस्य वोपादाने शास्त्रीयस्वशब्दस्वरूपग्रहणं प्राथम्यादाद्यपक्षः प्रायोगिकग्रहणो द्वितीयः त

त्रानायः स्त्रिनेत्यादौ विभक्त्युदात्तत्वानुपपत्तेः प्रथमैकवचने स्त्रीति विकृतिप्रयोगात्तृतीयादौ च स्त्रियेति प्रकृतिप्रयोगात्
विकृत्या च प्रकृतेरग्रहणात् सप्तमीबहुवचनग्रहणे तु स्त्रीष्विति प्रकृतिप्रयोगात्स्वरविधौ नलोपस्यासिद्धत्वात्तस्यैव चतसृतौ
यादौ प्रयोगात्सिद्धेः अप्येकाक्षरादिनिष्ठेनो निषिद्धत्वात् त्रायं प्रयोग इति विभाव्यते न हि याज्ञो याज्ञिरित्याद्युदाहार्यं प्रथमैकव
चने यानिति रूपं तस्य तृतीयादावप्रयोगात् यात्क इत्यस्य तु प्रयोगात् न च तत्सम्यपतितन्यायान्नमो न भेदकत्वमिति वाच्यं
तस्य शब्दस्वरूपविशेषोपादानमात्रविषयकत्वात् यमियाहकमानेन तथैव सिद्धेः नेदमदसोरकोः एतत्तदोः सुलोपोऽ
कोरित्यत्र तादृशस्थलएव तस्याप्रापितत्वात् अन्येत्वभ्यपभिरित्युदाहार्यं एतदृत्यत्र अशादेशकृते एकाच्त्वात् अयमित्य
त्रैकाच्त्वाभावान्न प्रसंग इत्याहुः न द्वितीयः नगोश्वन्निति सूत्रे गोश्वनोर्ग्रहणे गोरेवापत्तेः गोश्वाक्षित्यप्रयुज्यमानस्यैव रू
पस्य गोभ्यामश्वभ्यामित्यादौ प्रयोगात्प्रकृतसूत्रेण प्राप्तस्य विभक्त्युदात्तस्य प्रतिषेधाय तदावश्यकत्वात् प्रथमैकवचनग्रहणे
तु गौः श्वा इति रूपस्य तृतीयादावप्रयोगादेव प्रसक्त्यभावेन तस्यानुपादेयत्वात् मैवं सप्तमीबहुवचनस्यैव ग्राह्यत्वात्तत्र
च नगोश्वन्नित्यत्र गोश्वनोर्ग्रहणस्यैव ज्ञापकत्वात् त्यदादेः प्रतिषेधो वक्तव्यः त्वया मया सोयहूस्तस्मादेकाचः परात्तृतीया
दिर्विभक्तिरुदात्तेति सूत्रार्थे प्रसक्तस्य विभक्त्युदात्तस्यायं प्रतिषेधः वस्तुतस्तु सौ यदेकाच् तस्मात्परेत्यर्थात्सौ च ग्रहणास्व
स्मात्सह इत्यत्र प्रकृतेरनेकाच्त्वात्प्रसक्त्यभावादनारम्भं ॥ अंतोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ नित्याधिकार
विहितसमासादन्यसमासे यदेकाजंतोदात्तमुत्तरपदं ततः परा तृतीयादिर्विभक्तिरंतोदात्ता वा स्यात् नित्यशब्दस्यात्र स्वरि
तत्वान्नित्याधिकारलाभः परमवाचा परमवाचापदे समासस्वरेण प्रकृतेरंतोदात्तत्वे अनित्यसमासे किं अग्निचिता उपपदसमासस्य
नित्याधिकारीयत्वात् कृदुत्तरपदप्रकृतिस्वरेणात्र चिद्बूहुदात्तः अधिकारग्रहणं किं विग्रहाभावमात्रेणानित्यसमासप
र्युदासो माभूत् अवाचा कवाचा ब्राह्मणेन बहुव्रीहौ नञ्भ्यामित्युत्तरपदांतोदात्तत्वे अत्र विभक्तेर्वैकल्पिकमंतोदा॰

सि॰
ष॰
५८

46

नत्वं यथा स्यात् । नन्वनित्यसमासइत्यधिकरणेसप्तमीमाश्रित्यानित्यसमासस्थांतोदात्तादेकाचः परास्तृतीयादिर्विभक्तिरुदात्ते
ति व्याख्यानादेवोपपन्नोत्तरपदग्रहणं व्यर्थमिति चेन्नैवं एकाज्ग्रहणस्योत्तरपदविशेषणं यथा स्यादित्येतदर्थत्वात् उत्त
रपदग्रहणाभावे हि अनित्यसमासइति सप्तमीविज्ञानादेकाज्ग्रहणं समासस्यैव विशेषणं स्यात् कृतत्वात् उत्तरपदस्याः
कृतत्वात् नचैकाचः समासस्याः प्रसिद्धिः पुनरूर्क्प्रयोर्क इत्यादेः सोलभ्यात् ॥ अंचेश्छंदस्यसर्वनामस्थाने ॥ अंचेः परासर्व
नामस्थानभिन्नाविभक्तिरुदात्ता वा स्यात् छंदसि तृतीयादिरित्यनुवर्तमानेपि असर्वनामस्थानेत्युपादानं शसोपि संग्रहार्थं
न त्वशसादिरित्येवोच्यतामिति वाच्यं नपुंसकेपि शसि प्रसंगात् इंद्रोदधीचो अस्थभिः दध्यंच इति दध्यङ् ऋत्विगादिना क्वि
न् वावितिहवि पदांतोदात्तस्यायं निषेधः ॥ ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ॥ एकाजेभ्योतोदात्तेभ्यः परोक्तविभक्तिरुदात्ता स्या
त् ऊठ्ग्रहणं कर्तव्यं ऊपधाद्वपकष्टस्यते नवन्त्वेत्यर्थः तेन पष्ठौहः पष्ठौहेत्यादौ विभक्त्युदात्तत्वं अक्षद्युवोऽ
क्षद्युवेत्यादौ न इदमो यथा आभ्यां एतानित्यादौ न एकाजित्यनुवृत्तेः अन्वादेशे तु न अत्रोतोदात्तादित्यनुवृत्तेः नत्र चेद
मोन्वादेशेशनुदात्तस्तृतीयादाविति एवानुदात्तत्वात् अतेव अविचक्षण शंसामि मा भ्यां गाउत्त आभ्यामिति सर्वानुदात्तेर
तितत्रैव व्याख्यानं पदादयोत्र पद्दन्नोमासित्रिसृत्वं निर्दिष्टा रहोणे तेपि निशंतापव अस्तन्निपादीनामनेकाच्त्वात्
तेषामप्यंतत्वाद्लोपेकृते यदेकाच्त्वं तदोदात्तमिति इह निसर्वेणेव विभक्तेरुदात्तत्वसिद्धेः नन्वनिशंतेषप्याद्युदात्तपा
दादिशहृस्नाकानामादेशानां ग्रहणं न स्यादंतोदात्तानुवृत्तेरयोक्तत्वादिति चेन्न तेषामप्यंतोदात्तत्वं निपातनस्यतइतिस्वी
कारात् पदादिषु निशंतानि प्रयोजयंतीति भाष्योक्ति प्रामाण्यात् पद्भ्योभूमिः दद्भिर्न जिह्वा जायते मासिमासि सनस्त्रि
न्निहृदया आपोयथा अपां फेनेन पुंसोयथा अधानेव पुंसः रायोयथा रायावयं दिवोयथा दिवेदिवे फलादौतु निषे
धस्यवक्ष्यमाणत्वात् ॥ अष्टनो दीर्घात् ॥ दीर्घांतादष्टनः पराशसादिर्विभक्तिरुदात्ता स्यात् अष्टाभिः नचोत्तरार्थमनुव

प्रथ॰

नेमानस्यान्तोदात्तादित्यस्यानन्वयः नोत्तसंख्यानेनाद्युदात्तत्वादिति वाच्यं ह्नन्तादित्वेनाद्युन्नोतोदात्तत्वान्मेड् कल्पत्वात्तम्
यणाह्वा दीर्घात् किं अप्रकृक्रमेणुत्राल्लणाद्यादधीत नत्वष्टनश्वाविभक्तावित्यात्वस्य नित्यत्वाद्दीर्घोदित्ति ध्येंध्याव
भावात् आत्वविकल्पेपि तदभावपक्षे षट्स्वरस्य परत्वात्प्रवृत्तेः नचात्वपक्षेपि नस्यात्स्यादष्टनः स्वरस्य तदपवादत्वा
दष्टकतयात्वाभावपक्षेपि षट्स्वरस्य न प्रवृत्तिरिति वाच्यं आत्वपक्षेन कारान्तत्वाभावेन षट्संज्ञाविरहात्षट्स्व
रस्य प्रवृत्त्यभावात् नैवम् दीर्घग्रहणस्यात्वपक्षे षट्संज्ञाज्ञापनार्थत्वात् न्यायसिद्धं चैतत् यथोद्देशपक्षे षट्
संज्ञाया अन्तरङ्गत्वात् नस्य आत्वस्य बहिरङ्गत्वादसिद्धत्वाद्वा तत्पूर्वमेव षट्संज्ञायाः प्रवृत्तेः । दीर्घग्रहणं नैव च आ
त्वविकल्पो ज्ञाप्यत इति निरूपितं प्राक् ॥ शतुरनुमो नद्यजादी ॥ अनुमागमरहितो यः शतृप्रत्ययस्तदन्तादन्तोदात्ता
त्परा नदी अजादिः शसादिविभक्तिश्च तिद्वयमुदात्तं स्यात् जानती जानतः जानतेत्यादि अन्तोदात्तात् किं दधती जक्ष
तीत्यादि अभ्यस्तानामादिरित्याद्युदात्तः अनुमः किं तुदन्ती एकादेश उदात्तेनोदात्त इति शतुर्लादेशत्वात्सार्वधातुकत्वादनु
पदेशत्वाच्च तास्यनुदात्तेदिति निघातः बृहन्महतोरुपसंख्यानं बृहती महती उगितश्चेति ङीप् तस्यानेन
उदात्तः गौरादिषु बृहन्महतोः पाठस्तु नार्थः तत्रानुपसर्जनाधिकारादतिमहतीत्यादेरसिद्धेः नचातिमहतीत्यादौ
कप्यस्तु का स्वरप्रवृत्तिरिति वाच्यं तदन्तविध्यभावेपि नद्यजादी बृहन्महतोः परत्वसौलभ्यात् नाभ्यां विहिताविति पर्या॰
नेगीकारात् बृहतो महत इत्यादि नच वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेति शतृवद्भावातिदेशात्स्वरोपि च सिद्धिः
पृषदादिभ्यो माभूदिति नियमार्थत्वात् आशासंताविदुषीत्यस्मिन्महत् यस्यैवं विदुषोग्निहोत्रं जुह्वतीत्यादौ शत्रादे
शस्य वसोः स्थानिवद्भावेन नदीविभक्त्योरुदात्तत्वं न भवति स्वरे च वस्वादेशो इति स्थानिवद्भावनिषेधस्य वार्तिककृ॰
तानत्रपठितत्वात् उदात्तयणो हल्पूर्वात् उदात्तस्थानिकाद् हल्पूर्वाद्यणः परा नदी शसादिरजादिविभक्तिश्चोदा॰

शि॰
घं॰
४२

तासात् चोदयित्रीसत्काना चोदयितृशब्दस्त्रंतमादंतोदात्तः अत्रेभ्यश्इतिङीप् उदात्तस्थानिकाकिं उदात्तस्वरितयोरि
तिप्राप्ताभावारंभः कर्त्रीत्यत्रतत्वादाद्युदात्तेऽप्यत्राप्युक्तापत्तिवारणायकर्तृशब्दः हलपूर्वात्किं प्रश्नयेवायवे अपवादेशयो
र्यकारवकारघटितत्वात्प्राप्तिः स्यात् नत्वसमुदायोत्तरयादेशः नतयणमात्रे अतएवसोपानकिरिम्यादौ अकडंत देश
स्याणंतरसमुदायत्नपत्वादुरणपरइतिरपरत्वेनेतिसिद्धांतः अतएवोदात्तस्वरितयोर्यण्याहलपूर्वादितिनोपात्ते मे
वे वह्रुतितवान्नालगपेत्याप्त्यापत्तिवारणार्थत्वात् वहूतितिन[illegible]यस्यालयेतिवहुव्रीहिः नचैवंसर्वपदप्रकृतिस्व
रापत्ताउकारस्योदात्तत्वमेवनास्तीतिवाच्यं वहोर्नञ्वदुत्तरपदभूम्नीत्यतिदेशादंतोदात्तत्वात् तेनाचोदात्तस्वरित
योर्यणइत्यनेनस्वरितत्वं उदात्तयतिहलयहणं नकारांतार्थं उदात्तयणाश्यपनीयोदात्तहलइत्येवपठनीयंउदा॰
त्तस्थानिकाद्धलःपरानदीत्यादिरर्थः तेनवाक्पत्नीत्यादौईकारस्योदात्तत्वं वाकपतिशब्दादेरंतोदात्तत्वात् नमृवाक्
विदिपिषितिसर्वपदप्रकृतिस्वरविधानात् विभाषासर्वेस्येतिपतिशब्दस्यकारस्यनकारादेशः तस्योदात्तस्थानिकत्व
स्पष्टं भाष्यकारास्तुहलपूर्वोन्नोङ्पान्तोरितिसंहितापादेलुप्तपंचमीकस्यनकारांतरस्यप्रश्लेषादुदात्तेनवतद्विशे
षणादुदात्तादेशात्नकारात्परस्याअपितयोदात्तत्वसिद्धिरित्याहुः सूत्रकारविषयकभक्त्यातिशयप्रदर्शनमात्रंचे
दंतत्वप्रयोगानिरीतिकैयटः उदात्तहलइतिपाठेलाघवस्यस्पष्टत्वात् ॥ नोङ्पान्तोः ॥ अनयोर्यणः परस्यशसाद
यउदात्तानस्युः अलंबुधा खलप्वा उदात्तस्थानिकयणादेशपरत्वात्प्राप्तावारंभः ॥ ह्रस्वनुड्भ्यांमतुप् ॥ ह्रस्वांतादंतोदा
त्तानुटश्चपरोमतउदात्तःस्यात् अग्निमान् अग्निशब्दोऽप्युमत्तिपदोफिट्स्वरेणाद्युमत्तिपदेतत्प्रत्ययस्वरेणांतोदात्तः अत्तत्वे
तः कर्णवेतःसत्वायः छंदस्यपिदृष्टपतत्इत्यतनङ् अमोनुट् सर्वेनकारलोपः अंतोदात्तात्किंवसुमान् मरुत्वानित्यत्रनभ
वति नकारेणव्यवधानात् हलस्वरप्राप्तावेवव्यंजनस्याऽविद्यमानवद्भावात् नेयहणंकर्तव्यं ॥

ह्रित्यत्वी

ग्रादेवानेनतनोविशः रयिमैनौ वहलमिति संप्रसारणोहर्वे हपेङ्क स्वाभावाद्भामा वारेभः विप्रतिषेधश्चवक्तव्यः त्रिश
ह्यान्यस्यमतुप उदात्तत्वं नेत्यर्थः त्रिवतीयोज्यानुवाकाभवंति छंदसीरइतिवत्वे वाछंदसीतिहर्वे सवर्णदीर्घः ॥
नामन्यतरस्यां ॥ मतपिग्रोक्तस्वांतयतटहेनतस्मान्परोनामुदात्तोवास्यात् अग्नीनां यदितज्ञस्वानान्परइतिव्याख्यायेत
तदापरत्वान्नित्यत्वाच्च नामीतिदीर्घेकृते ग्येस्वरोनस्यात् नचवचनसामर्थ्याद्धृतहर्वंगतिविज्ञाने तिरश्चांवनत्रस्रणा
मित्यादौ सावकाशत्वात् नतिसृचतसृइत्यनेन नाच्चनामीति दीर्घस्यनिषेधात् षट्त्रिचतुर्भ्यो हलादिरितिनित्यस्व
रात्तत्वेप्राप्ते विकल्पस्योपपत्तेः ननुषट्त्रिचतुर्भ्य इतियोगोविभज्यते तत्रनामित्यनुवर्त्यतेभ्यः परोनामुदात्तः स्या
दितिव्याख्येयं हलादिरित्यत्रषट्त्रिचतुर्भ्य इत्यनुवर्त्यायमर्थ्यासवदर्थः तत्रविकल्पेप्राप्ते नित्यार्थोयोगविभा
गः विकल्पस्य चतिसृचतसृमात्रविषयकत्वेन तत्रैव नित्यविधिप्रहृत्तत्रयपमात्रयाणामित्यादिविषयकत्वमपि
नामित्यन्यतरस्यामितियोगस्यस्वीकार्यं नचघृतहर्वंगतिंविनानेतिसिद्धं घृतहर्वंगतिविज्ञानमितिचेत्सत्यं ते
नणोन्तपतेजायमेस्तुविरितिन्त्रणामित्यत्रैवनामन्यतरस्यामित्यस्यसावकाशत्वस्यदर्शनीयत्वात् नचात्रापित्वा
न्यतरस्यामित्यस्यैव बाधकत्वं तत्रफलपदानुहृतेः वाग्रेयादौउदात्तयणोहल्पूर्वस्यबाधकत्वेपिनरीत्यत्रनत्वहतिवा
णायफलादित्वेन विभक्तिविशेषणीयत्वात् नतुङ्क स्वनुङ्यामित्यत्रङ्क स्वग्रहणस्य स्वारितत्वेनामन्यतरस्यामितीहा
र्थे प्रतिज्ञातेनतस्य सर्वङ्कस्वग्रहणार्थत्वात्तन्नटशाहमात्रविषयकत्वेनसंकोचोयुक्तः तथाहतिन्त्वान्यतरस्यामित्येतना
दनेनरे नामित्येवसूत्रेकुर्यात् न्यणामित्यत्राप्युदात्तविकल्पस्यभावनैवसिद्धेः एवंचनामन्यतरस्यामितिवचन
सामर्थ्याद्घृतहर्वगतिविज्ञानमितिचेत्सत्यं तथापिप्रतिपत्तौगौरवप्रसंगात् ननुनामस्वरेमतोङ्कस्वग्रहणामिति
वातिकरीत्यामतोङ्कस्वांतान्नामन्यतरस्यामितिसूत्रन्यासापत्तयोक्तरीत्याघृतहर्वगतावेवलाघवमितिचेन्मेवम्

सि॰
प्र॰
४८

नामन्यतरस्यामित्यत्र मनोज्ञत्वादिष्वनुवर्तनं इत्यस्यैव वार्तिकार्थत्वात् अस्य ग्रहणं भय मनेष्वनुवर्त्तने मनुवित्यत्र ह
न्ते च सामर्थ्यात्समस्य तनयादि परिणामितं इति यथोक्तार्थसिद्धिः ॥ अष्ट्रं दसिवा ॥ अष्टापरो नाम उदात्तो वा देवसेना
नामभिभंजतीनां वेन्मुक्तेर्नेह जयंतीनामरुतो यंत्व अत्र स्वरेणानुदात्तत्वे ॥ षट्त्रिचतुर्भ्यो हलादिः ॥ षट्संज्ञके
भ्यास्त्रिचतुर्भ्यां च परा हलादिर्विभक्तिरुदात्ता वा स्यात् आवद्धिः क्रियमाणः षष्णां पंचानां त्रयाणां चतुर्णां हलादिः
किं चतस्रः पश्य ॥ ऋलुपोत्तमे ॥ षट्त्रिचतुर्भ्यः परा या हलादिर्विभक्तिस्तदंते पदे उपोत्तममुदात्तं स्यात् सर्वेषां
पवादः आदीनामेतत्सूत्रं तत्सर्वं उपोत्तमे अध्वर्युभिः पंचभिः नवभिर्वाजैः सप्तभ्यो जायमानः आ दशभिर्विव
स्वतः तिसृभिः चतुर्भिः उपोत्तमे किं आवद्धिः विश्वैर्देवैस्त्रिभिः अत्र विभक्तिविशिष्टस्य अच्त्वान्नैतत् षट्त्रिः क
लिकिं पंचानां नवानामित्यादि ॥ विभाषा भाषायां ॥ उक्तविषये उदात्तविकल्पः स्यात् पंचभिः तिसृभिः ॥ न गोश्व
न्सावर्णराड्डुङ्क्रुङ्कृद्भ्यः ॥ एभ्यः प्रायुक्तं न स्यात् अनेनेतरोक्तस्वरनिषेधस्य प्रसक्त्यभावपराहतत्वाद्यथा प्राप्तमानो
स्वरांतराणां प्रतिषेधोयं गवां शतं गोभ्यो मातुः सावेकाचस्तृतीयादिरित्यस्यात्र निषेधः अन्नपूर्वस्य संहितापाठे विदि
त्यस्य वाङ्मलकान्मध्ये प्रक्षेपः अन्नपूर्वस्य निदिनिनरावांशंसं हवणां नरावंशसंदैव्यं चेत्यनानुपूर्व्यं संहिताइति
प्रातिशाख्योक्तेः पदपाठकाले तु पुनःशेषं विदितिपादःशोषप्रबलात्मलेषु पुनरित्यलुक् वनस्पत्यादिषु ॥ भय
पदप्रकृतिस्वरः सावर्णोन्त्यस्य प्रथमैकवचने सौ पदवर्णान्तमित्यर्थः नन्विह सावेकाचस्तृतीयादिर्न निर्णीतत्वात्सप्तमी
बहुवचनस्यैव ग्रहणमस्त्वेकप्रकरणोपात्तत्वात् नचैवं ताभ्यां याभ्यां ग्रहणाभ्यामित्यत्र निषेधो न प्रवर्तेत अपि
ते षष्ठ्येकारांतत्वादिति वाच्यं सावेकाच इत्यस्यार्थ ग्रहणादोषाभावात् सप्तमीबहुवचने यदेकारांतं रूपं तस्यान्पर
त्वाभावाद्विभक्तेः नचैवं तेभ्यो येभ्य इत्यादौ तु उक्तनिषेध ग्रहणानापत्तेः अप्पकारांतत्वाभावात् सावेकाच इत्यस्य वा

प्रसक्तिसत्वात् नचयाम्यस्तामभ्योर्ब्राह्मणीभ्य इत्यत्र सर्वपदेति निषेधोपपत्तिर्नत्वसिद्धांते ॥ सेत्ति द्रूपस्याग्रामावादिति वाच्यं
केभ्य इत्यादेः सर्वपदेत्यसिद्धेः नन्वसिद्धांतेप्यनुपपन्नः तयाते नेति स्त्रीपुंनपुंसके प्रथमानुपपन्नेः स्त्रीपुंसयोः सकारस्यै
वाऽकारांतत्वात् न रूपस्यवाऽग्रामावात् नपुंसके तु तदित्यस्याऽकारांतताया एवाऽभावात् सर्वं सर्वपदेत्येतदनुपपत्तिसत्वा
त् तस्माद्यज्ञदोष्ठेति निषेधयज्ञभाष्यामेवारंभणीयः अत्र कैयटः तेनेतियङ्पन्यस्तं श्राम्यत्वत्र कथं स्वरः यकारांतयदेका
चस्तेन तस्मादत्र परोनद्यां नवाङ्गणे कृते प्राप्ति निषेधयाङ्भ्याम्ये विधा वंता दिवत्वस्या विंप्यं तस्मादिदं द्वैधेः राजापरम
राजो अङ् इति किं तेन तसंज्ञा चते अलूनन कारस्य ग्रहणं प्राचाप्रामो गम्यर्थस्य नकारलोपाङ्कृ निषेधाग्रहस्याप्राचाप्रा
म्यामित्यादौ भवत्येव विभक्त्युदात्तत्वं कुङ् क्रिनंतः क्रुंचा परमक्रुंचा कदिति किं वंतः उरोति कृतति र्वा कृता परमकृता
॥ दिवोझल् ॥ दिवः परा झलादिर्विभक्तिरुदात्ता तस्मात् द्युभिर्द्युभिः परियानमस्मात् सावेकाचइतिऊडिदमिति वाप्रा
प्तस्यायं निषेधः झलादिः किं ङपत्वाग्रे दिवेदिवे ॥ न्वान्यतरस्यां ॥ ङ्यशाह्यन्या झलादिर्विभक्तिरुदात्ता वास्यात् ङ्यम्भ्यो॥
ङ्यभिः पक्षेनुदात्तत्वं झलादिः किं नरीक्षत्र स्मात् दनुदात्तत्वमेव अत्र वदंति अष्टनोदीर्घात् दिवोझादिः शतुरनुमोनदीवे
ति सूत्रगणीयं तङ् तरेउदात्तयणो हल्पूर्वादित्यादि दिवः परा झजादिर्विभक्तिरुदात्ता भवतीत्यर्थः तेन झलादौ प्राप्त भावा
द्दिवोझलिति सूत्रे ऊडिदमिति सूत्रे युगाह ग्रहणं चमाह्विति लाघवं नच दिवोझलिति सूत्रयोगेन्न्वान्यतरस्यामित्यत्र झ
लग्रहणानुवृत्तिर्नस्यादिति वाच्यं तदनुवृत्तौ प्रयोजनाभावात् नरीत्याद्युदात्तस्य वेदे दर्शनाद्धेति तद्धि तं ङ्यन्वान्यतरस्या
मिति सूत्रेफलीत्यनुवृत्त्या नरीत्यत्रादि भक्त्युदात्त प्रवृत्ते नैतिनामन्यतरस्यामित्यत्र भाष्यकारैरेवोक्तत्वात् कादिकस्वरस्यव्य
वस्थयेनोपपाद्यत्वात् किंचैवं उदात्तयणोइतिसूत्रे अजादिग्रहणं नानुवर्तते चानुकृष्टत्वात् ॥ तित्स्वरितं ॥ सूत्रेर्थः चिकी
र्ष्यं प्रचोयत् कार्येऽकृष्टलोपेपित् प्रत्ययग्रहणं कर्तव्यं अतइडातोः किरतिगिरतीत्यादौ इकारस्य स्वरितत्वं माभूत् पवंदि

वऽदित्यादौ ग्रहणभाष्ये दकारांतोयं नचैवंभाष्यमानोऽणकारः सवर्णग्राहकइत्यत्र ज्ञापकत्वेनस्यादितिवाच्यं दकारस्यापितत्का
लग्राहकत्वात् प्रत्ययग्रहणपरिभाषयासमाधानेन्तनाकरस्थितं ऋदोरबित्यत्रदात्परत्वमाश्रित्यउकारस्यतत्कालग्राहकत्वप
रिहारदर्शकभाष्यस्याऽत्रत्यभाष्येणसमंयथानविरोधस्तथासर्वं प्र[?]विनिप्रत्याहारप्रस्तावे ॥ तस्यनुदात्तेन्ङिददुपदेशाल्लसा
र्वधातुकमनुदात्तमह्न्विङोः ॥ तासेरनुदात्तेतोङितोऽदुपदेशाच्चपरंलादेशसार्वधातुकमनुदात्तंस्यात् ह्नुङिङोर्वर्जयित्वा
कर्ताकर्तारौतनिपः पित्वादनुदात्तत्वादनुदात्तेपवडादेशो टिलोपेऽदात्तनिवृत्तिस्वरेणांतोदात्तत्वं तशाद्धस्यांतरंगत्वाड्डादेशेपर
त्वाट्टिलोपेतथैव कर्तारावित्यादौप्रत्ययस्वरेणांतोदात्तत्वबारणार्थमारंभः तेननास्तिस्वरेणमध्योदात्तत्वं अनुदात्तेतोयथा
ईढेईडाते आस्तेआसाते ङितोयथा सूतेसुवाते शेतेशयाते नत्वविनुतःसत्तुनइत्यादौविकरणस्यसार्वधातुकमपिदि
तिङित्वात्ततःपरस्यापिअनुदात्तत्वंस्यात् ङिदुपदेशादितिव्याख्येयत्वात् यतेनङितोनुदात्तत्वेविकरणेभ्यःप्रतिषेधइति
गतार्थं अदुपदेशाद्यथा पचतःपठतः नन्वशपःकथमकारांतोपदेशत्वंउपदेशेहलंतत्वात् नचवचनसामर्थ्यात्तद
तःभाविष्यतइत्यादौशपस्यप्रत्ययस्यचउपदेशेऽकारांतत्वसत्वेननत्वचरितार्थत्वात् नचोपदेशइत्यकारविशेषणा
न्निपातनाच्चविशेषणस्यपरनिपातइतिउपदेशपदस्यकर्मसाधनतयाऽउपदिश्यमानाभिन्नोयोऽकारइतिपर्यवसा
नात् ताटशादकारात्परत्वंतसोऽस्येवेतिनदोषइतिवाच्यं हतोहतइत्यादावतिप्रसंगात् अकारस्योपदेशाद्विशेषणेन
धातंदत्तविधिसज्ञावादकारांतोपदेशादित्येवंव्याख्येयत्वात् नचव्यपदेशिवद्भावेनहकाराऽकारस्यापिअकारांतत्वं अ
र्थवत्वेवतत्त्वहत्तेरुक्तत्वात् नन्वकारांतेयउपदेशइत्यर्थेमाहिभुवामित्यादौक्तस्यावीतिलोपेकृतेऽणकारानुदात्तत्वे
स्यात् [illegible]स्योपदेशेऽकारांतत्वात् एकदेशविकृतन्यायेनलसार्वधातुकस्यतदुत्तरत्वात् अकारादुपदेशादितिपञ्चमेन
कारात्परत्वाभावान्नापत्तिः नचाप्यनुदात्तत्वेकृतेक्तस्यावीतिलोपाऽदात्तनिवृत्तिस्वरेणोदात्तत्वंभविष्यतीतिवाच्यं पर

त्वाल्लोपस्यैव सर्वं प्रसक्तेः नैवं लसार्वधातुकानुदात्तत्वं हि प्रत्ययस्वरस्यापवादः तद्विषये च प्रत्ययाद्युदात्तस्य प्रसङ्गस्याभावा
त् अलङ्घोदात्तभावप्रवृत्तस्मिन्परे वस्यात्वीतिलोपप्रसक्तेः अविद्यमानोदात्तरूपानुदात्ते परे अकारलोपप्रसङ्गस्याउदात्तनिवृत्ति
स्वरेण सिद्धेः न च परत्वाल्लोपे कृते ततउदात्तनिवृत्तिस्वरः लसार्वधातुकानुदात्तत्वयोर्विप्रतिषेधे परत्वाल्लसार्वधातुकानुदात्त
त्वस्यादिति वाच्यं पुनःप्रसङ्गविज्ञानात्सिद्धेः तस्मादकारान्तेयङ्पदेशइति सिद्धं ताच्छ्यपः परस्य कथं उक्तनिघात इति चेत्
उच्यते अनुबन्धानामनेकान्तत्वात् एकान्तपक्षेपि डीचामाङोत्यतीहारे इति मेङः कृतात्वस्य निर्देशेन कार्यविरोधित्वं नास्ती
ति ताधितत्वात् नन्वेवं कृते तस्यादावपि लसार्वधातुकमनुदात्तं स्यात् एवावङ्यादौ दीर्घादेशे कृते नेपुपदेशग्रहणाद्यथा
भवत्येवं शपो लोपेपीति स्ववचनात् नैवं आदेशस्यात्र भावरूपत्वात्तेन समं पौर्वापर्याभावात् न च स्थानिवत्वं अल्विधि
त्वात् नापि प्रत्ययलक्षणं वर्णाश्रयत्वात् एवावेत्यादौ तु दीर्घीकारस्य समानत्वप्रसक्तेः अनुदात्तङिद्ग्रहणमप्यत्र लिङ्गं अन्य
थाल्वमेव विकरणमादाय अनुपदेशात्परत्वमाश्रित्यैव तत्सिद्धेः न च विदाते विदाने इति श्रमर्थमनुदात्तग्रहणमिति वाच्यं
तथापि ङिद्ग्रहणस्यैव ज्ञापकत्वात् रुधादौ कस्यापि धातोर्ङित्वाभावात् वस्तुतस्तु अनुदात्तग्रहणमपि लिङ्गं विदिविदिः
श्याउक्तनिघातस्य प्रतिषेधात् प्रत्ययस्वरस्यैवेष्टत्वात् तास्यादिभ्योनुदात्तत्वे सप्तमीनिर्देशः अभ्यस्तजसर्थः लसार्वधातुके इ
ति पठनीयं अन्यथा अभ्यस्तानामादिरुदात्तो भवति लसार्वधातुकं चोदात्तमिति तत्र वाक्यार्थः स्यात् वचनबलाच्च योगपद्येप
र्यायो वा स्यात् न च अश्रूयमाणपाठेपि तत्रार्थाद्विभक्तिविपरिणामो भविष्यतीति वाच्यं कृतसंबंधोपपत्तौ तदभावात् सप्त
म्यंतत्वे तु अभ्यस्तानां शिवश्रादिरुदात्तो लसार्वधातुके परे इत्यादिरर्थः न चैवं प्रकृतस्वरे लसार्वधातुके परे विधीयमान
मनुदात्तत्वं तास्यादीनामेव स्यादिति वाच्यं तास्यादिभ्य इति पंचम्या लसार्वधातुक इति सप्तम्याः षष्ठीत्वप्रकृतेः तस्मादित्यु
त्तरस्येत्युक्तेः न च सप्तम्यैव पंचम्याः षष्ठीत्वं कल्प्यतां तस्मिन्निति निर्दिष्टे पूर्वस्येति वचनादिति वाच्यं सप्तम्या उत्तरस्यत्वे

सिं॰ मं॰ पं॰
50

कृतार्थत्वात् न त्वकल्पकत्वात् चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेन चित्स्वरस्यावकाशः चलनः चोपनः चलनशब्दा
र्थादिति युच् तास्यादिभ्योऽनुदात्तस्यावकाशः लेऽस्यादिः आसीनः शयान इत्युभयप्रसंगे परत्वात्तास्यादिभ्योऽनुदात्तत्वं ननु आ
देः परस्येति वचनादाकारस्यानुदात्तत्वे नकाराकारस्य च चित्स्वरेणोदात्तत्वं प्राप्नोतीति विषयभेदात्कथं विप्रतिषेध इति
चेन्नैवं प्रत्ययात्स्वितीत्यनेन स्वरविधौ संघातः कार्यी भवतीति ज्ञापयिष्यमाणत्वात् सर्वस्याप्यानस्यानुदात्तत्वविधानात्
मुकश्चोपसंख्यानं पचमानः यजमानः विकरणेन त्वस्यागमत्वात्तस्य च मुको विधानादनुपदेशशापेक्षस्य नवयवत्वात् अनु
पदेशग्रहणेन मुको ग्रहणाभावादारंभः वक्तव्यं तस्यायोऽकारलस्य मुगिति समम्येवक्ष्यमाणत्वादुपसंख्यानं व्यर्थमिति भा
ष्यं तास्यादिभ्यः किं। चिन्वन्तः सुन्वन्तः लादेशा इति किं तिङ्मानाः सार्वधातुक इति किं शिश्ये अङ्गिङोर्किन्नुते यदधीते ॥ आदि
सिचोऽन्यतरस्याम् ॥ सिजन्तस्यादिरुदात्तो वा स्यात् यासिष्टं वर्तिरश्विनौ आद्युदात्तोऽयं माहिलाविष्टं मध्योदात्तोऽयं सिचश्चित्कर
णं इट उदात्तार्थमित्युक्तत्वात् इट आगमानुदात्तबाधनात् सिच आद्युदात्तत्वेऽनिटः पित्त्वोपसंख्यानं अनिटः सिचः परः पि
त्प्रत्यय उदात्तो वा स्यादित्यर्थः माहिकार्षिः अंतोदात्तोऽयं पक्षे धातुस्वरेणाद्युदात्तं अमः पित्त्वेनानुदात्तत्वात् अनिटः किं मा
हिलाविष्टं पक्षे आद्युदात्तं पक्षे मध्योदात्तं ॥ स्वपादिहिंसामच्यनिटि ॥ स्वपादीनां हिंसेश्चानिटि अजादौ लसार्वधातुके परे
आदिरुदात्तो वा स्यात् स्वपादयश्चागणणानात् तङ्क्तं स्वपिश्वसिहिंसिनिजेस्त्विदरिद्राजागृणालयः दीधीवेवीचकासश्चषसशा
ङङ्क्ष् नश्चैवच चर्करीतमदाद्यन्तर्गणोऽत्रेयः स्वपादिकः स्वपंति श्वसंति हिंसंति पक्षे प्रत्ययस्वरेण मध्योदात्तत्वे ङित्येवा
ऽयमिष्टः नेह स्वपानि हिनसानि इति ह्यन्तुसारिणः अन्ये तु भाष्येनेनदृष्टमिति निर्मूलमित्याहुः अचि किं स्वप्यात् अनिटि
किं स्वपितः रुदादिभ्यः सार्वधातुके इतीट् स्वपादीनां वावचनादभ्यस्तस्वरो विप्रतिषेधेन विकल्पस्यावकाश उक्तः अभ्य
स्तानामादिरित्यस्यावकाशः [illegible] प्रति जनतीत्यादावुभयप्रसंगे परत्वादभ्यस्ताद्युदात्तत्वं ॥ अभ्यस्तानामादिः ॥ उदात्तः स्यादच्
नै

पं॰

नित्वजादौ लसार्वधातुके परे ददति दधति जक्षतीत्यादि अनरादिग्रहणं नित्यार्थं ॥ अचिकिं दध्यात् अनिटिकिं जक्षि

तः दधाना इत्यादौ चित्स्वरस्यायं बाधकः परत्वात् ॥ अनुदात्ते च ॥ उदात्तरहिते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः स्या

त् हलादित्वादप्राप्तावारंभः ददाति दधातीति तिपः पित्त्वादनुदात्तः अनुदात्तग्राहित्वं स्वरविशेषद्वयानुदात्तविवक्षायां तु मा

हि स्म दधात् दधात्वित्यादौ न स्यात् लोपयणादेशाभ्यामनुदात्तस्य इकारस्यापहृतत्वात् तदुक्तं अनुदात्ते चेति बहुव्री

हिनिर्देशो लोपयणादेशार्थः इति पदद्वयापेक्षतया यणो बहिरंगत्वात्ततः पूर्वमेवोक्तस्वरसिद्धेर्लोपपरत्वान्न्यायासिद्धेः

प्रयोजनं बोध्यं ॥ सर्वस्य सुपि ॥ सर्वशब्दस्यादिरुदात्तः सुपि परे सर्वेषां विकारः सार्व इत्यनुदात्तादिलक्षणस्य ञः सि

द्ध्यर्थं उणादावेतोदात्तस्य सर्वशब्दस्य निपातितत्वादारंभः सर्वः सर्वौ अनेकाच्कस्येति वक्तव्यं तन्मध्यपतितन्यायात्सर्वस

कौ निषेधारंभः सर्वकः अंतोदात्तोऽयं सर्वभौम इत्यादौ प्रत्ययलक्षणेनाद्युदात्तत्वमेवेति तत्रैवोक्तं ॥ भीह्रीभृहुमदजन

धनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ एषामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् बिभेति जिह्रे

ति बिभर्ति ममत्तु नः परिज्मा जजनदिंद्रं मा नो अयद्धीरं दधनत् दरिद्राति यो जागर्ति अनुदात्ते चेत्यनेनाद्युदात्तत्वे प्राप्ते

तत्प्रत्ययात्पूर्वस्योदात्तत्वे विधीयमाने विषयविभागलाभार्थं भ्यादीनामुपादानं भ्यादीनां प्रत्ययात्पूर्वस्य ददाम्यादीनां

त्वादेरुदात्तत्वमिति विवेकस्य वचनव्यतिरेकेणानुल्लासात् पर्यायेणोभयप्रसंगात् यद्वा सर्वेषामप्यभ्यस्तानां पितो ल

सार्वधातुकात्पूर्वस्योदात्तत्वं स्यात् अभ्यस्तस्वरस्य मिमीत इत्यादौ सावकाशत्वात् माङो ङित्त्वात्ततः परस्य लसार्वधातुकस्य

तास्यनुदात्तेदित्यनुदात्तत्वेऽस्य प्रवृत्तेः न च भ्यादिभ्यः परस्यापित्वाः प्रत्ययातिरिक्तस्यासंभवात्प्रत्यये इति व्यर्थमिति वाच्यं वि

भयानीत्यत्र आटः पूर्वस्योक्तस्वरो माभूदित्येतदर्थत्वात् आडुत्तमस्य पिच्चेति आट आगमतया प्रत्ययत्वाभावात् नन्वेव

च पित्त्वविधानात् नन्वाटः पूर्वस्यैवास्तु प्रत्ययात्पूर्वत्वाविशेषाभावः एकस्यैवोदात्तविधेः लोपेऽपि पित्त्वं विधीयते नः

त्वाट्ः इत्यागमसहितस्यैव लोउन्नमस्यापि न्नाडकस्वरप्रवृत्तेः नचाटउदात्तत्ववारणार्थमेव प्रत्ययपदमिति वाच्यं पिति
परे विहितस्य स्वरस्य तदागमेऽशंकितुमशक्यत्वात् नहि शिष्टादेव सर्वस्य कार्ययोगात् प्रकृतसहितस्य प्रत्ययत्वात् स
त्वे विनापि प्रत्ययग्रहणमाद्युसिद्धेस्तावित: एवं स्योदात्तसिद्धौ स्वरविधौ संज्ञातः कार्यीभवतीति ज्ञापनार्थं तथा सति हि
संज्ञातस्य स्वरविधौ पर्यायेण सर्वेषामपि चोउदात्तत्वमाभूत् किंतु प्रत्ययात् सर्वस्यैवा च इत्येतदर्थं तया सामर्थ्यकं अतएव
चित्स्वरान्नाम्न्यादिभ्योन्तोदात्तत्वमिति विप्रतिषेधः सर्वमुक्तः संगच्छते अथ सर्वग्रहणाद्वर्णेपि तीति समस्यैव तल्लाभात्
तस्मिन्निति निर्दिष्टे सर्वस्येत्युक्तेः सत्यंसौ वर्यः समस्यन्तं दंतसमस्य इति ज्ञाप्यत्वात् प्रत्ययेन संज्ञातस्य कार्ये निहत्यर्थं
स्यतस्य स्वरविधौ तदंतविधिज्ञापकत्वात् ततश्च प्रत्यये पितीत्युच्यमानेपि प्रत्ययात् तस्य समुदायस्योदात्तत्वस्यात्तत्वा
भूत् किंतु प्रत्ययात् सर्वभागस्यैवेति तत्सार्थक्यं तेनडपोत्तमेरितीत्यादौ रिदंतस्योपोत्तममित्यादिरर्थो व्याख्येयः नचैवंव
त्वरः शसीत्यत्र शसंतस्यांतोदात्तत्वप्रसंगः शस्ग्रहणसामर्थ्यात् अन्यथा ऊडिदमादिसूत्रपवचनं रथ्येति ब्रूयात् अ
सर्वनामस्थाने इत्यनुवृत्त्या जस्यनापत्तेः हलादीनांच षट्त्रिचतुर्भ्यइत्युदात्तविधानात् परिशेषादेव शसिविषयकत्वसि
द्धेः नचापि ग्रहणं व्यर्थं जायतेत्यादौ अभ्यस्तानामादिरित्यनेनोदात्तप्रवृत्त्येरापत्तेः नत्वनेन प्रत्ययात् सर्वस्य अकारस्यो
दात्तत्वेउदात्तस्वरितयोर्यणइति स्वरितःस्यात् अभ्यस्तानामित्युदात्ते त्वपदमाद्युदात्तं भवतीति विशेषइति वेद्यं नित्य
त्वाद्यणादेशे कृते उभाभ्यामत्येकस्यैवोदात्तप्राप्तेः सैवं स्वरभिन्नस्य प्राप्यायणोऽप्यनित्यत्वात् दरिद्रतीत्यत्र इकारस्यो
दात्तत्वेमाभूदाद्युदात्तत्वमेव यथा स्यादित्येतदर्थत्वाच्च अन्यथा ऽनेन इकारस्योदात्तप्रसंगात् नचाभ्यस्तयोरित्या
लोपस्स्यानिवत्वं स्वरविधौ न निषेधात् ॥ लिति ॥ प्रत्ययात् सर्वमुदात्तं स्यात् चिकीर्षकः ईकार उदात्तः ॥ आदिर्णमुल
न्यतरस्यां, णमुलि परे अभ्यस्तानामादि र्वोदात्तो वा स्यात् लोलूयं द्वितीयलोलूयशब्दस्याम्रेडितत्वादनुदात्तत्वे अ

रु लोलूयं

यमे पत्ते आद्युदात्तः तदभावपक्षे लित्स्वरेण मध्योदात्तः न चात्राल्लोपस्य स्थानिवत्त्वं स्वरविधौ तन्निषेधात् ॥ अचः कर्तृयकि ॥
तासन्त्यनुदात्तेदित्यत उपदेश इत्यनुवर्तते उपदेशे ऽजन्तानां धातूनां कर्मकर्तृविषये यकि परे आदिरुदात्तो वा स्यात् ॥ लूयते केदारः
स्वयमेव पक्षे यक्स्वरेण मध्योदात्तः उपदेशे किं स्तीर्यते स्वयमेवेत्यादावपि यथा स्यात् अन्यथा रपरत्वे कृते ऽजन्तत्वाभावान्न स्या
त् एतेन रपरत्व उपसंख्यानमिति गतार्थं ननु एवं जनादीनां कर्मकर्तरि यगीनानांउक्तस्वरो न स्यात् उपदेशे ऽजन्तत्वविरहात् जाय
ते स्वयमेव अकर्मकत्वेपि पक्षे द्वादशधा जन्तेः स्यादाविव अन्तर्भावितण्यर्थत्वाज्जनेः कर्मकर्तरि यक् मैवं अनुदात्तोपदेश
त्वात्तो ये विभाषेत्यत्रोपदेशपदानुवृत्त्या यकारादिप्रत्ययविवक्षायामेवात्व विधानात् यादिप्रत्ययविषयत्वरूपोपदेशे ऽज
न्तत्वसत्त्वात् ॥ थलि च सेटीडन्तो वा ॥ अजन्ते थलो विहितः सेट्कस्य थलस्तदन्ते पदे इडन्तमादिर्वा उदात्तो वा स्यात् अन्यतरस्यां ग्रहण
मनुवृत्तमेव इडन्तपो विकल्पे सिद्धे वाग्रहणं कार्यकल्पार्थं तेनादेरपि लाभः लुलविथ पक्षे लित्स्वरोपि पर्यायेण चत्वार उ
दात्ताः ययिथेत्यत्र यः थलि किं लुलविव सेटीति किं ययाथ अत्र लित्स्वरेण मध्योदात्तमेव न चेड्ग्रहणात् सिद्धे पदवि
धेयत्वत्र पदाद्युदागमस्त्वदात्तस्योदात्तार्थत्वेनैवोपपत्तेः अन्यथा चतुर्णामभावे त्रयाणामिव इडभावेपि तदापत्तेर्डवीरत्वात्
ननु अन्तस्थ ——— युगपदित्युक्त्या अन्यत्रोदात्तयोगपद्याभावादेव इडादीनां त्रयाणां पर्यायेणोदात्तसिद्धौ अन्यतरस्यां
ग्रहणानुवृत्तिर्वैयर्थ्यमिति चेन्न त्रयाणामप्युदात्तत्वाभावे लित्स्वरप्रवृत्त्यर्थतापादर्शितत्वात् ॥ ञ्नित्यादिर्नित्यं ॥ ञिदं
तस्य निदन्तस्य चादिरुदात्तः स्यात् दाक्षिः ॥ यतनङ्ग ॥ मोक्रैतमन् नित्यग्रहणं विकल्पनिवृत्त्यर्थं ॥ आमन्त्रितस्य च ॥ सं
बोधने प्रयुज्यमानस्यादिरुदात्तः स्यात् अग्न इन्द्र वरुण मित्र देवाः ॥ पथिमथोः सर्वनामस्थाने ॥ आदिरुदात्तः स्यात् अयं पं
थाः मंथाः सर्वनामस्थाने किं ज्योतिष्मतः पथो रक्ष उदात्तनिहतस्वरेणान्तोदात्तः स्वरविधौ सम्पलं देन समस्य इति पदेष्य
त्र स्वरभेदाभावात् परमममीत्वं ॥ अन्तश्च तवै युगपत् ॥ तवैप्रत्ययान्तस्यान्त आदिश्च समकालमेवोदात्तौ स्यातां हर्षमेदा

तवाउ त्तमर्थे सिद्ध इति नैवं प्रत्ययः ॥ क्षयो निवासे ॥ आद्युदात्तः स्यात् क्षियन्त्यस्मिन्निति क्षयः अन्यत्राऽजन्तत्वादन्तोदात्तः ॥ जयः करणं ॥
करणवाची जयशब्द आद्युदात्तः जयन्त्यनेनेति जयोऽश्वः करणं किं जयो ब्राह्मणानां भावे एरच् अन्तोदात्तः ॥ वृषादीनां च ॥ आदि
रुदात्तः स्यात् वृषः जनः ज्वरः ग्रहः हयः गयः मयः तयः अयः अमः वेद वंश पवाय च गय इति गायतेर्निपातनादेत्वं सू
दः इगुपधात्कः गुहाभिधा ध्रुः शमरणौ संज्ञायां समनोभावकर्मणोः शमो भावे रणः कर्मणि निपातनादच् मंत्रः मं
जंतः शांतिः किजंतः कामयागौ च जंतौ आराधारा कारा अद्ंताः वहः चातः कल्पः अजंतः पादः चजंतः कृवि प्रत्यय
स्वरेणैक विश्वकर्षान्तत्वात् इत्यंतोदात्ते प्राप्ते आरंभः आकृतिगणोऽयं अविहितलक्षणआद्युदात्तो वृषादिषु द्रष्टव्यः ॥ संज्ञायामुप
माने ॥ उपमानशब्द आद्युदात्तः संज्ञायां चंचेव चंचा संज्ञायामिति कनो लुमनुष्य इति लुप् नन्वत्र तिस्वरेणैव सिद्धं न
च नलुमताङ्गस्येति प्रत्ययलक्षणनिषेधः तस्याङ्गाधिकारीयकार्यविषयकत्वात् सत्यं उपमानस्याद्युदात्तवचनं ज्ञाप
कमनुबंधलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य तेन गार्गाः वत्साः विदाः ऊर्वाः उपग्रीवा इत्यादौ यञादीनां लोपे नाद्युदा
त्तत्वं अत्रयः इत्यत्रापि नेरिति ढक् अत्रिभृगुकुत्स इत्यादिना तस्य लुक् तमादाय कित इत्यंतोदात्तत्वाभावः अथैवं पथिप्रि
य इत्यादौ पथिमथोरित्याद्युदात्तत्वं स्यात् तस्यानुबंधलक्षणत्वाभावात् स्वरमात्रविषयकत्वेन सर्पिरागच्छ इत्यादौ आ
मंत्रितस्य चेत्याद्युदात्तत्वं न स्यात् लुकालुमतान्यत्वं तत्त्वाभावेन पदत्वाभावात् माहिदानां इत्यादौ आदिः सिच इति स्वरश्च न
स्यात् मैवं सप्तमे लक्षणे स्वरे प्रत्ययलक्षणं न भवतीति ज्ञापकत्वात् पथिप्रिय इत्यादौ तु वचनेनैव दोषस्य वारणीय
त्वात् प्रपंचितं चेदं न लुमतेति सूत्रे ॥ निष्ठा च द्व्यजनात् ॥ निष्ठान्तस्य द्व्यच आदिराकारभिन्न उदात्तः स्यात् संज्ञायां दत्तः गु
मः प्रत्ययस्वरापवादोऽयं द्व्यच् किं चिंतितः अनात् किं त्रातः अन्तोदात्तो मा पूर्वसंज्ञायां किं कृतमित्यत्र माभूत् ॥ शुष्कधृष्टौ ॥ आद्यु
दात्तौ स्तः असंज्ञार्थमेतत् अतसंतप्लुक् ॥ आशितः कर्त्ता ॥ कर्तृवाचक आशितशब्द आद्युदात्तः आशितो देवदत्तः ॥

आशितेकर्तरिनिपातनमुपधादीर्घत्वमाद्युदात्तत्वंच अशेःसकर्मकत्वात्कर्मणियेशामपवक्तप्रत्ययोनिपात्यते अविवक्षितकर्म
कर्तानदुपपाठेनेपचन्त्यादिभ्योपितथाप्रसंगात् सत्येसैवोऽकर्मकस्यतत्रोपादानात् अत्रभाष्ये आद्युदात्तस्याधिकारादेवसिद्धि
उपधादीर्घत्वमप्यनिपात्यं आङ्पूर्वस्यप्रयोगात् नचाश्वयहापत्तिः संहितायामप्योरुषेयत्वेपिपदान्तोपोरुषेयुवात इत्याप
त्तेः नलक्षणेनपदकाराअनुवर्तनीयाःपदकारैर्नामलक्षणमनुवर्त्यमित्यभ्युपगमात् ॥ रिफेविभाषा ॥ आदिरन्तोवाउदात्तः
स्यात् रिफंसंज्ञायांतनिष्ठाचद्व्यजनादिनिनित्यमाद्युदात्तत्वंसर्वविप्रतिषेधेनरिफोनामकश्चित् ॥ उष्टापितेवछंदसि ॥
पन्तावाद्युदात्तोवास्तः अष्टः अर्पितःपक्षेभाषायांचप्रत्ययस्वरेणान्तोदात्तत्वंस्यात् ॥ निसंमसे ॥ पूर्वोक्तंस्यात् उष्टोदमूताः
अर्पितेपितरणो अन्येतर्पितशाद्वहृनानुवर्त्यः शंकवोर्पिताः अर्पिताःक्षिप्तिरित्यादिमंत्रेन्तोदात्तस्यापिपाठादित्याहुः अपरेत्व
स्वमेवेदंव्याप्ये छंदसिविपरीतस्यानापायत्वात्सर्वेणैवसिद्धेरित्याहुः ॥ युष्मदस्मदोर्ङसि ॥ आदिरुदात्तःस्यात् मदिकप्र
त्यथांतत्वात्प्रत्ययस्वरेप्राप्तमावारंभः महिवसत्त्वनोममम ॥ ङयिच ॥ उक्तंस्यात् अभ्यहिन्त्वानाःमस्यबानःपवन्ताः ॥ यतोऽनावः ॥
नौभिन्नस्ययतप्रत्ययांतस्यद्व्यचआदिरुदात्तःस्यात्चेयंजेयं प्रजेतस्यकाम्या अवोपन्त् यर्मइत्यादि नौवयोधर्मेतियत् अना
वःकिं यदिनाख्यंतरेत इहतित्वात्स्वरितत्वं ॥ ईडवंदवृशंसदुहांण्यतः ॥ एषांण्यदंतानामादिरुदात्तः आज्ञानईड्योवंद्य
अ श्रेष्ठंनोधेहिवार्यं उकथमिंद्रायशंस्यं दोहं अरहलोरितिण्यत् यतिरूपशास्त्रहृतस्तइतिक्यपाविधानेनहलन्तपदेवोपादाने
इत्युक्तं ॥ विभाषावेण्विंधानयोः ॥ अनयोरादिरुदात्तोवास्यात् वेणुः इंधानः अग्निं वेणुरिववेणुरितिसंज्ञायांतसर्वविप्र
तिषेधान्तसंज्ञायामित्याद्युदात्तत्वंनित्यं ॥ त्यागरागहासकुहस्वठक्रथानां ॥ आदिरुदात्तोवास्यात् आपायसयोघञतः पक्षेक
र्षात्वतइतिअंतोदात्तत्वं ततस्त्वपःपवायजंताःपक्षेचित्स्वरेणान्तोदात्तत्वं ॥ उपोत्तमंरिति ॥ रिदंतस्योपोत्तममुदात्तंस्यात् आ
हवनीयः ईकारउदात्तः ननुरितिसर्वमित्येवसहृत्रमस्तु रेफइत्यस्येतिरिक्तग्रहणेनान्यवर्णग्रहणेनस्मात्सर्वस्योदात्तविधाने

सि॰
मु॰
५३

फलेकस्य पत्रेः एवं च मतोः पूर्वमात्संज्ञायामित्यत्राप्युत्तरार्थमेव सिद्धे पूर्वग्रहणं न कर्तव्यमिति लाघवमिति चेन्मैवं चङ्यन्यतरस्यामि
त्युत्तरार्थत्वात् माहिस्म दधदित्यत्र चेटस्येच्चङि तत्र चिप्रभृतीनामभावाच्चङि तस्योपोत्तमं नास्तीति चङि तस्योदात्तत्वं भवति पूर्व
ग्रहणेन तु चङः पूर्वस्य यातो ह्युदात्तप्रसंगात् ॥ चङ्यन्यतरस्यां ॥ चङि न्ते धातावुपोत्तममस्युदात्तं वा स्यात् मा हि चीकरतां नमाङ्योगा
इत्यत्र चङो हि चेति निघातस्य निषेधः सङ्कपदेशादिति लसार्वधातुकमनुदात्तं धात्वकारउदात्तः पते चङ्उदात्तः ॥ मतोः पूर्व
मात्संज्ञायामस्त्रियां ॥ मतोः पूर्वस्याकार उदात्तः स्त्रीनाम्नि उदुंबरावती शरावती शरादीनां चेति दीर्घः स्यात् किं इक्षुमती संज्ञायां किं
खट्वावती स्त्रियां किं शरावान् मतोः किं यवादिनी ॥ अन्तोवत्याः ॥ अवतीशब्दस्यान्त उदात्तः संज्ञायां वेत्रवती अजिनवती ङीपः
पित्वात्प्राप्तस्यानुदात्तस्यापवादः ॥ ईवत्याः ॥ ईवत्यन्तस्य प्राग्वत् अहीवती मुनीवती नन्ववत्या इत्येवोच्यतां उभयसंग्रहलाघवा
न्मैवं राजवतीत्यत्रापि प्रसंगात् अवत्या इत्युक्ते तु नलोपस्यासिद्धत्वात् अवतीशब्दाभावात् न च वत्वस्याप्यसिद्धत्वादेत्र
वतीमादावनी शब्दोपि कल्प्यमिति वाच्यं आश्रयात्सिद्धत्वात् नलोपस्य तु नाश्रयात्सिद्धत्वं वेत्रवत्यादौ वचनस्य चारितार्थ्य
त्वात् ॥ चौ ॥ लुप्ताकारेऽञ्चतौ परे पूर्वस्यान्तोदात्तः स्यात् देवद्रीचीनयतः उदात्तनिवृत्तिस्वरापवादः अतद्धित इति वक्तव्यं इह मा भूत्
दाधीचः माध्वः स्यादेतत् प्रत्ययस्वर एवात्र बाधकः दधीचो दधीचेत्यादावनुदात्तस्य परेऽनुस्वरस्य सावकाशत्वात् न तु
हन्तस्वरेण चतेरकारस्योदात्तत्वात् अच इत्यनेन तस्य लोपे उदात्तनिवृत्तिस्वरस्य प्रसक्तस्य यथानुस्वरेण बाधः त
था प्रत्ययस्वरस्यापि स्यात् उदात्तनिवृत्तिस्वरस्य प्रत्ययस्वरं प्रत्याप्रवृत्तिरूपत्वात् तु स्वरस्य तदपवादत्वोपपत्तेः
प्रत्ययस्वरस्याप्यपवादोऽनुदात्तौ सुप्पिताविति तस्योदात्तनिवृत्तिस्वरः तस्यापि तु स्वरस्यापवादस्यानवकाशत्वा
त् मैवं नगोऽस्यन्तावववर्णौ ति उदात्तनिवृत्तिस्वरस्याप्रतिषेधात् नचनत्र किं तेन तस्यनो चेः पूजायामित्यनेन न तिष्ठि
इनलोपस्यैवाचतेरूपादाने धातुस्वरूपमात्रोपादानात् ॥ ॥ ॥

तावेकाचश्चस्मान्तृतीयादिग्रहणान्तु हस्मात्तृतीयादिस्वरस्यैव न गोश्वन्निति निषेधो न तदुदात्तनिहतस्वरस्येति दधीचः पश्येत्य
त्रान्तस्वरस्योदात्तनिहतस्वरबाधकत्वं स्यान्न चायि सिद्ध विभक्तिग्रहणसैव न गोश्वन्नित्यत्रानुग्रहमायेन केन च लक्षणेन प्राप्तस्य वि
भक्तिस्वरस्य निषेधात् न च हल्स्वानित्यादौ मतुपो विभक्तित्वाभावात् प्रतिषेधाभावे कृत्स्वरस्तन्त्र्यामिति मतुप उदात्तत्वं स्यादिति वाच्यं
मतुपोऽप्यनुग्रहमात्रं स्वरस्यापि प्रतिषेधात् न च लक्षणविशेषानपेक्षे उदात्तस्यापि प्रतिषेधे वेन स्यान्नित्यत्रापि उदात्तनिहतस्व॰
रो न स्यादिति वाच्यं मतुप उपादानेन मतुपो निषेधाभावात् तत्स्वं बंधकग्रहणेनानन्तरं बंधकस्येति न्यायात् वचनविधौ तत्प
तो रिति सामान्यनिर्देशादिति वैयर्थ्यं न तदेवं तु स्वरस्य प्रत्ययस्वरबाधकत्वाभावान्नैव सिद्धात्तु पसंख्यानेनारज्जव्यमिति ग्रामेहृमः
दधीचीत्यत्र ङीपि विभक्तिस्वरप्राप्त्यभावाद् उदात्तनिहतस्वरस्यैव तु स्वरोपवाद इति प्रत्ययस्वरबाधकस्यान प्राप्तत्वादावश्यक॰
मुपसंख्यानं वस्तोनगोश्वन्नित्यनेन उदात्तनिहतस्वरो न निषेधः कुमारश्चाहस्यस्मादवर्णान्तत्याद्ङीपि परतो यस्येति लो
पे कुमारीत्यत्रान्तोदात्तत्वानुपपत्तेः दध्यश्च प्रसप्रभृतिस्थितेन सर्वं न हितः नतो विभक्तेर्लुक् पश्चादच इत्यल्लोपः तत्र सुस्वर
प्रवृत्तिरिति नित्यसतिशिष्टत्वपाठात्प्रत्ययस्वरेणबाधितत्वमशक्यत्वाच्च ॥ समासस्य ॥ अंत उदात्तः स्यात् राजपुरुषः नीलोत्पलं
समासान्तोदात्तेव्यंजनानेष्टप्रसंख्यानं राजदृषद् ब्राह्मणसमित् उश्चैरुदात्त इत्यत्राध्व इत्यनुग्रहमा अजं तस्य समासस्यान्तोदा
त्तत्वविधानादप्राप्त्यभावाद्रम्भः यद्वा हल्स्वरप्राप्तौ व्यंजनमविद्यमानवद्भवतीति परिभाषणीयं न चोभयत्र हल्ग्रहणं वैयर्थ्यं
प्रत्ययत्र तत उक्ता व पि सक्क न त्वा ङ्भयत्रा पिलामादिति वाच्यं ह्रिवंडं स्वडं भवतीति स्पष्टप्रतिपत्त्यर्थत्वात् न च व्यंजनस्य
स्वरानापत्तिः उच्चैरुदात्त इत्यादौ यवर्त्यस्य निहतेः न चैवं दध्युत्र उदात्तादनुदात्तस्येति स्वरितत्वं न स्यात् यकारेण व्यव
धानात् हल्स्वरप्राप्त्यभावे नोक्तपरिभाषाया अप्रवृत्तेः तथा च उदात्तात्स्वरितविधौ व्यंजनमविद्यमानवद्भवतीत्यपि परि॰
भाषणीयेन च स्वरविधाविधिवपठनीयं उदश्वित्वान् घोषो विद्यमानवल्लाहकत्त्यत्र ह्रस्वनुडिति मतुप उदात्तत्वापत्तेः से॰

सि॰
व॰
५४

54

वं अविद्यमानोदात्तत्वपक्षानुदात्तस्यानच्त्वग्रहणं तपाव्यंजनस्य स्वरग्राभिमत्वात् नन्वृक्षवार्तिकस्योक्तपरिभाषायां वारंभे वि
निगमकाभावइति चेन्न परिभाषायाअस्यार्थमावश्यकत्वात् तदुक्तं प्रयोजनं लिङ्याद्युदात्तान्तोदात्तविषयः अन्यथाभौरिका
द्यैषुकार्यादिभ्योविधयल्लभकलाविति विधत्स्वान्यथेभौरिकिविधमित्यादावेवलित्स्वरः स्यात् नविकीर्षकइत्यादौरेफवकारा
भ्यामीकारस्यविवहितत्वात् आह्निकंचकायनिः अग्निवेशइत्यादावेवञ्नित्यादिरित्याद्युदात्तत्वंनस्यात् ननगार्ग्यः कृतिरि
त्यादौ अजादित्वाभावात् ऊर्णोनीत्यादावेवयथान्तोरंतोदात्तत्वंस्यान्नतपचतीत्यादौहलंतत्वात् नन्वेवमपिअनुदात्तादेरंतोदा
त्ताच्चयदिहितंततोव्यंजनादेर्व्यंजनान्ताच्चनस्यात् मैवं नोत्तरपदेनुदात्तादावित्यत्र पृथिवीरुद्रपूषमंथिष्विति प्रतिषेधेनञ
स्वहृतेर्ज्ञाप्यत्वात् अन्यथापृथिव्यादीनां हलाद्यंतत्वेनानुदात्तादित्वाभावादेवप्रतिषेधाप्रसक्तौ निषेधवैयर्थ्यात् ज्ञापकं
चाऽस्याःपरिभाषायांयेनाऽनावइत्यत्राऽनावइतिपर्युदासः अन्यथानोशब्दस्यहलादित्वादेवनाव्यशब्देप्युदात्तप्रसक्त्य॰
भावात्॥ इतिश्रीसिद्धांतसुधानिधौवृहत्स्वरप्रथमेवृहदाह्निके पादश्चायंसमाप्तः॥ बहुव्रीहौप्रकृत्यापूर्वपदं॥ पूर्वपद
स्यसमासाभावे उदात्तस्वरितयोर्वायःस्वरःसएवबहुव्रीहौस्यात् समासांतोदात्तस्यापवादः सत्यश्रवणीलकाराकारउदात्तः
स्यादेतत् नञ्सुभ्यामित्यनेनग्राभ्यामेवबहुव्रीहेरंतोदात्तइतिनियमात्समासस्यान्तोदात्तत्वमन्यत्रबहुव्रीहौनभविष्य॰
ति नवैवमपिपूर्वपदस्यैवप्रकृतिस्वरत्वेनियामकाभावादुत्तरपदस्यापिप्रकृतिस्वरापत्तिरितिवाच्यं शितेर्नित्यंबह्व
जितिनियमेनतदभावात् मैवं अनुदरसुदरइत्यादौनेपइतिपूर्वपदांतोदात्तप्राप्तौतद्बाधकतयानञ्सुभ्यामित्यस्यनियम
त्वाभावात् शितेरितिनियमेनचशितिललाटइत्यादावुत्तरपदप्रकृतिस्वरनिवृत्तावपिविचित्रपरित्यादौतदनिवृत्तेःशितेर्नि
त्याबह्वजेवोत्तरपदेप्रकृतिस्वरमितिनियमस्यशितिमात्रपरत्वात् तदुक्तंबहुव्रीहिस्वरंशास्तिसमासान्तविधेःसुकृत नञ्सु
भ्यांनियमार्थंतत्परस्यशितिशासनात् नेपविधिर्नञोसिद्धःपरस्यनियमोभवेत् स्यादेतत् समशब्दःसर्वानुदात्तः बहुस

१

मस्मिन्मेव्यत्र चान्यानीतिपिहत्सत्रात् सत्योऽस्मवितिह्रस्वदन्तः पादशब्दो हस्त्यादिनाद्युदात्तः समपाद इति बहुव्रीहावपि पूर्वपद
प्रकृतिस्वरेण समासान्तोदात्तभावे पादशब्दस्याद्युदात्तत्वं स्यात् न चेष्टापत्तिः समासस्वरेणान्तोदात्तस्यैव तत्रेष्टत्वात् एतद्भाष्ये
वप्रियो वाप्रिय इति वादीनामन्तोदात्तत्वात्समासान्तोदात्तत्वं न स्यादित्युक्तं तस्य दर्शनमात्रं प्रत्ययस्वरेणैव प्रियशब्दस्यान्तोदात्तो
पपत्तेः पूर्वपदप्रकृतिस्वरस्य प्रत्ययस्वरं प्रत्यनपवादत्वात् सैवं उदात्तस्वरितयोरनुहस्याउदात्तस्वरितयोगिनपवत्पूर्वप
दस्य प्रकृतिस्वरविधानात्सर्वानुदात्ते समासान्तोदात्तस्यैव प्रवृत्तेः तदुक्तं यत्नस्य वाप्रिये सिद्धः संभवात्प्रकृता हि येः समपि
संभवेवान्तस्यान्तकृतौ ङित्यादौ सिद्धत्वात्पूर्वपदप्रकृतिस्वरेण समासान्तोदात्तवाधे प्राप्ते उदात्तस्वरितयोः प्रकृतत्वाद्गकारी
स्यान्तदोष इति भावः अत्र वार्तिके बहुव्रीहावन्ते सिद्धं ज्येष्ठान्तश्चावधारणं द्विपादृष्टे विंतलेस्थ पर्यायोन प्रकल्पते उदात्तेन
ज्ञापकं त्वेतत्स्वरितेन समाविशेत् अस्यार्थः विनापि बहुव्रीहिग्रहणं पूर्वपदप्रकृतिस्वरस्य बहुव्रीहिमात्रविषयकत्वं
सिद्धं न चैवं तत्पुरुषे प्रसंगः तत्पुरुषे तत्पार्थेन तृतीया समस्तपूर्वमानाव्ययद्वितीयाकृत्या इति नियमात् नापि द्विगो इति ते
द्विगाविति नियमात् नापि द्वंद्वे राजन्यबहुवचनद्वंद्वे अंधकवृष्णिष्विति नियमात् नाप्यव्ययीभावे परिप्रत्युपापा वर्ज्यमा
नाहोरात्रावयवेष्विति नियमात् न चैतेषां तत्पुरुषादिष्वेवेति विपरीतनियमापत्तिः शास्त्रप्रवृत्तेरनिष्टार्थत्वानुपपत्तेः
प्रयोगानुसारेण व्याख्यानप्रवृत्तेः नन्वेवं तत्पुरुषादिषु तत्पार्थादीन्येव पूर्वपदप्रकृतिस्वराणीति नियमे तत्पार्थादीनि
पूर्वपदप्रकृतिस्वराण्येवेति नियमाभावात् बहुव्रीहिग्रहणाभावे समासान्तोदात्तपूर्वपदप्रकृतिस्वरयोरेकविषयक
त्वाद्विरोधात्सविकल्पः तत्पक्षे तः पंचारात्रिरित्यादौ द्वयोः पर्यायः स्यात् सैवं द्विव्यंशाभ्यां पाद्दन्मूर्धस्सु बहुव्रीहाविति अंतोदा
त्तविकल्पविधानात्पर्यायनिवृत्तेः अन्यथा ऽत्र पर्यायेण सिद्धो नेदं युज्येत द्विविदित्यस्यैत्यनेन एषामिह पूर्वपदप्र
कृतिस्वरो नियम्यते तेनैषां पाक्षिकं समासान्तोदात्तत्वं न भवतीति ज्ञापितत्वात् सदेवं बहुव्रीहिग्रहणं प्रत्याख्यातं न चैतो

सि॰
घ॰
५५

55

दात्तग्रहणात्तु हस्वाऽऽद्यात्तयोरुक्तज्ञापकेनपर्यायनिहत्वावपिउदात्तस्वरितयोस्तदापत्तिरितिवाच्यं स्वरितात्तु हस्वेरगृक्तत्वा
त्॥ नञ्सुरूपेतत्स्वार्थत्वत्तीयासमस्मपमानाव्ययद्वितीयाकृत्याः॥ इवंपदमत्ताः समेतेप्रकृतिस्वराः सुखत्वरूपे तत्स्ये^
तः सटकृस्थेतः कृत्पतत्स्वार्थप्रजात्येतिसमासः तत्पशब्दोयतोनावइत्याद्युदात्तः सहगितिकिन्नत्वात्कृउत्तरपदप्रकृ
तिस्वरेणांतोदात्तः किरिणाकाणः किरिकाणः किरिशब्दः कृगृइत्योणादिकइप्रत्ययेन्तोदात्तः प्रवत्तशोऽः प्रवत्तशब्दः नेर्दे
वनइतिसप्रत्ययांतत्वादंतोदात्तः पतयन्मदयत्नांवमेदयन्मदेहत्वलाक्षित्रिंदेसवेतिसप्तमीसमासः मदिस्तृतिमोद
मदस्वप्नकांतिगतिषुण्यंपताल्लटः शत्रादेशः प्रत्ययस्वरेणांतोदात्तः नवसार्वधातुकत्वाच्छपिप्रऽपेदेशात्वितिनिघाताप
त्तिः छेदस्तुभयथेत्यार्द्धधातुकत्वात् नचणिलोपापत्तिः तेप्रतिसार्वधातुकत्वात् नचैवं परीत्यंलब्धंदेसिद्धसैवानुविधाना
त् ननुपरमेकारकंपरमकारकंपरमेणकारकेणपरमकारकेणपरमेकारकेपरमकारकेइत्यादावतिप्रसंगः प्रयु
क्तानामेवविशेषणसमासइतिनियमानंगीकारात् मैवं लक्षणप्रतिपदोक्तन्यायेनद्वितीयादिशब्दस्त्रचार्यविहि
तस्यैवसमासस्याज्ञापादानात्प्रकृतेःचविशेषणत्वानुपादाय सामान्यलक्षणेनैवसमाससाविहितत्वात् शाह्रीवष्ण
माशस्त्रीषुणमाडीयंनत्वाच्छस्वीतंतोदात्तं प्रत्ययेनतत्कनिपातानामितिवक्तव्यंतु पोतत्वात्सिद्धेनञ्ग्रहणंप्रकरणितत्वा
दौपरस्यापिकृउत्तरपदप्रकृतिस्वरस्यबाधार्थंनेनयज्ञोपपदंकृतिनञ्नतस्यसहनिर्दिष्टस्यचनञ्स्वरोवलीयानिति
वचनद्वयंगतार्थं॥ अब्राह्मणः अब्राह्मणः प्रत्ययत्वार्थेवादिष्वेवजशब्दः पायुत्यन्येति [illegible]कौशांविः॥ परिगणनेकिं स्ना
त्वाकालकः पीत्वास्थिरकइत्यादौमाभूत् नचकायांप्रतिषेधपदववक्तव्यइतिवाच्यंसामिकृतेस्वयंधौतमित्यादि॰
वारणायपरिगणनस्यावश्यकत्वात् वस्तुतस्तुमहरवंसकादिषुल्पबभावार्थंस्वकृतिपातनावश्यकत्वेंतो
दात्तत्वमपितत्रैवनिपातनीयमितिभाष्यं म[illegible]तैस्त्वंमहूर्तेस्त्वंमहूर्तशब्दोहस्वा ॥

कृ

रित्वादंतोदात्तः भोज्योष्णं भोज्यशब्दो ण्यदंतत्वादंतस्वरितः कृत्यतुल्याख्या अजात्येति समासः ॥ वर्णो वर्णेष्वनेते ॥ एतमि
न्नेवर्णवाचिन्युत्तरपदे वर्णवाचि पूर्वपदं तत्पुरुषे प्रकृतिस्वरं स्यात् कृष्णसारंगः लोहितसारंगः कृष्णशब्दः कृषेर्वर्णे इति
नक्प्रत्ययांतत्वादंतोदात्तः लोहितशब्द इतन्नंतो नित्स्वरेणाद्युदात्तः वर्णो वर्णेनेति समासः वर्णः किं परमकृष्णः वर्णेष्वि
ति किं कृष्णतिलाः अनेते किं कृष्णैतः शबलैताम्रकद्रुरश्ममरः ॥ गाधलवणयोः प्रमाणे ॥ इयत्त्वापरिच्छेदवाचिनि तत्पु
रुषेऽनयोः पूर्वपदं प्रकृतिस्वरं स्यात् अरित्रगाधमुदकं अरित्रशब्द इत्रप्रत्ययांतत्वान्मध्योदात्तः गोलवणं यावद्गवे दीयते
तावदित्यर्थः गोशब्दोंतोदात्तः प्रमाणे किं परमगाधं परमलवणं ॥ दायाद्यं दायादे ॥ दायाद्यवाचि पूर्वपदं दायादशब्दे परे
प्रकृतिस्वरं स्यात् विद्यादायादः धनदायादः विद्याशब्दः समजनिषद इति क्यबंत उदात्तः धनशब्दः कप्रत्ययांतः प्रत्ययस्व
रेणाद्युदात्तः दायाद्ये किं परमदायादः ॥ प्रतिबंधि चिरकृच्छ्रयोः ॥ कार्यसिद्धिविघातके प्रतिबंधि प्रतिबंधवाचि पूर्व
पदे चिरकृच्छ्रयोः परयोस्तत्पुरुषे प्रकृतिस्वरं स्यात् गमनचिरं गमनकृच्छ्रं गमनशब्दो ल्युडंतो लित्स्वरेणाद्युदात्तः विशे
षणमिति समासो मयूरव्यंसकादिर्वा कारणवैकल्याच्चिरभावि कृच्छ्रभावि वा गमनं कार्यप्रतिबंधि प्रतिबंधि किं मूत्रकृ
च्छ्रं ॥ पदेऽपदेशे ॥ व्याजोऽपदेशो लक्ष्यं चेत्यमरः व्याजवाचिनि पदशब्दे परे पूर्वपदं तत्पुरुषे प्रकृतिस्वरं स्यात् मूत्रपदेन प्र
स्थितः मूत्रेः ष्ट्रन्प्रत्ययांतो मूत्रयतेर्घञंतो वा मूत्रशब्द आद्युदात्तः पूर्ववत्समासः अपदेशे किं विष्णुपदम् ॥ निवाते वात
त्राणे ॥ निवाते परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्राग्वत् कुटीनिवातं कुड्यनिवातं कुटीशब्दो गौरादिङीषंतत्वादं
तोदात्तः कुड्यशब्दो यगंत इति केचित् यदंत इत्यन्ये वातत्राणे किं राजनिवाते वसति तस्य पार्श्व इत्यर्थः ॥ शारदेऽनार्तवे ॥
ऋतुभवमभिनववाचिन्यार्तवशब्दे प्रत्ययवाचिनीति यावत् तस्मिन् शारदशब्दे परे तत्पुरुषे पूर्वपदं प्राग्वत् रज्जुशारदमुद
कं शारदशब्दो ह्यत्र विषये नूतनार्थः सद्योरज्जूद्धृतमित्यर्थः नित्यसमासत्वादस्वपदविग्रहः रज्जुशब्द आद्युदात्तः सृजे

सि॰
मं॰
५८

56

रसमेवेत्यत्र निर्दिश्यते हन्तेः अनार्तवे किंपरमशारदं ॥ अर्धधर्षकषाययोर्जातौ ॥ जातिवाचिनि तत्पुरुषेऽनयोः पूर्वपदं प्राग्व
त् कटाधर्षुः दौवारिककषाये कटशब्दः पचाद्यजन्तत्वादन्तोदात्तः वैशंपायनान्तेवासित्वाल्लिनिः तस्य कठचरकादिति लु
क् दौवारिकशब्दस्तत्र निपातनरूपतिठगन्तत्वादन्तोदात्तः जातौ किंपरमाधर्षुः ॥ सदृशप्रतिरूपयोः सादृश्ये ॥ सादृश्ये तत्पु
रुषार्थेऽनयोः पूर्वं प्राग्वत् पितृसदृशः पितृप्रतिरूपः पितृशब्दो निपातनादन्तोदात्तः सादृश्ये किंपरमसदृशः पूज्य
मानत्वमत्र समासार्थो न तु सादृश्यप्रतियोगिवाचिनि पूर्वपदप्रवसादृश्यप्रतीतेः स्पष्टत्वात् नन्वपि त्रासदृशश्शितित्तृ
तीयासमासेन तत्पुरुषेऽनुत्पन्नस्तीयेत्यादिनैव पूर्वपदप्रकृतिस्वरत्वं सिद्धं न च सदृशयोगे षष्ठ्या अपि विधानात्वष्ठ्यर्थे
ऽहो पादानमिति वाच्यं अनभिधानात् षष्ठीसमासानङ्गीकारात् भैवं दास्याः सदृशो वृषल्याः सदृशपदार्थस्यावश्यक
त्वात् षष्ठ्या आक्रोशे इत्यलुक् दासीवृषलीशब्दावन्तोदात्तौ ङ्दात्तयणो हल्पूर्वादिति विभक्त्युदात्तत्वं ॥ द्विगौ प्रमाणे ॥
द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्राग्वत् प्राच्यसप्तसमः सप्तसमाः प्रमाणमस्य सप्तसमः तद्धितार्थेति
समासः प्रमाणे लो द्विगोर्नित्यमिति वार्त्तिकेन मात्रचो लुक् प्राच्यश्चासौ सप्तसमश्चेति समासः प्राच्यशब्दो यदन्तत्वादाद्युदात्तः
द्विगौ किं व्रीहिप्रस्थः प्रमाणे किं परमसप्तसमः ॥ गन्तव्यपण्यं वाणिजे ॥ वाणिजे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं
प्राग्वत् मद्रवाणिजः सप्तमीसमासः मद्रशब्दो रक्प्रत्ययान्तत्वादन्तोदात्तः मद्रदेशोऽस्य वाणिजस्य गन्तव्य इत्यर्थः गोवाणिजः गो
शब्दोऽन्तोदात्तः गौरस्य पण्यमित्यर्थः ॥ मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥ एषूत्तरपदेषु नपुंसके तत्पुरुषे पूर्वपदं प्राग्वत् सप्तुरन्मात्रं पाणि
नीयं सप्तुरन्मात्रस्य प्रमाणमित्यस्वपदविग्रहः षष्ठीसमासः सप्तुरन्शब्दः पाटलापालङ्काम्बासागरार्थानामिति फिट्सूत्रेणान्तोदा
त्तः पाणिन्युपज्ञं पाणिनिरित्यञन्तत्वादाद्युदात्तः नन्दोपक्रमं नन्दः पचाद्यजन्तत्वादन्तोदात्तः इषुच्छायं इषुशब्द आद्युदात्तः इषोः किं वेत्य
प्रत्ययविधौ तिरित्यनुवृत्तेः नपुंसके किं कुड्यच्छाया ॥ सुखप्रिययोर्हिते ॥ एतयोः परयोर्हितवाचिनि तत्पुरुषे पूर्वपदं प्राग्व

न च तृतीयासमासप्रसङ्गः कार्य इति वाच्यम् हेतु तृतीयायाभावान्न सहत्वस्य पदार्थस्यावश्यकत्वा त् तत्र समासाभावात्
सिद्धांतकौमुदी

त् गमनमर्हं गमनश्रियं समानाधिकरणसमासः गमनशब्दो लित्स्वरेणाद्युदात्तः हिते किं परमसुखं ॥ प्रीतौ च ॥ प्रीतौ गम्या
यां प्राग्वत् ब्राह्मणसुखं पायसं ब्राह्मणप्रियोऽनध्यायः ब्राह्मणशब्दो प्रत्ययस्वरेणान्तोदात्तो प्रीतौ किं राजसुखं सुखशब्दोऽत्रसु
खार्थपरो न तु तद्धेतुपरः ॥ स्वं स्वामिनि ॥ स्वामिशब्दे परे स्ववाचिपूर्वपदं तत्पुरुषे प्राग्वत् गोस्वामी स्वं किं परमस्वामी ॥ पत्यावै
श्वर्ये ॥ पतिशब्दे परे ऐश्वर्यार्थे तत्पुरुषे पूर्वपदं प्राग्वत् गृहपतिः गृहशब्दो गेहे क इति कप्रत्ययान्तत्वादन्तोदात्तः ऐश्वर्ये किं वृ
षलीपतिः नस्वाभर्तेत्यर्थः ॥ भुवाक्चिद्दिधिषु ॥ उक्तस्थले पूर्वपदभूतान्यन्तानि स्वराणि नस्युः दिधिषूति समाहारे द्वन्द्वः भू
पतिः वाक्पतिः चित्पतिः दिधिषूपतिः समासस्वरेणान्तोदात्ताः ॥ वा भुवनं ॥ उक्तस्थले भुवनेति पूर्वपदं प्रकृत्या वा स्यात् भुव
नपतिः भूसूधूभ्रस्जिभ्य इति क्युन् भुवनशब्दो नित्स्वरेणाद्युदात्तः पक्षे समासेऽन्तोदात्तः ॥ आशंकाबाधनेदीयस्सु संभावने ॥ सं
भावनार्थे तत्पुरुषे एषु परेषु पूर्वपदं प्रकृतिस्वरं स्यात् अस्तित्वाध्यवसायः संभावना गमनाशंकं गमनाबाधं गमननेदीयः
गमनमाशंक्यत इति आबाध्यत इति निकटतरमिति वा संभाव्यते षष्ठीसमासापन्ने क्रियाविशेषणत्वादव्ययीभावस्येति वका
रान्तयोगाद्वाक्लीबत्वं ॥ पूर्वे भूतपूर्वे ॥ भूतपूर्वार्थे तत्पुरुषे पूर्वशब्दे परे पूर्वं प्रकृत्या स्यात् आढ्यो भूतपूर्वः आढ्यभूतपूर्वः वि
शेषणसमासो मयूरव्यंसकादिर्वा पूर्वशब्दो ह्यत्र विषये भूतपूर्वार्थः भूतपूर्वे किं परमपूर्वः ॥ सविधसनीडसमर्यादसवेशस
देशेषु सामीप्ये ॥ सामीप्यार्थे तत्पुरुषे एषु परेषु पूर्वपदं प्राग्वत् मद्रसविधं गान्धारिसनीडं कश्मीरसमर्यादं मद्रसवेशं मद्र
सदेशं मद्रशब्दोऽन्तोदात्तः गान्धारिशब्दः कर्दमादित्वादाद्युदात्तो मध्योदात्तो वा कश्मीरशब्दः दूरन्नेतो नित्स्वरेणाद्युदात्तः सामीप्ये
किं सहमर्यादया समर्यादं ॥ विस्पष्टादीनि गुणवचनेषु ॥ गुणवाचिषु परेष्वेतानि प्राग्वत् तत्पुरुष इति निवृत्तं विस्पष्टक
टुकं विस्पष्टत्वं कटुकत्वारोपदार्थेनावच्छेदकेनान्वयः अतः कर्मधारयत्वं नेति द्वितीयेऽङ्कं । विस्पष्टशब्दो गतिरनन्तर इत्याद्यु
दात्तः । विचित्रलवणं विचित्रशब्दोऽव्ययस्वरेणाद्युदात्तः व्यक्तविक्लवं व्यक्तशब्दः उदात्तस्वरितयोर्यणः इत्यादिस्वरितः संपन्न।

त१ प्रभृति१

सि॰
ध॰
५७

निपुण। पटुपंडित। कुशलचपल। विपुल संपन्ननिपुणेषु। पाथ्यादीन्येतेनोदात्तोपटुपंडितेतौ उप्रत्ययक्तप्रत्ययौ तावेतौतोदात्तौ कुश
लशब्दः कुडन्नरपदप्रकृतिस्वरेणांतोदात्तः चपलशब्दश्चपेरच्चोपधायाइत्यत्रविदित्यनुवृत्तेरंतोदात्तः॥ अल्पाचमकन्यायव
त्वभावेकर्मधारये॥ पष्टपरेषुकर्मधारयेभाववाचिपूर्वपदं प्रकृतिस्वरं स्यात् गमनश्रेष्ठं गमनज्यायः गमनावमं गमन
कनिष्ठं गमनपापिष्ठं श्रेत्यादिकिं गमनशोभनभावेकिं गम्यतेनेनेतिगमनं तद्वनत् श्रेयस्त्वगमनश्रेयः कर्मधारयेकिं
गमनस्यश्रेष्ठंगमनश्रेष्ठं॥ कुमारश्च॥ कर्मधारयेपूर्वपदभूतः कुमारशब्दः प्रकृतिस्वरः स्यात् कुमारश्रमणाकुमारशब्दोंतो॰
दात्तः॥ आदिः प्रत्येनसि॥ प्रत्येनसिपरेकर्मधारयेकुमारशब्दस्यादिरुदात्तः स्यात् प्रतिगतमेनोस्यप्रत्येनाः कुमारश्चासौ॰
प्रत्येनश्चकुमारप्रत्येनाः॥ पूगेष्वन्यतरस्यां॥ गणवाचिन्युत्तरपदे। कुमारस्यादिरुदात्तोवास्यात् पक्षेकुमारस्यांतिप्रकृतिस्वर
त्वे। कुमारचातकाः कुमारजीमूताः। कुमारबलाहकाः। पष्ठपगाज्जोग्रामणीपूर्वादितिभ्यः तद्राजस्येतिबहुषुतस्यलुक्॥ ॥
इगंतकालकपालभगालशरावेषुद्विगौ॥ पष्ठपरेषुद्विगौपूर्वपदंप्रकृतिस्वरंस्यात् पंचारत्नयः प्रमाणमस्यपंचारत्निः पंच
मासान्भूतोभावीवापंचमास्यः तमधीष्टइत्यधिकारेद्विगोर्यप् पंचसुकपालेषुसंस्कृतः पंचकपालः पंचभगालः पंचभगा॰
लः पंचशरावः पंचशब्दोनांतसंख्यायाआद्युदात्तः ननुपंचारत्न्योदशारत्न्यः पंचारत्नयः दशारत्नयः इत्यत्र इगंतलक्षणस्व
रोनस्यात् अत्रतद्धितार्थेतिद्विगुः द्विगोर्नित्यमितिमात्रचोलुक् जुसादिवच्छेदोवावचनमितिजस्विवेतिगुणेनिषेधपक्षेयणा
देशः तत्रगुणेचकृतेइगंतत्वाभावात् नैवं सपोर्वहिरंगतयानंतरंगस्वरं प्रत्यसिद्धत्वात्पूर्वमेवस्वरप्रवृत्तेः पदग्रहणस्यप
रिमाणार्थतयापाहनुत्पत्तेः पूर्वमेवस्वरप्रवृत्तेः आदेशायोस्त्वपरनिमित्तकत्वेनव्यवधेत्वात्॥ बह्वन्यतरस्यां॥ इगंतादिषू
त्तरपदेषु बहुशब्दोवाप्रकृतिस्वरः स्यात् बहुरत्निः बहुमास्यः बहुकपालः बहुभगालः बहुशरावः बहुगणेतिबहुशब्दा॰
हस्यसंख्यावात् तद्धितार्थेतिसमासः बहुशब्दोंतोदात्तः यणादेशस्यलेउदात्तस्वरितयोरितिस्वरितत्वं॥ दिष्टिवितस्त्योश्च॥

२१

ऽगंतत्वात्सिद्धे विकल्पार्थ आरंभः पंचदिष्टिः दशवितस्तिः पदेनोदात्तत्वं ॥ सप्तमीसिद्धशुष्कपक्वबंधेष्वकालात् ॥ एषु परे
ष्वकालवाचिभिन्नं सप्तम्यंतं प्रकृतिस्वरं स्यात् न च तत्पुरुषे तत्स्यार्थेति सप्तमीस्वरेण सिद्धिः कृदुत्तरपदे प्रकृतिस्वरेणान्त
स्य बाधात् तत्पुरुषस्य वक्तव्यत्वात् सांकाश्यसिद्धः सांकाश्यकांपिल्येति मध्यस्थानस्योदात्तत्वं निपनशुष्कः निपनश्वा॰
द्रः सुप्रत्ययांतो मध्योदात्तः कुंभीपक्वाः कुंभीति ङीष्षंतोदात्तः चक्रबंधः चक्रेत्यंतोदात्तः अकालात्किं पूर्वाह्णसिद्धः ॥ परि
प्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ वर्ज्यमानवाचिष्वहोरात्रावयववाचिनि चोत्तरपदे पर्यादयः प्रकृतिस्वराः स्युः बहु
व्रीहितत्पुरुषयोः लक्षणांतरेण सिद्धाव्ययीभावार्थोयमारंभः परित्रिगर्तं वृष्टो देवः अपत्रिगर्तं अपपर्योर्वर्जनार्थत्वा
त् परिपूर्वाह्णं अपपूर्वरात्रं प्रतिपूर्वाह्णं अप्यपरात्रं उपपूर्वाह्णं उपपूर्वरात्रं वर्ज्येतिकिं अभिप्रति ॥ राजन्यबहुवचन
द्वंद्वेंधकवृष्णिषु ॥ अभिषिक्तवंश्यक्षत्रियपरो राजन्यशब्दः तेषां बहुवचनांतानां द्वंद्वे पृथक् वर्तितो यो द्वंद्वस्तत्र पूर्वपदं
प्रकृतिस्वरं स्यात् शिनिवासुदेवाः श्वाफल्कचैत्रकाः शिनिरायुदात्तो लक्षणयातदपत्यार्थः राजन्येतिकिं द्वैप्यभैमाय॰
नाः द्वीपेभवा द्वैप्याः भैमेरपत्यं युवा भैमायनः एवं अंधकवृष्णित्वेपि अभिषिक्तवंश्यत्वाभावात् बहुवचने किं संकर्ष
णवासुदेवौ द्वंद्वे किं वृष्णीनां कुमारा वृष्णिकुमाराः अंधकवृष्णिषु किं कुरुपंचालाः ॥ संख्या ॥ द्वंद्वे संख्यावाचि पूर्वपदं प्र
कृतिस्वरं स्यात् एकादश त्रयोदश एकशब्दः कनंतत्वादाद्युदात्तः त्रेस्त्रयसादेशो निपातनादंतोदात्तः ॥ आचार्योपस
र्जनश्चांतेवासी ॥ आचार्योपसर्जनांतेवासिनां द्वंद्वे पूर्वपदं प्रकृतिस्वरं स्यात् आपिशलपाणिनीयाः आपिशलिपा॰
णिनीयव्याडीयगौतमीयाः सर्वोपत्यापूर्वस्यात्रोपात्ते आपिशलस्यापत्यमापिशलिः तेन प्रोक्तमापिशलं इञश्चेत्य
ण् तदधीयते आपिशलाः । प्रोक्ताल्लुक् । एवं आपिशलेः छात्रा आपिशलाः इञश्चेति शैषिकोऽण् आचार्योपसर्जनेति
द्वंद्वविशेषणं तेन छात्रमात्रवर्तिनस्य द्वंद्वस्य लाभः नेह पाणिनीयदेवदत्तौ आचार्येतिकिं छांदसवैयाकरणाः अंते

खु॰

सि॰
ध॰
५८

वासीकिंस्रापिशलपाणिनीये शास्त्रे ॥ कार्तकौजपादयश्च ॥ एवं द्वंद्वे प्रागवत् कार्तकौजपौ कृतस्यापत्यं कार्तः कुजात्म्भमिमानानां
तिरक्तनि कुजपः तस्यापत्यं कौजपः श्रवणेनावेतौ सावर्णिमाण्डूकेयौ सावर्णिरिञन्तस्तत्राद्युदात्तः माण्डूकेयो ढगन्तत्वादन्तोदात्तः
अवन्त्यश्मकाः अवन्तेरश्मकस्य वा बहून्यपत्यानि तन्निवासो जनपदो वा पैलश्यापर्णेयाः पीलाया वेत्यपत्येऽण् तस्य युवाप
त्येऽणोद्व्यचश्चेति फिञ् पैलादिभ्यश्चेति तस्य लुक् श्यापर्णीविदादयञन्तः तस्यापत्यं स्त्री श्यापर्णी तस्या युवापत्यं श्यापर्णेयः
कपिश्यापर्णेयाः कापिरन्तोदात्तः कपिर्बोधादाङ्गिरस इति बहुत्वे यञो लुक् शैतिकाक्षपाञ्चालेयाः शितिकाक्षाट्ठक्टञण् तस्य यु
वापत्येऽञ् एयन्नत्रियार्षञितिनत इति लुक् पाञ्चालस्यापत्यं स्त्री पाञ्चाली तस्य युवापत्यं पाञ्चालेयः शैतिकाक्षपाञ्चालेयौ कटु
कवार्चलेयाः कटेरोणादिक उः प्रत्ययः संज्ञायां कन् तस्मादिञो बह्वचश्चञः प्राच्यभरतेष्विति लुक् वर्चलाया अपत्यं वार्चलेयः
शाकलशुनकाः शाकल्यो गर्गादियञन्तः तस्य छात्राः शाकलाः कण्वादिभ्यो गोत्र इत्यण् शौनको विदादिन्वादञन्तः बहुत्वे लुक्
शाकलशणकाः इति केचित् शणकादिञ बह्वच इति लुक् शणकबाभ्रवाः आर्चाभिमौद्गलाः ऋचाभेन प्रोक्तमधीयते आ
र्चाभिनः वैशंपायनान्तेवासित्वात् णिनिः मुद्गलो गर्गादिः तदपत्यस्य छात्राः मौद्गलाः कण्वादिभ्य इत्यण् कुन्तिसुराष्ट्राः चिन्तिसुरा
ष्ट्राः कुन्तेः सुराष्ट्रस्य चिन्तेश्च बहून्यपत्यानि तन्निवासो जनपदो वा तण्डवतण्डाः उभौ पचाद्यजन्तौ गर्गादियञो बहुत्वे लुक् अ
विमत्तकामविद्धाः अविमत्तो नञ्स्वरेणाद्युदात्तः ह्वयोरपत्यं बहुत्वे बह्वच इतीञो लुक् बाभ्रवशालङ्कायनाः बाभ्रवदानच्यु
ताः बभ्रोरपत्यं बाभ्रवः शलङ्कोरपत्यं शालङ्कायनः फक् संनियोगेन शलङ्कादेशः दानच्युताद्बह्वच इतीञो लुक् कठकाला
पाः कठकौथुमाः कठेन प्रोक्तमधीयते कठाः वैशंपायनान्तेवासित्वात् णिनिः कठचरकाल्लुक् कलापिनोऽण् सब्रह्मचारी
ति टिलोपः कौथुमलौकाक्षाः कुथुमिना प्रोक्तमधीयते प्राग्दीव्यत इत्यण् टिलोपः आपत्यस्य लोकाक्षेण प्रोक्तमधीयते तद
पत्यस्य छात्रा वा स्त्रीकुमारं स्त्रीशब्दोऽन्तोदात्तः मौदपैप्पलादाः मुदस्यापत्यं मौदिः तस्य छात्राः एवं पैप्पलादाः द्विःपाठः पदे

हु १

समासान्तोदात्तार्थः वत्सजरन्तः वत्सोन्तोदात्तः सोमसुतपार्थिवाः स्फकतत्पुरुषेण्योः स्वच्छाज्ञाः जरान्महत् जरेप्यन्तत्वादन्तोदात्तः याज्या
नुवाको यजेर्ण्यदन्तत्वादन्तस्वरितत्वं आचार्योपसर्जनान्तेवासिनः पाठः प्रपेवार्थः ॥ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारत
हैलिहिलरौरवप्रवृद्धेषु ॥ व्रीह्यादिषु दशसु परेषु महच्छब्दः प्रकृतिस्वरः स्यात् महत् इति निर्देशान्महाव्रीहिः महापराह्णः महा
गृष्टिः महेष्वासः महत्त्वं गुर्वित्यर्थः महदित्यन्तोदात्तः सन्महदिति प्रतिपदोक्तसमासस्य वायं स्वरः महद्व्रीहिरित्यादौ न समासा
न्तोदात्तः नच प्रवृद्धशब्दे परे कर्मधारये निष्ठान्ते वसिद्धे सूत्रपाठवैयर्थ्यं प्रतिपदोक्तस्य ग्रहणाद्यद् इति समाससस्यैवोपादाना
त् इह मा भूत् महानिरवृद्धोदात्तिणादीपते ॥ क्षुल्लकश्च वैश्वदेवे ॥ वैश्वदेवशब्दे च कारान्महच्छब्दे च परे क्षुल्लकशब्दः प्रकृति
स्वरः स्यात् क्षुल्लकवैश्वदेवं क्षुधं लातीति क्षुल्लं तस्मादज्ञातादिषु कायन्तोदात्तः ॥ उष्ट्रः सादिवाम्योः ॥ अनयोः परयोरुष्ट्रश
ब्दः प्राग्वत् उष्ट्रसादी उष्ट्रवामी कर्मधारयः षष्ठीसमासो वा उषेष्ट्रन् नित्स्वरेणाद्युदात्तः ॥ गौः सादसादिसारथिषु ॥ एषु परेषु गो
शब्दः प्राग्वत् गोसादः सादेति घञन्तः कर्मण्यणन्तो वा गोसादी गोसारथिः गौरन्तोदात्तः ॥ कुरुगार्हपतरिक्तगुर्वसूतजरत्य
श्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलो दासीभाराणां च ॥ एषां समासानां दासीभारादीनां च पूर्वपदं प्राग्व
त् कुरोर्गार्हपते कुरुगार्हपतं कृग्रोरुच्चेति कुप्रत्ययान्तः कुरुरन्तोदात्तः वृजेश्च गार्हपतमिति वक्तव्यं वृजिगार्हपतं वृजिराद्युदा
त्तः रिक्तो गुरुः रिक्तगुरुः रिक्ते विभाषेत्याद्यन्तोदात्तः असूता चासौ जरती चासूतजरती एवमश्लीलदृढरूपा लावण्यहीनत्वे
सति कुत्सनादिदोषरहितेत्यर्थः अश्लीलो नञ्स्वरेणाद्युदात्तो श्रियं लातीति श्रीलं न तथा अश्लीलं कपिलिकादित्वाल्लत्वं ।
पारेवडवेव पारेवडवा निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारे इति हृतादित्वादन्तोदात्तः तिलशब्दान्मत्वर्थीय इति पृ
षोदरादित्वात्तिशब्दस्य द्वित्वं तितिलिनः अपत्यं छात्रो वा तैतिलः अणिनस्तद्धित इति टिलोपः तस्य कद्रूः पण्यकम्बलः संज्ञाया
मिति वक्तव्यं नियतप्रमाणो नियतमूल्यो व्यावहारिको यः कम्बलस्तस्येयं संज्ञेति कैयटः पण्यशब्दोऽवद्यपण्येति यदन्तत्वा

सि॰
ष॰
५९
59

दाध्रुदान्नः नवतस्यरुधेतत्स्यार्थेत्यत्रद्वितीयाकृत्याश्त्यनेनैवपूर्वपदप्रकृतिस्वरत्वसिद्धिः तस्यकृत्यतत्स्याख्याप्रज्ञात्येतिप्र
तिपदोक्तसमाससमात्रपरत्वात् नन्वेवंविशेषणसमासोपिनस्यात् प्रजात्येतिनिषेधसामर्थ्याद्गोज्यओदनइत्यादौनदप्रह
तेरितिवेत्सत्यं गुणक्रियावचनानांविशेषणविशेष्यभावनियमाभावात्सर्वंनिपातनपर्यायापन्नोक्तन्योनानोपूर्वंनिपातनि
यमार्थंवचनेनतज्जातिनिषेधार्थंप्रज्ञात्येतितन्यायसिद्धर्थोनुवादमात्रमितिस्वीकारात् दासीभारादीनामितिवक्तव्ये आकृ
तिगणम्यायंदासस्याभारोदासीभारोदासीभारः देवहूतिःदेवनीतिःदासीदेवशब्दावंतोदात्तौवहूनीतिः वहुराध्रुदान्नःओषधिः
वेद्माः ओषधीयतेतस्यामितिकिप्रत्ययांतः ओषधावञ्जेतत्वादाध्रुदात्तः चंडोरकप्रत्ययांतत्वादंतोदात्तः इहदासीभाराणां
चेतिद्वंद्वाश्रयंवहुत्वं नैतिलकद्रूःप्राणकेवलइतिविभक्तिलोपत्सौत्रत्वादित्यभिप्रायेणायथोक्तवार्तिकारंभः भाष्यका
रास्तुउभयत्रविभक्तिनिर्देशान्सर्वाणिपदान्यसमस्तान्येव उत्तरविद्धिभक्तानुद्धारणात्सौत्रे तथाचदासीभाराणांचेतिवहु
वचनादेवमदादीनामित्यर्थोलभ्यतेसप्तमीषष्ठ्योर्डेरित्यादिवदित्याहुः ॥ चतुर्थीतदर्थे ॥ चतुर्थ्यंताभिधेयार्थेउत्तरपदेचतुर्थ्य
तेप्रकृतिस्वरंस्यात् यूपायदारु यूपदारु उपर्धांचेतिपः तत्रनिदित्यत्वहनेराध्रुदात्तोयूपशब्दः तदर्थेकिं कुवेरवलिः प्रकृति
विकारभावप्रवायं तत्रैवचतुर्थीतदर्थेतिसमासविधानात् नेह अश्वघासः ॥ अर्थे ॥ अर्थशब्देपरेचतुर्थ्यंतंप्राग्वत् मात्रर्थं
पित्रर्थं मातापितृशब्दौनिपातनादंतोदात्तौ ॥ क्तेच ॥ क्तांतेपरेपूर्वपदंप्राग्वत् गोहितं गोरक्षितं कर्मधारयेनिष्ठाकर्मधार
येक्तांतेपरेनिष्ठांतमित्रंपूर्वपदंप्राग्वत् श्रेणिकृताः श्रेणिशब्दआद्युदात्तः श्रेण्यादयःकृतादिभिरितिसमासः अनिष्ठाकिं
कृताकृते केननञ्विशिष्टेनेतिसमासः ॥ अहीनेद्वितीया ॥ अहीनवाचिनिसमासेक्तांतेपरेद्वितीयांतंप्राग्वत् ध्याध्यादिस
रापवादोयं कष्टश्रितः द्वितीयाश्रितेतिसमासः अत्रनत्संबंधप्रतीतिरहीनवाचित्वं अहीनेकिं कांतारातीतः योजनातीतः
कांतारंत्यक्तवानित्यर्थप्रतीत्यासमासस्याहीनवाचित्वं तथाचाहीनवाचिनेद्वितीयांतविशेषणमितिवोध्यं इहथाया।

दिस्वरेणांतोदात्तः अनुपसर्ग इति वक्तव्यं नेह प्रसुवप्रामः अत्र थाथादिस्वरः एवेचाऽहीनस्य ग्रहणं न कर्तव्यं अनुपसर्ग इत्यनेनै
व कांतानां तीनस्य इत्यादिर्व्याहत्तेः एवं प्रहृद्धादिष्वप्युत्तरपद शाहृपाठोपि न कार्यः सोपसर्गत्वादेतस्य एव ग्रहणात् थाथादिस्वरेणांतो
दात्तसिद्धेः ॥ तृतीयाकर्मणि ॥ कर्मार्थकक्तांते परे तृतीयांतं पूर्वपदं प्राग्वत् अहिहतः अहिहतो दात्त इति केचित् आद्युदात्त इ
त्यन्ये त्वोतासः त्वया ऊतास्तिता इत्यर्थः सर्पपर्यंतस्यत्वादेशः छंदसोदकारलोपः अवनेक्तः ऊवरत्वेपत्तह इहृयोरभावः बा
हुलकत्वात् पूर्वपदप्रकृतिस्वरेण कादेश उदात्तेनोदात्तः उदात्तादनुदात्तस्येति स्वरितः कर्मणि किं रथेन यातो रथयातः गत्य
र्थाकर्मकेति कर्तरि क्तः ॥ गतिरनंतरः ॥ गतिरिति किं जेतः पुंस्त्वनिर्देशात् निपातनादनुनासिकलोपः कर्मार्थकक्तप्रत्ययां
ते परे अव्यवहितगतिः प्रकृतिस्वरः स्यात् थाथादिस्वरापवादः उद्धृतः अनंतरः किं अभ्युद्धृतः अत्राभेर्माभूत् स्यादेतत् गा
तिर्गतौ विनिनिघातस्य परत्वात् तेनैवाऽभेः प्रकृतिस्वरो बाधिष्यते मैवं एवमपि अभेः परस्य उद्धृतशब्दस्य थाथादिस्वरेणां
तोदात्तत्वं स्यात् उद्धृतशब्दे हि समासांतोदात्तत्वेऽपवादः पूर्वपदप्रकृतिस्वरत्वेन कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वविहृत्वो
पमर्देन प्राप्ते तदपवादो यगतिस्वरो विधीयते तस्याऽभिशब्देन समासे समासांतोदात्तेन तदपवादेन कृदुत्तरपदप्रकृतिस्व
रेणोद्धदात्तत्वे वाध्यमाने तदपवादस्य थाथादिस्वरस्य प्रसंगः कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तांतत्वात् नैवं गतेः प्र
कृतिस्वरविधानवैयर्थ्यं उद्धृतक्षिप्तादौ एकगतिस्थले च चरितार्थत्वात् अभ्युद्धृतक्षिप्तादौ तु कत्तांतरप्राप्तत्वात् थाथादि
स्वरस्य दुर्वारत्वात् ततस्तद्बाधिनाऽभेर्गतिस्वरः स्यात् अनंतरग्रहणेन अभेर्गतिस्वरप्रसंगो नास्ति इदानीं वयानात् न च कृ
द्ग्रहणपरिभाषया उद्धृतशब्दस्यापि क्तांतग्रहणेन ग्रहणान्नदं तत्तरपदोपादाने पि तद्व्यवधानाद्वक्ष्यमितिवाच्यं तत्रापि अर्थे
नयातो रनंतरस्य गतेरिति व्याख्यानात् स्यादेतत् एवमपि उदः स्वरो न सिध्यति तथाहि कुगतिप्रादय इत्यत्र समर्थेनेति तृतीयो
ते निर्वृत्तमिति प्राग्वक्तसंबंधि वर्तमानत्वान्न दे कत्वस्य चाविवक्षितत्वाद्भूतच्छंद्योर्धृतशब्देन सह प्रगापत्तसमास

साक्षपेपत्नमात्पर्यंतसमूहाययाप्रत्ययग्रहणपरिभाषयासुवंतनाभावाडुहृतइतिसमासं कृत्वाततोऽभिशब्देनसमासः अ
नवाऽभिशब्दस्यपूर्वपदत्वमक्षतमेव तथाचपूर्वस्यगतेर्विधीयमानः प्रकृतिस्वरः कथमुच्छेद्यः प्रवर्तेत उद्धृतइतिसमासेग
तिस्वरप्रवृत्तावपिद्वितीयसमासेउक्तरीत्यानदनवकाशात्थाथादिस्वरएवस्यात्सतिपूर्वपदत्वात् सिद्धांतस्तथाभ्यंतर
इतिव्याख्यानात्पूर्वपदत्वेविनापिप्रधानेनर्थमादिनाऽच्छेदगतिस्वरप्रवृत्तिः योगविभागात् गतिरिति योगस्यपूर्वपदंग
तिः प्रकृतिस्वरः स्यादित्यर्थः अनेनतरस्यगतिरित्यनुवृत्त्या अभ्यंतरोगतिरपूर्वपदमपिप्रकृतिस्वरः स्यादित्यर्थः स्यादेत
त् गतिपूर्वे प्रागात इत्यादिवत् चकारकपूर्वे हरादागत इत्यादावपिगतिस्वरः स्यात् नचेष्टापत्तिः थाथादिस्वरेणांतोदात्त
स्येवेष्टत्वात् तदुक्तं अपूर्वपदार्थमितिचेत्कारकेऽतिप्रसंग इति अथथाथादिसूत्रेकारकोपपदग्रहणमेवानुवर्तते न
तुगतिग्रहणं ततश्चगतिस्वरःकृत्स्वरस्येवापवादो नतुथाथादिस्वरस्य तथाचहरादागतइत्यत्रकृत्स्वरापवादयोर्गति
स्वरथाथादिस्वरयोः प्रसक्तावपवादविप्रतिषेधात्थाथादिस्वरएवभवति अनेनतरग्रहणं नमु उद्धृतमित्यादावुच्छेद्यस्य
त्पूर्वपदस्यापिप्रकृतिस्वरार्थं नतथाथादिस्वरस्योक्तरीत्याप्रसंगाभावात् मैवं प्रभेद इत्यत्रगतिस्वरेणाद्यातो रुदात्तता
पत्तेः अंतोदात्तस्येवतत्रेष्टत्वात् तदर्थं थाथादिसूत्रेगतिग्रहणानुवृत्तेरावश्यकत्वात् अथथाथादिसूत्रेकृत इति एव
कारस्त्रेकृत्वात् गतिग्रहणंनिवर्त्यकारकोपपदग्रहणं वानुवर्त्यकांतस्योत्तरपदमंतोदात्तंभवतीति व्याख्येयं तथाच
प्रभेद इत्यादौ थाथादिस्वरेण तत्र हरादागत इत्यादावितिचेत् मैवं विशुष्क इत्यादौ कृत्स्वरेणोत्तरपदाद्युदात्तप्रसंगात् शुष्क
शब्दाद्वित्याद्युदात्तयोर्निपातितत्वात् अंतोदात्तस्यचतत्रेष्यमाणत्वात् तदुक्तरीत्याचतत्र तदनुपपत्तेः तस्मादनंतरग्रहणे
सत्यपिहरादागत इत्यादावाकारस्यप्रकृतिस्वरोदुर्वारइतिप्राप्ते सिद्धांतः कारकाद्दत्तश्रुतयोराशिषीत्यत्रकारकादितियोगो
विभज्यते तेन गतिग्रहणानुवृत्तिः कारकात्परं सगतिकं क्तांतमुत्तरपदमंतोदात्तमित्यर्थः इदं चसूत्रेहरा

दागतस्मादेगतिरनंतरस्यास्य बाधनार्थं हस्त्यागतस्मादैष्याष्यादिस्वरेणैवांतोदात्तसिद्धेः तत्रानंतरग्रहणमपि
न कर्तव्यं तथाहि आगतस्य त्र गतिस्वरेणाद्युदात्तः ततो हूरशाह्वस्य लोकांतिके ति समासः पंचम्या लोकादिभ्य इ
ति प्रलक् तत्र समासस्वरं प्राप्तं बाधित्वा गतिकारकोपपदादिति कृत्स्वरे प्रकृते प्रत्ययोदात्तत्वसिद्धो कारकादिति स्व
रे नियमार्थं कारकादेव परं गतिपूर्वपदं क्तांतमुत्तरपदमंतोदात्तं भवतीति तदर्थः अभ्याहृतस्य त्र तत्परत्वात्कृति गी
ताविव्यभेनिवातः ततः कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्तः तत्र गतिरनंतरस्यास्यावकाशः अभेः सर्वोनुदात्त
त्वात् उदात्तस्वरितप्रसक्तेरेव पूर्वपदस्य प्रकृतिस्वरविधानात् नापि थाथादिस्वरस्य उत्तरपदस्य कारकात्परत्वाभा
वादुक्तनियमेन तस्याप्रवृत्तत्वात् अत्रोच्यते परविप्रतिषेधमनादृत्य व्यवहितस्यापि गतेः प्रकृतिस्वरवारणार्थ
मनंतरग्रहणं क्रियते कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषाज्ञापनार्थम् तदभावे हि प्रत्ययग्रह
णपरिभाषया भृतशाह्वस्यैव क्तांतत्वात् उद्धृते गतिस्वरप्रसक्तावपि प्रभिशाह्वेतस्य प्रसक्तिर्नास्ति उदात्तव्यवधानात् स
मांतत्वाच्च उद्धृतशाह्वस्यापि क्तांतग्रहणेनाग्रहणात् तदपेक्षया अभेः व्यवहितस्य पूर्वत्वसद्भावादस्ति गतिस्वरप्रसक्तिरि
ति तन्निवृत्त्यर्थमनंतरपदस्य सार्थकं ननु कारकपूर्वस्यैतत्प्रयोजनं किं ज्ञापकमिति चेत् सत्यं एकदेशानुमतिद्वारा पूर्वा
वार्थपठितोक्तपरिभाषाभ्यनुज्ञानात् गाधेवतिति कृमेनोद्धृतशाह्वमित्यत्र कारादेतिति कृति परे अनंतरो गतिः प्र
कृतिस्वरः स्यात् गतिकारकेति कृत्स्वरस्यापवादः अग्रेण्याऽत्तमस्य प्रभृतोभवः क्तिन् प्रकृतौ ल्युट् न् प्रकृते तत्र न्
नात्रैकिं प्रजल्पाकः पाकव निति किं प्रकर्ता ल्युडंतः प्रतेति किं आगतः स्यादेतत् कृतीति व्यर्थं गतिसंज्ञ्यैव धातो
रात्तेपाक्षत्प्रत्ययविशिष्टस्यैव तस्य प्रयोगात् प्रत्ययस्य चात्र परिशेषात्कृत एव ग्रहणात् समस्तितोस्यानेन प्रत्ययग्रहण
परिभाषया निर्देतस्य ग्रहणे तत्रैव तादाविव्यस्य विशेषणात्व प्रसंगात् निर्देतेत कारादौ उत्तरपदे इत्यर्थे प्रवर्तिताप्र

नविभक्तिमित्यादावेवोक्तस्वरः स्यात् न तु प्रकृतीप्रकृत्तिमित्यादौ निर्देशत्वे पुनरपदस्य तकारादित्वाभावात् ननु तादित्वं
नित्यएव विशेषणं न तु निर्देशस्य विशेषणसंवंधोत्तरमेव तदंतविधिप्रवृत्ते अतएवोतश्च प्रत्ययादसंयोगपूर्वादि
त्यत्राःसंयोगपूर्वइति उकारस्य विशेषणं न तु तदंतप्रत्ययस्येति सिद्धांत इति चेन्न अत्र वार्तिके व्यपदेशिवानायर्थं
सिद्धे वाशब्दस्तस्यार्थे विधिवाक्ये प्रलकारादिः कृदित्यर्थे लाभार्थं कृदिति नेन प्रलविनाप्रलविन्नमित्यादौ स्वरप्र
वृत्तिर्वेलायां प्रत्ययस्य तादित्वाभावेपि उक्तस्वरप्रवृत्तिः स्यादेतन्न अतावितिपर्युदासः कित एवास्तु स्तुप्तिस्तमति
शब्दयोर्गतिस्वरस्य वक्ष्यमाणत्वात् अत्राहुः तनएवायं पर्युदासः अभृतो संगतिमित्यादौ कित्त्वे गतिस्वरपाठात्
स्तुत्वेत्यादौ कृत्स्वरेणोत्तरपदप्रकृतिस्वरेणाद्युदात्तप्रसक्तावंतोदात्ततायाः कित्पर्युदासेपि निर्वाहाच्च स्तुत्विति शब्दस्तलो
वकरणीभूतायाः प्रपित्सुः साधसिद्धिमनीति च कर्तृत्वविवक्षायां किजिति वोध्यं यत्तु मन् कित न्याख्यानेनत्यादिना
तोदात्त इति तडेयेकादित्यस्य तत्रवृत्तावनुवर्तितत्वात् प्रभृतावित्यादि प्रयोगमात्रस्यात्रेति दिक् ॥ तवैवोतश्च प्रत्य
यत् ॥ तवैप्रत्ययोतस्योतउदात्तोनंतरो गतिः प्रकृतिस्वरश्चेत्येतदुभयं युगपत्स्यात् अन्येनवाऽकृत्स्वरापवादोयं अं
दात्तस्यात्र प्रकरणाभावेपि गतेः प्रकृतिस्वरविधानेनाद्युदात्तोपरस्थित्याऽऽतस्येत्यत्र उदात्तएव विधेयः ॥ अनिगंतेंच
तौवप्रत्यये ॥ वप्रत्ययांते च तौ परे इगंतभिन्नो गतिः प्रकृतिस्वरः स्यात् येपरोचस्तात् प्राङ्‌प्रांचौ प्राचः अनिगंते
किं अत्यंचौ यं तप्रतिशब्द इगंतः नन्वत्र यणादेशे कृते इगंतत्वाभावादुक्तस्वरो दुर्वारः नच स्यानिवत्त्वे उक्तस्वरस्यप्र
वृत्तिविधित्वाभावात् नच निषेधवैयर्थ्यम् अतीचः प्रतीचेत्यादौ यणादेशाभावस्य लेखरितार्थत्वात् नच तत्र चावितिप्र
वृत्तिपदांतोदात्तत्वेनास्यवाधः विप्रतिषेधादस्यैव प्राप्त्यापत्तेः तडके चोरदिगंतो वतौ च प्रत्यय इति कृत्स्वरस्य दधीचः प
श्यत्यादावनिगंत इत्यस्य पराङ्‌इत्यादौ सावकाशत्वात् नच दधीचेति सूत्रस्यानयोरेव कृतयणादेशयोः प्रकृतिस्व

रत्वं नान्यस्येति नियमार्थत्वमाश्रित्य प्रत्यङ्ङि:ष्यादौ प्रकृतिस्वरो वारणीय इति वाच्यं तस्यापि प्रथीवेत्यादावेव चरितार्थ
त्वपाउक्तनियमार्थत्वानुपपत्तेः उक्तरीत्यैव तत्र तद्गुस्वरानवकाशात् न चोक्तसूत्रे इति शाह्वस्य प्रकृतिस्वरविधानमेव नि
यमार्थमस्त्वनीचेत्यादौ त्रुस्वरे प्रकृतिस्वरे वा विशेषाभावान्नीत्यस्यैकाच्त्वात्तस्य कृतयणादेशार्थमेवारंभादिति वाच्य
म् सेन्तरंगमपि यणादेशो बाधित्वा वचनसामर्थ्यात् न शाह्वे उक्तस्वरप्रवृत्तेः उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येति य
ङि:ष्यत्र भान्तकारस्य स्वरितत्वमिति तस्यापि कृतयणादेशार्थत्वाभावात् प्रत्यङ्ङि:ष्यादौ तु प्रकृतिस्वरवचनस्यान्यत्र चरिता
र्थत्वादंतरंगत्वाद्यणादेश एव पूर्वं भवतीति इगंतत्वाभावे उक्तप्रकृतिस्वरः स्यादेव नङ्क्ते प्रतिगंतप्रकृतिस्वरत्वे यणा
देशे प्रकृतिस्वराभावप्रसंग इति प्राप्ते उच्यते न चाद्युस्वरस्य पूर्वपदप्रकृतिस्वरे भाविनि प्रतिषेधादिति तथा हि सर्वापवा
द इति प्रसक्तार्थः पूर्वपदप्रकृतिस्वरे भाविनि त्रुस्वरप्रतिषेध एव वक्तव्यः अन्यथा त्रुस्वरस्य सर्वापवादत्वानुपपत्तेः दधीचइ
त्यादौ हि विभक्तेः प्रत्ययस्वरः प्राप्तः तस्यापवादोऽनुदात्तौ सुप्पिताविति तस्यानुदात्तस्य च यत्रोदात्तलोप इत्युदात्तनि
वृत्तिस्वरः तस्य त्रुस्वर इति तेन उदात्तनिवृत्तिस्वरस्यैव प्रतिषेधो न त्वनाविति गतिप्रकृतिस्वरस्यापि बाधः स्यात् ततश्चो
त्सर्गापवादयोर्विप्रतिषेधानुपपत्तेः ननु लक्षणगणनायामतिगंतस्वरोपि चरितार्थ एव प्रथमं समासोन्तोदात्तत्वप्रा
प्ते तस्यापवादः तत्पुरुषे तुल्यार्थेति प्रव्ययपूर्वपदप्रकृतिस्वरः तस्य गतिकारकोपपदात्कृदिति कृत्स्वरः तस्यापि गतौ
चताविति द्वयोरपि चरितार्थत्वाद्विप्रतिषेधोपपत्तिरिति चेत् सत्यं तथापि त्रुस्वरस्य सर्वतिशिष्टत्वात् चकारावकारयोर्लो
पे कृते वाविति द्वपसंपत्त्यानन्तरमेव तत्प्रवृत्तेरिति सर्वापवादत्वस्य दुर्वारत्वात् ॥ त्रपीव ॥ चप्रत्ययांतेनैव तेन पूर्वपदे तो
प्रकृतिस्वरौक्तः इगंतत्वाद्यणभावारंभः न्यङ् प्रत्यङ् इत्यत्र यणादेशस्यांतरंगत्वेपि वचनसामर्थ्यात् न्यङ्ङि:ष्याद्यौ चेत्युदा
त्तः ततो यणः उदात्तस्वरितयोर्यण इति यान्तकारः स्वरितः ॥ ईषदन्यतरस्यां ॥ उत्तरपदे परे ईषच्छब्दो वा प्रकृतिस्वरः स्यात्

ईषत्कडारः ईषदित्यन्तोदात्तः पक्षे समासस्यान्तोदात्तः ईषद्भेदः इत्यादौ कृत्स्वरः प्रबलत्वात् ॥ हिरण्यपरिमाणं धने ॥ हिरण्यप
रिमाणवाचिपूर्वपदं धनशब्दे परे वा प्रकृतिस्वरं स्यात् द्विसुवर्णधनं द्वौ सुवर्णौ परिमाणमस्य द्विसुवर्णं तदेव धनमि
ति कर्मधारयः बहुव्रीहावपि परत्वादयं विकल्पः हिरण्येति किं प्रस्थधनं परिमाणं किं काञ्चनधनं धने किं निष्कमा
ला ॥ प्रथमोऽचिरोपसंपत्तौ ॥ अभिनवत्वार्थे प्रथमशब्दो वा प्रकृतिस्वरः स्यात् प्रथमवैयाकरणः प्रथेरमजिति प्रथ
मशब्दोऽन्तोदात्तः संप्रत्येव तदध्येतुं प्रवृत्त इत्यर्थः अचिरेति किं प्रथमशब्दस्य मुख्यार्थत्वे माभूत् ॥ कतरकतमौ कर्म
धारये ॥ प्रकृतिस्वरौ वा स्तः कतरकलापः कतमकठः कर्मधारये किमुत्तरार्थं कतरकतमौ जातिपरिप्रश्न इति प्रतिप
दोक्तसमासग्रहणादेवात्रानतिप्रसंगात् ॥ आर्यो ब्राह्मणकुमारयोः ॥ अनयोः परयोरार्यशब्दो वा प्रकृतिस्वरः स्यात् क
र्मधारये आर्यब्राह्मणः आर्यकुमारः आर्यशब्दो ण्यदन्तत्वात् स्वरितः पक्षे समासान्तोदात्तः आर्यः किं परमब्राह्मणः अनयोः
किं आर्यक्षत्रियः कर्मधारये किं षष्ठीसमासादौ माभूत् ॥ राजा च ॥ अनयोः परयो राजशब्दो वा प्रकृतिस्वरः स्यात् कर्मधा
रये राजब्राह्मणः राजकुमारः कर्मधारये किं राज्ञो ब्राह्मणो राजकुमारः राजशब्दः कनिन्नन्तत्वादाद्युदात्तः योगविभाग
उत्तरत्र राजशब्दस्यैवानुवृत्तिर्यथा स्यात् ॥ षष्ठी प्रत्येनसि ॥ षष्ठ्यन्तो राजा प्रत्येनसि परे प्रकृतिस्वरो वा स्यात् राज्ञः
प्रत्येनाः राजप्रत्येनाः षष्ठी किं कर्मधारये माभूत् ॥ क्ते नित्यार्थे ॥ क्तान्ते उत्तरपदे नित्यार्थे समासे पूर्वपदं वा प्रकृतिस्वरं स्या
त् नित्यप्रहसितः सततप्रहसितः कालाः इति द्वितीयासमासः नित्यमिति त्यबन्तत्वादाद्युदात्तः सततमिति भावे क्ते थाथादि
स्वरेणान्तोदात्तः कर्मणि तु कृत्स्वरेणाद्युदात्तः नित्यार्थे किं मुहूर्तप्रहसितः ॥ ग्रामः शिल्पिनि ॥ शिल्पिवाचिन्युत्तरपदे
ग्रामशब्दो वा प्रकृतिस्वरः स्यात् ग्रामनापितः ग्रामेत्याद्युदात्तः शिल्पिनि किं ग्रामरथ्या ॥ राजा च प्रशंसायां ॥ शिल्पिवा
चिन्युत्तरपदे प्रशंसार्थं राजपदं वा प्रकृतिस्वरं स्यात् राजनापितः शिल्पिनि किं राजहस्ती प्रशंसायां किं राज्ञो ना

पितोराजनापितः ॥ आदिरुदात्तः पूर्वपदस्यादिरुदात्तो भवतीत्ययमधिकारः ॥ सप्तमीहारिणौ धर्म्येऽहरणे ॥ सप्तम्यन्ते
हारिवाचकं च पूर्वपदमाद्युदात्तं हरणाभिन्ने धर्म्यवाचिन्युत्तरपदे देयस्त्रीकर्तिहारी आचारनियतं देयं धर्म्यं स्वपेशाणः
मुकुटेकार्षापणः हलेद्विपादिका संज्ञायामिति समासः कारनाम्नि चेत्यलुक् हारिणि याज्ञिकाश्वः वैयाकरणहस्
ती स्तूपादिषु शाणादिदानं वैयाज्ञिकादीनां स्वं धर्मादीनि कविदाचारः धर्म्ये किं स्तम्बेरमः अहरणे किं वाडवहरणं वड
वाया अयं वाडवः तस्य हरणं वाडवहरणं वडवायां बीजनिषेकादुत्तरकालं अश्वस्य शारीरपुष्ट्यर्थं यद्दीयते तद्धरण
शब्दार्थः ननु गतिकारकोपपदादिति कृत्स्वरस्य परत्वादेवात्र हारिस्वरेण न भवितव्यमिति किं हरणप्रतिषेधेनेति चेन्न
यतोपि कृत्स्वरो हारिस्वरं न बाधत इति ज्ञापनार्थत्वात् तेन वाडवहार्य इत्यत्र हारिस्वर एव भवति एवं च कृत्स्वरात् हारि
स्वरः पूर्वविप्रतिषेधेनेत्यनारभ्यं अनेनाभावकमेव वचनम् इत्यतो दानवाचकस्यास्य न ह्यप्य कृत्स्वरबाधकत्वस्य मूलभवात्
पितृगवो मातृगव इत्यत्राविनस्वरेणापि नाऽयमेव स्वरः परत्वात् ॥ युक्ते च ॥ युक्तवाचिनि समासे पूर्वपदस्यादिरुदात्तः स्यात् क
र्तव्येन त्यरो युक्तः गोवल्लभः अश्ववल्लभः युक्तस्वरः कृत्स्वरात् पूर्वविप्रतिषेधेनेति वक्तव्यं गोसंख्य इत्यत्रायमेव स्वरो न
तु गतिकारकोपपदादिति यद्यपि इह नदपवादस्याद्युदात्तस्वरः प्राप्नोति न तु कृत्स्वरः तथापि प्रथमं प्राप्तेस्तु याकृत्स्व
रेणुक्तं ॥ विभाषाध्यक्षे ॥ अध्यक्षशब्दे परे पूर्वमाद्युदात्तं वा स्यात् गवाध्यक्षः ॥ पापं च शिल्पिनि ॥ शिल्पिन्युत्तरपदे पा
पशब्दमाद्युदात्तं वा स्यात् पापनापितः पापाणके कुत्सितैरिति प्रतिपदोक्तसमासग्रहणान्नेह पापस्य नापितः पाप
नापितः ॥ गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ॥ एषु परेषु पूर्वं स्यादिरुदात्तः समासेन निंदायां गम्यायां भार्यासौश्रुतः
सुश्रुतापत्यस्य भार्याप्रधानत्वात् निंदा कुमारीदाक्षाः ओदनपाणिनीयाः कुमार्यादिलाभार्थं दाक्षादिप्रोक्तशास्त्राध्येता
र इत्यर्थः भिक्षामाणवः आद्ध्वब्राह्मणः पूर्ववन्निंदा ॥ अंगानि मैरेये ॥ मैरेयमासवः सीधुरित्यमरः मधुमैरेयं मैरेयप्रकृ

सि॰
ध॰
६३

63

तित्वान्मधुनस्तदंगत्वं ॥ भक्ताख्यास्तदर्थेषु ॥ अन्नवाचिनस्तादर्थ्ये परे आद्युदात्ताः स्युः भिक्षाकंसः भाजीकंसः भिक्षादयोऽन्नवि
शेषाः भक्ताख्याः किं समाशशालय संसृष्टवादन्नानेर्भाविचय्य तदर्थेषु किं भिक्षाप्रियः बहुव्रीहित्वात्पूर्वपदमन्तोदात्तं ॥ गो
बिडालसिंहसैन्धवेषूपमाने ॥ उपमानार्थेषु गवादिशब्देषूत्तरपदेषु पूर्वस्यादिरुदात्तः स्यात् धान्यंगौरिव धान्यगवः उ
पमितं व्याघ्रादिभिरिति समासः गवाकारसंनिवेशितं धान्यमित्यर्थः गोबिडालः तृणसिंहः सक्तुसैन्धवः पञ्चकिं पुरुष
व्याघ्रः उपमाने किं परमसिंहः ॥ अके जीविकार्थे ॥ अकान्ते परे पूर्वपदमाद्युदात्तं जीविका चेत्समासार्थः दन्तलेखकः
नित्यं क्रीडाजीविकयोरिति समासः अके किं रमणीयकर्त्ता जीविकार्थे किं इक्षुभक्षिकां धारयसि ॥ प्राचां क्रीडायां ॥ प्राग्देश
वासिनां क्रीडायां वाचके समासेऽकान्ते परे पूर्वमाद्युदात्तं स्यात् उद्दालकपुष्पभञ्जिका । संज्ञायामिति ण्वुल् नित्यं क्री
डेति समासः प्राचां किं जीवपुत्रप्रचायिका उदीचां क्रीडेयं क्रीडायां किं तवपुष्पप्रचायिका पर्यायेण्वुच् ॥ अणि नियु
क्ते ॥ अणन्ते परे पूर्वमाद्युदात्तं नियुक्तवाचिनि समासे छत्रधारः नियुक्ते किं काण्डलावः ॥ शिल्पिनि चाकृञः ॥ कृ
ञ्प्रकृतिकादणो भिन्नो योऽण् कृञ्भिन्नप्रकृतिक इति यावत् तदन्ते परे पूर्वमाद्युदात्तं शिल्पिनि गम्ये तन्तुवायः तन्त्र
वायः शिल्पिनि किं काण्डलावः अकृञः किं कुम्भकारः ॥ संज्ञायां ॥ अणन्ते परे प्राग्वत् तन्तुवायो नाम कृमिः अकृञ इत्य
ेव रथकारो नाम ब्राह्मणः ॥ गोतन्तियवं पाले ॥ पाले परे गवादीनामादिरुदात्तः स्यात् गोपालः तन्तिपालः यवपा
लः अनियुक्तार्थ आरंभः गवादीनां किं वत्सपालः पाले किं गोरक्षः ॥ णिनि ॥ णिन्यन्ते परे पूर्वं स्यादिरुदात्तः पुष्पहारी
॥ उपमानं शब्दार्थप्रकृतावेव ॥ शब्दार्थकधातुप्रकृतिके णिन्यन्ते परे उपमानवाचि पूर्वपदमाद्युदात्तं स्यात् उष्ट्रक्रोशी ध्वा
ङ्क्षरावी कर्त्तर्युपमाने इति णिनिः उपमानग्रहणं पूर्वसूत्रस्यास्य च विषयविभागार्थं अन्यथा हि प्रत्ययनियमार्थत्वावि
ज्ञाने पुष्पहारिण्यादौ न स्यात् न चैवं योगविभागवैयर्थ्यं पूर्वयोगे उपमानेऽप्येतद्विनेऽस्यापि प्रसंगात् शिष्टप्रयो

गानुसारे प्रतिपत्तिर्गौरवापत्तेः शब्दार्थप्रकृतौ किं हकरावी प्रकृतिग्रहणान्न उपसर्गनिरपेक्षस्यैवमानोः शब्दार्थकत्व
लाभार्थं नेह कोकिलाभिव्याहारी एवकारउपमानमेव शब्दार्थप्रकृताविति विपरीतनियमवारणार्थं अन्यथा साधव्या
पीप्यादावव्याप्तेः केचित्तनुपमानार्थं तेन प्रकलजस्वीप्यादौ ग्रयमेव स्वरइत्याहुः ॥ युक्तारोह्यादयश्च ॥ एते समासा आ
द्युदात्ताः स्युः युक्तारोही आगतरोही आगतवाधी आगतनन्दी आगतप्रहारी एषां णिनीत्येव सिद्धे पूर्वोत्तरपदनियमा
र्थमुपादानं तेन हव्यारोही शुक्राभिधीपीप्यादौ नाद्युदात्तः आगतमत्स्यः क्षीरहोता भगिनीभर्ता ग्रामगोधुक् अश्वत्रि
रात्रः गर्गत्रिरात्रः विस्मत्रिरात्रः शणपादः एते षष्ठी समासाः एकशितिपादः एकः शितिः पादो यस्य इति त्रिपदो बहु
व्रीहिः एकशितिशब्दयोस्तद्धितार्थेत्युत्तरपदनिमित्तकः समासः बहुव्रीहेस्तत्पुरुषं प्रति निमित्तत्वान्निमित्तस्वरस्य ब
लीयस्त्वात् एकोदात्तत्वप्रसंगादाद्युदात्तार्थं शब्दपाठः नच इगन्ते द्विगाविति पूर्वपदाद्युदात्तत्वसिद्धिः उत्तरपदे शितिपदेन
स्यद्विगुस्वरोनेति शापत्वात् तेन द्विशितिपादित्यत्र शितिशब्दान्तः निमित्तस्वरबलीयस्त्वेन एकशितिपादित्यस्याग्रपा
दयवत्तापकः इति बहुव्रीहिस्वरेण के पात्रे संमितादयश्च युक्तारोह्यादित्वादाद्युदात्तः ॥ दीर्घकाशतुषभ्राष्ट्रवटं जे ॥
एते जशब्दे परे आद्युदात्ताः स्युः दीर्घजः काशजः तुषजः भ्राष्ट्रजः वटजः ॥ अन्त्यात्पूर्वं बह्वचः ॥ बह्वचोन्त्यादयः पूर्वमुदा
त्तस्यां जे परे उपसरजः आमलकीजः इत्यत्र दीर्घेति वाधितः पूर्वमेव परत्वात् बह्वचः किं दग्धजा नितरणानि ॥ ग्रामेऽनिव
सन्तः ॥ ग्रामे परे निवसद्भिन्नवाचके पूर्वपदमाद्युदात्तं स्यात् मल्लग्रामः तेषां समूह इत्यर्थः देवग्रामः देवस्वामिक इ
त्यर्थः अनिवसन्तः किं दाक्षिग्रामः तेषां निवास इत्यर्थः ॥ घोषादिषु च ॥ एषु परेषु पूर्वपदमाद्युदात्तं स्यात् दाक्षिघोषः
घोष घट पल्लव बदरी पिंगल पिशंगमाला रक्षाकट शाल्मली अश्वत्थ दाक्षिवनी प्रेष्यकूट ॥ छात्र्यादयः शालायां ॥
शालाशब्दे परे छात्र्यादय आद्युदात्ताः स्युः छात्रशाला छात्रिमलि भोडि वाडि आषाडि आपानि गोपिष्ठ शालान्त समास

साञ्जीवत्वेन तत्पुरुषे शालायामित्यस्यापरत्वेत्यस्यैव प्रवृत्तिः छात्रिशालं ॥ प्रस्थेऽवृद्धमकर्क्यादीनां ॥ प्रस्थशब्दे परेऽवृद्धसंज्ञाक
र्क्यादेश्चभिन्नेह सर्वपदमाद्युदात्तं स्यात् इन्द्रप्रस्थः अवृद्धं किं दाक्षिप्रस्थः अकर्क्यादीनां किं कर्कीप्रस्थः कर्की मघी कवरी क
र्कंधूशमिनी करीर कंडुक कवल खदिर ॥ मालादीनां च ॥ प्रस्थे परे एषामादिरुदात्तः स्यात् अवृद्धमिति पर्युदासप्रसक्तावा
रंभः मालाप्रस्थः मालाशालाद्राक्षाक्षामा कांची एका शोणा कामा एकाशोणेत्यनयोरेङ्प्राचां देशे इति वृद्धत्वं ॥ अमहन्न
वन्नगरेऽनुदीचां ॥ उदक्ग्रामानभिधायिनि नगरशब्दे परे महन्नवशब्दभिन्नं सर्वपदमाद्युदात्तं स्यात् सह्मनगरं अमहन्नवं
किं महानगरं नवनगरं अनुदीचां किं कांचीनगरं कीर्तिनगरं ॥ अर्मे चावर्णं द्व्यच्त्र्यच् ॥ अर्मे परे द्व्यच्त्र्यच् अवर्णान्तं
सर्वपदमाद्युदात्तं स्यात् गुप्तार्मं दत्तार्मं अवर्णान्तं किं बृहदर्मं अच् किं कपिंजलार्मं अमहन्नवमित्येव महार्मं नवार्मं
॥ न भूताधिकसंजीवमद्राश्मकज्जलं ॥ अर्मे परे एतान्याद्युदात्तानि न स्युः सर्वं गाप्रामावारंभः भूतार्मं अधिकार्मं संजी
वार्मं मद्राश्मग्रहणं संघातविग्रहीतार्थं मद्राश्मार्मं मद्रार्मं अश्मार्मं कज्जलार्मं एषु समासस्यान्तोदात्तत्वं आद्युदात्तप्र
करणे दिवोदासादीनां छन्दस्युपसंख्यानं दिवोदासाय गायते बध्र्यश्वाय दाशुषे आकृतिगणोऽयं ॥ अन्तः ॥ अधिकारोऽयं उ
त्तरपदस्यादिरित्यतः प्राक् ॥ सर्वं गुणकार्त्स्न्ये ॥ निरवच्छिन्नसमवायसंबंधेन गुणस्य वृत्तिर्गुणकार्त्स्न्यं तद्वाचिनि सर्वमिति सर्वपद
मन्तोदात्तं स्यात् सर्वश्वेतः सर्वमहान् सर्वं किं परमशुक्लः गुणेति किं सर्वसौवर्णः कार्त्स्न्ये किं सर्वेषां श्वेततरः सर्वश्वेतः
गुणान्तरलोपः स्वरलोपश्चेति समासस्तत्र लोपस्य सर्वशब्दो गुणकार्त्स्न्ये वृत्तिः सर्वेषां श्वेतवतामपेक्षया सातिशायः श्वे
तो गुणाद्रत्यर्थः ॥ संज्ञायां गिरिनिकाययोः ॥ अनयोः परयोः सर्वपदमन्तोदात्तं स्यात्संज्ञायां अंजनागिरिः शांडिलनिकाय
संज्ञायां किं परमगिरिः ब्राह्मणनिकायः ॥ कुमार्यां वयसि ॥ कुमार्यामुत्तरपदे सर्वपदमन्तोदात्तं वयसि गम्ये वृद्धकुमा
री कुमारीशब्दे पुंसा सह संप्रयोगाभावोऽत्र प्रवृत्तिनिमित्तं अतो वृद्धशब्देन सामानाधिकरण्यं वयसि किं परमकुमारी

कुमार्यो किं गुडकन्या ॥ उदकेऽकेवले ॥ अकेवले रसान्तरापादकद्रव्यमिश्रे तद्वाचिके समासे उदके परे पूर्वपदमन्तोदात्तं गु
डोदकं गुडशब्दोन्तोदात्ते कृते घ्राणाः स्वरितो वानुदात्ते पदादाविति पक्षे स्वरितः पक्षे एकादेश उदात्तेनोदात्तः अकेवले किं
शीतोदकं उष्णोदकं ॥ द्विगौ क्रतौ ॥ द्विगावुत्तरपदे पूर्वपदमन्तोदात्तं क्रतुवाचिनि समासे गर्गत्रिरात्रः द्विगौ किं अतिरात्रः
क्रतौ किं बिल्वहोमस्य सप्तरात्रो बिल्वहोमरात्रः ॥ सभायां नपुंसके ॥ नपुंसकसभाशब्दान्तपदे समासे पूर्वपदमन्तोदात्तं
स्यात् गोपालसभं स्त्रीसभं सभायां किं ब्राह्मणसेनं नपुंसके किं राजसभा सभाराजामनुष्यपूर्वेति सभाशब्दस्य पुरस्कारे
णविहितप्रतिपदोक्तनपुंसकग्रहणान्नेह रमणीयसभं ब्राह्मणकुलं ॥ पुरे प्राचां ॥ पूर्वपदमन्तोदात्तं पुरे परे तच्चेत् पुरं प्रा
चां शिवदत्तपुरं नान्दीपुरं प्राचां किं शिवपुरं उदीचामेतत् ॥ अरिष्टगौडपूर्वे च ॥ एतत्पूर्वे समासे प्राच्ये पुरे परे पूर्वपदमन्तोदा
त्तं अरिष्टपुरं गौडपुरं पूर्वग्रहणं तदरिष्टाश्रितपुरं गौडभृत्यपुरं इत्यत्रापि यथा स्यात् ॥ न हास्तिनफलकमार्देयाः ॥
एते पुरे परे नान्तोदात्ताः हास्तिनपुरं फलकपुरं मार्देयपुरं मृदेरपत्यं मार्देयः शुभ्रादित्वात् ढक् ॥ कुसूलकूपकुम्भशालं
बिले ॥ कुसूलादयोऽन्तोदात्ता बिले परे कुसूलबिलं कूपबिलं कुम्भबिलं शालबिलं कुसूलादयः किं सर्पबिलं बिले किं
कुसूलस्वामी ॥ दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु ॥ एषु परेषु दिक्शब्दा अन्तोदात्ताः स्युः क्रमेण यथा पूर्वेषुका
मशमी पूर्वपञ्चालाः पूर्वयायातं पूर्वचानराटं दिक्शब्द इति शब्दपदोपादानं कालवाचिनोपि दिक्शब्दस्य निवृत्त्यर्थं ॥ आचा
र्योपसर्जनश्चान्तेवासिनि ॥ आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ताः स्युः पूर्वपाणिनीयाः पाणिनीयशब्दः पाणि
निप्रोक्तशास्त्राध्येतृवाचित्वाच्छणोऽकार्थः आचार्येति किं पूर्वान्तेवासी अन्तेवासिनि किं पूर्वपाणिनीयं शास्त्रं ॥ उत्तरपदवृद्धौ
सर्वं च ॥ उत्तरपदस्येत्यधिकारे विहिता या वृद्धिस्तद्वति उत्तरपदे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ताः स्युः वृद्धिमत उत्तरपद
स्य ग्रहणमित्येतावतैव लाभे उत्तरपदग्रहणं सामर्थ्याज्जदधिकारविहितवृद्धिलाभः सर्वपाञ्चालः अपरपाञ्चालः अपि

लि°
ग्र°
८५ कृल्लनीर

65

कारकग्रहणं किं सर्वभासः सर्वकारकः ॥ बहुव्रीहौ विश्वं संज्ञायां ॥ विश्वशब्दरूपं पूर्वपदमंतोदात्तं बहुव्रीहौ पूर्वपदप्रकृति
स्वरेण प्राप्तस्याद्युदात्तस्यापवादः विश्वकर्मा विश्वदेवः प्राग्विश्वदेवं सर्वपतिं बहुव्रीहौ किं विश्वदेवा इति कर्मधारये मा
भूत् संज्ञायां किं विश्वदेवास्य सा विश्वदेवः त्वतः प्राग्बहुव्रीहाविति निष्ठकारः ॥ उदराश्वेषुषु ॥ एषु पूर्वपदमंतोदात्तं बहुव्री
हौ संज्ञायां वृकोदरः कुवलयाश्वः महेषुः ॥ क्षेपे ॥ घसेज्यायामपि उदरादिषु परेषु पूर्वपदमंतोदात्तं बहुव्रीहौ निंदायां
गम्यायां कुंभोदरः कटुकाश्वः वलावलेषुः ॥ नदी बंधुनि ॥ बंधुशब्दे परे नद्यंतं पूर्वपदमंतोदात्तं बहुव्रीहौ गार्गीबंधुः
नदी किं ब्रह्मबंधुः ब्रह्मशब्दस्याद्युदात्तः बंधुनि किं गार्गीपुत्रः बहुव्रीहौ किं गार्ग्याः पुत्रो गार्गीपुत्रः ॥ निष्ठोपसर्गपूर्वमन्य
तरस्यां ॥ सोपसर्गे निष्ठान्ते पूर्वपदमंतोदात्तं स्याद्बहुव्रीहौ प्रधौतपादः निष्ठांते किं प्रसेवकमुखः उपसर्गपूर्वमिति किं
शुष्कमुखः शुष्के स्याद्युदात्तः ॥ उत्तरपदादिः ॥ इत ऊर्ध्वमुत्तरपदस्यादिरित्यधिकारः उत्तरपदाधिकार आपादसमाप्तेः आ
दिरिति तु प्रकृत्या भगालमित्यतः प्रागिति विशेषः ॥ कर्णो वर्णलक्षणात् ॥ कर्णवाचकात् लक्षणवाचकाच्च परः कर्णश
ब्द आद्युदात्तो बहुव्रीहौ शुक्लकर्णः तत्राकर्णः कर्णे लक्षणमस्येति दीर्घः लक्षणानामपशूनां विभागज्ञानार्थं क्रियमाणं दात्रा
दिप्रतिरूपकं चिह्नं कर्णे किं श्वेतपादः वर्णलक्षणात् किं शंकुकर्णः ॥ संज्ञौपम्ययोश्च ॥ अनयोर्बहुव्रीहौ कर्णस्वरूपमुत्तरप
दमाद्युदात्तं कुंभकर्णः गोकर्णः ॥ कण्ठपृष्ठग्रीवाजंघं च ॥ प्राग्वत् शितिकण्ठः कालपृष्ठः दशग्रीवः गोजंघ इति संज्ञायां औपम्येन
उष्ट्रकण्ठः गोपृष्ठः उष्ट्रग्रीवः नाडीजंघः ॥ शृंगमवस्थायां च ॥ उत्तरपदं शृंगशब्दो बहुव्रीहावाद्युदात्तो ऽवस्थायां संज्ञायामौपम्ये च
गम्ये उद्गतशृंगः ह्रस्वशृंगः मेषशृंगः अवस्थायां किं स्थूलशृंगः ॥ नञो जरमरमित्रमृताः ॥ नञः परे एते आद्युदात्ता बहुव्री
हौ नास्य जरा अजरः अजरो जीर्यते रसः ॥ अमरः मृडः अस्मादेव निपातनाद् अमित्रस्य व्यथयामन्युरिंद्र अमो ईदं घनीस्यो णादि
केभ्यश्च विश्रंभोदात्तः नञ ननसुहवेनाद्युदात्तः अज्ञामित्र हत्र मेष्ठः पुंसीति लिंगानुशासनसूत्रात् ॥

प्रवो देवेभ्यस्तम् नञः किं ब्राह्मणमित्रः जरादयः किं प्रशत्रुः ॥ सोर्मनसी अलोमोषसी ॥ सुशब्दात्परं लोमन्नुषश्श
ब्दाभ्यामन्यन्मन्नन्तमसन्तं चाद्युदात्तं स्यात् नञ्सुभ्यामित्यस्यापवादः सुकर्मा सुयशाः आद्युदात्तं द्व्यच्छन्दसीत्यनेनासिद्धे
पि सुप्रथिमेत्यादि वह्वृजर्थं मध्यं दोर्घ्यं वायमारम्भः सोः किं कृतकर्मा मनसी किं सुराजा अलोमोषसी किं सुलोमा सूषाः
सोर्मनसी इत्यस्यावकाशः सुशर्माणमपि नावमिहेत्यादिः कपिपूर्वमितिवक्ष्यमाणस्या यवक इत्यादिः सुशर्म
कः सुस्रोतस्क इत्यादौ कपिपूर्वमित्येव परत्वात् ॥ क्रत्वादयश्च ॥ सुशब्दात्परे क्रत्वादयो बहुव्रीहावाद्युदात्ताः स्युः सु
क्रतुः सुप्रतीकः क्रतु दृशीक प्रतीक प्रतूर्ति भव्य हव्य ॥ आद्युदात्तं द्व्यच्छन्दसि ॥ सोः परं यदाद्युदात्तं द्व्यच् तद्ब
हुव्रीहावाद्युदात्तं स्यात् सुअश्वाः सुरथाः अश्वरथौ नित्स्वरेणाद्युदात्तौ आद्युदात्तं किं यस्त्वा बाहुः बाहुर्वेनोदात्तः द्व्यच् किं सु
हिरण्यः ॥ वीरवीर्यौ च ॥ सुशब्दात्परौ एतौ छन्दसि बहुव्रीहावाद्युदात्तौ स्तः सुवीरेण रयिणा सुवीर्यस्य गोमतः बहुव्री
हावित्यपि कारः समासः । न च वीर्यशब्दस्य यत्प्रत्ययान्तत्वाद्यतोऽनाव इत्याद्युदात्तत्वात्स्वरेणैव सिद्धमिति वाच्यम् वी
र्यशब्दे उञ्नमाद्युदात्तत्वेन प्रवर्तनं इत्यस्यासाध्यत्वात् ॥ कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ एतान्युत्तरपदानि
अव्ययीभावे आद्युदात्तानि स्युः उपकूलं परितीरं उपतूलं उपमूलं उपशालं उपाक्षं सुषमं निःषमं तिष्ठद्गुप्रभृतिष्व
नयोः पाठः कूलादीनीति किं उपकुम्भं अव्ययीभावे किं परमकूलं पर्यादिभ्यः कूलादिनामाद्युदात्तत्वं विप्रतिषेधेन परि
प्रत्यपापावर्ज्यमानाहोरात्रावयवेष्विति पूर्वपदप्रकृतिस्वरस्यावकाशः परित्रिगर्तं परिसौवीरं कूलतीरेत्यादेरनुकूल
इत्यादिः परिकूलमित्यादौ परत्वादुत्तरपदाद्युदात्तत्वं ॥ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ द्विगौ कंसादीन्युत्तरपदमाद्यु
दात्तं द्विकंसे द्विमन्थमित्यादि कंसादीनीति किं पंचाश्वं द्विगौ किं परमकंसः ॥ तत्पुरुषे शालायां नपुंसके ॥ नपुंसके शा
लाशब्दान्तेन तत्पुरुषे उत्तरपदमाद्युदात्तं स्यात् ब्राह्मणशालं तत्पुरुषे किं दृढशालं नगरं शालायां किं ब्राह्मणसेनं

नपुंसके किं ब्राह्मणसेना विभाषासेनासुरेति ङीवन्तविकल्पः ॥ कन्था च ॥ उक्तविषये उत्तरपदमाद्युदात्तं स्यात् सौश
मिकंथं आह्वरकंथं नपुंसके किं दाक्षिकंथा ॥ आदिश्चिहणादीनाम् ॥ कंथान्ते नपुंसके तत्पुरुषे पूर्वपदस्थानामेषा
मादिरुदात्तः स्यात् चिहणकंथं मदरकंथं चिहण मदर वितुल पटक वैतिल कर्ण कुक्कुट चिकण आदिरित्यधिकारे आदि
ग्रहणं सर्वपदाद्युदात्तार्थम् ॥ चेलखेटकटुककाण्डं गर्हायाम् ॥ चेलादीन्युत्तरपदान्याद्युदात्तानि गर्हायां पुत्रचेलं उपमिते
व्याघ्रेति समासः उपानत्खेटं दधिकटुकं भूतकाण्डं गर्हायां किं परमचेलम् चेलादीति किं ब्राह्मणब्रुवः ॥ चीरमुपमा
नं ॥ उपमानार्थे तत्पुरुषे चीरपदं आद्युदात्तं स्यात् वस्त्रचीरमिव वस्त्रचीरं कंबलचीरं उपमानं किं परमचीरं ॥ पलल
सूपशाकं मिश्रे ॥ मिश्रार्थे तत्पुरुषे पललादीन्युत्तरपदान्याद्युदात्तानि स्युः गुडपललं घृतसूपः घृतशाकं भक्ष्येण
मिश्रीकरणमिति समासः पललेत्यादि किं गुडौदनः मिश्रे किं परमपललम् ॥ कूलसूदस्थलकर्षाः संज्ञायाम् ॥ तत्पुरु
षे आद्युदात्ताः स्युः दाक्षिकूलं देवसूदः भाण्डस्थली लिंगविशिष्टपरिभाषया स्थलीशब्दस्यापि ग्रहणं दाक्षिकर्षः ग्रामवि
शेषाणामेताः संज्ञाः संज्ञायां किं परमकूलं ॥ अकर्मधारये राज्यं ॥ कर्मधारयभिन्ने तत्पुरुषे उत्तरपदस्थं राज्यमाद्युदात्तं
ब्राह्मणराज्यं अकर्मधारये किं परमराज्यम् चेलराज्यादिस्वराद् अव्ययस्वरः पूर्वविप्रतिषेधेनेति वक्तव्यं कुचेलं कुराज्यं त
त्पुरुषे तुल्यार्थेत्यव्ययस्वरेण कुशब्द उदात्तः ॥ वर्ग्यादयश्च ॥ उत्तरपदस्था एते आद्युदात्ताः स्युः अर्जुनवर्ग्यः वासुदेवपक्ष्यः अक
र्मधारय इत्येव नेह परमवर्ग्यः दिगाद्यंतर्गणो वर्गादिः यत्प्रत्ययान्ता वर्गादय एव वर्ग्यादय इह बोध्याः ॥ पुत्रः पुंभ्यः ॥ पुंशब्देभ्यः
परः पुत्रशब्दस्तत्पुरुषे आद्युदात्तः स्यात् दाशकिपुत्रः माहिषपुत्रः पुत्रः किं कौनटिमातुलः पुंभ्यः किं दासीपुत्रः ॥ नाचार्यरा
जर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥ आचार्यादिभ्यः परः पुत्र आद्युदात्तो न स्यात् पूर्वेणापवादः आख्याग्रहणं सर्वान्वयि तेन स्वरूप
स्य पर्यायाणां विशेषाणां चोपादानं आचार्यपुत्रः उपाध्यायपुत्रः शाकटायनपुत्रः राजपुत्रः ईश्वरपुत्रः नंदनपुत्रः ऋत्वि
क्पुत्रः याजकपुत्रः होतृपुत्रः संयुक्ताः संबंधिनः श्यालपुत्रः ज्ञातयो मातापितृसंबंधेन बांधवाः ॥

वाः ज्ञातिपुत्रः आत्मपुत्रः ॥ चूर्णादीन्यप्राणिषष्ठ्याः ॥ अप्राणिभिन्नात्षष्ठ्यन्तात्पराणि चूर्णादीन्याद्युदात्तानि स्युस्तत्पुरुषे
मुद्गचूर्णम् अप्राणीति किं मत्स्यचूर्णं मत्स्यत्वजातेः प्राणिवृत्तित्वात् तेन चूर्णे वस्त्रायोग्यप्राणत्वस्याभावेपि न क्षतिः ॥
षट् च काण्डादीनि ॥ चेलखेटेति सूत्रोक्तपठितं काण्डशब्दमारभ्य कूलसूदेति सूत्रादिपठितकूलशब्दपर्यन्ताः षट् काण्डाद
यः तेऽप्राणिभिन्नात्षष्ठ्यन्तात्परे तत्पुरुषे आद्युदात्ताः स्युः दर्भकाण्डं दर्भचीरं तिलपललं मुद्गसूपः मूलकशाकं नदीकू
लं षट् किं राजसूदः अप्राणीति किं दत्तकाण्डं ॥ कुण्डं वनम् ॥ वनवाचिनि तत्पुरुषे कुण्डमाद्युदात्तं स्यात् कुण्डं [illegible]वनं
किं मत्कुण्डं कुण्डमाद्युदात्तं वेत्तत्समुदायग्रहणं कर्तव्यं अस्यार्थः कुण्डशब्दो भाजनविशेषवाची प्रसिद्धः इक्षुकुण्डमित्यादौ
समुदायवाच्यपि तत्र यथाह्वर्थे वनमिति कुण्डवनशब्दोपि समुदाये जलेव वर्तते कुण्डशब्दस्यावशिष्टाधारजलवाच्य
पाक्तित्वडागादिवत् नीलं कुण्डमिति प्रयोगात् मतस्वहृतेपि वनग्रहणे मत्कुण्डमित्यादावतिप्रसंगतादवस्थ्य तस्मा
द्वनरूपो यः समुदायस्तद्रूपं वनमत्र ग्राह्यं समुदायवचनो वनशब्दोयं नतूदकवाची इति यावत् अन्येन वनानां स
मुदायो वनसमुदायः शरवणसमुदायः शरकुण्डं ग्राह्यार्थ्य इत्याहुः मत्कुण्डमित्यत्र तु भाजनविशेषो विशिष्टसंस्थाने ज
लेवा कुण्डशब्दार्थ इति नातिप्रसंगः ॥ प्रकृत्या भगालं ॥ भगालवाचकमुत्तरपदं तत्पुरुषे प्रकृतिस्वरं स्यात् कुम्भीभगा
लं कुम्भीनदालं कुम्भीकपालं लघावन्ते इति मध्योदात्ताः प्रकृत्येत्ययमधिकारोन्त इति यावत् ॥ शितेर्नित्याबह्वज्बहु
व्रीहावभसत् ॥ शितेः परं नित्याबह्वज्कं भसद्भिन्नं प्रकृतिस्वरं स्यात् पूर्वपदप्रकृतिस्वरस्यायमपवादः शितिपा
दः [illegible] शित्यंसः पादशब्दो वृषादित्वादाद्युदात्तः शितेः किं दर्शपादः अबह्वच् किं शिति
ललाटः नित्येति किं शितिककुत् ककुदस्यावस्थायामिति लोपस्य बहुच्त्वव्यभिचारेपि तदभावे बह्वच्त्वात् अ
भसत् किं शितिभसत् शितिराद्युदात्तः ॥ इति श्रीसिद्धान्तसुधानिधौ षष्ठस्य द्वितीये प्रथममाह्निकम् ॥ गतिकार

सि॰
ष॰
९७

67

कोपपदात्कृत् ॥ गतेः कारकात् उपपदाच्च परं कृदंतं प्रकृतिस्वरं स्यात् तत्पुरुषे संनिहितस्यापि वडवी हाविमस्यने ह्या
त्वहानिरस्यारितमात्तप्रकारकः प्रहरणं कुगतिप्रादय इति समासः इध्मव्रश्चनः पलाशशातनः कृद्योगे कर्मषष्ठ्या समा
सः उच्चैःकारं ईषत्करः प्रव्यपेयपाभिप्रेनेति णमुल् ईषद्दुःसुषु इति खल् उपपदमतिङ् इति समासः एतेभ्यः किं शेषषष्ठ्यास्तत्पु
रुषे माभूत् देवदत्तकारकं कृतकाम्याकर्नेरीति कारकषष्ठ्या समासनिषेधादिह शेषविवक्षायां षष्ठी ततः समासः एवंपर
मकारकमित्यपि प्रत्युदाहार्यं नच कारके कारकव्यपदेशाभावात्कारकशब्दस्यापि कारकवाचित्वान्न हि शेषणस्य परमशब्दस्या
पि कारकत्वमस्त्येवं यथा कटंकरोति भीष्ममुदारमित्यादौ भीष्मादीनां तथा च परमशब्दात्परस्य कृदंतस्य कारकपदस्याकृत्स्वरो
दुर्वार इति चेन्न उक्तकारकशक्तेर्विभक्त्यादिमात्रप्रतिपाद्यतया कारकादिशब्दानां तदनभिधायकत्वात् तदुक्तं स्वशब्दैरभिधा
नेत्वसमर्थानाभिधीयते विभक्त्यादिभिरेवासावुपकारः प्रतीयते कारकसंप्रदानादिशब्दानां प्रसत्वभूतकारकशक्तिप्रतिपादना
सामर्थ्यं नास्ति घटमित्यादौ द्वितीयार्थकारकस्य कारकांतरानावेशात् कारकादिपदार्थस्य तु कारकं कारकेणेत्यादौ तदावेशात्
इत्यादि प्रत्ननभिहितसूत्रपद्वोक्तं ॥ प्रकृते तु परमशब्देन क्रियाया विशेषणं येन कर्मकारकत्वमाशंक्येत किंतु कर्तो
क्रियाविशिष्टद्रव्यवाचकतया कर्तरि क्त एव सामानाधिकरण्यनिबंधनः समास इति नात्रोक्तस्वरप्रसंगः । अत्र
वार्तिके गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यमन्यस्याभावात् अस्यार्थः क्रियायोगं विना गतिकारका
संज्ञे क्रियावचनमात्रस्यार्थः यावत्प्रकृतिकः प्रत्ययो द्विविध एव तिङ् कृद्भेदात् न च गतिकारकनिष्ठत्वेप

दत्वनिरूपितोत्तरपदत्वशालिनस्तिङः प्रत्ययस्यासंभवात्कृदे

व गृह्यते एवमुपपदेपि योज्यं

॥

मादिङ्लुङित्यादौ तत्रोपपदं सप्तमीस्थमिति माङो दैरुपपदत्वेपि तिङन्तेन समासाभावात् उपपदमतिङिति सूत्रकेः उमरपदादेश्च स
मासमात्रविषयकत्वात् निक्षेत्रविरित्यादौ तु निसोगतित्वं क्रमणक्रियापेक्षं न तूत्तरपदापेक्षं तस्य क्रियानभिधायित्वादिति न
तत्र प्रसंगः ननु यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति यां प्रत्येव गतिसंज्ञा न तत्कृदन्तं प्रति तथा च प्रणीः उ
न्नीरित्यादावेव स्यादानो रुत्तरपदत्वात् तत्र णायक उन्नायक इत्यादौ कृद्ग्रहणे तु कृदपि कस्यापि ग्रहणात्तद्दोषः मैवं यत्क्रिये
त्यत्र हि कर्मधारयो न तु षष्ठीसमासः तेन क्रियायुपमर्थं प्रति गत्यादिसंज्ञा केवलायाश्च क्रियाया व्यवहारानङ्गत्वात्सामर्थ्या
द्धस्त्वतरसंसृष्टक्रियावाचिनः कृदन्तस्योपादाने केवलक्रियावाचिनः शाहस्याः प्रसिद्धेः प्रधानेभूत क्रियावाचिनां तिङन्तानां
वोक्तरीत्या वा हृतेः क्रियाविशिष्टसाधनवाचिनां कृदन्तानामेव ग्रहणपर्यवसानात् प्रणीरित्यादौ कृत्प्रत्ययलोपेपि क्रिया
विशिष्टसाधनवाचित्वसाम्यात् न च प्रभवनमित्यत्र स्तुदोभावेविधानां केवलक्रियावचनत्वेन तत्रापि भोक्तुं पाक इत्यादौ क्रि
योपपदाश्रयप्रत्ययानुरोधेनासत्वभूतालिङ्गसंख्यान्वयानुरोधेन सत्वभूतावक्रियागम्यत इति केवलक्रियानभिधानात्
किंच कृदित्युक्तेप्रपवतितरामित्यादावव्याप्तिः इह त्वामन्तस्य प्रशब्देन समासः गतिकारकोपपदानामित्यस्य गत्यादीनां कृ
द्भिः समासः सत्युत्पत्तेः सुब्भवतीत्यर्थकतया कृद्भिरेव समास इत्येवं परत्वाभावात् तद्धितान्तानां तु व्यस्तौ समासप्रहृत्तौ बाध
काभावात् न च कृद्ग्रहणपरित्यागेपि कथमत्रोक्तस्वरप्रवृत्तिः संख्याकालसाधनोपग्रहविशिष्टक्रियाभिधायकतया क्रिया
मात्रानभिधायकत्वादिति वाच्यं अकसामर्थ्याजदापि केष्वपि प्रवृत्तेः तस्मात्कृद्ग्रहणं प्रत्याख्यातं ॥ उभे वनस्पत्यादिषु युगपत् ॥
पश्चपूर्वपदमुत्तरपदं च युगपत्प्रकृतिस्वरं स्यात् वनस्पतिं वनस्पतेह हच्छ्होतोदात्तः इंद्रकत्वं हि तेह हत्विन्यासैत त्यापाठा
त् केचित्तत्रहहच्छहस्याद्युदात्तत्वं निपात्यते हहस्पतिं यज्ञ्यायत्वरोधादिमाऊः हर्षयाशचीपति शाङ्ग स्वादिमान्डीति प्राग्
दात्तः शचीभिर्न इत्यादिदर्शनादित्येके कृदिकारादिति ङीष्यंतोदात्त इत्यत्ये तनूशब्दो तोदात्तः तपादित्यसनधारत्नपादित्यादा

सि॰
घ॰
६८

वाद्युदात्तनिपातः तत्र शाहस्पात्राद्युदात्तत्वं निपात्यते तत्र तनप्ता उच्यते गर्भस्रावस्य रक्षत्पायत्नुशोषात् नराशंसे शंसेतीति नराशंसः
त्तनपे ऋदीर्घत्वं तत्त्वादाद्युदात्तः शेषोपि तथा चर्मतत्त्वात् निपातनाद्दीर्घः शुनःशेफः उभावाद्युदात्तौ शेउमकौ चर्मतौ अ
न्येषामपीति दीर्घः ॥ देवताद्वन्द्वे च ॥ पदद्वयेऽपुगपत्प्रकृत्या स्यात् आयंद्रावरुणौ इन्द्राबृहस्पतीवयं इन्द्रशब्दो रन्ध्रेस्त्वादुहण
शब्दउत्तरत्वादाद्युदात्तः देवतेति किं प्लक्षन्यग्रोधौ द्वंद्वे किं अग्निष्टोमः ॥ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥ पृथि
व्यादिभिन्नेऽनुदात्तादावुत्तरपदे पूर्वोक्तं न स्यात् इन्द्राग्नी अग्निशब्दो न्तोदात्तः शेषनिघातादनुदात्तादिः अपृथिव्यादौ किं द्यावापृथि
वीजनयन् दिवोद्यावेत्यत्र निपातनादाद्युदात्तो द्यावाशब्दः सोमारुद्रौ इन्द्रापूषणौ शुक्रामन्थिनौ पृथिवीति ङीषन्तत्वादन्तोदा
त्तः सोमो मन्नन्तत्वादाद्युदात्तः रुद्रो रगन्तत्वादन्तोदात्तः पूषापि तथा श्वन्नुक्षन्निति निपातनात् उत्तरपदग्रहणमनुदात्तादावित्य
स्योत्तरपदविशेषणत्वलाभार्थं अन्यथा द्वंद्वस्यैव तद्विशेषणं स्यात् अनुदात्तादाविति विधिनिषेधयोर्विषयविभागार्थम् न
त्वपृथिव्यादीनां हलादित्वादनुदात्तादित्वाभावादेव स्वरप्रसक्त्यभावेन पृथगुपादानस्य वैयर्थ्यं स्वरविधौ व्यञ्जनमविद्यमानवदिति ज्ञापनार्थत्वा
त् अपं विनैवैतत्सिद्धेः ॥ अन्तः ॥ अधिकारोयमापादसमाप्तेः ननत्र समासस्यान्तोदात्तत्वे उत्तरपदस्य उभयोरपि प्रकृतत्वाद्ग्रहण
संभवेन संदेहोपपत्तेः नाद्यः बहुव्रीहाविदमेत नञ्सुभ्यः अथमहरणायोः क्रियागुणानेकत्वनेन समासोन्तस्य उदात्तत्वमित्य
र्थे इदं प्रथमकारस्यात्रकस्योदात्तप्रसंगात् मकारोदात्तनायाश्च तत्रेष्टत्वात् नान्तः नञ्सुभ्यामित्यनेनोत्तरपदस्यान्तो
दात्तत्वमित्यर्थे अन्त्यावेदकूव इत्यादौ समासान्तस्याकारस्योदात्तत्वानुपपत्तेः समासावयवत्वादकारस्योत्तरपदा॰
नवयवत्वात् किंच अन्तक इत्यादौ कप उदात्तत्वेन स्यात् तस्य समासावयवत्वात् उत्तरपदान्तोदात्तत्वविधानेन च श
ब्दाकारस्यैवोदात्तत्वप्रसंगात् न चात्र कापि पूर्वमित्यस्य प्रवृत्तिः कृत्स्वान्तत्वात्पूर्वमित्यनेन बाधात् ननु यवका॰
इत्यादावेव तस्य प्रवृत्तिः ननु अन्तक इत्यादौ उत्तरपदे त्वात्पूर्वस्योदात्तभावि ॥ ॥

68

चो

नोवाध्यउत्तरपदस्यान्तशाहसैकान्तत्वात् तथाचकपिहर्वेमित्यस्यप्रवृत्तिर्निर्वाधाअपवादप्रहस्याभावेउत्सर्गप्रवृत्तिर्नैत्यस्यउर्वे
टत्वात् मैवं क्रस्वजातेराश्रयणादेकाचःकोत्तरपदस्यलेपितद्वाधात् अतएवहलादिःशेषइत्यासावभ्यासजातेराश्रयणादाट
नरित्यादौ आदेर्हलोवाधेपुत्तरस्यहलोनिवृत्तिरितिसिद्धान्तः यद्वाकपिहर्वेमित्यस्मान्सर्वग्रहणान्नुहत्वावपिक्रस्वांतइत्यत्र
सर्वग्रहणंनियमार्थं क्रस्वांतेमाद्यावेववसर्वेसदातेननुकपिहर्वेमिति॥ कपिहर्वेमित्यारंभसामर्थ्यान्नञ् सुभ्यामित्यत्रोत्तरप
दस्यकार्यत्वंद्योतीतिज्ञापितत्वात्॥ अत्रोच्यते नञ्सुभ्यामित्यत्रसमासस्य इदमेनत्रअ इत्यत्रवोत्तरपदस्योंतउदात्तइतिव्याख्या
नात् उभयस्यप्रकृतत्वाद्यथेष्टंसंबंधात्॥ थाथाद्यञ्क्ताजवित्रकाणां॥ एतदन्यतमांतानांगतिकारकोपपदात्परतमान्येषामेव
उदात्तःस्यात् प्रवसथः प्रवेशन्येतिचथन् आवसथः उपसर्गा हसेरित्यथप्रत्ययः प्रभेदःकाष्ठभेदः घञ्तोमज्जीप्रकृष्टतः प्रकृ
ष्टप्रदेशोष्टस्तत इतिविग्रहः तृतीयासमासेतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरप्रसंगात् प्रत्ययःपरजित्यवृप्रलवः कदो
त्रिमप्र प्रलवित्रं अर्तीत्यादिनाइत्रः गोहृषः मूलविभुजादित्वात्कः गत्यादिकिं सुत्ततेभवता। स्वः हृजायामितिकर्मप्रव
चनीयत्वं प्रकृष्टोलवः प्रलवः लवनक्रियानिरूपितेनात्रगतित्वं॥ सूपमानात्क्तः॥ सोरुपमानाच्चपरंक्तांतमन्तोदात्तंस्यात्
सुकृते शशाप्लुते प्रायेगतिरनंतरइत्यस्यद्वितीयेचतृतीयाकर्मणीत्यस्यचाभावारंभः गतिकारकोपपदादित्येव नेह सुष्ठु
तेभवता॥ संज्ञायामनाचितादीनां॥ गतिकारकोपपदात्परं आचितादिभिन्नंसंज्ञाभूतंक्तांतमन्तोदात्तंस्यात् उपहृतःशाकलः
गतिरनंतरइत्यस्यवाधः पत्नुःखातानदीतृतीयाकर्मणीत्यस्यवाधः अनाचितादीनांकिं आचितंपर्याचितं आस्थापितं परिगृ
हीतंनिरुक्तं प्रतिपन्नं अपश्लिष्टंप्रश्लिष्टं उपहूते गतिरनंतरइतिपूर्वपदप्रकृतिस्वरत्वं संहिता अयाविशतिगणसूत्रं संहिता
शब्दोगोभिन्नस्यसंज्ञात्वेत्तदान्तोदात्तः गोसंज्ञात्वेतदन्तोदात्तइत्यर्थः॥ प्रवृद्धादीनांच॥ एषांक्तांतमुत्तरपदमन्तोदात्तं असंज्ञा
र्थआरंभः प्रवृद्धंयानं प्रयुक्ते वृषलः प्राकर्षे प्रवहितः अवहितोभारेषु खट्वारूढःकपिलकृतः प्रतकृतसमतेवासेदियं प्र

३३

प्र

नर्निकृतः। आकृतिगणोऽयं यानादिनिर्देशो विषयनियमार्थ इति केचित्। अन्ये तु प्रयोगदर्शनमात्रेण तन्न। तेनान्यत्राप्यंतोदात्तत्वमित्या
हुः॥ कारकाद्दत्तश्रुतयोरेवाशिषि॥ आशिषाद्विस्वरेण सिद्धे नियमार्थोऽयमारंभः। आशिषि विषये संज्ञायां कारकात्परयोर्दत्तश्रुत
योरेव क्तांतयोरंतोदात्तत्वं स्यात्। देवा एनं देयासुर्देवदत्तः। विष्णुश्रुतः। कारकात्किं। संभूतो रामायणः। दत्तश्रुतयोः किं। देवपा
लितः। संज्ञायामनाचितादीनामित्यस्यापि नेह प्रवृत्तिरेतन्नियमान्निरोधात्। आशिषि किं। देवैः खाता देवखाता। आशिष्येव का
रकाद्दत्तश्रुतयोरित्यपि नियमोऽत्र व्याख्येयः। तेनेह न। अनोहतो नदति देवदत्तः। शंखविशेषस्येयं संज्ञा। तृतीयाकर्मणीति पूर्व
पदप्रकृतिस्वरत्वं॥ इत्थंभूतेन कृतमिति च॥ विकारापन्नेन कृतमित्यस्मिन्नर्थे यः समासस्तत्र क्तांते उत्तरपदेऽन्तोदात्तं स्यात्
उन्मत्तप्रलपितं प्रमत्तगीतं। तृतीयाकर्मणीत्यस्यापवादोऽयं॥ अनो भावकर्मवचनः॥ भावे कर्मणि च योऽनप्रत्ययस्तदंते का
रकात्परेऽन्तोदात्तं स्यात्। पयःपानं सुखं। राजभोजनाः शालयः। भावेत्यादि किं। दंतधावनं काष्ठं। करणे ल्युट्। अनः किं। हस्तदा
यः। भावे घञ्। कारकात्किं। निदर्शनं। पूर्वपदकृत्स्वरः॥ मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः॥ उत्तरपदानामेषा
मन्तोदात्तानि स्युः। रथवर्त्म। पाणिनिकृतिः। छंदोव्याख्यानं। राजशयनं। राजासनं। अश्वस्थानं। ब्राह्मणयाजकः। याजकादिभिश्चेत्य
त्रैन उक्ताः। गोक्रीतः। कृत्स्वरापवादोऽयं। कारकात्किं। प्रहृतिः। अवनादौ च नितौ निकृत्स्वरः॥ सप्तम्याः पुण्यं॥ अंतोदात्तं स्यात्। वेदे
न पुण्यं वेदपुण्यं। तत्पुरुषे तुल्यार्थेत्यादिना प्राप्तस्य सप्तमीपूर्वपदप्रकृतिस्वरस्यापवादः। सप्तम्याः किं। वेदेन पुण्यं वेदपुण्यं॥
ऊनार्थकलहं तृतीयायाः॥ तृतीयांतात्परे एते अंतोदात्ताः स्युः। माषोनं कार्षापणविकलं। तत्पुरुषे तुल्यार्थेति तृतीयापूर्व
पदप्रकृतिस्वरापवादोऽयं। अर्थग्रहणं स्वरूपग्रहणमिति केचित्। धान्यार्थः॥ मिश्रं चानुपसर्गमसंधौ॥ तृतीयांतात्परं अनुपस
र्गं मिश्रं उत्तरपदमन्तोदात्तं स्यात्। तिलसंयोगगुडमिश्राः। अनुपेति किं। गुडसंमिश्राः। असंधावित्यादेव ज्ञापकान्मिश्रग्रह
णे सोपसर्गग्रहणमित्युक्तं। असंधौ किं। ब्राह्म ॥ ॥ ॥

ग्णमित्रो राजा नैः सहसंवद्ध इत्यर्थः पणं वेयेनैकार्थ्यं संपिबिति केचित् गृह्यमाणविशेषाभावात् समतिरित्यन्ये ॥ नञो गुणप्रतिषे
धे संपाद्यर्हहितालमर्थास्तद्धिताः ॥ संपादीत्याद्यर्थकायेन तद्धितास्तदन्तानि नञः पराणि गुणप्रतिषेधवाचीभ्यश्च पदान्यन्तोदात्ता
नि स्युः गुणप्रतिषेधप्रतात्पर्येका नञः पराणीति किं कर्णः अकार्णवेष्टकिकं मृदवेकर्णवेष्टकाभ्यां संपादिकार्णवेष्टकिकं संपा
दिनीति ठञ् ततो नञ्समासः अच्छैदिकः छेदमर्हतीति छैदिकः छेदादिभ्यो नित्यमिति ठक् अवत्सीयः वत्सेभ्यो हितो वत्सीयः
असांतापिकः संतापाय प्रभवति सांतापिकः तदस्मै प्रभवति संतापादिभ्य इति ठञ् गुणप्रतिषेधे किं गार्दभरथमर्हति गा
र्दभरथिकस्तस्मादन्यो अगार्दभरथिकः संपादीत्यादि किं अपाणिनीयः ॥ ययतोश्चातदर्थे ॥ तद्धितौ यौ ययतौ तदन्तस्य गुण
प्रतिषेधार्थात् नञः परयोः अन्तउदात्तः स्यात् पाशानां समूहः पाश्या पाशादिभ्यो य इति यः न पाश्या अपाश्या दन्ते भवो दन्त्यः शरीरा
वयवाद्यत् अदन्त्यः अतदर्थे किं अपाद्यं पादार्घाभ्यां वारिणीति तादर्थ्ये यत् तद्धितेति किं अदेयं अचो यत् तदन्तग्रह
णपरिभाषयानेह अवामदेव्यं गुणप्रतिषेधे किं दन्त्यादन्यददन्त्यं ॥ अच्कावशक्तौ ॥ अजन्तौ कौ तदन्तस्य नञः परमन्तोदात्तं अशक्तौ ग
म्यायाम् अपचः पचाद्यच् अविलिखः इगुपधलक्षणः कः पक्तुं विलिखितुं वाशक्त इत्यर्थः अशक्तौ किं अपचो दीक्षितः गुणप्रति
षेध इत्येव नेह अपचः पचादन्य इत्यर्थः ॥ आक्रोशे च ॥ नञः परावच्कौ अन्तोदात्तौ संज्ञायामाक्रोशे अपचो जाल्मः अविलि
पः पक्तुं विलेखितुं वा न शक्त इति निन्दा ॥ ॥ संज्ञायां ॥ आक्रोशे नञः परं पदं संज्ञायां वर्तमानमन्तोदात्तं स्यात् अदेवदत्तः शक्ता
वच्छेदकसमानाधिकरण्यमस्यान्न निन्दा ॥ कृत्योकेष्णुच्चार्वादयश्च ॥ नञः परा एतदन्ता अन्तोदात्ताः स्युः अकर्तव्यं अगा
मुकः अनलंकरिष्णुः अचारुः चारु साधु यौधिक अनंगमेजय एते अन्तोदात्ताः वदान्यः अकस्मात् अनकस्मादित्यन्तोदात्तः व
र्तमान वर्धमान त्वरमाण ध्रियमाण रोचमान शोभमान एते संज्ञायां विकारसदृशे व्यस्तसमस्ते अविकारः असदृशः अ
विकारसदृशः गृहपति इति चार्वादिः तत्पुरुषे तुल्यार्थेत्यव्ययपूर्वपदप्रकृतिस्वरस्यायमपवादः ॥ राजाह्नोश्छन्दसि ॥

अनंगमेजय नञ्समाते

प्रवाजा प्रनद्धः भाषायां त्वव्ययस्वरेणाद्युदात्तत्वं ॥ विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ तृन्नन्तादयश्चनञः परेंतोदात्ता वा स्युः अ
कर्ता अनन्नं अतीक्ष्णं अशुचिः पक्षेऽव्ययस्वरेणाद्युदात्ताः ॥ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ इदमादि
भ्यः परस्य पूरणप्रत्ययांतस्य प्रथमशब्दस्य चांतउदात्तः स्याद्बहुव्रीहौ इदं प्रथमं यस्य स इदंप्रथमः एतद्द्वितीयः तत्पंचमः
गमनादिक्रियागणनमेतत् बहुव्रीहौ किं अनेन प्रथमः इदंप्रथमः तृतीयेति योगविभागात्समासः इदमादिभ्यः किं यत्प्रथमः
प्रथमेत्यादि किं तानि बहून्यस्य तद्बहुः क्रियागणने किं अयं प्रथमः प्रधानमेषां त इदंप्रथमाः द्रव्यगणनमेतत् उत्तरपदस्या
न्तकार्यित्वात् इदंप्रथमकाः इत्यत्र नास्य प्रकृतिः कपः समुदायावयवत्वात् तेन कपि पूर्वमिति मकारोकारउदात्तः वने समासस्य
स्मात्स्वमबहुव्रीहावित्यधिकारः ॥ संख्यायाः स्तनः ॥ संख्यायाः परः स्तनशब्दोंतोदात्तो बहुव्रीहौ द्विस्तना संख्यायाः किं दर्शनी
यस्तना स्तनः किं द्विशिराः ॥ विभाषा छंदसि ॥ संख्यापरः स्तनोंतोदात्तः द्विस्तनी कुर्याद्वामदेवः पक्षे बहुव्रीहिस्वरेणाद्युदात्तः
॥ संज्ञायां मित्राजिनयोः ॥ मित्राजिने उत्तरपदे बहुव्रीहावंतउदात्तः संज्ञायां देवमित्रः कृष्णाजिनः मित्रोत्तरपदस्य ऋषिवाचि
नः प्रतिषेधो वक्तव्यः विश्वामित्रऋषिः मित्रे चर्षाविति दीर्घः बहुव्रीहौ विश्वसंज्ञायामिति वा पित्वापरत्वादनेनांतोदात्तत्वप्रा
प्तौ वार्तिकारंभः तथा च प्रकृतसूत्रस्य प्रवृत्त्यभावे बहुव्रीहौ विश्वमित्यनेन पूर्वपदांतोदात्तत्वं ॥ व्यवायिनोंत
रं ॥ व्यवधायकवाचिनः परोंतरशब्दो बहुव्रीहावंतोदात्तः स्यात् कुड्यमंतरं व्यवधायकं यस्यासौ कुड्या
ड्यांतरः व्यवायिनः किं आत्मा स्वभावोंतरं भिन्नो यस्य आत्मांतरः अंतरे किं कुड्यास्तनः बहुव्रीहौ किं कुड्य
स्यांतरं कुड्यांतरं ॥ ॥ मुखं स्वांगं ॥ ॥ बहुव्रीहावुत्तरपदं स्वांगवाचि मुखमंतोदात्तं स्यात् गौरमु
खः स्वांगं किं दीर्घमुखा शाला बहुव्रीहौ किं चैत्रमुखं ॥ नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्से
भ्यः ॥ उक्तविषये मु

ते चैवं ऽन्तोदात्तेन स्यात् उच्चैर्मुखः आङ्ग्मुखः गोमुखः महामुखः स्थूलमुखः मुष्टिमुखः पृथुमुखः वत्समुखः अत्र बहुव्रीहावि
ति पूर्वपदप्रकृतिस्वरः ॥ निष्ठोपमानादन्यतरस्याम् ॥ निष्ठान्तादुपमानाच्च परं मुखमन्तोदात्तं बहुव्रीहौ प्रक्षालितमुखः पक्षे पूर्वे
पदप्रकृतिस्वरेण पूर्वपदान्तोदात्तत्वं निष्ठोपसर्गादि ति प्रक्षालितशब्दस्यान्तोदात्तत्वात् तस्यापि वैकल्पिकत्वान्निष्ठायां गतिरनन्त
र इति स्वरेण प्रशब्द उदात्तः उपमानाद्व्याघ्रमुखः ॥ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ॥ आच्छा
दनभिन्नार्थकाज्जात्यादित्रयात्परमन्तमवाचकान्यत्कृतमितप्रतिपन्नेभ्यः क्तान्तमन्तोदात्तं बहुव्रीहौ सारङ्गजग्धः मासजातः सुख
जातः सुखदुःख तृप्तेति सुखादिः अनाच्छादनात् किं वस्त्रच्छन्नः अकृतेत्यादि किं कुण्डकृतः कुण्डमितः कुण्डप्रतिपन्नः असा
देवलिङ्गान्निष्ठान्तस्य परनिपातः ॥ वा जाते ॥ जात्यादिभ्यो जातशब्दान्तो बहुव्रीहिरन्तोदात्तो वा स्यात् दन्तजातः मासजातः
सुखजातः ॥ नञ्सुभ्याम् ॥ आभ्यां परमुत्तरपदमन्तोदात्तं बहुव्रीहौ अमाषो देशः सुव्रीहिः ॥ कपि पूर्वम् ॥ नञ्सुभ्यां परे कपः
पूर्वपदमन्तोदात्तं बहुव्रीहौ अकुमारीको देशः सुकुमारीकः ॥ ह्रस्वान्तेऽन्त्यात्पूर्वम् ॥ नञ्सुभ्यां परे ह्रस्वान्ते उत्तरपदे ऽन्त्यात्
पूर्वमुदात्तं कपि परे अयवकः सुयवकः यकाराकार उदात्तः पूर्वयोगापवादोऽयं तेन पूर्वस्य दीर्घोत्तरपदविषयकत्वमेका
न्तोत्तरपदविषयकत्वेन अर्थात्सिद्धे पूर्वशब्दस्य ग्रहणरूपादाने प्रत्ययविभेदेन नियमार्थं ह्रस्वान्तेऽन्त्यादावेव पूर्वमुदात्तं न क
पि पूर्वमिति नियमार्थः तेन अवत्तकः सुवत्तक इत्यादौ कवर्णमेवान्तोदात्तं ॥ बहोर्नञ्वदुत्तरपदभूम्नि ॥ उत्तरपदार्थबहुत्वा
भिधायिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् बहुव्रीहौ नञ्सुभ्यां कपि पूर्वं ह्रस्वान्तेऽन्त्यात्पूर्वं नञो जरमरमित्रमृता इति
सूत्रचतुष्टयोक्तस्वरस्यायमतिदेशः बहुमाषो देशः बहुकुमारीकः बहुव्रीहिकः बहुजरः उत्तरेत्यादि किं बहुषु मानोऽस्य
बहुमानः ननु नञ्सु बहुभ्य उत्तरपदभूम्नि इत्येव सूत्र्यतां सामर्थ्यादुत्तरपदभूम्नीत्यस्य बहुशब्दमात्रपरतोपपत्तेः नञ्सोरुत्तर
पदबहुत्ववाचकत्वाभावात् यत्नेन नञ्गणादयो व्यवाऽन्यस्यापि बहुशब्दमात्रविषयकत्वं व्याख्याने उत्तरपदबहुत्वग्रहणेऽर्थे

सगुणास्योविशेष्याः संतितिइतिव्याख्यानात् अगुणाइत्यादौ चतथाइदर्वचनात् सम्यक्प्रकरणेनञ्विहितस्यापि स्वरस्य सिद्ध्यर्थं नञ्व
दित्यतिदेशारंभात् तेन नञोजरमरेत्यादेरपि संग्रहः ॥ न गुणादयोऽवयवाः ॥ अवयववाचका बहुव्रीहौ परे गुणादयो नांतोदात्ता बहु
व्रीहौ बहुगुणा रज्जुः बह्वक्षरं बहुच्छंदः बहुसूक्तः बह्वध्यायः आकृतिगणोयं अवयवाः किं बहुगुणो ब्राह्मणः ॥ उपसर्गा
त्स्वांगं ध्रुवमपर्शु ॥ उपसर्गात्परं ध्रुवमेकरूपं यत्स्वांगं तदंतोदात्तं बहुव्रीहौ प्रपृष्ठः प्रललाटः आजीवनं यदेकरूपं तद्ध्रुवमित्यु
च्यते प्रसृत्वेपि त्वनायनेनेनेवांतोदात्तत्वेपरत्वात् नञ्सुभ्यामिति स्वांगमित्यस्य नाद्यदिक्शब्देत्यादिना प्रतिषेधात्कथं विप्रतिषेध इ
तिवाच्यं नसुभ्यां स्वांगमित्यस्य ह्यायमपवादो नाद्यचेत्यादिः उपसर्गात्स्वांगमित्यादिश्च तत्रापवादविप्रतिषेधादसौ च प्रवर्त्तिरिति भा
ष्याभिप्रायात् उपसर्गात्किं दर्शनीयपृष्ठः ध्रुवं किं उद्बाहुः वाहोः सर्वदा ऊर्द्ध्वदिगवस्थानाभावादध्रुवत्वं अपर्शु किं उपर्शुः बहु
व्रीहावित्यधिकारः समाप्तः ॥ वनं समासे ॥ उपसर्गात्परं उत्तरपदे वनमंतोदात्तं समासमात्रे प्रवणे यष्टव्यं निर्वणे प्रणिधी
यते ॥ अंतः ॥ अंतरित्यव्ययात्परं वनमंतोदात्तं अंतर्वणो देशः ॥ अंतश्च ॥ उपसर्गात्परोंतशब्द उदात्तः अंतः पर्यंतः ॥ न ने
र्विभाषा ॥ न्यंतः स्यंतः व्यंतः पूर्वपदप्रकृतिस्वरेणोदात्तत्वं तेनोयणादेशः उदात्तस्वरितयोर्यण इति स्वरितः ॥ परेरभितोभावि
मंडलं ॥ अभित उभयतो भावो वर्तनं स्यास्तु तदभितोभावि यथा कूलादि मंडलशब्देन समाहारे द्वंद्वः परेः परं कूलादि मंडलं चांतोदात्तं
परिकूलं परिमंडलं ॥ प्रादस्वांगं संज्ञायां ॥ प्रात्परं स्वांगं भिन्नमंतोदात्तं संज्ञायां प्रगृहं प्रकोष्ठं अस्वांगं किं प्रपदं ॥ निरुदकादी
नि च ॥ अंतोदात्तानि स्युः निरुदकं निरुपलं निर्मक्षिकं निर्मशकं निःकालकः निःकालिकः निष्पेषः निस्तरीपः निस्तरीकः
दुस्तरीपः तरीनावं पन्ति तरीपः निरजिनं उपाजिनं परिहस्तः परिपादः परिकेशः परिकर्षः आकृतिगणोयं ॥ अ
भेर्मुखं ॥ अंतोदात्तं स्यात् अभिमुखं उपसर्गात्स्वांगमिति सिद्धे अबहुव्रीह्यर्थमध्रुवार्थमस्वांगार्थं चायमारंभः ॥ अ
भिमुखा शाला ॥ अपाच्च ॥ अपमुखं योगविभाग उत्तरार्थः ॥ स्फिगपूतवीणांजोध्वकु

प्र॰

त्रिसीरनामनामच ॥ अपाच्छ्यशाणित्वट् स्फिगादीनि सीरार्थो नामवद्यन्तानोदात्तानि स्युः अपस्फिगं अपपूतं अपवीणं अपांजः
अपाध्वा समासांतविधेरनित्यत्वाड्उपसर्गाद्ध्वनइतिटज्भावः तत्सम्ब्रे विस्वरेणैव सिद्धेः अपकुक्षिः अपसीरं अपहलं अप
नामस्फिगादिष्ट्वतवीणाकुक्षीणामुपादानं अभेदस्वरेमिन्यर्थो प्रयोजनत्वपार्थम् ॥ अधेरुपरिस्थं ॥ अधेरुपरिस्थितवाच
कमंतोदात्तं स्यात् अधिदंतो दंतोऽधिदंतः दंतस्योपरिस्थितो दंत इत्यर्थः उपरिस्थं किं अधिकरणं गतिकारकोपपदादिति कृ
त्स्वरः ॥ अनोरप्रधानकनीयसी ॥ अनोः परमप्रधानवाचकं कनीयश्चांतोदात्तं स्यात् अनुगतो ज्येष्ठमनुज्येष्ठः पूर्वपदा
र्थप्रधानः समासः अनुगतः कनीयान् अनुकनीयान् उत्तरपदार्थप्रधानोयं अप्रे इति किं अनुगतो ज्येष्ठोनुज्येष्ठः ॥ पुरुषश्चा
न्वादिष्टः ॥ अनोः परः पुरुषोंतोदात्तोन्वकथितश्चेत् अन्वादिष्टः पुरुषोऽनुपुरुषः अन्वितिकिं अनुगतः पुरुषोनुपुरुषः
॥ अतेरकृत्पदे ॥ अतेः परमकृदंतं पदशब्दश्चांतोदात्तं स्यात् अत्यंकुशो नागः अतिपदा गायत्री अकृत्पदे किं अतिकारः अ
तेर्धातुलोपइति वक्तव्यं अकृदित्यपनीय धातुलोपइति पठनीयं अकृदित्युक्तेहि शोभनो गार्ग्य इत्यर्थे अतिगार्ग्य इत्यत्र
स्यात् अतिक्रांतः कारकं अत्यत्र च न स्यात् ॥ नेरनिधाने ॥ निधानमप्रकाशनं अनिधाने प्रकाशने नेः परं पदमंतोदात्तं प्र
काशनेर्थे निमूलं बहुव्रीहिस्तत्पुरुषो वा अव्ययीभावे समासस्वरेणैव सिद्धेः अनिधाने किं निवाक्निहितवागित्यर्थः ॥
प्रतेरंश्वादयस्तत्पुरुषे ॥ प्रतेः पराण्येतेंतोदात्ताः प्रतिगतोंशुः प्रत्यंशुः अंशु जन राजन् उष्ट्र खेटक आर्द्रा श्रवणा कृत्तिका
अर्द्ध पुर तत्पुरुषे किं प्रत्यंशुरुषः बहुव्रीहिः अत्र राजन् शब्दपाठोपि समासांतस्यानित्यत्वे लिंगं अन्यथा राजाहःसखि
भ्यष्टजिति टचो नित्यत्वे विस्वरेणैव सिद्धेः ॥ उपाद्द्व्यजजिनमगौरादयः ॥ उपात्परं द्व्यजकं अजिनं चांतोदात्तं तत्पुरुषे गौरादीन्व
र्जयित्वा उपदेवः उपेंद्रः उपाजिनं अगौरादयः किं उपगौरम् गौर तैष तैल लोट जिह्वा कृष्णा कन्या गुड कल्प पाद तत्पु
रुषे किं उपगतः सोमोस्य उपसोमः ॥ सोरवक्षेपणे ॥ निंदायां सोः परमंतोदात्तं तत्पुरुषे इह खल्विदानीमास्स स्थंडिले

सि॰
ष॰
७२

72

सुरवङ्गजायो वाक्यार्थत्वनिंदा असूयया ऽभिधानात् ॥ विभाषोत्पुच्छे ॥ उत्पुच्छस्यान्त उदात्तो वा स्यात् उत्क्रान्तः पुच्छाद् उत्पुच्छः य
दा तु पुच्छमुदस्यतीत्युत्पुच्छयते ततः पचाद्यच् उत्पुच्छः तदा थाथादिस्वरेण नित्यमन्तोदात्ते प्राप्ते विकल्पोऽयमित्युभयत्र विभाषेयं
तत्पुरुषे किं उदस्तं पुच्छं येन स उत्पुच्छः ॥ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥ आभ्यां परेष्वेषु अन्तोदात्तो वा स्यात् द्विपाद्वत्स्याव
स्थाय त्रिपाद्दः त्रिमूर्ध्नो ने समासरापिमरणोषे मूर्ध्न इत्यकृतसमासान्तस्य मूर्धशब्दस्य निर्देशः सच समासान्तो नाभावपक्षेऽपि
अन्तोदात्तार्थः अन्यथा अपक्रमानुरोधान्मूर्धशब्दस्यापि कृतसमासान्तस्यैव मूर्ध इति निर्देशं कुर्यात् इदमेव समासान्तविधेर
नित्यत्वे लिंगं द्विमूर्ध इत्यादौ द्वित्रिभ्यां षमूर्ध्न इति समासान्तपदेऽन्तोदात्तत्वं भवत्येव बहुव्रीहेरत्र कार्यित्वात् समासान्तस्य च त
दवयवत्वात् प्रपंचितं चैतद्हृद्दिकेत्ताहवे द्वित्रिभ्यां किं बहुष्यात् कल्याणमूर्धा बहुव्रीहौ किं द्वयोर्मूर्धा द्विमूर्धा ॥ सक्थं
चाक्रान्तात् ॥ क्रान्तशब्दभिन्नात्परं सक्थमन्तोदात्तं स्यात् गौरसक्थः श्लक्ष्णसक्थः ॥ अक्रान्तात् किं चक्रसक्थः षच् षित्वा
त्स्वरेणान्तोदात्तत्वे ॥ परादिश्छन्दसि बहुलं ॥ छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा स्यात् अञ्जिसक्थमालभेत अत्र वा
र्तिके परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं स्मृतः परादिर्यथा तुविजाता उरुक्षया उरू
णो वरुणो त्वये त्वयो निवास इत्याद्युदात्तः समासस्वरेण प्राप्तमन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं
प्राप्ते तस्य थाथादिस्वरेणापवादे प्राप्ते बाहुलकेनोत्तरपदाद्युदात्तत्वमापवमतेत्थितानो वाडलकादपि करणोपरजिति मा
पवेन स्वीकारात् तयथाहो वषप्रयोत इति ह्रस्वतादि मनेन त्व थाथादिस्वरस्यात्र प्रसक्त्यभावात् इति कारकोपपदादिति कृदुत्त
रपदप्रकृतिस्वरेणैव सिद्धे वोदयिश्री हूत्या नामितदुदाहार्यं सततराम्नतयत्यप्रियामिति सूत्रे ते प्रियं[illegible]कृतनय
विहातोऽइति चौरादिकात् क्विप् नजनतहननेचेति सूत्रेणे अयस्मयादीनीति भत्वात् नलोपाभावः परान्तो यथा नियेन मुष्टिहत्य
या मुष्टिहननं मुष्टिहत्या हन स्तचेति क्यप् कृदुत्तरपदप्रकृतिस्वरेणाद्युदात्ते प्राप्ते हन्याशब्दस्यान्तत्ववार्तिकेनान्तोदा

नत्वं सर्वतोयथायष्टिवक इति वा यथा वहुव्रीहाविति सर्वपदप्रकृतिस्वरप्रसंगात् सर्वतोयथा विश्वायुर्येहि विश्वमायुर्य
स्मिन्नयने इति बहुव्रीहिः विश्वेतिकखत्पयोंतत्वादाद्युदात्तः सर्वपदप्रकृतिस्वरोऽत्रप्राप्तः ॥ इति श्री सिद्धान्तसुधानिधौ षष्ठ
स्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकं पादश्चायं समाप्तः ॥ अलुगुत्तरपदे ॥ अलुगित्यानङः प्राक् उत्तरपदे इत्यापादसमा
प्तेरधिकारः तथाहि उत्तरपदेनेत्तरस्य नकारोतस्य प्रानङभावं अलुकितविभक्त्याव्यवधानेस्यात् नववचनसामर्थ्याद्व्य
वधानेपि भविष्यतीति वाच्यं तथापि विधेयांतरस्य मात्त्वादुपादाने प्रकरणोपात्तस्य विधेयस्यान्वयानर्हत्वात् समन्वयेच
मानाभावात् एवमंगाधिकारात्प्रागेवोत्तरपदाधिकारः प्रत्यये परतोंगसंज्ञाविधानादुत्तरपदे तदभावात् यद्यप्यत्र
व्याख्यानादेवाधिकाराव्यपि परिच्छेदस्तथाप्यत्र सामर्थ्यमपि संभवतीत्येवमुक्तं नन्वत्तरपदाधिकारो व्यर्थः लुकासमासे
विधानात्तदपवादस्याऽलुकोपि तत्रैव ग्रहणमुपपत्तेः समासाधिकाराद्धोत्तरपदलाभात् कार्यांतरविधानेपि वनेसमा
सस्यप्राप्तेः समासग्रहणानुवृत्त्योत्तरपदलाभादिति प्राप्ते उत्तरपदाधिकारस्य प्रयोजनमाह वार्तिककारः प्रयोजनं लो
कादिभ्यो लुग्वानङिःकोऽक्त्स्वनलोपा इति निःक्रान्तः लोकान्निर्लोक इत्यादौ पंचम्याः लोकादिभ्य इत्यलुक् नचात्रलोका
तिकेति प्रतिपदोक्तसमासोपादानादेव नातिप्रसंग इति वाच्यं प्रयोजनांतरानुरोधादुत्तरपदाधिकारावश्यकत्वे लक्षण
प्रतिपदोक्तपरिभाषाया अनाश्रयणात् होतापोत्रभ्यां इत्यादौ योत्रशब्दस्य नानङ् होतापोतारावित्यादौ द्वन्द्वपरत्वाद्ग्रहणेना
नङो वाधोपपत्तेः यद्दितविभक्त्यपेक्षत्वाद्ग्रहणो वहिरंगा आनङ् तत्तदनपेक्षत्वादंतरंग इत्युच्यते तदा तदपि उदाहरणी
यमिति कैयटः ग्रामणीरित्यादौ इकोऽक्त्स्व इति ह्रस्वो न समासाधिकारेणाप्यस्य दुर्वारत्वात् नतरागमनामित्यादौ नलोपो
नज इत्यस्य प्रवृत्तिः परमनेत्यत्र त्वनोक्ते प्रयोजने नाहत्त्वप्रयोगाभावात् एकवद्भावालुग्भवतीति वक्तव्यं लोकाभ्यानु
क्तः लोकेभ्यो मुक्त इत्यादौ विग्रहेपि समासे लोकान्मुक्त इत्येव यथा स्यादिति वचनारंभः अत्र भाष्ये अनभिधानादेवनाय

मतिप्रसंगः अन्यथा गोषुचरः वर्षाजः अप्सुयोनिः अप्सव्यः इत्यादावप्येकवद्भावप्रसंगात् ॥ पंचम्याः स्तोकादिभ्यः ॥ एभ्यः पंच
म्या अलुक् स्यादुत्तरपदे स्तोकान्मुक्तः अंतिकान्मुक्तः समीपान्मुक्तः दूरान्मुक्तः कृच्छ्रान्मुक्तः स्तोकांतिकदूरार्थेति समासः ब्राह्म
णाच्छंसिन उपसंख्यानं ब्राह्मणशब्द एवात्र तद्धितान्तः शस्त्रपर अप्रगीतमंत्रसाध्यानि गुणकथनानि शस्त्राणि तानि शंसतीति ब्रा
ह्मणाच्छंसी ऋत्विग्विशेषः द्वितीयार्थे पंचम्यपि उक्तवार्तिके अलुग्विधानसामर्थ्यात् यद्वा उपात्तविषयमेतदपादानं बलाह
काद्विद्योतत इतिवत् शंसतेराहरणविशिष्टशंसनपरत्वात् ब्राह्मणेभ्य आहृत्य शंसतीत्यर्थः ॥ ओजःसहोम्भस्तमसस्तृतीया
याः ॥ एभ्यः परस्यास्तृतीयाया अलुक् स्यात् ओजसाकृतं सहसाकृतमित्यादि सततनैशानमोहतमन्यत इत्यादौ भावे क्तः
नैशानस्य षष्ठीसमासः सततनैशानमोहतमेयत्रेति बहुव्रीहिः अञ्जस उपसंख्यानं अञ्जसाकृतं आर्जवेनेत्यर्थः पुंसानु
जोजनुषान्ध इति च वक्तव्यं यस्मादनुः पुमान्स पुंसानुजः जनुषान्धो जात्यन्धः ॥ मनसः संज्ञायां ॥ मनसागुप्ता ॥ आज्ञायिनि
च ॥ मनसस्तृतीयाया अलुक् मनसा आज्ञातुं शीलमस्य मनसाज्ञायी आत्मनश्च पूरणे उपसंख्यानं आत्मनापंचमः आत्मना
दशमः आत्मनश्चेति सूत्रे त्वनार्षे उपसंख्यानारंभादिति केचित् अन्ये त्वेवं सति उत्तरसूत्रे आत्मन इति न लभ्येत परस्येति सू
त्रे च वाच्यमेव स्यादित्याहुः तद्धितं आज्ञायिनि चेति सूत्रे उक्तोपसंख्यानस्य भाष्ये लिखितत्वात् न च तत्रात्मनश्चेति सूत्रानि
र्देश एव पूरण इत्येव वार्तिकशरीरमिति वाच्यं आज्ञायिनि चेति सूत्रोपन्यासवैयर्थ्यापत्तेः तत्र विशेषानंतरस्यानुक्तत्वात्
नापुत्तरसूत्रे इत्यादिदोषः वार्तिकोक्तस्यैवात्मन इत्यस्य तत्समर्पकत्वात् ये च तद्धिते इत्यत्र शीर्षन्नादेशविधौ वार्तिकस्यैव
शिरश्शब्दस्यान्वयदर्शनात् आत्मापंचमो यस्येति बहुव्रीहिः उपसंख्यानसामर्थ्यात् तृतीया यद्वा आत्मना कृतमस्य पंचमत्व
मित्यर्थः इत्थं वा तद्भूतक्रियापेक्षं कर्तृत्वं तद्द्वारकमेव सामर्थ्यं दध्योदनादिवत् जनार्दनस्त्वात्मचतुर्थ एवेत्यत्र तु बहुव्रीहिरि
तिभाष्यं एकस्यैवात्मनो बुद्धिकल्पितभेदमाश्रित्य वर्तिपदार्थत्वमन्यपदार्थत्वं चोपपाद्यं ॥ वैयाकरणाख्यायां चतुर्थ्याः ॥ आ

मतः परस्याः चतुर्थ्या अलुक् स्यात् ॥ परस्य च ॥ परशब्दस्य प्रत्ययत्वेन संबंधिन्याः चतुर्थ्या ङकविषये अलुक् स्यात् व्याकरणे
भवा वैयाकरणी आश्वलायनादिभ्य इत्यण् आख्याशब्दः संज्ञार्थः द्वयोः कर्मधारयः आत्मनेपदं परस्मैपदम् चतुर्थी नियोग
विभागान्न समासः आत्मनेभाषपरस्मैभाषयोरुपसंख्यानं तङानावात्मनेपदं लः परस्मैपदमिति वदनयोः संज्ञात्वेनाविति
योगादप्राप्तावारंभः यदि तु वैयाकरणशब्दो व्याकरणाध्येतृवेदितृपरः आख्याशब्देन षष्ठीसमासः तदा तु आत्मनेपदिनो
यातुनामात्मनेभाषशब्देन परस्मैपदिनां च परस्मैभाषशब्देन यातुपाठादौ व्यवहारात् सूत्रेणैव सिद्धं तस्मान्निपातनादेवात्मने
पदमित्यादावलुक्सिद्धेराख्याशब्देन व्यवहारप्रवग्राह्यः ॥ हलदंतात्सप्तम्याः संज्ञायां ॥ हलंतादंताच्च परस्याः सप्तम्या अ
लुक् संज्ञायां त्वचिसारः हृद्युभ्यां ङेरुपसंख्यानं हृदयं स्पृशतीति हृदिस्पृक् एवं दिविस्पृक् द्वितीयार्थे सप्तम्येषा अलुग्विधान
सामर्थ्यात् पद्दन्नोमास् इति सूत्रे हृदयस्य हृदादेशः दिविस्पृगिति तु भाष्यायामपि इति कैयटः गोरुपसंख्यानं गविष्ठिरः
गोशब्दस्य हलंतत्वाभावादप्राप्तावारंभः अथ ङेर्लुकं बाधित्वा परत्वादवादेशो हलंतत्वादेव सिद्धं न चावादेशो बहिरंगो लुगंत
रंगः अंतरंगानपि विधीन्बहिरंगोपि लुग्बाधत इति चोभयथापि विप्रतिषेधानुपपत्तिरिति वाच्यम् अंतरंगबहिरंगभावमनपे
क्ष्योक्तत्वात् अवादेशानंतरमलुक्प्रवृत्त्या लुकः संदिग्धत्वात्तद्बाधकत्वस्यापि तथात्वात् किंच व्यक्तिपक्षे लक्ष्यभेदेन लक्षणभेदात्
एतद्व्यक्तिविषयकलक्षणस्य चरितार्थत्वाद्गवि हलंतत्वाश्रयेण अलुकालुग्बाधादवादेशः उत जातिपक्षे हलंतजातीये सो
प्रतिके हलंते अन्यत्र चरितार्थस्य अलुकोनुपजातनिमित्ततया लुग्बाधकत्वानुपपत्त्या लुक्प्रवर्तताम् इति विप्रतिषेधोपपत्तिः
न चैवम् भूमिपाशादावतिप्रसंगः आमियणादेशे च कृते हलंतत्वादलुगापत्तेरिति वाच्यं सप्तम्याः संज्ञायामित्येव सूत्रं कृत्वा अ
कोऽनत इति सूत्रणीयत्वात् तत्र नियमार्थं अकोऽनत एवाऽलुक् नान्यस्मादिति तदर्थः एवं च भूमिपाशेनापत्तिः संयहत्तरांतेभ्यश्च
सप्तम्या इति सामान्यवचनेनैवाऽलुक्सिद्धेः मैवं सूत्रभेदापत्तेः तस्माद्गोरुपसंख्यानमेव युक्तमिति वार्त्तिकाभिप्रायः भाष्य

कारात्लुगविकृपिभ्यो॰स्थिरइतिषत्वविधौगवीतिनिपातनादेवालुक्सिद्धिरित्याहुः ॥ कारनाम्निचप्राचांहलादौ ॥ प्राचांदेशेयत्का
रनामतत्रहलादावुत्तरपदेहलदंतात्सप्तम्याअलुक्स्यात् कारःस्वामिग्राह्योभागः मुकुटेकार्षापणंदृषदिमाषकः अत्रसंज्ञाया
मित्यनुवृत्तौकेनचिदुत्यादिनस्यसांप्रतिकस्यकारस्यानुपादानान्नियतद्रव्यपरिमाणस्यरूढस्यकारस्यग्रहणमितिपूर्वेणानित्यम
लुकिप्राप्तेविभाषेयं तदनन्तुवृत्तौतुसांप्रतिककाराभिधायिन्यप्राप्तेस्यलुकोविभाषेयमितिपक्षः सूत्रस्थोनामशब्दश्चव्यपदेश
मात्रार्थः संज्ञायांचपूर्वविप्रतिषेधेनपूर्वेणानित्यो॰लुक् प्राच्येष्वविकटोरणइत्यत्रापूर्वसूत्रेणा॰लुक्प्रसंगः अवीनांसेवा
तो॰विकटः तत्रोरणोमेषइत्यर्थः कारविशेषेरूढोयं प्राचामित्याचार्यनिर्देशोविकल्पार्थः प्राग्देशेहलादौकारनाम्निनित्यम
लुक् देशान्तरेतुकारनाम्निलुगेव यूथपशुरित्यादौ अथवाप्राचांदेशेयत्कारनामतत्रहलादावुत्तरपदेअलुक् नतुदेशान्तरेयू
थपशुरित्यादावितिसामर्थ्याद्देशभेदेनतद्व्यवस्था यूथपशावादयउदग्देशेकाराः हलेद्विपदिकादयःप्राग्देशे अविकटोरणा
दयःप्राग्देशकेतिकैयटः तस्माद्द्वितीयपक्षएवज्यायान् नचप्रथमपक्षेसंज्ञायामितिसूत्रेणसमासो॰त्रतुतदनुपपत्तिरितिवाच्यं
अलुग्विधानादेवसमाससिद्धेः अन्यथातत्कःप्रसक्त्यभावात् अविकटोरणादयस्तत्स्वरूपेशाणादिवत्सांप्रतिकाःकाराइत्यभ्युपग
मात्तत्रपूर्वसूत्रप्रवृत्तिः नचैवमपितत्रकथंसमासइतिवाच्यं अजादिनिवृत्त्यर्थहलादिग्रहणसामर्थ्यादजादावपिसमा॰
सानुमानात् अन्यथाअजादौसमासाभावादेवालुगप्रवृत्तौहलादिपदवैयर्थ्यात् नत्वलुग्विधानसामर्थ्यात्समाससिद्धावपिन
सुरूपेतुल्यार्थेत्यादिनासप्तमीपूर्वपदप्रकृतिस्वरत्वंनस्यात् तत्रसप्तमीशब्दस्यवार्यविहितस्यैवसमासस्योपादानात् अन्य
थापरमकारकेइत्यादावतिप्रसंगात् संज्ञायामितिसमासेतुतत्रसप्तम्यनुवृत्तेः तत्स्वरप्रवृत्तिरितिचेन्न मैवं तथापिसप्तमी
हारिणौयर्थे॰हरणेइतिपूर्वपदाद्युदात्तत्वस्यदुर्वारत्वादिहस्वरस्यदुर्लभत्वात् तस्माद्यमत्रसिद्धान्तः संज्ञाग्रहणानुवृत्तौस्व
पेशाणादयोरूढा अन्यथातनेतितावहुविटं पकस्योभयरूपत्वविरोधात् चिरंतनानांसांप्रतिकानांवातेषांरूढत्वावश्यक

त्वात् अत एव संज्ञाग्रहणानुवृत्तिसन्देहनिवृत्त्यर्थं नाम्नीत्येतल्लंगच्छते प्राग्विभाषायास्तेन स्पष्टप्रतीतेः तेन नियमार्थे सू
त्रे प्राचामित्यस्य देशविशेषणत्वात् प्राचामेव कारनाम्नीत्येको नियमः प्राचां कारे हलादावेवेति द्वितीयः आद्येन उदीचां का
रस्याः विकटोरणोरित्यादेर्निवृत्तिः द्वितीयेन प्राचामपि कारस्यान्तस्येति न दोषः स्वरस्तु पूर्वपदाद्युदात्तत्वमेवेति सिद्धं ॥ मध्या
द्गुरौ ॥ मध्यात्परस्याः सप्तम्या अलुक् स्याद्गुरावुत्तरपदे मध्येगुरुः अन्ताच्चेति वक्तव्यं अन्तेगुरुः ॥ अमूर्द्धमस्तकात्स्वाङ्गादका
मे ॥ मूर्द्धमस्तकभिन्नात्स्वाङ्गात्सप्तम्या अलुक् स्यात्कामशब्दादन्यस्मिन्नुत्तरपदे कण्ठेकालः उरसिलोमा अमूर्द्धेत्यादि किं
मूर्द्धशिखः मस्तकशिखः अकामे किं मुखकामः ॥ बन्धे च विभाषा ॥ हलदन्तात्सप्तम्या वा अलुक् बन्धे उत्तरपदे हस्तेबन्धः ह
स्तबन्धः न त्वत्र स्वाङ्गग्रहणमनुवर्तते न वा नायं चक्रेबन्ध इत्यादेरसिद्धेः नोन्त्यः हस्तेबन्ध इत्यादेरसिद्धेः नेत्विद्ध्वभाति
क्षिति अलुको निषेधात् नैवं तत्र बभातीति याप्तमाचोपादाने तेन बक्रबन्धनमित्यादौ बभातिधातोः सर्वत्रोत्तरपदे
अलुक्प्रतिषेधः अत्र तत्पुरुषे तो बन्धशब्द इति तस्मिन्नलुग्विधानं इति विषयविभागस्य स्पष्टत्वात् स्वाङ्गादित्यस्यानुवृत्तेर
भावात् हलदन्तात्किं गुप्तिबन्धः ॥ तत्पुरुषे कृति बहुलं ॥ सप्तम्या अलुक् स्यात् स्तम्बेरमः कर्णेजपः क्वचिन्न कुरुचरः अ
कर्मधारयइति वक्तव्यं परमकारके वाङ्गलकलप्यार्थकथनं चैतत् अन्तरङ्गाहृदन्तवाच्यक्रियापातिमिता सप्तम्यत्र गम्यते न
तु निये ही त्यादिक्रियान्तरनिमित्ता वहिरङ्गत्वादिति समाधानाच्च न च वाङ्गलकमात्रेण सिद्धे लुगलुकोः प्रकरणं व्यर्थमिति
वाच्यं विषयविभागार्थं स्पष्टार्थत्वात् ॥ प्रावृट्शरत्कालदिवां जे ॥ प्रावृडादिभ्यः सप्तम्या अलुक् जे उत्तरपदे प्रावृषिजः शरदि
जः कालेजः दिविजः हर्व स्वप्रपञ्चोयं ॥ विभाषा वर्षक्षरशरवरात् ॥ एभ्यः सप्तम्या अलुग्वा जे परे वर्षेजः वर्षजः क्षरेजः क्ष
रजः शरेजः शरजः वरेजः वरजः ॥ घकालतनेषु कालनाम्नः ॥ सप्तम्या अलुग्वा पूर्वाह्णेतरे पूर्वाह्णतरे पूर्वाह्णतमे पूर्वा
ह्णेकाले पूर्वाह्णकाले पूर्वाह्णेतने पूर्वाह्णतने सर्वेतनाद्वितोत्यत्राविदं ज्ञापकमिति स्मर्तव्यं ॥ शयवासवासिष्वकालात् ॥ काल

पूर्वाह्णेतमे

भिन्नात्पूर्वपदात्परस्याः सप्तम्या अलुग्वा स्यादुत्तरपदे ॥ खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी ॥ अपो यो
नियन्मतुप्सूपसंख्यानं ॥ अप्शब्दात्सप्तम्या अलुग्योन्यादौ अप्सुयोनिर्वा अप्सुः अप्सुभवो ऽब्भवो वेतसः एवं साधर्थे तत्र साधुरिति
यदिति कैयटः अप्सुमन्तावाज्यभागौ अप्सुतेयोनिः अप्स्वग्ने सधिष्टवेति मंत्रस्य अप्सुपदमनुकरणत्वात् तस्यानुकार्याद्भिन्नत्वविवक्षा
यां अर्थवत्त्वेन प्रातिपदिकत्वात्प्रथमोत्पत्तौ तदंतान्मतुप् ॥ एतेन प्रकृतिवदनुकरणमित्यप्सुशब्दस्य प्रत्ययांतत्वात्प्रातिपद
कत्वानुपपत्त्या प्रथमाया अभावेन तदंताद्विहितस्य मतुपो ऽलभ्यत्वे अतिदेशाभावे तल्लुकु प्रसक्तिरेव नास्तीति दोषद्वयमपा
स्तं अतिदेशस्य वैकल्पिकत्वादुभयोपपत्तेः कार्यविशेषप्रकारेणानत्यस्यापि प्रहृत्योः स्वीकारात् अतिदेशस्य प्रमाणोच्चय
नदेतेभ्यः इदमेतत्त्वद्य इत्यादिनिर्देशाद् उक्तवार्तिकं चेति बोध्यं एतेन अप्सुदसप्तम्ययगोचरयो रिति भगवत्पाद प्रयोगो
पिव्याख्यातः प्रोच्चस्तु मत्वस्थाने मतिक्षितिपठित्वा अप्सुमतिरित्युदाजह्रुः तन्न आकरविरोधात् एतेनयच्छब्दस्थाने ज
शब्दपाठोपि निरस्तः अप्सुज इत्यस्य हलदंतादित्यनेनैव सिद्धेश्च वस्तुतस्तु मतिक्षितिपाठो युक्त एव अलुगुत्तरपदे इति
सूत्रेतथैव पठित्वा अप्सुमतिरितिभाष्यकारैरुदाहृतत्वात् अप्सुमंतौ इत्यादौ अतिदेशाग्रहणग्रहणमित्याभिवेष्टसिद्धेः ॥ ने
सिद्धबध्नातिषु च ॥ इकंतादिषु सप्तम्या अलुग्न स्यात् स्थण्डिलशायी सांकाश्यसिद्धः चक्रबद्धः चक्रवंधनं ॥ स्थे च भाषायां ॥
सप्तम्या अलुग्न स्यात् समस्थः भाषायां किं कृष्णोस्य पचेरेष्टः ॥ षष्ठ्या आक्रोशे ॥ अलुक्स्यादुत्तरपदे चौरस्यकुलं मचौरे
चोरत्वारोपान्निंदा चोरसंबंधाद्धानिर्दार्यो हन्तर्ये आक्रोशे किं ब्राह्मणकुले स्वरूपकथनमेतत् वाग्दिक्पश्यद्भ्यो युक्तिदंड
हरेषूपसंख्यानं वाचोयुक्तिः दिशोदंडः पश्यतोहरः अनादरे षष्ठी पश्यंतमनादृत्य हरतीत्यर्थः आमुष्यायणामुष्य
पुत्रिकामुष्यकुलिकेति च वक्तव्यं अमुष्यापत्यमामुष्यायणः नडादित्वात्फक् अमुष्य पुत्रस्य भाव आमुष्यपुत्रिकामनो
ज्ञादित्वाद्वुञ् एवं तस्यैव योज्यं देवानांप्रिय इति च मूर्खे वक्तव्यं अन्यादेवप्रियः कर्मणादेवप्रीतिजनकत्वात् अ

मत्रदेवप्रियः शेपपुच्छलांगूलेषु शुनः संज्ञायामुपसंख्यानं शुनःशेपः शुनःपुच्छः शुनोलांगूलः ऋषिविशेषाणामेताः
संज्ञाः अथवाशुनः शेपईत्यौचक्रेइत्यादौप्रसिद्धाः शेपशब्दोऽकारांतोप्यस्ति नकेवलंसकारांतः शुनइवशेपोऽस्येति बहुव्री
हिः एवमुत्तरद्वयेपिबोध्यं दिवश्चदासेउपसंख्यानं दिवोदासायदाशुषे ॥ पुत्रेन्यतरस्यां ॥ पूर्वसूत्रविषयेअलुग्वापुत्रेप
रे दास्याःपुत्रः दासीपुत्रः निंदायांकिं ब्राह्मणीपुत्रः ॥ ऋतोविद्यायोनिसंबंधेभ्यः ॥ विद्यासंबंधवाचिनोयोनिसंबंधवाचिनः
श्चऋदंतात्षष्ठ्याअलुक् तत्संबंधिन्युत्तरपदेग्रहणंवक्तव्यं एतदन्यतरस्यापूर्वोत्तरपदत्वे अलुक्तेनपदद्वयस्यविद्यासंबंधवाचि
त्वेयोनिसंबंधवाचित्वेवातदुभयव्याप्तिकरेवाअलुकः प्रवृत्तिर्नतुउत्तरपदस्यतदुभयभिन्नवाचित्वेइतिफलितार्थः होतुरंते
वासी होतुःपुत्रः पितुरंतेवासीपितुःपुत्रः तत्संबंधीतिकिं होतृधने पितृगृहे ॥ विभाषास्वसृपत्योः ॥ ऋदंतात्षष्ठ्याअलुग्वाः
नयोःपरयोः मातुःस्वसा पितुःस्वसा इहषत्वविकल्पोनिपात्यते मातृष्वसा पितृष्वसा लुकिषत्वं असमासेतु मातुःस्वसा
पितुःस्वसा ॥ अलुगपिकारःसमासः ॥ आनङृतोद्वंद्वे ॥ विद्यायोनिसंबंधवाचिनामृदंतानांद्वंद्वेआनङ् स्यादुत्तरपदे होता
पोतारौ इहोत्तरपदेन पूर्वपदेनाक्षिप्यते समर्थसूत्रेहोतृपोतृनेष्टोद्गातारइतिभाष्यप्रयोगात् एतेनपूर्वपदस्यानङि
तिव्याख्यानमपेक्षं नचकार्यार्थःश्रवणार्थोवावर्णानामुपदेशः नकारस्यतुनश्रवणं नलोपःप्रातिपदिकांतस्येतिलोप
प्रवृत्तेः नापिकार्यविशेषइतिचेन्नैवं रपरत्वनिवृत्त्यर्थत्वात् नचनलोपेकृतेऋस्थानस्याण आकारस्यरपरत्वेउर्वारमे
वेतिवाच्यं प्रसंगावस्थायामेवरपरत्वमितिसिद्धांतात् अस्यचतदानींसमुदायरूपस्यादेशत्वाभावात् स्यादेतत् ऋकारांता
नांद्वंद्वइत्यर्थः उत द्वंद्वेविद्यमानस्यऋकारांतस्येति नाद्यः पितापुत्रावित्यस्यासिद्धेः कार्यविशेषानभिधानेपूर्वस्योत्तरस्य
चापदस्यानङितिनिर्णेतुमशक्यत्वात् नांत्यःपितृपितामहावित्यादावतिव्याप्तेः इतिप्राप्तेसिद्धांतः ऋकारांतानांद्वंद्वेइ
त्येवार्थः पुत्रेन्यतरस्यामित्यतःपुत्रपदानुवृत्त्यापितापुत्रावित्यसिद्धेः नचविभाषास्वसृपत्योरित्यपितदनुवृत्तेःआनःपु

त्रइत्यादावनाक्रोशेपिअलुग्विकल्पापत्तिरितिवाच्यं। तत्राक्रोशपदसंबद्धस्यैवानुवृत्तेः आक्रोशासंबंधं विनापुत्रशब्दस्यानव
संबंधाभावात् अन्येत्वाक्रोशइत्यस्यनिवृत्त्यापुत्रमात्रानुवृत्तेः। उत्तरपदइत्यधिकारात् ङकारानुबंधकरणाद्वाकार्यिनिर्देशा
भावेपिऋकारस्यैवकार्यित्वलाभाच्च। नचैवमपिपितापुत्रावित्यत्रकथंकार्यिविशेषलाभइतिवाच्यं ऋतोविद्येत्यत्रऋतइ
त्यनुवृत्त्यापुत्रइतिसप्तम्याश्चपंचम्याःषष्ठीत्वप्रकल्पनात्। पुत्रेपरेऋदंतस्यानङितिवाक्यार्थलाभात्॥ देवताद्वंद्वेच॥ आ
नङ् स्यादुत्तरपदेमित्रावरुणौ। उभयत्रवायोःप्रतिषेधोवक्तव्यः। वायोःपूर्वपदत्वेउत्तरपदत्वेचेत्यर्थः वाय्वग्नी इंद्रवायूब्रह्म
प्रजापत्यादीनांचप्रतिषेधोवक्तव्यः। ब्रह्मप्रजापती। भाष्यकारास्तुद्वंद्वइत्यनुवर्तमाने। पुनर्द्वंद्वग्रहणंप्रसिद्धसाहचर्यस्य
ग्रहणार्थम् छंदसितुवेदे। नैकहविर्भागित्वेनअक्तंतेनापिलोकेप्रसिद्धसाहचर्यमितिनानङ् प्रसक्तिरित्याहुः॥ ईदग्नेःसोमव
रुणयोः॥ अग्नेरीदादेशःस्या[illegible]त्तयोःपरयोः। आनङोयमपवादः अग्नीषोमौअग्नीवरुणौ देवताद्वंद्वइत्यस्यानुवृत्तिरत्रेति
रत्रेतिवृत्तिकारः। अग्नीषोमौप्रणेष्यामीत्याश्वलायनप्रयोगेतुज्योतिर्लेनयोरपिद्वंद्वेआनङ् श्रवणमस्तीत्याहुः॥ इद्वृद्धौ॥
वृद्धिमत्युत्तरपदेअग्नेरिदादेशोदेवताद्वंद्वे अग्नामरुतौअग्नीवरुणौवादेवतास्य आग्निमारुतंआग्निवारुणंवाकर्म देवता
द्वंद्वेचेत्युभयपदवृद्धिः अलौकिकेवाक्येआनङ्भीत्वंचवाधित्वाइदादेशःवृद्धौकिं अग्नेंद्रः नेंद्रस्यपरस्येतिवृद्धिप्रतिषेधा
दत्रवृद्धिमदुत्तरपदंनास्ति इतवृद्धौविष्णोःप्रतिषेधोवक्तव्यः आग्नावैष्णवंचरुंनिर्वपेत् इहानङेव॥ दिवोद्यावा॥ दिवृश
ब्दस्यद्यावित्यादेशोदेवताद्वंद्वेउत्तरपदे द्यावाभूमीजनयन्देवएकः द्यावाक्षामा॥ दिवसश्चपृथिव्यां॥ चकाराद्द्यावेत्यस्यसमुच्च
यार्थः दिवित्यस्य दिवस्इत्यादेशःपृथिव्यामुत्तरपदे आदेशेऽकारोच्चारणंसस्यरुत्ववारणार्थं सकारश्रवणेनविकाराभावा
नुमानात् नचसकाराचिकं दिवस्पृथिव्योरवतिरित्यत्रपदकालेविसर्गपाठात् दिवस्पृथिव्यौद्यावापृथिव्यौ द्यावाचिदस्मैपृथि
वीतिछंदसिदृष्टानुविधानात्॥ उषासोषसः॥ उषस्इत्यस्यउषासाइत्यादेशोदेवताद्वंद्वे उषासासूर्यं॥ मातरपितरावुदीचां॥

मातृशब्दस्यानङादेशोऽत्र निपात्यते उदेवामितिविकल्पार्थं पठे मातापितरौ पितरामातरा च छंदसीति वक्तव्यं सर्वपदस्य
श्वराङ्गयंतो देशो निपात्यते समासान्तस्य प्रथमाद्विवचनस्य सुपां सुलुगित्याकार आदेशः अतो ङि सर्वनामस्थानयोरिति
गुणः उरण्रपर इति रपरत्वं श्रामागोत्तो पितरामातरा च कारादिविपरीतमपि न मातरापितराऽनूविदिह्यो एवं वर्त्तो ॥ इ
ति श्रीसिद्धान्तसुधानिधौ षष्ठस्य तृतीयपादे प्रथममाह्निकं श्रीं स्त्रियाः ॥ पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रिया
मपूरणीप्रियादिषु इह भाषितपुंस्कादनूङिति एकं पदं स्त्रिया इत्यस्य विशेषणं भाषितपुंस्काप्यरो नूङ् ऊङोऽभावो यस्या मि
तिच्छेदसमानाधिकरणपदो बहुव्रीहिः लिंगभेदेपि शक्यतावच्छेदकैक्यं भाषितपुंस्कत्वं तथाहि भाषितः पुमान्यस्मिन्निति
ति बहुव्रीहिः प्रवृत्तिनिमित्तं लक्षणया स्वार्थोऽन्यपदार्थः तयोश्च शब्देपि भाषितपुंस्कव्यवहारः प्रत्यासत्त्या च यस्य शब्द
स्य पुंवद्भावो विधीयते तेन तस्याभिधायकत्वलाभः अन्यथा शब्दान्तरेण अर्थे शब्देन वा सर्वस्यार्थस्य भाषितपुंस्कत्वात्स्त्वेन ङ
पादानैयर्थ्यमेवं स्यात् अव्यावर्तकत्वात् यदि तु भाषितः पुमानेनेति बहुव्रीहिमाश्रित्य शब्द एवान्यपदार्थ इति व्याख्या
येत तदा प्रवृत्तिनिमित्तैक्यालाभो न स्यात् तथा च पुंलिंगे प्रवृत्तिनिमित्तं यमेव प्रवृत्तिनिमित्तीकृत्य स्त्रियां वर्त्तमानाच्छब्दा
न्नरेयङू प्रत्ययाभावस्तद्वतः स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पूरण्यां प्रि
यादौ च परतः चित्रागावो यस्य स चित्रगुः चित्रा अस् गो अस् इत्यलौकिकविग्रहे अंतरंगानपीति न्यायेन सवर्णदीर्घं बाधि
त्वा सुपो लुक् अन्यथा एकादेशस्य पूर्वादिवत्त्वेन ग्रहणात् सुपोलुकि तच्छब्दस्य आकारस्य श्रवणानुपपत्तेः स्त्रियाः किं ग्रामणिकुलं दृ
ष्टिरस्य ग्रामणिदृष्टिः भाषितेति किं गंगाभार्यः अनूङ् किं वामोरूभार्यः समानेति किं कल्याण्याः माता कल्याणीमाता
स्त्रियां किं कल्याणीप्रधानः अपूरणीत्यादि किं कल्याणी पंचमा रात्रयः अपूरणीप्रमाण्योरिति वक्तव्यं प्रधानपूरण्यामेवायं
पुंवद्भावनिषेधः अप्रधानपूरण्यां तु भवत्येवेत्युक्तं नेह कल्याणी पंचमी कः पक्षः तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थत्वाद

सि॰
वृ॰
७७ ब॰

77

देरत्रप्राधान्यं नेति बोध्यं कल्याणी प्रिया यस्य कल्याणीप्रियः प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः यद्वति महतीभ
क्तिर्भातीति न टेन मद्वित्वरमितिस्त्रीहर्षः अतिमहती भक्तिर्यस्येति बहुव्रीहिः दृढभक्तिरित्यादौ तु सामान्येन पुंसकेन दृढ
शब्देन समासः सचिवाख्यसाकांता भलबुद्ध्युतकांतः संख्या स्वपास्यतपोमयेति स्त्रीहर्षः पुताकांता येनेति समासः ज्ञाता
क्षमा चपला दुहिता वामा अबला तनयेति प्रियादिः ननु समाने प्रवृत्तिनिमित्ते भाषितपुंस्कत्वविवक्षायां गर्भिभार्यः
प्रजातभार्यः प्रसूतभार्य इत्यादि न स्यात् स्त्रियां वर्तमानस्य गर्भिशब्दस्यानवयवभूतगर्भसंबंधः प्रवृत्तिनिमित्तं गर्भिणी
हिरित्यादौ त्ववयवभूतगर्भसंबंध इति तद्भेदात् एवं प्रजातप्रसूतशब्दयोः स्त्रियां गर्भविमोचने प्रवृत्तिनिमित्ते पुंसि तु
गर्भाधानमिति भेदात् सत्यं गर्भसंबंधस्यापत्योपत्यवत्त्वाद्वस्योभयसाधारणस्यैव प्रवृत्तिनिमित्तत्वाद् वांतरविशेषस्या
विवक्षितत्वात् प्रवृत्तिनिमित्तैक्याविवक्षायां तु द्रोणीभार्यः कुटीभार्य इत्यादावतिप्रसंगात् परिमाणविशेषेण वादन्या
ववर्तमानयोर्द्रोणद्रोणीशब्दयोरभेदाध्यवसायात् एकस्योभयत्र वृत्तेः सत्त्वात् उक्तरीत्या वाच्यपरिमाणत्वव्याप्यधर्मो
द्वितीये चोपयित्वव्याप्यः प्रवृत्तिनिमित्तमिति भेदेन दोषानवतारात् नन्वनूङ् इति पृथक् निषेधो व्यर्थः नकोपधाया
इत्यनंतरं ऊङः प्रत्येवस्तवक्तव्यत्वात् एकेनैव तन्नार्निर्वाहात् मैवं पुंवत्कर्मधारयेत्यस्य निषेधप्रतिप्रसवार्थतया वक्त
माणत्वात् ब्रह्मबंधू हृदारिकेत्यादौ पुंवद्भावो माभूदित्येतदर्थत्वात् नचनकोपधाया इत्यादेरिवास्यापि प्रतिषेधस्यैते
न प्रतिप्रसवापत्तिर्निषेधत्वाविशेषादिति वाच्यं पृथक् प्रतिषेधारंभसामर्थ्यात् यद्वा पुंवत्कर्मधारयेत्यादावनूङ् इत्य
नुवर्तनीयं अग्रहणीत्यादेरप्यनुवृत्ते भीरुकतानत्त्वात्महानवमीमहाद्वादशीत्यादौ पुंवद्भावो भवत्येवेति कैयटः यद्वा
नत्रानुवृत्तस्यानूङ् पदस्य पर्युदासतया व्याख्यानात् ऊङ्भिन्नस्य स्त्रीप्रत्ययस्य पुंवद्भावे कार्यित्वस्यादेनत् स्त्रियाइतिस्व
रितेनाधिकारात् स्त्रीप्रत्ययस्योपादाने किंवा स्त्रीवाचकशब्दस्य उतस्वार्थस्य प्रत्रार्थपरत्वे स्त्रीशब्दोत्र स्वाः परंत्वर्थस्यो॰

ध्य॰

त्तरपदेन समर्थे पौर्वापर्यानुपपत्त्या स्ववाचकशब्दद्वारकं गौणं तदाश्रयणीयं शब्दपरत्वे तु स्त्रीशब्दो गौणः पौर्वापर्यं तु सुख
मिति विवेकः नाद्यः भाषितपुंस्कात्परस्याः ऊङः स्त्रीप्रत्ययस्य पुंवद्भवतीति तदा सूत्रार्थः स्यात् उपमानदृष्टे स्त्रयर्थस्योपमे॰
येन्वयनिर्वाहकस्य वाक्यशेषस्य कल्पनात् स्त्रियाः प्रत्ययाभावसिद्ध्यर्थे न भवतीति वाक्यशेषः पुंसः प्रतिपदोक्तकार्यस्या
भावेनातिदेशानुपपत्तेः पुंसि दृष्टस्य स्त्रीप्रत्ययाभावस्यैवातिदेशात् यथा पुंसः स्त्रीप्रत्ययो न भवति एवं समानाधिकर
णे उत्तरपदे भाषितपुंस्कस्येति स्त्रीप्रत्ययलोपविधाने पर्यवसन्ने तथा च पत्नी भार्या यस्य पत्नभार्यः अत्र एकदेशविकृत
स्यानन्यत्वाद्भाषितपुंस्कादेनशब्दात्परस्य ईकाररूपस्त्रीप्रत्ययस्य लोपेपि स्वार्थस्य सत्त्वान्नकारश्रवणं स्यात् न च संनियोग
शिष्टन्यायेन तन्निवृत्तिः लोपस्य स्थानिवद्भावात् उत्तरपदनिमित्तकस्य लोपस्य परनिमित्तकत्वात् एवं पटुभार्य इत्यत्र लु
ममीकारमाश्रित्य यणादेशः स्यात् आद्ये ईकारनकारयोः सहविधानमात्रे द्वितीये नीकारो यणादेशस्य निमित्तमिति भे
दः एवं तेन वर्त्त॰॰दिषु पुंवद्भावो वक्तव्यः स्यात् गार्ग्यपुत्ता हृद्दारिकाः अगार्ग्यहृद्दारिका इति न स्यात् स्त्रीत्वरूपार्थसद्भावा
दस्त्रियां विहितस्य यञिञोश्चेति नियुक्तस्य लोपस्यानुपपत्तेः एवं लगल्लगस्त्रीविषयाद्धि स्त्रीप्रत्यया इति भाष्ये लगल्लको य
थायोगमिष्यमाणेन सिध्यत इति पुंस्त्वरूपार्थातिदेशप्रारम्भः स्यादिति तदर्थः तथाहि वर्तेङस्यापत्यं स्त्री वर्तेङी वर्तेङाच्चे
तियञ् लुक् स्त्रियामिति लुक् शार्ङ्गरवादित्वात् ङीन् वर्तेङी चासौ हृद्दारिका च वर्तेङहृद्दारिके तीष्यमाणे ङलेभे ङीनोति
हत्तावपि प्रवर्तिनिष्टस्य स्त्रीत्वस्य सत्त्वात् ङ्कःलुको ङीवत्त्वात् नन्वीकारे परे लुगिति व्याख्येयं स्त्रियामित्यत्र स्त्रीशब्देनेत्वमी
कारप्रश्लेषेण स्त्रीवाससावीकारश्चेति कर्मधारयः एकादेशस्य पूर्वान्तत्वेन ग्रहणात् स्त्रिया इतीयङ् तथा च पुंवद्भावेन ई
कारनिवृत्तौ ईकारे परतो विहितस्य लुको न प्रसक्तिः पटुभार्य इत्यादौ यणादेशनिषेधार्थं स्थानिवत्त्वनिषेधस्याऽवश्यमा
रभ्यत्वाद् ज्ञापितत्वप्रवृत्तेः सैवं शार्ङ्गरवादौ लुग्विशिष्टस्य वर्तेङशब्दस्य पाठात् प्रत्ययान्तात् ङीनो ङलेभत्वात् ङीनेविनाच॰

डा॰

लुकोऽप्रवृत्तेः ङीन्लुकोःपरस्पराश्रयापत्तेः नचङीन्निवृत्तौ वानेयशब्द एव पठनीयः उत्तरपदानपेक्षत्वल्लुकःस्त्रीप्रत्ययनि
वृत्तेःप्रागेवान्तरंगत्वात्प्रवृत्तेः नचनिमित्तापायपरिभाषयाईकारनिवृत्तौ लुकोऽपिनिवृत्तिः इयानित्यादौ प्रकृतौ निवृत्त्यायोप्र
त्ययनिवृत्तिप्रसंगात् असिद्धंवहिरंगमन्तरंगे इतीकारनिवृत्तेरसिद्धत्वान्निमित्तापायविरहाच्च एवंक्रोडी चासौ वृन्दारिका
चेतिक्रोडवृन्दारिकेति न स्यात् ज्ञातश्चजोरस्त्रियामितिन्मस्यानुपपत्तेः द्विस्त्रीप्रत्यययोयथा गार्ग्यायणी चासौ वृन्दारिका च
गार्ग्यवृन्दारिकेति न स्यात् प्राचामिति निषेधेऽप्यक्षःवित्त्वसामर्थ्यात् ङीष् अत्रच्फोत्तरपदयोर्ङीनोऽवच्छवत्यानात् पुंवद्भावाप्र
वृत्तौ च्फस्य निवृत्तिर्न स्यात् ङीवृत्तरपदयोरानंतर्यसत्त्वेपि ङीनो भाषितपुंस्कात्परत्वाभावात् निवृत्तिर्न स्यात् ङीवृक
तेःच्फप्रत्ययान्तस्य स्त्रीमात्रवृत्तित्वात् इति प्रथमे पदोदुष्ट एव नापि द्वितीयः अंगारकनाम्नोऽशकुनीनां स्त्रीषु कालिका।
शब्दस्यवृत्तेः द्वेमहद्धिमेत्तानां त्रियाणं स्त्रीषु तन्तुकेशीशब्दस्य तथा च कालिकावृन्दारिकाः तन्तुकेशीवृन्दारिका इति
न स्यात् अंगारकादिशब्दानां कदापि स्त्रीवाचकत्वाभावात् कालिकाशब्दस्य च तज्जातीयस्त्रीवाचकत्वात् पुंवत्कर्मधारये
ति पुंवद्भावे नातएवांगारकाद्यादेशे अंगारकवृन्दारिकाः द्वेमहद्धिवृन्दारिका इत्यस्य प्रसंगात् अंगारकादिशब्देन स्त्रा
वयो कालिकादीनामभिधातुमशक्यत्वात् एवं वृत्तस्य स्त्री वरटा कच्छपस्य डुलीत्यस्य अपस्य रोहित् अश्वस्य वडवा पुरुषस्य
योषित् वरटावृन्दारिका इत्यादि न स्यात् अश्ववृन्दारिकेत्यादेःप्रसंगात् नचात्र भाषितपुंस्कादित्यनेन निस्तारः भाषित
पुंस्कात्परप्रतिव्याख्याने हि स्त्रीप्रत्ययग्रहणपक्षे संभवति न तु स्त्रीवाचकशब्दग्रहणपक्षे वित्तगरित्यादेरसिद्धेः वित्ता
दिशब्दानां भाषितपुंस्कात्परत्वाभावात् एताः कालिकावृन्दारिका इत्यादौ भाषितपुंस्कादेन च्छब्दात्परत्वसंभवाच्च नापि तृती
यः तदुक्तं आर्षीतिदेशे विप्रतिषेधानुपपत्तिरिति तथाहि पुंवद्भावात् ह्रस्वत्वं विद्यादिके क्षितिवदसते एद्धिते इत्यादौ
पुंवद्भावे वाधित्वापरत्वाद्ध्रस्वे पेति ह्रस्व एवेति न दर्पः विप्रतिषेधश्चैकस्य कार्यद्वयप्रसंगः यदि त्वर्थस्य पुंवद्भावः

तदा ह्रस्वेन समं तदनुपपत्तिः साक्षाद्ध्रस्वस्य शब्दसंबंधित्वात् नन्वसंभवदुपपदत्वादविप्रतिषेधः पुंवद्भावे हि पडशब्दस्य दीर्घो
नत्वाभावान्न ह्रस्वः ह्रस्वे च न पुंवद्भावः न च स्त्रीत्वपार्थस्य ह्रस्वे कृतेऽप्यनपायात्कथं न पुंवद्भाव इति वाच्यं ह्रस्ववैयर्थ्यात् श्रवण
भावे प्रवृत्तिमात्रेण साफल्याभावात् तथा च परेण ह्रस्वेन पुंवद्भावो वाध्य इति चेत् सत्यं एतादृश एव विप्रतिषेधस्य इकोऽगुणवृद्धी इ
ति सूत्रे कौमुदीयमतदूषणप्रसंगाद्भाष्यकृतैव निरस्तत्वात् एवं सर्वप्रसंगोऽप्यत्र योज्यः तस्मात्पक्षत्रयमप्यत्र न संभवतीति प्रा
प्ते सिद्धांतः स्त्रीवाचकशब्दस्येति मध्यमपक्ष एवात्र युक्तः साक्षादुत्तरपदेन पौर्वापर्योपपत्तेः शब्दानुशासनतया शब्दपरत्वे
तात्पर्यस्य स्वग्रहत्वात् पौर्वापर्यस्य गौणत्वापेक्षया युक्तत्वात् भाषितपुंस्कादनूङ् यस्मिन्निति समुदायः समासार्थावयवेन
विग्रहः न च लुगापत्तिः निपातनात्तदभावात् अलुगित्यनुवृत्तेर्वा न चापरार्थ्ययोः कथमित्यपि संबंध इति वाच्यं अपेक्षावशात्त
दुपपत्तेः केचित्तु भाषितपुंस्कं प्रततीति भाषितपुंस्कादिति समानाधिकरणपदमेव बहुव्रीहिरेवं चालुगर्थमपि यत्नो न क
र्तव्य इत्यपि स्ववचमित्याहुः तच्चिंत्यं भाषितपुंस्कसंबंधेन ऊङ्भावस्य लाभेऽपि तत्परत्वस्यालाभात् पंचम्यंतेनैव दिक्शब्दा
ध्याहारेण तदुपपत्तेः न च सर्वशब्दाध्याहारस्याप्यापत्तिः प्रतियोगिनः प्रत्ययेनाक्षेपात् परशब्दस्यैवाध्याहारात् न चैवमप्यनूङि
ति प्रथमांतस्य षष्ठ्यंतविशेषणत्वानापत्तिः छांदसत्वेन षष्ठीलुगिति स्वीकारात् षष्ठ्यंतपाठस्तूपेक्ष्यः हरदत्तादिग्रंथवि
रोधात् भाषितपुंस्कात्परत्वं च ऊङ्भावे विशेषणं न त्वङि सर्वप्रसंग इति दोषानुद्धारात् उक्तरीत्या तु भाषितपुंस्कत्वे सत्यूङ्
भावान्वयः स्त्रीवाचकः शब्दस्तस्य पुंवाचकस्येव रूपं स्यादित्यर्थो लभ्यते कालिकादिशब्दास्तु समर्थेनेन व्याक्रियंते एतेन इडविडो
ऽपत्यं ऐडविडवृंदारिका पार्थवृंदारिका दारदवृंदारिका औशिजवृंदारिकेत्यपि व्याख्यातं ग्रामद्वये जनपदशब्दात्क्षत्रियाद
ञ् अंत्यद्वये राजन्यगोत्रेऽण्यञ् अतश्चेति स्त्रियां तयोर्लुक् यदि त्वत्रानूङि त्यत्र पर्युदासमाश्रित्य भाषितपुंस्कात्परऊङ्भिन्नस्त्रीप्रत्य
यो यत्रेति व्याख्यायेत तदा कालिकादौ प्रतिप्रसंगाभावेऽपि पैडविडवृंदारिकेत्यादावव्याप्तिः इडविडेत्यादीनां स्त्रीप्रत्ययांतत्वा

भावात् भाष्ये त्वद्रू.मित्त्रस्य प्रत्ययमात्रस्योपादानेन तरादावादीनां स्त्रीप्रत्ययानामेव लुगपि स्यात् निवृत्तावेन प्रत्ययो भवत्येवे
तिनायं दोष इत्युक्तं पट्वीमृद्वीभार्य इत्यत्र मृद्वीशब्दस्योत्तरपदेनानन्तर्या स्यैवत् नत्त पट्वीशब्दस्य उत्तरपदस्य मृद्वीशब्देन व्य
वहितत्वात् पटुमृद्वन्तयोः प्रवृत्तिनिमित्तयोर्लिंगद्वयेपि समानत्वात् नचाचोत्तरपदेन पूर्वपदाक्षेपात् द्वितीयस्य वतथा
त्वाभावात् कथं पुंवद्भाव इति वाच्यं प्रात्वङ्कृत्यत्रैव तदभावात् तत्र च प्राणेहात् पोत्वे नेष्टोन्नाता इति भाष्यं अत्र तु पट्वीमृदु
भार्य इति भाष्यमित्ति विशेषः एतेना चित्राजरत्योर्गावो यस्येति समासे चित्राजरतीगुः इत्युदाहरणे निरस्तं चित्राजरद्गविरित्य
स्यैव युक्तत्वात् चित्राजरत्योः कर्मधारये तन्निमित्तके चित्राशब्दस्य पुंवद्भावेन नोदन्ड बहुव्रीहौ जरतीत्यस्यापि तथात्वे चित्रजरद्गवि
तिरूपं उत्तरपदे कर्मधारये कृत्वा बहुव्रीहौ तु चित्रजरद्गवीक इति त्वप्यदेनत्त् ॥ तसिलादिष्वाकृत्वसुचः ॥ तसिलमारभ्य
कृत्वसुजंता ये प्रत्ययास्तेषु परेषु स्त्रियाः पुंवत्स्यात् केषुचिन्न दत्तमस्ते न ष्वपि पुंवद्भावस्यानिष्यमाणत्वात् नद्धद्धिर्न्हतेष्वपि च
केषुचिदिष्यमाणत्वात् परिगणनं कर्तव्यं तत्त सौ तत्र शालायां ततः शालायाः एवं यत्र यतं इति योज्यं नचात्र सर्वनाम्नोवृ
त्तिमात्र इति भाष्यकारेणागतार्थत्वं वक्षीषु बहु त्र बहुत इत्येतदर्थमस्यावश्यकत्वात् सर्वनाम्नापि वृत्तौ बाधकाभावात् तर
पमपौ दर्शनीयतरा दर्शनीयतमा बहट्जातीयरौ पटुचरी पटुजातीया कल्पदेशीयरौ दर्शनीयकल्पा दर्शनीयपाशा
पद्कल्पेत्यपपाठः चरट्पकल्पे ति कृत्सवत् सैव तत्र परत्वात् ह्रस्वत्वे नेति कैयटः रूपपाशपौ दर्शनीयरूपा दर्शनीयपाशा थं
मालौ कया ग्राह्यास्माकं यथा यथा दार्हिलोत सौवेलायां तदा तर्हि ति लुप्यतेनो प्रशस्ताहकीहकतिः । प्रजाभ्यो हिता प्रज
थ्याहृतिः लिंगविशिष्टपरिभाषया हकीशाहान्तहकसे छाभ्यामिति तिल् प्रजाविभ्यामित्यजाशब्दान्तथ्यन् नचजाते स्त्रीति
पुंवद्भावनिषेधः परिगणनसामर्थ्यात् शासि बहुत्वार्थस्येति वक्तव्यं बहुत्वार्थादिति शस् तसिलादिषु इत्यस्य यः बा
ह्वीभ्यो देहि बहुशः ऊपो वैकल्पिकत्वात्तदभावपक्षे पुंवद्भावान्नयप्ययोगोपि तत्पक्षे निष्टदूपवारणार्थमेतत् त्वतलोर्गुण

वचनस्येति वक्तव्ये पद्वाभावः पटुत्वे पटुता गुणेति किं कटीत्वं कटीता गोत्रं च चरणैः सहेति जातित्वं अत्र केचित् जातिसंज्ञाया
निरिक्तेऽयं धर्ममात्रं हि गुणः तेन क्रियाशब्दानामपि पुंवद्भावः अत एव नेपथ्यायाप्य इति सूत्रे पाचिकात्वमित्यत्र गुणवचनत्वात्पामस्य
पुंवद्भावस्य निषेध इति प्रश्नावः अन्येन भाष्यादिविरुद्धमेतत् एकतद्धिते इति सूत्रे एकत्वं एकतेत्यत्र पुंवद्भावे न सिद्धिमाशंक्य भाष्य
कृतोक्तेऽनकमेतत् त्वतलोर्गुणवचनस्येति तथा कैयटेन व्याख्यातं एकशब्दस्य संख्यावाचितायां गुणवचनत्वेऽपि असहायवाचिनो
नत्वादिति त्वदुक्तरीत्या न सहायाभावस्यापि उक्तधर्मत्वादसहायार्थकस्यापि गुणवचनत्वानतिप्रसंगात् स्त्रियामिति सूत्रे
व्यापिनीत्वात्स्त्रीहन्तेरिति पुंयोगादिति सूत्रे चास्त्रियाः संविग्याज्ञीत्वादिति ईश्वरादिति सूत्रे च विभक्तेरेव संज्ञिनीत्वादिति तेनैव प्रयुक्त
त्वाच्च निरीक्ष्यमेनेशारदः कृतार्थेनाल्लो वृत्ताक्षपगतास्वनुवेले दृष्टतारहसिभर्तृप्रणामिभिरित्यादौ च सामान्येन पुंसकविवक्षायां प्रत्य
योगात्तेः अत एव पत्युर्नो यज्ञसंयोगे इति सूत्रे पत्न्याः फलप्रतिग्रहीतृत्वादिति हि भैक्षं कर्तृत्वमात्रं विवक्षितं न तु स्त्रीत्वमिति ङीब्भावः इति हरद
त्तेन व्याख्याते संहितासंज्ञासूत्रे एकैकवर्णवर्तित्वाद्वाच इति भाष्ये कैयटेऽप्येवं पनेननने हि पुरोद्भावः वनीत्वमासीदित्यपि व्याख्यात
मित्याहुः भस्याढे तद्धिते इति वक्तव्ये हास्तिनीनां समूहो हास्तिकं लिंगविशिष्टपरिभाषया अचित्तहस्तिधेनोरिति ठक् न चात्र
यस्येति चेतीकारलोपेन स्त्री ङित इति टिलोपेनैव सिद्धमिति वाच्यं ईकारलोपस्य स्थानिवद्भावादाभीयत्वेनासिद्धत्वाच्च टिलोप
स्याऽलभत्वात् न च ठक्छसोश्चेत्यनेन पुंवद्भावः छसा सहचरितस्य भवतष्ठक्छसाविति सस्यैव तत्रोपादानात् अढे इति किं श्ये
नेयः रौहिणेयः श्वेतरोहितयोर्वर्णादनुदात्तादिति ङीब्विकारौ पुंवद्भावे तु श्वैतेयो रौहितेय इति स्यात् नन्वेवं आग्नायीदेवतास्या
ग्नेयः स्थालीपाक इति न स्यात् अग्नेर्ढगिति सर्वत्राग्निकलिभ्यामिति वा ढक् पुंवद्भावनिषेधे आग्नायेय इति प्रसंगात् कौण्डिन्यः
सापत्न्य इत्यत्रातिप्रसंगाच्च कुण्डिन्या अपत्यं गर्गादित्वात् यञ् पुंवद्भावे कौण्ड्य इत्यस्य प्रसंगात् एवं सापत्न्य इत्यण्यापादनीयं न चा
ढ इत्यस्य स्थाने ऽनपत्य इत्येव वक्तव्ये तेनोक्तदोषानापत्तिरिति वाच्यं ॥ गार्गायण्या अपत्यं माणवको गार्गीजाल्म इत्यत्राऽव्याप्तेः

सि॰
ष॰
८॰

गोत्रस्त्रियाः कुत्सने ण चेति णस्यापत्यप्रत्ययत्वात् मैवं आगस्त्यकौण्डिन्ययोरिति निपातनेन कौण्डिन्ये पुंवद्भावाप्रवृत्तेः सपत्नशब्दस्य प्र
कृत्यन्तरं व्यस्य पत्न इति निर्देशाल्लिङ्गात् विधौ वैरिसपत्नारातीत्यमरोक्तेश्च तस्मात् शार्ङ्गरवादित्वान्ङीन् तस्मात् शिवादित्वादण् ततः
पुंवद्भावः इति सापत्नशब्दसिद्धेः योपि समानः पतिर्यस्या इति विवाहजन्यसंस्कारविशेषोपाधौ नित्यस्त्रीलिङ्गः सपत्नीशब्दः तस्मा
पि शिवादित्वादणि यस्येति चेतीकारलोपे सापत्न इत्येव रूपं यत्तु स्वामिपर्यायपतिशब्देन भाषितपुंस्कः सपत्नीशब्दस्तस्मात्पु
नरपदलक्षणोण् एव शिवादौ तूढस्यैव पाठात् भाषितपुंस्कत्वात्पुंवद्भावः यस्येति चेतीकारलोपः सापत्न इति सिद्धे एतेन
नित्यं सपत्न्यादिषु इत्यत्र समुदायोच्चारणात् पुंवद्भावबाधनार्थमिति न्यासकारोक्तं निरस्तं यत्तु भावकर्मणोः एतत्तल्लक्षणयाके भा
षितपुंस्कत्वाभावान्न पुंवत् सापत्न्यं इति माधवेनोक्तं तद्विवाहनिबंधन सपत्नीशब्दाभिप्रायं प्रकृतमनुसरामः नचैवमण्याग्रे
य इत्यस्यासिद्धिः ताद्धितस्य स्त्रीभ्यो ढगित्यनेन विहितस्यैव ढस्यात्र भेदप्रतियोगित्वेन तद्ग्रहणं ढक इति व्याख्येयत्वात् तत्र पुंवद्भाव
स्यानिर्बाधत्वात् ढकछसोश्चेति वक्तव्यं भवत्याः छात्रा भावत्काः भवदीयाः वस्तुतः सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्टागता
र्थमेतत् एतेनैकतद्धिते चेति सूत्रमपि व्याख्यातं ननु ढक्छसो रिकेयादेशयोः कृतयोर्भस्याढे इत्यनेनैव सिद्धमिति चेन्मैवं ढ
कारावस्थायां भसंज्ञाविरहेपि पुंवद्भावविधानार्थत्वात् इकादेशोत्तरं पुंवद्भावे तु मा भूदिति कादिवर्णादेशो न स्याद्वर्णमात्रस्य स्था
निवत्त्वे अल्विधित्वेन स्थानिवत्त्वाभावात् समुदायपक्षेपि संनियोगपरिभाषाविरोधात् ढकसोरपि सिद्धत्वाद्भस्य च पदसंज्ञत्वाद्भस्या
ढ इत्यस्यानुपपत्तेः ॥ क्यङ्मानिनोश्च ॥ एतयोः परयोः पुंवत् एनीवाचरति एतायते श्येनायते रोहितायते ननु यागम्मानमेव
दर्शनीयां मन्यते तेन त्रस्त्रियाः पुंवदित्येव सिद्धं उपाधिभेदेन कर्तृत्वकर्मत्वोभयविवक्षायामपि वास्तवमभेदमादाय सामानाधि
करण्यानपायात्स्त्र्ये मानिन् ग्रहणमस्त्र्यर्थमसमानाधिकरणार्थं च दर्शनीयां कांचिन्मन्यते दर्शनीयमानी चैत्रस्तस्याः स्वभिन्नां
दर्शनीयां मन्यते दर्शनीयमानिनी देवदत्ता तस्याः अन्यविशेष्यकदर्शनीयत्वप्रकारकज्ञानवत्त्वमर्थः ॥ न कोपधायाः ॥ कोप

६०

धायाः स्त्रिया न पुंवत् पाचिकाभार्यः रसिकाभार्यः मद्रिकायते मद्रिकामानिनी मद्रेषु भवा माद्रिका। मद्रवृज्योः कन् नन्वत्र
करणे स्तत्र य प्राप्तस्य पुंवद्भावस्य निषेधः उक्तोपसंख्यानिकस्यापि नाद्यः मध्यमिकायां भवा माध्यमिकीया शालूकानि विद्यं
तेस्यां शालूकिका उञ्छादिसूत्रेण गण्यपादित्वात्कः तत्र भवा शालूकिकीयेत्यत्रां वा भेः आये वे एककादिभ्यश्छणावमक्षः इ
ति वृणा द्वितीये हृज्ञादके कांतत्वोपदादितिकः नवानयोर्नैगायौ या मेवाभाषितपुंस्कत्वात्पुंवद्भावप्रसक्तभावाडक्तानिषेधा
प्रवृत्तावपि न तत्तिरिति वाच्यं विलेपिकायां धर्म्यं वैलेपिकमित्यत्र तथाप्यवाभेः आमहिष्यादिभ्यश्च एण् नद्वितीयः हा
स्तिनीनां समूहो हास्तिकमित्यत्र जातेश्चेति निषेधप्रसंगात् मैवं जातेश्चेत्यतः प्राक् पुंवद्भावसामान्यस्य निषेधः जातेश्चेत्य
येन सोत्र सेवेति लक्षणानुसारेण व्याख्यानात् कोपधप्रतिषेधेन तद्धितवुग्रहणं कर्तव्यं मद्रिकेति तद्धितस्य पाचिकेति कृत्संबंधि
नः ककारस्योदाहरणं नेह पाका भार्या यस्य सोपाकभार्यः पाकशब्दस्य प्रथमवयोवचनत्वाद्वयसि प्रथमे इति ङीपं वा
धित्वा अजादित्वाट्टाप् बिभेतीति भेका भार्या यस्य स भेकभार्यः क्रियाशब्दोयं यदा तु जातिवचनस्तदा जातेरस्त्रीविषयादिति
ङीपि भेकीभार्यः जातेश्चेति पुंवद्भावनिषेधात्॥ संज्ञापूरण्योश्च॥ संज्ञाभूतस्य पूरणप्रत्ययांतप्रकृतिकस्य प्रत्ययांतस्य च
स्त्रीवाचकशब्दस्य न पुंवत् दत्ताभार्यः दत्तामानिनी दानक्रियानिमित्तकस्य भाषितपुंस्कत्वात्प्राप्तिः पंचमीपाशा॥ वृद्धिनि
मित्तस्य च तद्धितस्यारक्तविकारे॥ वृद्धिशब्देन विहिता वृद्धिः प्रत्युपधायको यो रक्तविकारभिन्नार्थे कृत्तद्धितस्तदंतायाः
स्त्रिया न पुंवत् सौघ्नीभार्यः माथुरीयते माथुरीमानिनी वृद्धिशब्देनेति किं तावद्भार्यः यासर्वनाम्न इत्याकाररूपा वृद्धिः प्र
तिवत्तु पधायकत्वेप्याकारस्य वृद्धिशब्देनाविहितत्वात् आ इति स्वरूपेणैव निर्देशात् उपधायक इति किं वैयाकरण
भार्यः प्रणौ णौ नाहृद्धिं प्रति स्वरूपयोग्यत्वेपि नयाभ्यामिति निषेधेन फलोपधानाभावात् प्रपंचितमन्यत्र वृद्धिसंज्ञायां
अरक्तविकारे किं काषायकंथः हैममुद्रिकः कषायेण रक्ता काषायी हेम्नो विकारो हैमी तेन रक्तं रागात् तस्य विकार

इत्याख्यामहे ॥ स्वांगाच्चेतः ॥ स्वांगप्रकृतिको य ईकारः तदंतास्त्रीनपुंवत् सुकेशीभार्यः स्वांगात्किं पटुभार्यः ईतः किं अके-
शाभार्यायस्याः केशभार्यः सहनञ्विद्यमानपूर्वाच्चेति न ङीष् । अमानिनीति वक्तव्ये सुकेशीं कांचिन्मन्यते सुकेशमानी चैत्रः
सुकेशीमात्मानमन्यां वा मन्यते सुकेशमानिनी देवदत्ता अमानिनीत्यत्र सूत्रांतर्भावस्त्वनार्ष इति कैय्यटादयः ॥ जातेश्च ॥
जातेः परो यः प्रत्ययस्तदंतायाः स्त्रिया न पुंवत् शूद्राभार्यः ब्राह्मणीभार्यः जातिवाचकात्परत्वमात्रमिहापेक्षितं न तु जाति-
शब्दस्वार्थे विहितत्वं तेन हस्तिनीभार्य इत्यत्र नांतत्वलक्षणङीषंतस्यापि पुंवन्निषेधः न चात्र मानाभावः हास्तिकमित्यत्रैतन्-
निषेधप्रवृत्तेर्भाष्यकृता शंकितत्वात् औपसंख्यानिकस्य नायं निषेध इति सिद्धांतितत्वाच्च यत्तु प्राचोक्तं ग्रंथे ङीषेवोपात्तस्त-
न्निर्मूलं शूद्राभार्य इत्यादावव्याप्तेश्च ब्राह्मणीभार्य इत्येतदुक्तोदाहरणविरुद्धं च ब्राह्मणीशब्दस्य शार्ङ्गरवादित्वेन ङीनंत-
त्वात् ॥ पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ननु तदर्थं कर्मधारये स्त्रियाः पुंवदिति जातीयदेशीययोस्तु तसिलादिष्विति
नेन सिद्धत्वात् मैवं निषेधप्रतिप्रसवार्थत्वात् तेन कारकवृंदारिका कारकजातीया कारकदेशीया दत्तवृंदारिकेत्यादि
पंचमवृंदारिकेत्यादि स्रौघ्नवृंदारिकेत्यादि स्वस्तामुखवृंदारिकेत्यादि कठवृंदारिकेत्यादि च सिद्धं अन्यथा नकोपधाया इ-
त्यादिपंचसूत्र्या यथायोगं निषेधप्रसंगात् कुक्कुट्यादीनामंडादिषु पुंवद्भावो वक्तव्यः कुक्कुटांडं मृगपदं काकशावः न चात्र
स्त्रीपूर्वपदस्याविवक्षितत्वात् अस्यार्थः कुक्कुट्या अंडमित्येव समासः पुंसंबंधस्याप्यंडादौ सत्त्वात् न च स्त्रीसंबंधविवक्षाया-
मतिप्रसंगः तत्र वाक्यमेव न तु समास इत्यनभिधानादिति स्वीकारात् न तु मृग्याः क्षीरमित्यत्र चोक्तरीतिसंभवः क्षीरस्य पुंसंबंधस्याऽ-
वैचत्वात् मैवं तत्रापि स्त्रीसंबंधस्याविवक्षितत्वात् जात्यंतरनिवृत्त्यर्थं जातिमात्रस्य तत्परत्वात् । लिंगविशेषस्याप्युपका-
रकत्वेऽप्यात्र ग्रहणप्रयुक्तिं दातव्यमित्यादौ विवक्षितत्वात् ॥ तसिलादिष्वाकृत्वसुचः ॥ वत्सूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः क-
ल्पादिषु प्रत्ययेषु चेलादिषु च प्रातिपदिकेषु उत्तरपदेषु भाषितपुंस्कप्रकृतिकङ्यंतस्यानेकाचो ह्रस्वः स्यात् ब्राह्मणित-

ऊं १

परेषु १

ग ब्राह्मणितमाथ ब्राह्मणितरेति ग्रामे जातेष्विति पुंवत्त्वनिषेधात् ब्राह्मणिकल्पा ब्राह्मणिचेली ब्राह्मणिब्रुवा ब्राह्म
णिगोत्रेत्यादि चेलडिति पचाद्यौ टित्पाठान्ङीष् ब्रुवेति ब्रूञः पचाद्यच् निपातनाद्वच्यादेशगुणयोरभावः चेलडादयो हि मो
कुत्सनार्थाः कुत्सितानि कुत्सनैरिति समासः पुंवद्भावाद्ध्रस्वत्वं विप्रत्ययादिकेषु घिनेतो ह्रस्वस्यावकाशः कालिमन्यइत्यादिः
पुंवद्भावस्य पटुभार्यइत्यादिः कालिमन्येत्यत्रोभयप्रसंगे विलूनत्वणो ह्रस्वः परत्वात् यादिषु ह्रस्वाह्रस्वस्यावकाशः ननेकि
तरेत्यादिः नकोपधायाइति पुंवद्भावनिषेधात् पुंवद्भावस्य दर्शनीयतरेत्यादिः सन्नत्वाभावेन च रूपेऽप्यप्रवृत्तेः पट्वितरा प
ट्वितमेत्यत्रोभयप्रसंगे च रूपेति ह्रस्वः परत्वात् केणा ह्रस्वस्यावकाशः नर्तकिकापुंवद्भावस्य दारदिका दरदोऽपत्यं स्त्री द्रा
रदमगधेत्यण् घनेष्विति तस्य लुक् प्राग्दिवादिति कः तसिलादिष्विति पुंवद्भावः न च तसिलादिषु कस्य परिगणनेन नास्तीति
वाच्यं उक्तभाष्यप्रामाण्येन कस्यापि तत्र परिगणनमित्यनुमानात् पट्विकाम्रदिकेत्यत्रोभयप्रसंगे परत्वात् केणइति ह्रस्वः
न च ह्रस्वोत्तरं पुंवद्भावापत्तिः सकृद्गतिन्यायात् अत्र भाष्ये ङी[illegible]ग्रहणं व्यर्थं खट्वान्तरेत्यादौ भाषितपुंस्कादित्यनुवृत्त्यैव
दोषाभावात् न च दत्तान्तरेत्यादावतिप्रसंगः । स्वांगाच्चेत इत्यत ईत इत्यस्यानुवृत्तेः । न च ग्रामणीतरइत्यादावतिप्रसं
गः । स्त्रियाइत्यस्यानुवृत्तेः स्त्रीवाचिन ईकारस्य ह्रस्वविधाने ग्रामणीशब्दे ईकारस्यानर्थकत्वात् तदग्रहणेः न च नद्याःशे
षस्येति सूत्रे ऽस्त्रेन्नाभिन्नेऽप्यनेकाभिन्नं वशेषपदार्थः न च सूत्रे तद्रूपस्य प्रतियोगिनः समर्पणार्थं ग्रहणमिति वाच्यं ईत
इत्यनेनैव तदुपपत्तेः । वस्तुतस्तत्र शेषग्रहणमपि व्यर्थम् यादिषु नद्या ह्रस्वो वेत्युत्सर्गः तस्याऽनेकाचो नित्यं ह्रस्व-
त्वमपवादः तस्याप्युगितश्चेति विकल्पइति सर्वेष्टसिद्धेः नव्वीनस्त्वनुवृत्त्या ङीग्रहणप्रत्याख्याने स्त्रीवाचिन ईकारस्येति
व्याख्याने लक्ष्मीतरौ तरीत्यादिकस्य ईकारस्य स्त्रियामविहितत्वान्नित्यं ह्रस्वत्वं नास्ति नापि वैकल्पिकं । न च ग्रामणीतरस्याभि
मत्रापि स्त्रियाइत्यनुवृत्तेः तथा च लक्ष्मीतरा तन्त्रीतरेत्येव स्यात् इह ङीग्रहणेन स्त्रियाइत्यस्य प्रयोजनविरहादनुवृत्त्यभा

वात्रयाः शेषस्येत्यनेन पाक्षिको ह्रस्वः। सिध्यति ह्येतन्न भिन्नत्वरूपशेषत्वसद्भावात् मैवं दुष्टापत्तेः लक्ष्मीतरेत्यादेरेवेष्टत्वात्
यथाप्यासोपिघादिष्वनया ह्रस्वविकल्पयोः प्रतिषेध इति सौनागैः पठ्यमानत्वात्। ङीतस्य प्रत्याख्यानेन तु उकारोऽस्यैव सिद्धो
तद्वच्चनानार्थे मेलाघवस्यस्पष्टत्वात् ॥ नद्याः शेषस्यान्यतरस्याम् ॥ ङ्यन्तादनेकाचश्चभिन्नः शेषः प्रत्ययेतन याऽथ नैकाचश्च
घादिषु वा ह्रस्वः ब्रह्मबंधुतरा ब्रह्मबंधूतरा स्त्रीतरा स्त्रितरा ॥ उगितश्च ॥ उगित्प्रकृतिका या ङीतस्य घादिषु वा ह्रस्वः विदु
षितरा ह्रस्वाभावपक्षे तसिलादिष्विति पुंवद्भावः विदुष्तरेत्यादि ह्रस्वनिकारस्तु पुंवद्भावोत्र पक्षे वक्तव्यः। विदुष्तरेत्यादि प्र
कर्षयोगात्प्राक् स्त्रीत्वस्याविवक्षितत्वात्सिद्धमित्याहुः तच्चवदंति निर्मूलमेवैतत् तसिलादिष्विति पुंवद्भावस्यैकान्ति
कतायामुत्तरेणानुक्तत्वात् प्रत्युदाहरणमपि दूष्यं: पुंवद्भावस्य पाक्षिकोनिषेधोऽयं विधिर्वा नायः श्रेयसीतरा विदुषीतमे
त्यादित्वदुक्तरूपाणां सिद्धावपि प्रकर्षयोगात्प्रागित्यादिग्रंथस्यासंगत्यापत्तेः उपसंख्यानप्रत्याख्यानपरतया तस्य मास
कारेणाव्याख्यातत्वात् नापि द्वितीयः तसिलादिषु तरप्तमपोः पाठस्य सर्वसंमतत्वात् ततएव सिद्धेः दर्शनीयतरेत्यादेरुदा
हृतत्वाच्च नचहतो विदुषीतमेति स्थिते पुंवद्भावे सति विदुत्तमेति रूपमित्यर्थोनतु विदुषीतमेत्यस्य रूपांतरत्वेपि तात्प
र्यमिति वाच्यं प्रकर्षयोगादित्यादेरसंगतत्वादवस्थ्यात् किंच प्रकर्षयोगादिति ग्रंथः सर्वथाप्यनुपपन्नः घ्यावृत्यहणा
तंदंता तद्धिते विधानर्थमित्युक्तत्वात् स्वार्थद्रव्यलिंगसंख्याकारकाविवक्षानंतरमेव प्रियपकृत्सनप्रकर्षादि विवक्षेति सि
द्धांताच्च लिंगप्रत्ययात्पूर्वं प्रकर्षविवक्षायाप्रयोगात् इति दिक्। वस्तुतस्तु विदुषीतमेति द्वृत्तिग्रंथः स्थितप्रदर्शनमात्रा
र्थः उक्तग्रंथस्य त्वयमर्थः तसिलादिष्विति पुंवद्भावः पक्षे प्रकर्षार्थकतरप्तमपोर्विवक्षायां वक्तव्यः तत्र प्रियपकृत्सनादि
प्रत्ययः प्रवर्तते सौत्रिभक्त्यंत इत्युक्तसिद्धांतात् लिंगप्रत्ययस्य तरवादेः एवमेवोपपत्तेः यस्तत्र प्रत्यापृततरमिति ज्ञापकात्प्रक
र्षोत्कर्षेणात्र संख्याविभाना स्वार्थिकाविधिनर प्तमयोस्त्री क्रीयेते तदा तत्र पुंवद्भावविधानस्य प्रयोजनेनाहित

त्वलिंगाश्रयणानंतरं प्रकर्षविवक्षायास्तवीजाभावादप्रवृत्तेः प्रपंचितं चैतत् उज्ज्वलाहृतेनैवमपि प्रकर्षयोगादिति हलितिग्र
यानुपपत्तितादवस्थ्यं अप्रत्ययस्य रूपमात्रस्यात्ने नोपलक्षितत्वात् यद्वा प्रकर्षोत्थाग्निवत्तगीयस्य स्त्रीत्वस्यात्र बीजाभावाद्वि
वक्षितत्वादित्यर्थः पत्नेनोपसंख्यानेन तरप्तमपोः तसिलादौ परिगणनं प्रत्यावक्षेपादिकं तयाव्यवस्था प्रपतीति व्याख्यानाय
न्यासग्रंथोपि समंजसनीयइति संक्षेपमवधेयम् ॥ ॥ इतिश्रीसिधांतसुधानिधौ बहुस्वरत्नीपेपादे द्वितीयाह्निके ॥ आन्म
हतः समानाधिकरणजातीययोः ॥ महच्छब्दस्यात्वं स्यात्समानाधिकरणे उत्तरपदे जातीयप्रत्यये च परे महाराजः महाबा
हुः महाजातीयः अत्र वार्तिकं अन्यप्रकृतिस्थमहानभूतप्रकृतौ महान्महत्येव तस्मादात्वं न स्यात् उवत्नकथं भवेदत्र
अमहतिमहान् हि हन्तव्यो चौचात्रभूतशब्दोयं तस्मात्स्थितिभूतं विविच्यमानं तन्मन्यंते अयमर्थः अमहान्महान्संप
न्नो महद्भूतश्चद्रमाः अन्यत्राप्यात्वं स्यात् महच्छब्दस्य भूतशब्दस्य च वेद्गादावेकास्मिन्नर्थेऽवृत्तेः सामानाधिकरण्यसत्त्वात् इ
त्याशंक्याह । अन्यप्रकृतिरिति भूतशब्दोऽतिकप्रत्ययो भवनक्रियायाः कर्तरि अमहत्[illegible] नत्तुविकारोऽमहतिविषये हि प्र
त्यन्तो
कृतिरेवकर्त्रीनत्तुविकृतिः संधीभवतिब्राह्मणाःपटीभवंतितंतवइत्यादौ प्रकृतिसंख्याश्रयस्यैववचनस्यदर्शनात् त
द्भवतीमत्र त्वन्निर्दिष्टसामानाधिकरण्यनिर्देशनस्य प्रथमपुरुषस्य दर्शनाच्च तथा च महच्छब्दस्य भूतशब्दसामानाधिकर
णाभावान्नात्वं न चैवं अमहती महती संपन्ना महद्भूता ब्राह्मणीत्यत्र पुंवद्भावोपि न स्यात् हैयधिकरण्यादित्याशंकनेयं व
चिति किंच विकृतेरपि कर्तृत्वं दृष्टत्पनप्रवर्णपिंडः कुंडले भवत इति विकृतिसंख्याश्रयद्विवचनदर्शनात् सूत्राय
संपद्यते यवागूरित्यादौ स्त्रीत्वपि संपद्यमाने च तृष्णा विकाराद्दर्शनाच्च असंवो ब्राह्मणाः संघः संपद्यते अपटस्तंतवः पटः
संपद्यतइत्यादेर्दर्शनाच्च तथा च यदि महद्भूते प्रत्ययविकृतेः कर्तृत्वमाश्रित्य सामानाधिकरण्यात्पुंवद्भावस्तुच्यते तदा
गोमतीभूतेति त्रातिप्रसंगः महद्भूतश्चन्द्र आत्वापत्तिश्च तत्र पुंवद्भावं साधयति अमहतीति महच्छब्दस्यैवाभ्महत

ऽपि वर्तमानत्वाद्भूतशब्देन सह सामानाधिकरण्योपपत्तेः प्रकृतेर्विकाररूपापत्तिविवक्षायां च्विप्रत्ययोपपत्तेः तस्य परिणा-
मविषयत्वात् एकस्यार्थस्य प्रकृतिविकारात्मकतयाऽभयात्मकत्वविवक्षायां परिणामसंपत्तेः तदुक्तं जहद्धर्मान्तरं पूर्वमु-
पादत्ते यदापरं तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते अवस्थाद्वयस्याभेदविवक्षायां तु च्विप्रत्ययो न भवति तेन तदा भवति
घटो भवतीति तदुक्तं सर्वावस्थामपि जहत्त्वं स्वशान्तपमन्तरां संमूर्छित इवार्थान्तर्जायमानोऽभिधीयते एवं च विकारस्य
कर्तृत्वाद्भूतशब्देन सामानाधिकरण्यात् च्विवद्भावोपपत्तिः नन्वेवमात्वमपि ड्वीरमत आह निवर्त्यमिति लक्षणानुरोधात्सामा-
नाधिकरण्यवैयधिकरण्यविवक्षाव्यवस्था महद्भूतेत्यत्र विकारस्य कर्तृत्वं गोमतीभूतेत्यत्र प्रकृतिभागस्येति वैयधिकर-
ण्यान्न च्विवद्भावः एवं महद्भूतश्चन्द्रमा इत्यत्रापि संघीभवंति ब्राह्मणा इत्यत्र प्रकृतेरेव कर्तृत्वं च्वेस्तस्य गतिसंज्ञतया क्रियावि-
शेषकत्वात् संघीभवनरूपायां विशिष्टक्रियायां ब्राह्मणानां तथात्वात् संघः संपद्यत इति वाक्ये तु जन्मन्येव संघः कर्ता अ-
त एव व्याकरणस्य सूत्रं करोतीत्यत्र वाक्ये करोतिक्रियामात्रापेक्षं सूत्रस्य कर्मत्वं व्याकरणं सूत्रयतीति वृत्तौ तु सूत्रविशिष्ट-
करोतिक्रियापेक्षं व्याकरणस्यैव कर्मत्वं तेन वृत्तौ प्रकृतिसंख्याश्रयं वचनं वाक्ये तु विकृतिसंख्याश्रयमिति वैषम्यं एवं च म-
हद्भूतश्चन्द्रमा इत्यत्र प्रकृतेरेव कर्तृत्वमवगम्यते महद्भूतेत्यत्र तु विकृतेरिति न दोषः अयं तु विशेषः विकृतेः कर्तृत्वे प्रकृ-
तिराक्षेपलभ्या। प्रकृतेस्तु कर्तृत्वे विकृत्यपेक्षेति। ब्रह्मवतीत्यत्र प्रकृतेरेवमित्यस्यैव कर्तृत्वे सर्वत्र शाब्दशक्तेः प्रयोगा-
नुसारेणाकल्प्यत्वात् आक्षेपे तु परिहारेणेतरसद्भावात् च्विवद्भावविधानस्यापि प्रसंगाच्चापेक्ष्यायो नोक्तमित्यप्यदेतत्। तद्यथा। न
नु लक्षणशास्त्रे निपातोक्तपरिभाषया सन्महदित्यादिना प्रतिपदोक्तोऽयं समासः लक्षणैवायं विधीयते। महद्भूत इत्यत्र तु कुगति-
प्रादय इति सामान्यलक्षणेन समासविधानान्नेति चेन्न महावाङ्गिरित्यस्यासिद्धेः तत्कथं नात्वमित्यत आह शेषवचनात्तयोसौ
असमासे भावात्तु तो बहुव्रीहिः तस्मान्निष्पत्तितस्मिन्प्रधानतो बाध्यतो वृत्तिः तथा हि शेषग्रहणमन्यपदार्थग्रहणं वा बहुव्री-

हि विधावस्तु श्चन्यतरेणापीष्टसिद्धेः। उभयोपादानात्तु तस्यापि प्रतिपदोक्तत्वमेवेति महावाडरिति सिद्धं। यद्वा गौणमुख्य
न्यायेन महद्भूतश्चन्द्रमा इत्यत्र नात्वं महत इति विशिष्टशब्दस्वरूपोद्देशेन तद्विधानात् पुंवद्भावविधाने तु महच्छब्दस्य साक्षादनुपा
दानान्महद्भूता ब्राह्मणीति सिद्धं अमहति महत्त्वोपचारेण वृत्तेरत्र महच्छब्दस्य गौणत्वात् गौर्वाहीक इतिवत् नन्वेवमादि
ष्टत्र शब्दविशेषानुपादानाद्भवदित्यत्र गौणमुख्यन्यायेन प्रग्टस्य संज्ञावारणं भाष्यकृतोनुपपन्नमिति चेत्सत्यं महद्भूते
ष्टत्र स्त्रीत्वस्य मुख्यत्वात्पुंवद्भावः गोमतीभूतेत्यत्र तु प्रकृतेः कल्पितत्वाश्रयणाद्गोमतीशब्दस्य भूतसामानाधिकरण्येनास्तीति
न पुंवद्भावः गोभवदित्यत्र तु ओदंतस्य निपातस्य गौणार्थत्वात्प्रग्टस्य संज्ञा शिष्टेन तैर्व विचारितमिति दिक्। महदात्वे घा
सकरविशिष्टेषूपसंख्यानेन पुंवद्वचनेन च नानाधिकरणार्थं। असमानाधिकरणादुभयोरप्रधानभावारंभः महत्या घासो म
हाघासः एवं महाकरः महाविशिष्टः अत्र केचित्। अत्रावयेयं चकारः तेन महतो घासो महाघास इत्यत्र पुंवद्भावाभावे
प्यात्वं भवत्येवेत्याहुः वस्तुतस्तु पुंवद्भावस्य संनियोगेनैवात्वस्योपादानत्वात् भाष्यस्वारस्यात् समुच्चये चकारः पुंवद्भाव
संनियोगशिष्टं चात्वं तदभावे न भवतीति कैयटः॥ अष्टनः कपाले हविषीति वक्तव्यं। कपाले हविषि समुदायार्थे अष्टन्
शब्दस्यात्वं भवतीत्यर्थः अष्टाकपालं चरुं निर्वपेत् अष्टसु कपालेषु संस्कृत इति तद्धितार्थविवक्षायां तद्धितार्थेति समासः
ततः संस्कृतं भक्षा इत्यण्। द्विगोर्लुगनपत्य इति तस्य लुक् हविषीति किं अष्टकपालं ब्राह्मणस्य समाहारे द्विगुः। पात्रादिभ्यस्त्वात् स्त्री
त्वं गवि च युक्ते उपसंख्यानं अष्टागवेन शाकटेन अष्टौ गावो युक्ता अस्मिन्निति त्रिपदो बहुव्रीहिः तद्धितार्थोत्तरपदे निवृत्त
तो द्विगुः गोरतद्धितलुकीति टच् ततश्चात्वं। तेनैव युक्तार्थप्रतीतेर्युक्तशब्दस्य निवृत्तिः यद्वा अष्टगवमिति समाहारे द्विगुः
साहचर्यादभेदोपचारात्तु युक्ते शाकटे वर्तमानेऽष्टगवशब्देऽनेनात्वं युक्त इति किं अष्टगवं ब्राह्मणस्य अष्टानां गवां समा
हार इत्यर्थः॥ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः॥ एतयोरात्वं स्यादशीतीति भिन्नसंख्यायां परतो न तु बहुव्रीहौ द्वादश द्वे

यं द्व्यधिका दशेति मध्यमपदलोपी तत्पुरुषो वा द्वाविंशतिः अष्टादश अष्टाविंशतिः बहुव्रीहौ तु द्वित्राः अशीतौ तु द्व्यशीतिः प्रा
क्शतादिति वक्तव्यं। नेह। द्विशतं द्विसहस्रं अष्टशतमष्टसहस्रं। अत्र केचित् द्वादशेत्यादौ समाहारद्वंद्व एव अन्यथा राज
न्यवचनद्वंद्वेंधकवृष्णिष्वित्यतो द्वंद्व इत्यनुवृत्तौ संख्येति पूर्वपदप्रकृतिस्वरासिद्धेः विस्पष्टादेराकृतिगणत्वस्वीकारे च गौर
वात् एकविंशतिरित्यादौ ङीष्वंतत्वलिंगस्य लोकाश्रयत्वान्नेत्याहुः अन्ये तु बहुव्रीहौ संख्येये इति सूत्रे संख्यायास्तत्पुरुषस्यो
पसंख्यानमिति वार्तिकव्याख्यायां एकाधिका विंशतिरेकविंशतिरिति भाष्यकृतोक्तत्वात् समासभेदेन स्वरभेदस्य चेष्ट
त्वादित्याहुः॥ त्रेस्त्रयः॥ पूर्वविषये त्रिशब्दस्य त्रयसित्यादेशः स्यात् त्रयोदश त्रयोविंशतिः बहुव्रीहौ तु त्रिदशाः सुज
र्थे बहुव्रीहिः अशीतौ तु त्र्यशीतिः प्राक्शतादित्येव नेह त्रिशतं त्रिसहस्रं॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां॥ द्व्यष्टनो
स्त्रिशब्दस्य प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारिंशत् अष्टाचत्वारिंशत् त्रिचत्वारिं
शत् त्रयश्चत्वारिंशत् एवं पंचाशत्षष्टिसप्ततिनवतिषु अशीतेः पर्युदासात्प्राक्शतादित्युक्तेश्च द्व्यष्टनोरपि ग्रहणार्थं
सर्वेषामित्युक्तिः अन्यथा संनिधानात् त्रेरेवात्रानुवृत्तिः स्यात् वस्तुतस्तु तयोरप्यनुवृत्त्या सिद्धं न च त्रे[स्त्र]य इत्यत्रापि तदनुवृ
त्तौ तयोरपि त्रयसादेशापत्तिः मंडूकप्लुत्याऽसमाधानात् त्रेस्त्रय इत्यस्यापि द्व्यष्टन इति सूत्रेण सह पाठो वा॥ हृदयस्य हृल्ले
खयदण्लासेषु॥ अणि परे लेखादिषु चोत्तरपदेषु हृदयस्य हृदादेशः स्यात् हृदयं लिखतीति हृल्लेखः कर्मण्यण् लेखस्य
णांतस्य ग्रहणादजंतेन हृदयलेखः हृदयस्य प्रियं हृद्यं हृदयस्येदं हार्दं हृल्लासः ननु लेखस्याणंतत्वेन संग्रहात्पृथक्
उपादानं व्यर्थमिति चेन्मैवं उत्तरपदाधिकारे तदंतविधिर्नास्तीति ज्ञापनार्थत्वात् तेन घरूपेति ह्रस्वो गौरितरेत्यत्रैव ननु
कुमारीगौरितरेति विग्रहे कुमारगौरितरेत्यत्र किंतु पुंवद्भाव एव न चैवं खित्यनव्ययस्येति ह्रस्वोऽपि खित्येव परे स्यान्न तु
खिदंते कालिमन्य इत्यादाविति वाच्यम् खिन्मात्रे परे ह्रस्वाहस्य पूर्वं स्यासंभवात्तत्र तदंतविधिप्रवृत्तेः न च तेन यथार

त्ति॰

मत्रपेटप्रवत्वेशिपरेङ्यस्ययोगपत्त्वमस्तीतिवाच्यं । तत्रापिशापायवधानात् एकादेशस्यापिपूर्वविधौ स्थानिवद्भावात् प्र
न्तवपसेतिप्रतिषेधसामर्थ्याच्च अन्यथाऽव्ययप्रकृतिकस्यत्विन्प्रत्ययस्याऽप्रसिद्धत्वात् प्रसक्तेरेवाभावात् ॥ वाशोकष्यञ्
रोगेषु ॥ हृदादेशोवास्यात् हृच्छोकः सौहार्द्यं हृद्रोगः उभयपदवृद्धिः हृद्रोगः पक्षे हृदयशोकः सौहृदय्यं हृदयरोगः
हृच्छब्देनसिद्धेपीदंप्रपंचार्थं ॥ पादस्यपदाज्यातिगोपहतेषु ॥ पदेत्यविभक्तिकोनिर्देशः पादस्यपदेत्ययमदन्तादेशः आ
जादिषूत्तरपदेषु पादाभ्यामजतिपदाजिः ताभ्यामततिपदातिः अज्यतिभ्यांपादेचेत्यौणादिकः इण् निपातना
द्वजेर्वीभावः पदगः पादेनोपहतंपदोपहतं पदादेशोन्तोदात्तनिपातनंपदोपहतंतांथे तृतीयाकर्मणीतिपूर्वपद
प्रकृतिस्वरत्वे तेनपूर्वपदंन्तोदात्तत्वंसिद्धं उपदेशिवद्भाववक्तव्यः तेनोपदेशावस्थायामेवान्तोदात्तत्वेतदुत्तरेसति
शिष्टेनसमासस्वरेणवाधाम्यदाजिः पदातिरित्यत्रसमासान्तोदात्तत्वं ॥ पद्यत्यतदर्थे ॥ पादस्यपदादेशःस्यात् यतिपरे पा
दौविध्यन्तीतिपद्याःशर्कराः विध्यत्यधनुषेतियत् अतदर्थेकिंपादार्थमुदकंपाद्यं पादाभ्यांवारिणीतितादर्थ्येयत् इके
चरतावुपसंख्यानं पादाभ्यांचरतिपदिकः पर्पादित्वात्ष्ठन् ॥ हिमकाषिहतिषुच ॥ उक्तंस्यात् पद्धिमं पत्काषी पद्धतिः
॥ ऋचःशे ॥ शसेकदेशस्यशस्यशेइत्यनुकरणं । ऋक्शब्दस्यापिपादार्थकस्यपादशब्दस्यपदादेशः शसिपरे गायत्रीपच्छः
शंसतिपादंपादमित्यर्थः ऋचःकिंपादशःकार्षापणंददाति ॥ वाघोषमिश्रशब्देषु ॥ पदादेशोवास्यात् पद्घोषः पन्मि
श्रः पच्छब्दःपक्षेपादघोषइत्यादि निष्केचोपसंख्यानं पन्निष्केण पादनिष्केण ॥ उदकस्योदःसंज्ञायां ॥ उदकस्यउदादे
शःसमुदायस्यसंज्ञात्वे उदवोषःसाटथणानुक्रमस्यसंज्ञेयं संज्ञायामुत्तरपदस्यचेतिवक्तव्यं क्षीरोदःलोहितोदः ॥ पेषं
वासवाहनधिषुच ॥ एष्वुदादेशःस्यात् उदपेषंपिनष्टि । स्नेहगोपिवञ्चनिणमुल् उदवासः उदवाहनः उदधिर्घटःक
र्मण्यधिकरणेचेतिकर्मण्युपपदेघःकिः समुदायस्यसंज्ञात्वाभावेएणसिद्धं ॥ एकहलादौपूरयितव्येऽन्यतरस्यां ॥ असंयोगा

दोहरणीयवा विभुत्तरपदेऽन्यतरस्यां वा स्यात् उदकुंभः पक्षे उदककुंभः असंयोगेति किं उदकस्थाली सरायितत्वेऽपि उदकप
र्वतः ॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च ॥ एषूत्तरपदेषूदकस्य वा स्यात् उदमंथः द्रवद्रव्यसंस्कृताः सक्तवो म
न्थः तृतीयेति योगविभागात्समासः उदौदनः स्रजतिशिशिरस्तोदश्रेणीमयैरुदसक्तुभिः उदबिंदुमयमौक्तिकमेउ
नेते इहहिसमये संदेहेऽषवजं ... उदवज्रनामितिश्रीहर्षः पक्षे उदकमंथ इत्यादि ॥ इको ह्रस्वोऽङ्यो गालवस्य ॥ इगन्तस्या
ङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे गालवग्रहणं पूजार्थं विकल्पस्य प्रकृतत्वात् ग्रामणिपुत्रः पक्षे ग्रामणीपुत्रः इकः किंउ
घापतिः अङ्यः किं गार्गीपुत्रः न च लाबुकर्कन्धुदम्भ्वो फले इति विग्रहे अलाबुकर्कंधुदम्भुफले इत्यत्र समुदायस्य ष
ष्ठ्यन्तपदत्वात्तदन्तस्यैकस्यैव ह्रस्वः स्यान्न तु सर्वेषामिति चेन्न तस्य उत्तरपदमात्रे इति वक्तव्यत्वात् यद्वा आद्ययोर्द्वंद्वानंत
रं तृतीयस्य द्वंद्वः ततः फलशब्देन षष्ठीसमासः न चैवं दम्भूशब्दस्य पूर्वनिपातापत्तिः राजदंतादित्वात् यद्वा अन्त्यस्य
फलशब्देन षष्ठीसमासं कृत्वा ततो द्वितीयेन द्वंद्वः ततस्तृतीयेनेति बोध्यं इयङुवङ्भाविनामव्ययानां च प्रतिषेधो वक्तव्यः
श्रीकुले भ्रूकुले काण्डीभूते कुण्डीभूते हलकुले अतस्य निपातत्वादव्ययं च अभ्रुकुंसादीनामिति वक्तव्यं भ्रुकुंसः भ्रुकु
टिः पक्षे भ्रूकुंसः भ्रूकुटिः स्त्रीवेषधारी नटो भ्रुकुंसः भ्रुवा कुंसो भाषा शोभा वा यस्येति व्युत्पत्तेः भ्रुवः कुटिः कौटिल्यं यद्वा
भ्रुकुंसादौ इकोऽकारादेशो भवतीत्यर्थः अप्रत्ययविभक्तिकनिर्देशेन प्रकारस्य विधानात् इदं चाप्यपरमाह इत्यादिना भाष्ये स्प
ष्टम् भ्रकुटिः भ्रकुंसः ॥ एक तद्धिते च ॥ एकशब्दस्य ह्रस्वः स्यात्तद्धिते परे उत्तरपदे च एकस्या आगतं एकरूप्यं एकमयं
एवमेकत्वमेकेनैव गुदाहार्यम् असहायवाचिनो गौणवचनत्वाभावान्न तलादि तस्याः पुंवत्त्वे एकस्याः शाटी एकशा
टी एकक्षीरं एकशाटीति कर्मधारये तु सामानाधिकरण्यात्सिद्धं कोपधप्रतिषेधेन तद्धितद्वयग्रहणमित्युक्तत्वात् ॥ ङ्यापोः
संज्ञाछंदसोर्बहुलं ॥ ह्रस्वः स्यात् रेवतिपुत्रः क्वचिन्नादीयोषः छंदसि यथाक्रमादिदाक्वचिन्न फाल्गुनीपौर्णमासी ॥

नेच॥ङ्याप्योर्वा ह्रस्वः [illegible] ग्रजत्वं रोहिणित्वं॥ इष्टकेषीकामालानां चिततूलभारिषु॥ इष्टकादीनांक्रमेण चितादिषूत्त
रपदेषु ह्रस्वः स्यात् इष्टकचितं इषीकतूलं मालभारी पदाधिकारत्वात् तदन्तविधिः पक्केष्टकचितं मुञ्जेषीकतूलं उत्पलमा
लभारी नचोत्तरपदाधिकारेण तदन्तविधिर्नास्तीति लेखग्रहणेन ज्ञापितत्वात् कथमेतदितिवाच्यं उत्तरपदेन तदन्तविधिर्ना
स्तीति तद्यथा पूर्वपदेन तस्मात् तेनचितादयेनेऽउत्तरपदे इत्यर्थाभावादिष्टकादिनि चित्तमित्यादौ न ह्रस्वः॥ खित्यनव्ययस्य॥
खिदन्तप्रत्यये तेऽउत्तरपदे पूर्वस्य ह्रस्वः स्यात् अनव्ययस्य कालिम्मन्या हरिणिम्मन्या आत्ममानेति मन्यतेः खश्प्रत्ययेच सार्वधा
तुकत्वात् श्यन् अनव्ययस्य किं दोषामन्यमहः दिवामन्या रात्रिः ननु मुमागमे कृते ह्रस्वान त्वं नास्ति सत्ये ह्रस्वान्तस्य मु
मितिवक्तव्यत्वात् यद्वा मुम्ह्रस्वयोः सहैवविधानात् मुमविधौ च कारस्यानुपादेयत्वात् वस्तुतस्तु ईकोह्रस्व इति सूत्रान्म
विधौ ह्रस्वइत्यनुवर्तनीयेऽचितीति सप्तम्या ह्रस्वस्येति षष्ठी प्रकल्पेते तस्मिन्नितिनिर्दिष्टे पूर्वस्येत्यत्र केः पद्धाभूत पूर्वं ग
तिविज्ञाने ध्यारंभसामर्थ्यात् नन्वकार्यकालपक्षे ह्रस्वविधाववृ[illegible]प्यस्यापस्यानेपवनादनजेन स्यापि ह्रस्वः नचवास्त्र
म इत्यादावतिप्रसंगः इकस्त्यनुवृत्तेः नचखट्वम्मन्य इत्यादावव्याप्तिः ङ्याप्योरित्यस्मादाप् ग्रहणस्याप्यनुवृत्तेः मैवं कीला
लपमन्य इत्यादावव्याप्तेः॥ अरुर्द्विषदजन्तस्य मुम्॥ एषां मुमागमः स्यात् खिदन्ते उत्तरपदे न त्वव्ययस्य अरुन्तुदः विधन्तु
दोरितितुदःखश् अमिकृते संयोगान्तलोपः एवंद्विषन्तपः द्विषत्परयोस्तापेरिति खश् खचि ह्रस्व इत्युपधाह्रस्वः
जनमेजयः एजयतेःखश् विधुन्तुद इत्यादिष्वनव्ययव्याहृतिः पूर्ववत्॥ इच एकाचोऽम्प्रत्ययवच्च॥ इजन्तस्यैकाचोऽमा
गमःस्यात्सच द्वितीयैकवचनाम्प्रत्ययवत् स्यात् खिदन्ते परे गाम्मन्यः औशेतामुशासौ तिस्यामंवल्लिपेमन्यः स्त्रीमन्यः वाम्शासो
रितीयङ् विकल्पः तदभावे प्रथमयोरितिपूर्वसवर्णदीर्घः नरंमन्यः ऋतोडिसर्वनामस्थानयोरितिगुणः भुवंमन्यः
उवङ् नन्वेके अमः प्रत्ययवदतिदेशो आत्वपूर्वसवर्णगुणयङुवङादेशाःप्रयोजनं इति ननु प्रत्ययवदित्यतिदेशान्न

६२

लुप्तसमासाश्रयत्वात्

सि॰
प॰
८८

९६

मयाग्रयं कार्यमत्तत्र आवश्यर्वसवर्णादीर्घो ऽलंभौतयोर्विशेषा सामान्यातिदेशेचविशेषातिदेशाभावादितिचेन्न
द्वितीयैकवचनवदित्यतिदेशात् यद्वाग्रमिसेकशेषनिर्देशः एकम् अरेविधेयसमर्पके अपरंत अम्प्रत्ययवद्भावातिदेशप
कार्यप्रतियोगिसमर्पके इतिनदोषः नचैवंसहविवक्षाविरहादेकशेषानुपपत्तिः प्राक्रियादशायांतदभावेप्येकशेषप्र
तिसिद्धावात् ध्रियमाणत्वानेमन्यतेइत्यर्थग्रहेतत्त्रिमन्यकुलमित्येवभवति नचश्रीशब्दस्यनपुंसकत्वेमानाभावः त्रिम
न्यमित्येवभवितव्यमितिभाष्यस्यैवमानत्वात् ह्रस्वोनपुंसकइतिह्रस्वः स्वमोर्नपुंसकादितिसोर्लुक् नवासिद्धंबहिरंग
मित्यंतरंगेलुकिकर्तव्येबहिरंगासामोःसिद्धत्वं उत्तरपदाधिकारेतदग्रहणेः अन्यथाहिबंतपइत्यादौसंयोगांतलोपानुप
पत्तेः नचैवंगोमन्यइत्यादावपिसुपोधातुप्रातिपदिकयोरितिलुगापत्तिः येननाप्राप्तिन्यायेनतद्बाधात् मध्येपवादन्याया
त् ॥ वाचंयमपुरंदरौच ॥ वाक्पुरोरमंतत्वंनिपात्यते वाचंयमोमौनव्रतीनचाजंतत्वान्मुमागमापत्तिः तदपवादेनामा
धितत्वात् यस्तुशमादिनाविचोव्रतएवविहितत्वात् नवदतितत्रवाम्यामः केवानवाचंयमाइत्यादिकंत्वपवादात् वा
चियमोव्रतइतिसूत्रसर्वयोर्दारिसहोरितिचवचनं खविड्नस्वइतिघेनस्योपधायाह्रस्वः ह्रस्वदन्तस्तु खच्प्रत्ययोप्येवंनिपात्य
तो निपातनबलादेवव्रतविषयत्वलाभात् अथवात्रवाचंयमोव्रते पुरंदरश्चेत्येवसूत्रयता सर्वथापिलाती पेवाचियमो
व्रतइतिसूत्रेस्याज्यसः सर्वयोर्विपत्रपुरिदारोरितिलुकां सर्वसहेरित्येवसूत्रणीयमित्याह ॥ कारेसत्यागदस्य ॥ मुम्स्या
त् संस्कारः समयकरणं अगदंकारोवैद्यः अस्तोरुपसंख्यानं अस्तुंकारोऽभ्युपगमः
मः तिङंतप्रतिरूपकमव्ययमेतत् भक्षस्यछंदसुपसंख्याने नस्यनेभक्षंकारस्य यागशेषद्रव्यभक्षणात्मकत्वरिर्थः ये
नोर्भव्यायामुपसंख्याने पेतुंभव्या भव्यगेयेतिकर्तरियत् विशेषणसमासः भविष्णोतीयेतुरित्यर्थः अयेन्तुंयेनुभव्येति
त्रुयादिनिगोतमस्यमोतत्राषित्वान्नेतिहरदत्तः इत्येनभ्याशस्योपसंख्याने अनभ्याशमित्यः अनभ्याशोहराभित्यम

स्येति समासः हृदायविहृल्लेखयद्यत्यर्थः श्येनतिलस्यपातेनेति णः काप् च लोकस्य पृणे उपसंख्याने लोकंपृणः लोकस्य पूरक इत्यर्थ इति
कैयटः हृदयं दत्तो हृल्लाघ्रीणाति इगुपधत्वात्कः यातू नामने कायत्वाडुकस्य लाभः भ्राष्ट्राग्न्योरिंधे उपसंख्याने भ्राष्ट्रमिंधः कर्मण्यण
वत्र्नेतेन षष्ठीसमासो वा गिलेऽगिलस्योपसंख्याने तिमिंगिलो मत्स्यभेदः गिरतेर्मूलविभुजादित्वात्कः अगिलस्येति किं गिल
गिलः गिलगिलु चेति वक्तव्यं तिमिंगिलगिलः तिमिगिलगिल इति समासः वस्तुतस्तु तिमिंगिले गिलतीति खुनपत्यासिद्धमि
ति कैयटः नुवा प्रथमगीलशब्दोत्तरं समापत्तिः अगिलस्येति निषेधात् परापिकारत्वान्नदंतविधिग्रहणे: उष्णाभद्रयोः कर
णे इति वक्तव्यं उष्णंकरणं भद्रंकरणं हृतो यराजभोजकुलमेरुभ्यो दुहितुः पुत्रट् चेति वक्तव्यं हृत्पुत्रीत्यादि टित्वान्ङीप् प
शेष्ट्र नदुहितेत्यादि वस्तुतस्तु ण्याङ् खादौ पुत्रशब्दस्य पाठान्ङीनैव सिद्धं ङीपि कृते उदात्तनिवृत्तिस्वरेणोदात्तः ङीनैतेन तत्पु
रुषेपि समासस्वरेणान्तोदात्त एवेति स्वरभेदस्याप्यभावात् नवतत्पुत्रशब्दपाठ एव निर्मूल उक्तवार्त्तिकारंभादिति वाच्यं कु
र्वन्तिडवीपति पुत्रिमर्वे पुत्रीवहर्षितदयेननेतीत्यादिविरोधात् आत्मजतनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं
सर्वे इत्यमरविरोधाच्च ॥ श्येनतिलस्य पाते ञे ॥ समस्यात् श्येनपातो स्यां वर्तते श्यैनंपाता मृगया तिलपातो स्यां तैलंपाता स्वधा
यञ्जः मास्या क्रियेति ज्ञः ॥ रात्रेः कृति विभाषा ॥ रात्रिंचरः रात्रिचरः रात्रिमटः रात्र्यटः अखिदर्थमिदं खित्ति तु पूर्वविप्रतिषेधे
नाहर्द्विषदिति नित्यो मुम् रात्रेरप्राप्ते विभाषा प्राप्ते नित्यो विधिरिति भाष्यकारः ॥ नलोपो नञः ॥ नञो नस्य लोपः स्यादुत्तरपदे
ब्रचटः नञिति समासः न तु वादिषु निरनुबंधकमेव नकारं पठित्वा तत्थैवात्र निर्दिश्यतां न च कर्णाप्ट्रवाप्रवत्पादावतिप्र
संगः स्तुन्यतिपदेनाणवस्यासिद्धत्वान्नत्वानापायादिति वाच्यं प्रसज्यतिपदेन स्यानर्थकत्वात् नकारस्वरूपत्वाभावाच्च इति चेन्न मा
मनप्रवृत्त्यादावतिप्रसंगात् ननु तथापि सेणप्रवृत्यप्र्याति प्रसंगाडुर्वीर इति चेन्न समने प्रत्यये जित्वस्य हाडिसवर्यो घरिता
र्थत्वात् निपातेवतस्यानन्यथासिद्धत्वात् अन्यत्र तैर्वोक्तं नञो नलोपे वक्षेपेतिस्त्रुपसंख्याने अवक्षेपो निंदा अपवसिवे वं

जाल्म प्रकारोपि वैवं जाल्म जाल्मपदसमभिव्याहारादविदाप्रतीतिः ॥ तस्मान्नुडचि ॥ लुप्तनकारान्नञ उत्तरपदस्याऽजादेर्नुडागमः स्यात्
अनश्वः न च नुड्वीमेवास्तु अमस्तु इति वाच्यं निर्दिष्टपरिभाषया नञ एव नुडापत्तेः ननु अगो वास्तु किं त्वान्नञेनावयवत्वेन रूपभेदाभा
वात् एवं च तदोः सःसावनन्त्ययोरित्यत्र तदोरित्यपनीय तोरित्येव वक्तव्यं त्वदः परादित्वेपि तच्छब्दावयवत्वाददनेषः करोतीत्या
दौ नकारस्य सत्वं मा भूदिति तोरित्यपहाय तदोरित्युक्ते त्वकेकृत्वापूर्वीनत्वसीकारेतउक्तानि प्रसंगाभावात्तोरित्येव वाच्ये ला
घवात् सत्यं अनुषण इत्यादौ न लोपः प्रातिपदिकान्तस्येति न लोपापत्तेः वचनसामर्थ्यात्समाधानेपि नुडः स्मृटोडवीरत्वात् तस्मा
त्परादित्वलाभार्थं तस्मादित्यावश्यके तस्मादित्युत्तरस्येति परिभाषया अचीति सप्तम्याः षष्ठीत्वकल्पने अजादेरुत्तरपदस्येत्यर्थ
लाभात् कैयटस्तु नुटः परादित्वपक्षेपि न दोरितिसूत्रे तोरित्येवास्तु न च तस्य सत्वापत्तेः असिद्धपरिभाषया समाधानादित्याह
॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या ॥ एषु नञो नकारलोपो न स्यात् न भ्राजते न भ्राट्
पादिति पारस्करो अस्मात् क्विप् प्रत्ययः वेदा इत्यपि सत्वं नेतः नञः सत्या नासत्याः सत्या इत्यर्थः न मुंचति नमुचिः न कुलमस्य नकुलः न
खमस्य नखः न स्त्री पुमान् नपुंसके स्त्रीपुंसशब्दस्य निपातनात् पुंसकेत्यादेशः पुंलिंगोप्ययं सनपुंसको भवतीति भाष्यप्रयोगात् न
क्षरतीति नक्षत्रं क्षीयतेर्वा नक्षत्रे क्षरतेरस्य निपातनात् तत्रादेशः न क्रामतीति नक्रः क्रमेर्डः न विद्यते अकं दुःखमत्र नाकः ॥ एकादि
श्चैकस्याडुक् ॥ एकशब्दस्यादिर्यस्य तादृशो नञ् प्रकृत्या एकस्याडुगागमश्च एकेन न विंशतिः एकान्नविंशतिः योनुनासिक
इति नत्वं तदभावपक्षे एकाद्विंशतिः ननु डुगेवागमोस्तु सवर्णदीर्घेणेष्टसिद्धेः मैवं पररूपापत्तेः नन्वाडुट् इति पठित्वा
परादिरेवास्तु एवं चैकस्येत्यपि न वाच्यं नञ आगामिनः प्रकृतत्वात् तदंतत्वेन परत्वरूपप्रसक्त्यभावाच्चेति वाच्यं अननुनासिकत्वान्नु
पपत्तेः तस्य पदान्तविषयकत्वात् अन्यथा अप्प्रभावभानीत्यादावपि प्रसंगात् न वाऽनुडेव क्रियतां इति वाच्यं दकारविशिष्टरूप
स्यापीष्टत्वात् वस्तुतस्तु अकारोच्चारणसामर्थ्यादपरत्वपि न च सवर्णदीर्घस्याप्यनापत्तिः येन विधिस्तदन्तस्य उपदेशानर्थक्यात् सविधेय

बोध्यं तेषस्मन्नविषये निमित्तमेव नासौ वाप्यतइत्यभ्युपगमात् तस्मादङ्गो वास्त्विति भाष्यं ॥ नगोऽप्राणिष्वन्यतरस्यां ॥ प्राणिभि
न्नवाचकेनगशब्दे नञ् प्रकृत्या वा स्यात् नगाः पर्वताः अगो वा अप्राणिषु किं अगो वृषलः शीतेन ॥ सहस्य सः संज्ञायां ॥ उत्तरपदे
सपलाशं संज्ञायां किं सहयुध्वा सहस्य हलोपवचनं सादेशो हि स्वरे दोषः निपातस्वरेण सहशब्दस्याद्युदात्तत्वं शेषनिघातेन ह
काराकारोत्तरोदात्तः उभयस्थानिकस्य सादेशस्यानन्तरमान्तस्वरितत्वं स्यात् हकारलोपे तु सशब्दस्योदात्तत्वं सिध्यतीत्यर्थः भाष्यका
रास्तु सइत्याद्युदात्तं निपातनं कर्तव्यं तेन स्वरितस्याप्यप्रसङ्गः उपदेशिवद्वचनं कर्तव्यं तेनैतदाद्युदात्तत्वं सपुत्र इत्यादौ श्रूय
ते बहुव्रीहौ हि पूर्वपदप्रकृतिस्वरविधानात् साक्षि सपशुवधमित्यव्ययीभावे समासान्तोदात्तत्वमेव सतिशिष्टत्वात् ॥ ग्रन्थां
ताधिके च ॥ अनयोरर्थयोः सहस्य सः स्यादुत्तरपदे सम्मुहूर्तं ज्योतिषमधीते मुहूर्तान्तमित्यर्थः सद्रोणा खारी द्रोणाधिकेत्य
र्थः ननु ग्रन्थान्तेऽव्ययीभावे चाऽकाले इत्यनेनैव सिद्धं सत्यं कालोत्तरपदग्रन्थार्थत्वात् सकाष्ठं सकलं ज्योतिषमधीते कालवि
शेषवचनात्काष्ठादिशब्दानोऽपवादान्नदं तत्रेयेह तिः अन्तवचनेऽव्ययीभावः तत्र चाऽकाल इति निषेधात् बहुव्रीहौ तु वक्ष्य
माणो विकल्पः परत्वात् ॥ द्वितीये चानुपाख्ये ॥ उपाख्या साक्षादाकारः तद्विषयत्वमनुपाख्यत्वं अनुमेयत्वमिति यावत् अनुमे
ये द्वितीये सहस्य सः स्यात् साराक्षसीका निशा तेन सहेति तुल्ययोगे इति बहुव्रीहिः राक्षसी साक्षादनुपलभ्यमाना निशयानुमी
यते ॥ अव्ययीभावे चाकाले ॥ कालभिन्ने उत्तरपदे सहस्य सः स्यात् च[illegible]णयुगपदे हि सचक्रं सदृशः सख्या ससखि इत्यादि अका
ले किं सहपूर्वाह्णं ॥ वोपसर्जनस्य ॥ उपसर्जनस्य सहस्य सो वा स्यात् सपुत्रः सहपुत्रः ननु सहयुध्वेत्यादौ बहुव्रीहिनिर्देशात्त
मायात्तेऽपि सहयुध्वा प्रियसहेत्यादावतिप्रसङ्गः नैव सहयुध्वेत्यत्र तावन्न दोषः पदद्वयस्यापि यत्रोपसर्जनत्वं तस्यैवात्रोपादानात्
बहुव्रीहाविति निर्देशवैयर्थ्यात् तेन सहयुध्वेत्यत्र तावत्तो बहुव्रीहित्वाभावात् प्रियशब्दस्य सहशब्दापेक्षयोत्तरपदत्वाभावात्
अतिप्रसङ्गापादानमप्यभ्युपगम एवेति बोध्यं ॥ प्रकृत्याशिषि ॥ आशिषि सहशब्दः प्रकृत्या स्यात् स्वस्ति राज्ञे सहपुत्रायस

उपाततव

सि॰
मु॰
८८

अमूर्द्धेतिरिं समान

दामान्यायमूयान् अणोवत्सहलेष्विति वक्तव्यं सगवे सवत्साय सहलाय ॥ समानस्यच्छन्दस्यमूर्द्धप्रभृत्युदर्केषु ॥ समानस्य सादे-
शः स्यान्मूर्द्धादिभिन्ने उत्तरपदे छंदसि अनुभ्राता सगर्भ्यः अनुसखा सयूथ्यः यो नः सनुत्यः सगर्भसयूथसनुताद्यत् समानस्ये-
ति योगविभागात् सपक्षसाधर्म्यसजातीयादिसिद्धिरिति वृत्तिकारः सदृशवचनेन सदृशशब्देन समासमस्वपदविग्रहो वाऽव्री-
हिः समानः पक्षोऽस्येत्यादि । तत्र चोपसर्जनस्येत्येव सिद्धमित्यन्ये ॥ सूदी समानप्रकृतिः समानो दर्कः ॥ ज्योतिर्जनपदरात्रिना-
भिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु ॥ ज्योतिरादिषु द्वादशसूत्तरपदेषु समानस्य सः स्यात् । समाने ज्योतिरस्य सज्यो-
तिः आदित्यनक्षत्रान्यतररूपे ज्योतिषि निमित्तं संपन्नौ तदहस्समयपर्यंतमनुवर्तमानमशौचं सज्योतिरित्युच्यते एवमन्यत्रा-
पि योज्यं ॥ चरणे ब्रह्मचारिणि ॥ ब्रह्मचारिण्युत्तरपदे समानस्य सः स्यात् चरणानिष्ट समानत्वे गम्ये चरणः शाखा । वेदार्थ
कस्य ब्रह्मशब्दस्य तदध्ययनार्थं व्रते उपचाराद्वृत्तिः समाने चरणे वेदाध्ययनार्थं च तं व्रतं चरतीति सब्रह्मचारी एकब्रह्मव्रताचारी
मिथः सब्रह्मचारिण इत्यमरः गुरुरेको भिन्नो वेत्यन्यदेतत् ॥ तीर्थे ये ॥ तीर्थे उत्तरपदे यकारादिप्रत्यये विवक्षायां समानस्य सः
स्यात् समानतीर्थे वासीति यत् सतीर्थ्यास्त्वेकगुरव इत्यमरः अध्येयमिन्नमभिन्नं वेत्यन्यदेतत् ॥ विभाषोदरे ॥ यादावित्येव सो-
दर्यः समानोदर्यः समानोदरे शयित इति यत् दृग्दृशवतुषु ॥ समानस्य सः स्यात् वतुग्रहणमुत्तरार्थं समानात्तद्विध्यभावा-
त् सदृक् सदृशः । त्यदादिषु दृशोऽनालोचने कञ्चेति क्विन्कञौ ॥ दृक्षे चेति वक्तव्यं । सदृक्षः दृशेः क्सः सदृक्षासः । प्रतिसदृ-
क्षास इति भाष्ये तदुदाहरणार्थं नत्वेकादशत्वदर्शनार्थम् । सदृक्षः सदृशः सदृगित्यमरोक्तेः कलहसः सदृक्ष इत्यादिप्रयोगा-
च ॥ इदंकिमोरीश्की ॥ दृग्दृशवतुषु इदम ईश् । किमः कीः स्यात् ईदृक्षः ईदृशः ईदृक् कीदृक् कीदृशः कीदृक्षः दृक्षसं-
रितयोरेव दृग्दृशयोरनुवृत्तेः इयान् कियान् किमिदंभ्यां परस्य वतोर्वस्य यादेशविधानसामर्थ्यात् वतुषु । किमिदंभ्यां वो घः इ-
ति वस्य घादेशः घस्य इयादेशः प्रकृतेरीशादेशः यस्येति चेति ईकारलोपः ॥ आसर्वनाम्नः ॥ आत्वं स्यात् दृग्दृशवतुदृक्षेषु

एतदेतस्य पदिमा
लो इति वक्तव्य

हे

८८

उत्तरपदे

ताहक् ताहशः तावान् ताहक्षः एवं एतादृगित्यादि यत्तदेतेभ्यः परिमाणे वतुप् अदसोमत्वोत्वे अमूदृक् अमूदृशः अमू
दृक्षः ॥ विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ॥ चकारः सर्वनाम्नामनुकर्षणार्थः विष्वग्देवयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यादप्रत्ययो
ऽन्तेऽञ्चतौ परे ऋत्विगादिसूत्रेण क्विन् अनिदितामिति नलोपः गतिदवामिति नुम् विष्वगञ्चतीति विष्वद्र्यङ् दिवद्र्यन् च इ
ति द्रियिते यणादेशः स्वाद्युत्पत्तिः हल्ङ्याब्भ्यादिलोपः संयोगान्तलोपः क्विन्प्रत्ययस्येति कुत्वेन ङकारः एवं देवद्र्यङ् अमु
मञ्चतीति अमुमुयङ् अदसोसेरित्युत्वमत्वे शिष्टं तत्रैव वक्ष्यामः नन्वप्रत्ययइति व्यर्थं उत्तरपदाधिकारात् क्विन्नादिसर्व
लोपि प्रत्ययव्यतिरेकेणाञ्चत्यादेरुत्तरपदत्वायोगात् विष्वगञ्चनमित्यादौ चोत्तरपदत्वस्य विशिष्टत्वात्तिनया अञ्चतौ न तद्भावा
देवप्रसंगाभावात् मैवं अप्रत्ययग्रहणं तदादिविधिरिति ज्ञापनार्थत्वात् तेन अयस्कृदयस्कारइत्यादौ अतः कृकमीति स
त्वे न च यस्मिन्विधिस्तदादावल्ग्रहणे इत्यनेन निर्वाहः धातोः समुदायरूपत्वाद् अल्ग्रहणत्वाभावात् ॥ समः समि ॥ समइत्यस्य समी
त्यादेशः पूर्ववद्विषये यणादेशः सम्यङ् ॥ तिरसस्तिर्यलोपे ॥ अलुप्ताकारेऽञ्चतावप्रत्यये परेऽन्तोऽञ्जरपदे तिरस इत्यस्य तिरी इत्यादेशः
स्यात् तिरोऽञ्चतीति तिर्यङ् अलोपे किं तिरश्चः तिरश्चा अचइति सूत्रेण भसंज्ञाविषयेऽकारलोपः सकारस्य श्चुत्वे ॥ सह
स्य सध्रिः ॥ उक्तविषये सहाञ्चतीति सध्र्यङ् ॥ सधमादस्थयोश्छन्दसि ॥ सधेत्यविभक्तिको निर्देशः सहस्य सधादेशो मादस्थ
योश्छन्दसि सहमाद्यन्ति देवा अस्मिन्सधमादो यज्ञः मदोऽनुपसर्गे इत्यप् घञर्थे वाधिकरणे वा परत्वात् करणाधिकरणयोश्चेति ल्यु
टि प्राप्ते हलश्चेति घञ् इन्द्र वाऽस्मिन्सधमादे सूत्रे मादेत्यकार उच्चारणार्थः तेन माद्यतेः क्विपि मादिति रूपेऽपि सधादेशः
श्रावाहहनो हरयोपुजानाश्रवीगिंद्र सधमादो वहन्तु । स्थे यथा । अस्मिन्सधस्थे अध्युत्तरस्मिन् ॥ अतः कृपसर्गेभ्यः पर्येत् ॥
ङ्यादिभ्यः परस्य अञ्चतेः पर्याद्यन्तस्यात् अचेति कृतसमासान्तस्य निर्देशः प्रथमा च षष्ठ्यर्थे येन विधिरिति सूत्रे प्रयोजनेन मह
दस्वरणादीर्घविधावितिवार्तिकव्याख्यायां श्रायस्ति एति स्यापदिति भाष्योक्तेः न पूजनादिति समासान्तनिषेधः समासा

नाभावेपि ईत्वग्रहणे चरितार्थत्वादिति न्यायानुपपत्तेः आदेः परस्येत्यकारमात्रस्यैवं द्विर्गतास्वापोः अन्तर्द्वीपं। अन्तरीपं समाप ईत्वप्रतिषेधो
वक्तव्यः। समापन्नामदेवयजनं। समपाहेन चात्र समासः अपर आह। ईत्वमनवर्णादिति वक्तव्यं। समीपं अन्तरीपं। अनव
र्णान्तं किं प्राप्यपरायं प्रवृत्तमासे नीतं मवर्णमेव। प्रेपं परेपं तदेतदभिप्रेत्याऽवर्णान्ताद्वेति पठन्ति॥ ऊदनोर्देशे॥ अनोः परस्याः
पस्सूजस्यात् सवर्णदीर्घः जलप्रायमनूपं स्यात् ननूकारो ह्रस्व एवात्र विधेय इति चेन्न अवग्रहे दोषादिति भाष्यं। नचाऽनू
पे गोमानोभिमित्यादौ वह्वृचैरवग्रहो न क्रियत इति वाच्यं तथाप्यशाखान्तरेषु तथापाठोपपत्तेः॥ अषष्ठ्यतृतीयास्थस्यान्य
स्यदुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु॥ षष्ठीतृतीयान्यविभक्त्यन्तस्याऽन्यस्य दुगागमः स्यादाशीरादिषूत्तरपदे
षु छप्रत्यये च परे अन्यदाशीः अन्यदाशा अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः अन्यदूतिः अन्यद्रागः नन्वेवं अन्यकार
कः अन्यदीय इत्यत्र न स्यात् कारकशब्दयोरेकयोगसंख्यात्रावश्यकत्वात् अन्यस्यायमन्यदीय इत्यत्र गहादेराकृतिगणत्वा
च्छप्रत्यये षष्ठ्या एव समर्थविभक्तित्वाच्च अत्र भाष्यं अन्यस्य दुक्छकारकयोरित्येकं सूत्रं। अषष्ठ्यतृतीयास्थस्याशीराशास्था
स्थितोत्सुकोतिरागेष्विति द्वितीयमिति न दोषः॥ अर्थे विभाषा॥ अन्यस्य दुक्स्यात् अन्यदर्थः अन्यार्थः॥ कोःकत्तत्पुरुषेचि॥
तत्पुरुषे कोः कदादेशः स्यादजादावुत्तरपदे। कुत्सितोऽश्वः कदश्वः। कुगतीति समासः। कदन्नं। तत्पुरुषे किं। कूष्ट्रो राजा व
हुव्रीहिरयं त्रावुपसंख्याने कुत्सितास्त्रयः कत्त्रयः केचात्रयो विभिडः कत्त्रय इति भाष्यं॥ रथवदयोश्च॥ कोः कदादेशः स्या
त् कद्रथः कद्वदः॥ तृणे च जातौ॥ उक्तं स्यात्। कत्तृणं तृणविशेषः॥ कापथ्यक्षयोः॥ कापथं अक्षस्येति अकारः कान्तः।
अत्तशब्देन तत्पुरुषः वक्ष्यदूहावकोदर्शनादित्यन्वा॥ ईषदर्थे॥ उक्तं स्यात् ईषज्जलं काजलं अजादावप्ययमेव परत्वात्
काम्लं ईषदम्लमित्यर्थः॥ विभाषा पुरुषे॥ कादेशो वा स्यात् कापुरुषः कुपुरुषः अप्राप्तविभाषेयं ईषदर्थे पूर्वविप्रति
षेधेन नित्यस्यैव कादेशस्य प्रवृत्तेः॥ कवंचोष्णे॥ कोः कवादेशः स्यात् कवोष्णं चात्कोष्णं कदुष्णं॥ पथि च छन्दसि॥ प

षिशब्दे उत्तरपदे कोः कवादेशः कावस्मात् कवपथः कापथः ॥ पृषोदरादीनि यथोपदिष्टं ॥ पृषोदरादीनि शब्दरूपाणि शि
ष्टैर्यथोच्चारितानि तथैव साधूनि पृषोदर पृषोत्पल बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर आकृतिगणोयं
पृषत् उदरं पृषोदरं तकारलोपः दिशोरुच्चारणाभ्यनात् प्रश्नप्रोक्तः भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् गूढोत्मा वर्ण
विकृतेर्वर्णनाशात्पृषोदरं गूढ आत्मा यस्यासौ गूढोत्मा आकारस्यौकारः तथा च श्रुतिः । एष सर्वेषु भूतेषु गूढोत्मा न प्रका
शते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः असमासान्तानां निरुक्तादिबोधितसाधुत्वानां पदानामुणादिसूत्रेणास
ध्रुवाभ्यनुज्ञाने समासान्तानां त्वनेनेति विभाग इति हरदत्तः कारिकायां हंससिंहयो रूपादानं तु नैरुक्तसम्मतेन नानावि
धत्वमिति नाप्ययं योगेनेति तदभिप्रायः आदिशब्दः सादृश्यार्थः सादृश्यं च सूत्रोक्तादृष्टविषयलोपागमवर्णविकारत्वे सति शि
ष्टप्रयुक्तत्वरूपेण धर्मेणेति नातिप्रसंगः दिक्शब्देभ्यस्तीरस्य तारभावो वा वक्तव्यः दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तर
तीरं वाचो वादे डत्वं वलभावश्चोत्तरपदस्येञि वक्तव्यं वाचः परे वादे वाग्वादशब्दे इति यावत् तस्मादिञ्प्रत्यये वाक्शब्दस्य
डकारो णादेशो वादशब्दस्य वलादेशश्चेत्यर्थः वाग्वादस्यापत्यं वाडवलिः षष उत्वं दुत्तरपदादेष्टुत्वं च वक्तव्यं षड् द
ता अस्य षोडन् वयसि दंतस्येति दत्रादेशः षट् दश च षोडश षट्धा इति निर्देशः सत्त्वावचनत्वलाभार्थः धासु चेति वक्त
व्ये उत्वस्य उत्तरपदादिष्टुत्वस्य चायं विकल्पः षोढा षड्धा बहुवचननिर्देशो नानाधिकरणवाचिनोऽप्यधिकरणविचाले ऽस्य
तेन विहितस्य धाप्रत्ययस्य ग्रहणार्थः तेन षड्धा नीति षड्धा इत्यत्र न दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वं च वक्तव्य
दुःखेन दाश्यते दूडाशः दाशृ दाने दुःखेन नाश्यते दूणाशः तथा दभ्यते दूडभः
न ध्यायते दूढ्यः श्वात्सिद्धेति कः

सि॰
कौ॰
५॰

90

पवसनादीनां छंदसि लोपो वक्तव्यः पीवोपवसनं भीम पयोपवसनानां प्रियेदे ॥ संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ ॥
संख्यादित्रितयात्परस्याह्नस्य अहन्नित्यादेशो वा ङौ परे आदेशपक्षे विभाषा ङिश्योरित्यल्लोपविकल्पः द्व्यह्नि द्व्यहनि द्व्य
ह्ने व्यह्नि व्यहनि व्यह्ने सायाह्नि सायाहनि सायाह्ने ॥ ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ढ्रौ लोपयतीति ढ्रलोपस्तस्मिन् तयोर्लोपनिमित्तव
र्णलाभः तत्र ढलोपे ढ एव रलोपे र एव निमित्तं ढो ढे लोपः रो रीति चोक्तेः तेन यत्र ढस्य रेफस्य वा लोपस्तस्मिन्परे पूर्वस्याणो
दीर्घः स्यात् अणग्रहणं पूर्वेणोऽस्तु तेन नचतस्मिन्निति निर्दिष्टे इत्यनेनैव पूर्वलाभे पूर्वस्येति व्यर्थमिति वाच्यं उत्तरपदाधिकारस्य
पूर्वपदस्य मा भूत् किंतु पूर्वमात्रस्येत्येतदर्थकत्वात् ऊढेश्वरी राजा पुनः रूपाणि कल्पयेत् अजर्थाः अणः सः व्याख्यातं प्राक्
लीढः मृणाः किं तृढः ॥ सहिवहोरोदवर्णस्य ॥ ढलोपे अनयोरवर्णस्य ओत्वं स्यात् दीर्घस्यापवादः सोढा वोढा सहेतिवेड् इड
भावपक्षे ढत्वधत्वष्टुत्वढलोपाः ओत्वं उदवोढां अवर्णस्येत्युक्ते तात्पर्यत्वात् कालग्राहकत्वेहढोढेनायाओत्वं न स्यात् इदमेव वता
दपि परस्य नकालग्राहकत्वे लिंगं अतोवर्णोऽस्त्युक्ते तेनाऽवर्णमात्रस्य ग्रहणादिष्टसिद्धिः अवर्णग्रहणं अजइत्यादौ ऋकारस्य मा
भूदित्येवमर्थं न च वस्य संप्रसारणे ऊकारस्य संप्रसारणाद्वेति पूर्वरूपं भविष्यतीति वाच्यं पूर्वरूपस्यान्तरंगत्वात्प्रागेव प्रवृत्तौ
उकारस्य ओत्वापत्तेः वस्तुतस्तु संप्रसारणात्पूर्वमेव परत्वादोत्वं नित्यत्वस्योभयसाधारणत्वात् न च संप्रसारणे पूर्वरूपे च
ओत्वप्राप्त्यभावात्तदनित्यमिति वाच्यं यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति स्वीकारात् संप्रसारणे न च ओ
त्वस्य निमित्तव्याहृतभावात् तथा च ओत्वे कृते पूर्वरूपापुनरोत्वप्रवृत्त्यभावादवर्णस्येति न कर्तव्यमिति भाष्यं ॥ साढ्यै साढ्वा सा
ढेति निगमे ॥ आद्ये द्वयं क्त्वान्तस्य तृतीयं च तृजन्तस्य निपात्यते तृजन्तस्येति हृतित्येयस्तस्वरत्वस्यायमभिप्रायः अन्यथा आद्यु
दात्तत्वानुपपत्तेः सहेस्तृनन्तस्य साढ्लृत्यत्र तस्येष्टत्वात् अत्र ढकारस्य ळ्हेत्यादेशः तदुक्तं बह्वृचप्रातिशाख्ये द्वयोश्चास्य स्व
रयोर्मध्यमेत्य संपद्यते स डकारो ळकारः ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः अथो मध्यस्य स्पर्शस्योक्तः

न्या॰

द्वि....

५॰

नाटशास्याढस्य ल्हस्येत्यर्थः अस्यावार्थस्य ऊष्मणा संप्रयुक्तः सन् ल्हकारतामेतीत्यन्वयः स्थानिवदादेशोऽपि ज्ञेयोऽर्थः तत्रेति
शब्दः प्रकारार्थः तेन साढ इति ऋस्योऽपि निष्ठायां निपातः अषाल्हो अषाल्हमुक्तमेतेनास्य इत्यादि प्रयोगात् एवं अषाढस्य
एतेनास्य पाठश्रमिति माध्वेदिनशाखायां ॥ संहितायां ॥ अधिकारोऽयम् ॥ कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रु
वस्वस्तिकस्य ॥ विष्टादिसमभिन्नस्य लक्षणवाचिनो दीर्घः स्यात् कर्णशब्दे परे द्विगुणाकर्णः स्वामिविशेषपरिचायकं लिंगं लक्षणं
लक्षणस्य किं शोभनकर्णः अविष्टादीनां किं विष्टकर्णः अष्टकर्णः पंचकर्णः मणिकर्णः भिन्नकर्णः छिन्नकर्णः छिद्रक
र्णः स्रुवकर्णः स्वस्तिकर्णः ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ क्विबन्तेषु परेषु उत्तरपदेषु पूर्वपदस्य दीर्घः उपनह्यते
इत्युपानत् संपदादित्वात्कर्मणि क्विप् नहो ध इति हस्य धत्वं जश्त्वे चर्त्वे निवर्तन्त इति नीवृत् प्रवर्षतीति प्रावृट् मर्माणि विध्य
तीति मर्माविध् निरोचनन इति नीरुक् एवं अभीरुक् ऋतिं सहते इति ऋतीषट् सहेः षत्वं ततेऽभ्याश्चेति योगविभागादुक्तसमुच्च
यार्थं चकारो ह्रासस्य षत्वमिति न्यासकारः पूर्वपदादिति ह्रस्वदन्तः परितनोतीति परीतत् गमः क्वादित्यत्र गमादीनामिति वक्त
व्यमुक्तेर्नलोपः कथं तर्हि अयाविष्य त्वन्येषामपीति दीर्घः विभाषा पुरुषे इत्यतो विभाषानुवृत्तेर्व्यवस्थितविकल्पोऽयं तेन गतिकार
कपूर्वस्य नेह पटुरुक् तिग्मरुक् ॥ वनगिर्योः संज्ञायां कोटरकिंशुलकादीनाम् ॥ कोटरादीनां वने किंशुलकादीनां च गिरौ
परे दीर्घः स्यात् संज्ञायां वने पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्य इति णत्वं वक्ष्यते तत्र कोटरान्ताः पंच हन्त दीर्घा इह को
टरादयो बोध्याः पुरगावणं मिश्रकावणं सिध्रकावणं सारिकावणं कोटरावणं किंशुलकागिरिः ॥ वले ॥ वलप्रत्यये परे दी
र्घः स्यात् संज्ञायां कृषीवलः प्रत्ययग्रहणं परिभाषया वले निप्रत्ययोपादाने तदन्तेऽगीकारपक्षे तु मतान्विशुक्तस्साहचर्यात् न
वलत्रापि मनीति प्रातिपदिकस्य ग्रहणापत्तिः मतौ इत्यो कारस्यानुनासिकत्वप्रतिज्ञानात् तस्य च मतशब्दानुकरणो विना तु
ययन्तेरिति सीरदेवादयः ॥ मतौ बह्वचोऽनजिरादीनां ॥ अजिरादिभिन्नस्य बह्वचो दीर्घः स्यान्मतौ परे अमरावती धनगिरेति

सि॰ घ॰ ९८

९१

किं अजिरवती बहूचः किं व्रीहिमती संज्ञायामेव नेह वलयवती ॥ शरादीनां च ॥ संज्ञायामन्वपि दीर्घः शराव
ती ॥ इको वहे ऽपीलोः ॥ पीलुभिन्नस्य इगंतस्य वहे दीर्घः ऋषीवहं कपीवहं इकः किं पिंडवहं अपील्वादी
नामिति वक्तव्यं पीलुवहं दारुवहं ॥ उपसर्गस्य घञ्यमनुष्ये बहुलं ॥ उपसर्गस्य बहुलं दीर्घो घञंते
परे न तु मनुष्ये परिवेभः परीवेभः अमनुष्ये किं निषादः पुलिंदत्वान्मनुष्यजातिः निषीदन्त्यस्मिन्पापमिति
हलश्चेत्यधिकरणे घञ् दौवारिके प्रतीहारशब्दस्तु मानस्योपचाराद्बोध्यः अमनुष्यादिति वक्तव्यं इह मा
भूत् प्रसवः प्रहारः प्रसारः सादकारयोः कृत्रिम इति वक्तव्यं प्रासादः प्राकारः नेह प्रसादः प्रकारः प्रति
वेशादीनां विभाषेति वक्तव्यं प्रतिवेशः प्रतीवेशः ॥ इकः काशे ॥ इगंतस्योपसर्गस्य दीर्घः काशे परे वीका
शः नीकाशः इकः किं प्रकाशः ॥ दस्ति ॥ इगंतस्योपसर्गस्य दीर्घः स्याद्दाजादेशो यस्तकारस्तदादावुत्तरपदे
नीत्तं सूत्तं दाजः क्तः अच उपसर्गात्त इत्याकारस्य तकारादेशः धातोर्दकारस्य खरि चेति चर्त्वेन तकारः
तीत्यस्योत्तरपदे विशेषणतायां यस्मिन्विधिस्तदादावल्ग्रहणे इति तदादिविधिना तकारादावुत्तरपदे
इत्यर्थः ततो द इति तकारे विशेषणे दाजादेशत्वेन संबंधी यस्तकारस्तदादावुत्तरपदे इति फलः पक्षः द्विती
यस्तु द इत्येतत्पूर्वमेव तकारे विशेषणे दादेशेनेन सिद्धो यस्तकार इत्यर्थः वत्वस्यासिद्धत्वादादिमूजसत

विश्वस्य वसुराटोः।

कारस्य वा यान्तामर्थ्यान्तरं नइति फलितम् नन्वाद्ये चर्त्विष्याः सिद्धत्वान्नकारादुत्तरपदाभावान्नीत्तमित्या
दौदीर्घीनस्यात् मैवं चर्त्विष्याः स्वयात्सिद्धत्वात् अन्यथा दादेशो यस्तकारस्तदादावित्यनुवादानुपपत्तेः अ
प्यद्वितीये सुदत्तप्रतिदत्तमित्यादावतिप्रसंगः मैवं दोदयोरित्यत्र ददादेशस्यथोनत्वात् नवचर्त्वे कृतेनो
नत्वंनस्याः सिद्धत्वेनएतदपेक्षयार्थान्तरत्वानपायात् प्रदत्तमितित्वपपाठः इगंतत्वाभावेननत्रदीर्घप्रा
कानवकाशादितिकैयटः ॥ अष्टनः संज्ञायां ॥ दीर्घः स्यादुत्तरपदे अष्टापदं संज्ञायां किं अष्टपुत्रः ॥ छंद
सिव ॥ अष्टनस्त्वात्वं स्यादुत्तरपदे अष्टाकपाले अष्टापदी ॥ चितेः कपि ॥ दीर्घः स्यात् एकचितीकः द्विचिती
कः दीर्घस्य स्यात्तिवत्त्वान्नह्रस्वो तेस्यात्पूर्वमिति शाहे कारस्योदात्तत्वम् ॥ नरे संज्ञायां ॥ विश्वानरः ॥ मित्रेच
र्षौ ॥ ऋषेः संज्ञायां मित्रे परे पूर्वस्य दीर्घः विश्वामित्रः ऋषौ किं विश्वामित्रो माणवकः ॥ मंत्रे सोमाश्वेंद्रिय
विश्वदेव्यस्य मतौ ॥ पबं

स्या पूर्वमिति शब्देकारस्योदात्तत्वम् ॥ नरे संज्ञायाम् ॥ विश्वानरः ॥ मित्रे चर्षौ ॥ अस्येः संज्ञायां मित्रे च परे पूर्वस्य दीर्घः विश्वामित्रः

ऋषावेति किं विश्वमित्रो माणवकः ॥ मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ ॥ अर्वोदावेव नोपधायाः इति दीर्घो न तु चर्मणामित्या

दौ तत्र नुडभावात् अत्र केचित् अंगस्य इकारांतत्वे सुपि चेत्येव दीर्घः परत्वात् अत एव चात्राग्नीनामिंद्राणामित्येव भाष्य उदाहृत

मित्याहुः अन्ये तु ह्रस्वसंनिपातकृतं नुटमादाय ग्रामीणयज्ञादित्व संपन्नो सुपि चेति न प्रवर्तते संनिपातपरिभाषाविरोधात्

नामीत्यनेन तु न बाधः आरंभसामर्थ्यात् सुपि चेत्यस्य च वृक्षाभ्यामित्यादौ चरितार्थत्वात् अत एव अल्लोप इति सूत्रे शकार

विशिष्टनकारानुपादानेन नकारस्य किं तेन विशेषणे पि यज्वानां यज्वानामित्यादौ प्रतिप्रसंगः नच दीर्घेण तद्बाधः नलोपस्य

परत्वादिति वाच्यं सुपि चेत्यस्य विवक्षायां तु न लोपादपि तस्य परत्वाद्राज्ञाभ्यादिग्रंथानाम संगति प्रसंगात् तथादिभ्यः अमिति सूत्रे

पि अम् शकारः अल्लोपस्य च विशेषणार्थः यज्वानामित्यत्र सुपि चेति दीर्घस्य संनिपातन्यायादप्रवृत्तेरिति सिद्धांतितत्वा

त् एतेन व्यतिभवमानानामित्यत्र नामीति दीर्घः सुपि चेत्यनेन चेति माधवोक्तमपि चिंत्यं [illegible] ॥ न तिसृचतसृ ॥ एतयोर्नामि इत्याहुः

मि दीर्घो न स्यात् तिसृणां चतसृणां पूर्वस्यापवादोयं ॥ छंदस्युभयथा ॥ पूर्वयोर्वा दीर्घो नामि तिसृणां चतसृणां एतेषु सर्व

व त् केचित्तु तिसृचतसृ इत्यस्यने ह्यानुवृत्तिः अन्यत्रापि विकल्पदर्शनात् यातायातृणामिति मंत्रे नेत्रिरीयेहूस्वस्य वृक्षचेश्वदी

र्घस्य पाठादित्याहुः ॥ नृ च ॥ नृ इत्यविभक्तिको निर्देशः छंदसीति निवृत्तं अन्यथा पूर्वेणैव सिद्धे उभयथेत्यनुवर्तते दीर्घस्य

नामीत्यनेनैव सिद्धेः निषेधमात्रस्येष्टत्वे तु न तिसृशब्दात् पूर्वं तत्रैव नृशब्दोपादानप्रसंगात् नृ इत्यस्य दीर्घो वा नामि नृणां

नृणां चिंताजर्जरचेतसां वत नृणां का नाम शांतिः कथा नृणां करं चित् मृदान्न्दमात नोत्वित्यादि ॥ नोपधायाः ॥ नेति लुप्त

षष्ठीकस्यांगविशेषणत्वात् तदंतविधिः नांतस्यांगस्योपधाया दीर्घो नामि परे पंचानां सप्तानां षट् चतसृभ्यश्चेति नुट् उपधाः

कारस्याभावे नलोप इति प्रकृत्यैतन्नकारलोपः नामि किं चर्मणां इत्यादौ नडभाववत्त्वामि परे मा भूत् ॥ सर्वनामस्थाने चासंबुद्धौ ॥
नांतस्यांगस्योपधाया दीर्घः संबुद्धिभिन्ने सर्वनामस्थाने परे राजा राजानौ राजानः इत्यादि सर्वनामस्थाने किं राज्ञः असंबुद्धौ किं
हे राजन् ॥ वा षपूर्वस्य निगमे ॥ नांतस्यांगस्य षपूर्वीया उपधाया वा दीर्घः एवंविषये वेदसि ऋभुक्षाणमिंद्रं ऋभुक्षणं ॥ सांतमह
तः संयोगस्य ॥ सांतेति लुप्तषष्ठीकमभेदेन संयोगविशेषणं सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ
सर्वनामस्थाने परे उपधेति पूर्वमात्रपरं उक्तस्थले नकारात्पूर्वस्य पारिभाषिकोपधात्वानुपपत्तेः अजरांसि पक्षे जरसादेशः
नपुंसकस्येति नुम् महान् महांतौ महांतः वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्चेत्यतिदेशादुगित्वलक्षणो नुम् असंबुद्धौ किं
हे विद्वन् महन् सर्वनामस्थानपदस्यात्र व्यावर्त्यं नास्ति तद्भिन्ने नुमभावात् ॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृ क्षत्तृहोतृपो
तृप्रशास्तॄणां ॥ अबंतस्य तृन्तृजंतस्य स्वस्रादीनां चोपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे आपः कर्तारौ कर्तारः स्वसा
रावित्यादि ऋतो ङीति गुणोऽपरत्वेव दीर्घः व्युत्पत्तिपक्षे नप्त्रादीनामपि तृन्नंतत्वात्सिद्धौ तद्ग्रहणं नियमार्थं एषामेव
संज्ञाशब्दानां दीर्घो नान्येषामिति तदर्थः तेन पितरौ भ्रातरौ इत्यादौ न उद्गातृशब्दस्य तु भवत्येव होतृपोतृनेष्टो
द्गातार इति भाष्यप्रयोगात् सर्वनामस्थाने किं स्वप्स्वपी कर्त्रादीनां तु उपधाया हलत्वादेव नातिप्रसंगः किं
तु कर्तरीति ङौ प्राप्तेऽतिप्रसंगवारणे वाच्यं असंबुद्धौ किं हे कर्तरित्यादि ॥ इन्हन्पूषार्यम्णां शौ ॥ सर्वनाम
स्थाने चेति सिद्धे नियमार्थोऽयमारंभः एषां शावेवोपधाया दीर्घो नान्यत्र बहुदंडीनि कुलानि बहुवृत्रहाणि
बहुपूषाणि बह्वर्यमाणि नियमसूत्राणां विधिमुखेन प्रवृत्तिरिति पक्षेऽनेनैव दीर्घः न चान्यत्रैषामामा
न्यशास्त्रेणादीर्घापत्तिः नत्र नाद्विषयकतात्पर्यसंकोचात् ॥ ॥

अन्यथा नियमसूत्रवैयर्थ्यात् निषेधमुखेनेति पदेन अप्राप्ताः नेन निषेधः शौ न सामान्यशास्त्रेणैव दीर्घ इति विशेषः यश
स्विनौ वाग्मिनौ इत्यादौ विनोऽनर्थकत्वेपीहग्रहणं भवत्येव तदुक्तं अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्र
योजयंतीति अत्र वार्त्तिकं दीर्घविधिर्य इन्हन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् शौ नियमं पुनरेव विदध्यात् भ्रूण
हनीति तथा स्यान्न इष्येत शास्सि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य दीर्घविधेरुपधानियमान्मे हन्त्यपि
दीर्घविधौ वन दोषः । सत्यपि वाऽप्रकृते नवकाशः शौ नियमोऽप्रकृतप्रतिषेधे यस्य हि शौ नियमः सुटि नैतेन तेन न तत्र भवे
द्धि नियमं अयमर्थः । ननु इदं तेः कोऽत्र नुनासिकस्य क्विझलोरिति उपधादीर्घः स्यात् उक्तनियमस्य सर्वनामस्थानप्रकर
णाधीनत्वात् शिभिन्ने सर्वनामस्थाने इहग्रहणे भ्रूणहनावित्यादौ दीर्घवारणेपि इहग्रहणं भ्रूणहनीत्यादौ दीर्घवारणा
नुपपत्तेः । नैवं इन्हन्पूषार्यम्णां शय्येकोनियमः पञ्चा सर्वनामस्थानपर्वो यथा दीर्घो न तु सर्वनामस्थानभिन्ने इति तदर्थः
तेन भ्रूणहनीत्यादेर्व्यावृत्तिः शाविति नियमान्तरं शिरूपे सर्वनामस्थाने स्य दीर्घो न तु अशिभिन्ने इति भ्रूणहनावित्यादेर्व्यावृ
त्तिरिति प्रथमश्लोकार्थः यद्वा सर्वनामस्थानप्रकरणे समाप्ते अनुनासिकस्येति सूत्रात्पूर्वं इन्हन्नित्यादिसूत्रं पठनीय
तेन शावेव दीर्घो न तु प्रथमयान्तरे इति नियमपर्यवसानान्नोक्तदोषः न चैवं इहग्रहणाय तेः स्यादावकृतस्यार्थ यातकयोवि
ति दीर्घोपि न स्यादिति वाच्यं नियमस्योपधादीर्घमात्रविषयकत्वात् उक्तदीर्घस्य च तथात्वाभावादिति द्वितीयस्यार्थः
अथवा यथान्यासमेवास्तु शावेव दीर्घो न तु तद्भिन्ने सर्वनामस्थाने इति नियमो हि न संभवति नपुंसकप्रकृतिकस्य स
ढः सर्वनामस्थानत्वाभावात् सुडनपुंसकस्येत्युक्तेः नपुंसकान्यप्रकृतिकस्य च शेरभावात् नपुंसकाद्वेति प्रक्रमस्य ज
शशसोर्विनिशिभावविधानात् तथा च सर्वनामस्थानप्रकरणे व्यावर्त्याभावात् शावेव दीर्घो नान्यस्मिन्नन्यत्र इति निय
मस्य फलितत्वान्नानुपपत्तिरिति तृतीयस्यार्थः ॥ सौ च ॥ इन्हन्पूषार्यम्णां सावुपधाया दीर्घः स्यात् असंबुद्धौ सौ परे पूर्वं ।

नियमादप्राप्तावारंभः दंडी वृत्रहा पूषा अर्यमा अप्सुद्धौ किं हे दंडिन् हे वृत्रहन् पूषन् अर्यमन् ॥ अत्वसंतस्य चाधातोः ॥
अत्वेति त्वमवहिष्ठे के अंगविशेषणं तेन नतदंतविधिः अधातोरिति असः भेदेनासंतस्येत्यत्रान्वयः कैयटस्तु दत्ताद्यपत्वम
धातोरिति योगो विभज्यते तत्सामर्थ्यादनेन तु असः संतस्यैव प्रतिषेधेन त्वं तं तस्येत्याह अत्वंतस्य धातुभिन्नत्वे सत्यसं
तस्य च दीर्घः स्यादसंबुद्धौ सौ परे ॥ भवान् भानेर्डवतुः नचपरत्वान्निमन्मावोगित्लुक्तणोः समिकृते अकारस्योपधात्वेना
स्तीतिवाच्यं नेवापित्वावचनसामर्थ्यादादौदीर्घस्यैवप्रवृत्तेः एवंधीमानित्यादौ मतुबंतेपि बोध्यम् ननुतदनुबंधकग्र
हणेनातदनुबंधकस्येति परिभाषया मतोर्ग्रहणं न स्यात् मतुपउकारस्त्वित्रपकारो भयानुबंधकत्वात् उकारानुबं
धविशिष्टस्यात्रोपादानात् नचपकारलोपे अंतत्वमस्त्येवेति वाच्यं उकारलोपे अत्वंतत्वस्याप्यभावात् भूतपूर्वग
त्याश्रयणेनतूपात्तत्वस्यैवसत्वात् नचोकारस्यसत्वे अश्रयणा त्वैवम् भूतपूर्वगतिर्नतूपात्तत्वे अत्वसंतस्येत्यत्रपकारस्या
नाश्रितत्वादितिवाच्यं सानुबंधकग्रहणेहि नहिशिष्टरूपं विवक्ष्यते लौकिके च प्रयोगेनुबंधानामदर्शनादुपदेशेन हि शिष्ट
त्वं गृह्यते तत्रचैतन्मतोरेवनत्वंतमित्याश्रयानाश्रययोरप्रयोजकत्वात् नचअन्तेनैतस्येत्येव वक्तव्ये अणीयमितिवाच्यं जग
दित्यादावतिव्याप्तेः । सत्यपि अत्वसंतस्य दीर्घत्वे पितडपसंख्यानमिति तत्सिद्धिः तेन इद्यान् किमानित्यादिकमपि बोध्यं
असंतस्य यथा सुयशाः सुपयाः अधातोः किं सुष्ठु वस्ते सुवः सौ किं पीमतौ सुयशसावित्यादौ मा भूत् असंबुद्धौ किं हे पीमन् हे
सुयशः इत्यादौ मा भूत् अधातोरित्यसंतस्यैव विशेषणमित्युक्तं तेनात्वंतस्य धातोरपि दीर्घः गोमत्प्रत्याचष्टे नादाचारक्विंतात् कर्ते
रि क्विप् गोमंतमिच्छति गोमानिवाचरतिवा गोमान् सनाद्यंताधातव इति धातुसंज्ञा नचैवमपि अत्र तुन्नस्याद्गोः स्वाभिमत्राधातोरित्युक्त
त्वादिति वाच्यं अधातु भूतपूर्वेस्यापि तु मर्ये मधातोरिति तत्रोक्तत्वात् नचसंस्कादीनामगितास्वदित्यादौ प्रसक्तस्य तु मो वारणार्थं तत्रहि
वाच्यं अत्राभिमतं वतिग्रहणं स्यातिनियमार्थत्वादेवतत्रअप्रसक्तभावात् । अनुनासिकस्य क्विझलोः क्ङिति । अनुनासिकांतस्य दीर्घः स्या ॥

क्वौ फलादौ क्ङिति प्रत्यये च परे सञ्चस्रगाणयनीतिस्रगणए नवणिलोपाल्लोपयोः स्थानिवत्वं क्वौ लुप्तं क्वौ विधिं प्रति न स्थानिवदित्य
क्तेः स्रगस्रीशरन्पादौ न विस्तरोध्यः एवं प्रशान् प्रतान् इत्यादिकमपि बोध्यं ॥ इदमिवाचरति इदामति राजानति पथीनति
सर्वप्रातिपदिकेभ्य इति किप् फलादौ किति यथा शान्तः प्रमेः क्तः हष्यमत्वरसंत्रुषास नामितिइष्ठिकल्पः फलादौ किं प्रमि
तः इटि कृते प्रत्ययस्याः जादित्वान् न फलादित्वम् ॥ अजन्तगमां सनि ॥ अजन्तानां हनिगम्योश्च दीर्घः स्यात् फलादौ सनि जिगी
षति चुकूषति जिघांसति वेदमपि जिगांसते गमेर्दीर्घेवेरिङ्ग्रहणं कर्त्तव्यं इङादेशस्य गमेर्ग्रहणं न तु औपदेशिकस्य गमेस्त
दानाविषयोयमर्थः तेन संजिगंसते वत्सो मात्रा सर्वव्रत्सनः इत्यात्मनेपदे गमेरिट् परस्मैपदेष्विति क्रेसन्ति नेट् प्रजापतिर्वै
स्वर्गलोकमजिगांसदिति छान्दसत्वाद्दीर्घः यद्वा अचः समीत्येकोयोगः हनिगम्योरिति द्वितीयः अच इत्यनुवृत्त्या अजादेश
स्य हनेश्चाः प्रसिद्ध्या हनेरजादेशगमेश्च दीर्घ इति तदर्थः न चैवं इणादेशगमेरपि दीर्घापत्तिः तत्र इट्ग्रहणात् सनो फलादि
त्वाभावात् ॥ तनोतेर्विभाषा ॥ तनु विस्तारे अस्योपधाया वा दीर्घो फलादौ सनि अप्राप्तविभाषेयं तितांसति तितंसति फ
लादौ किं तितनिषति तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः ॥ क्रमश्च क्त्वि ॥ क्रमः उपधाया दीर्घो वा फलादौ क्त्वाप्रत्यये परे क्रां
त्वा क्रन्त्वा फलादौ किं क्रमित्वा उदितो वेति वेट् अनुनासिकस्येति दीर्घे प्राप्ते विभाषेयं ॥ छ्वोः शूडनुनासिके च ॥ सतुक्कछस्य श
वस्य च ऊठ् स्यादनुनासिके फलादौ क्ङिति च प्रत्यये परे विश्नः प्रश्नः विच्छिप्रच्छिभ्यां यजयाचेति नङ् अन्तरंगत्वात् कः शादेश
सर्वेषु हनेर्लस्य च वर्णामामूदिति सतुक्कस्येत्युक्ते उपधावितिचैतदचः परस्मिन्निति स्थानिवत्त्वे त्वचमस्तनप्राड्भीवश्नित्धातोः वीत
त्वपते खौनाति स्यादिभ्य इति श्नाप्रत्ययः अनेन वस्य ऊठ् पत्यपालस्य इति वृद्धिः एवं स्यौन इत्यादिकमुदाहार्यं फलादौ
क्ङिति यथा पाश्वः एठेर्यङ् लुकि वस्य सार्वधातुकमपिदिति ङित्वे प्रत्युः स्यूनः स्यूतम् दिवोः विजिगीषायामिति तस्य ना
म्ने नत्वउयं टित्वाद्रागमलिंगाद्धकारस्यादौ स्यात् न चैषापत्तिः वस्य लोपाद्यो रिति लोपसंभवादिति वाच्यं ज्वरत्वरेत्यनेनउ

सि॰
घृ॰
५५

पपायावकारस्य वादेश ऊकारद्वयप्रसंगात् मैवं प्रसादिन स्वीकारात् न चैवं प्रसेधिवान् इत्यत्र इति हट्टिर्न स्यात् तत्र टिलपवौ यादाना
दिति वाच्यं वर्ण्ये कृते तदुपपत्तेः न चासिद्धत्वं आश्रयात्सिद्धत्वात् न च वाह ऊठ्‌ दिसहादिन स्य चरितार्थत्वं तस्यापि दिन स्वीका
रात् स्यादेतत् क्विति सम्प्रसारणवर्तनेन चानायः प्रष्ठवुं प्रष्ठवामि मादिसिद्धं ऐव प्रष्ठादिस्त्रे ऊठ् यरणस्य वशपकत्वेगो रवा
त् प्रत्यवहैतो नत्तम्नेन कृत्स्य शादेशा स्यवत्त्वविधानेनैवोपपनोन त्वरूठ् यहणपरित्यागेलाघवात् नोमः छुम्यांयुमिति
मादावरुद्धः प्रसंगात् मैवं प्रोधितत्र छुयणस्य कत्वेनानायत्वात् [illegible] द्वितीयेपि ऊठ्‌ पवादिवऽदिस्तुत्व संभवात् विधी
यमानत्वतपरत्वाभ्यां दीर्घस्य प्रसक्त्यभावात् न न्वत्र हति पदे प्रत्यूनगमांसनीयनेन किं फलोरपि दीर्घः स्यात् मध्ये नत्व हैनोवी
जाभावात् मैवं सनोफलादित्वेन विशेषणीयत्वात् फलादौ प्रसंयोगात् रेनदनापत्तेः किंच वीत्यादिनाऽनेतानामपि स्वादीनो दीर्घ
विधानेनाऽनूनेत्यादि सत्त्वं कौदीर्घेन विधत्त इति ज्ञापितत्वाच्च स्यादेतत् सनत्कृस्य छस्य शादेशविधाने ऽनुच्छ्यतेः क्विपि
तदिति रूपं न स्यात् किंतु तदिति एवं वाच्छेनैवोन्नवोशोवाशाइतिन स्यात् किंतु वाच्छोऽस्यादि सत्ये पयालक्षणमप्रयुक्तेरिति
सिद्धेनाहुस्तडिम्यादावित्याद्यत्तेः अत्रेदमपि कमवधेयं क्विन्तु हणानुहतिपदे तत्र त्वेतावान विशेषः अन वर्तमानेवैक्विन्तु
णाद्धः प्रत्यवक्तव्यमिति भाष्यकृतोक्तं न स्यामपण्णीहद्गाविभ्यायड़् लुग्भातीति लभ्यते अन्यथाहि दिवेर्यड़्लुकि देदेति दे द
वीत्यादीऊठो भावाभावाभ्यां महान्विशेषः स्यात् ननेश्वसोपि भाष्यऽङ्गाविनः स्यात् न च भाष्यस्यानऽपलक्षणत्वं यता
वानेवेत्येव कारविरोधात् यत्रतन्त्वरत्वेत्यादिनाऽऽहत्वाभ्यः स्विविमविभ्यायड़्लुग्भवत्येव तदभावकल्पकस्य भाष्यस्योक्तोरि
तिसहनीयत्वात् एवं स्विनोदिवेर्यड़्लुकापि रूपाणिलिखितऽपेद्यणीयाइति माधवीस्तितादयः वस्तुवस्तुक्विन्तु ह॰
णानुहतिपद्वेतगभावार्थं यत्नः कर्तव्य इति महदेवैर्थ चोचरंति हत्तेपिवैक्विन्तु हणोवश्यमत्रनगऽभावः कर्तव्यः
प्रेतरंगवाद्धिनकप्राप्नोतीत्युक्ता ॥ ∴ ॥ ∴ ॥

सन्वत्कृनिर्देशात्पूर्वं पर्यन्तमुपपादयतश्चावेनावानिति भाष्यकृतोक्तं तथा चैव कारस्य लग्भावार्थं यत्तु पक्षद्वयसाधारण्यदर्शनेन
क्विझ्ग्रहणानुवृत्तिपक्षमात्रविषयकत्वव्यवच्छेदार्थः नत्र क्विझ्ग्रहणानुवृत्तिपक्षे विशेषान्तरव्यवच्छेदार्थः ॥ इति विहड्विंशार्थे ॥
ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥ वकारोवकारसमन्वयार्थः ज्वरादीनामुपधाया वकारस्य च ऊठ् स्यात् क्वौ कलादावननामि
कादौ च प्रत्यये क्वितीत्यस्येहनानुवृत्तिः प्रवर्तते वौणादिके ह्वनिकृते ऊट्ठविति स्वीकारात् प्रत्ययेनानुनासिकग्रहणं नानुवर्तते प्रव
र्तमेत्यनुत्पत्ये प्रत्ययस्य टिलोपे ऊमिति स्वीकारात् उभयत्रापि सवर्णदीर्घेणपानोह्यटि सार्वधातुकार्धधातुकयोरिति गुणेऽकृतद्व
यद्वयसिद्धेः नन्वत्रस्यानिभेदादादेशद्वयं स्यात् नैवं पकः एर्वेति सूत्रेणादेशोकस्यापपादितत्वात् ज्वः जूरौ जूरः त्वः तूरौ
तूरः स्रूः स्रुवौ स्रुवः ऊः उवौ उवः जनशब्दे शाह्ययोगेनणत्येयतीति ह्रस्वे जनौः जनावो जनावः मूः मवौ मवः प्रविश्रुया
तिति ऊवट् स्रूः स्रुवौ स्रुवः ऊः स्रुवीतिय मामोति मामवीति यङोवेनिर्दिष्टिकस्य ॥ राल्लोपः ॥ इह सामर्थ्यात्केवल
स्यछ्स्यानुवृत्तिरित्यवः परस्मिन्निमत्तोक्ते रेफात्परयोः छकारवकारयोर्लोपः एवोक्तविषये मूः मूरौ मूरः मूर्तः नथ्यात्वा
हम्र्छिमदामितिनत्वनिषेधः तुर्वी हिंसायां तूः तूरौ तूरः एवं धूः धुरौ धुरः मोमोतितोतोर्ति ॥ इति श्रीसिद्धान्तव्याख्याने
षष्ठस्य चतुर्थे प्रथममाह्निकम् श्रीः ॥ असिद्धवदत्राभात् ॥ षष्ठस्य कोरसिद्धत्वादौत्यर्थान्तादश्यतामेप्यत्र स्पष्टप्रतिप
त्यर्थं वतिनिर्देशः आभादिति मर्यादायामाङ् भाधिकारात् एवमधिकारोऽयमित्येकः पक्षः आङोभिविध्यर्थत्वाद्गाधिकारम
भिव्याप्येत्यन्यः अत्रग्रहणं समानाश्रयप्रतिपत्त्यर्थं अत्रेतयोक्तत्वात् अत्रेति विषयः प्रतिनिर्दिश्यत इति अत्रत्यभाष्यस्य यथा
क्तपरत्वात् विषयस्याधिकारबलादेव लाभात् समानाश्रयमाभीयशास्त्रं प्रतिसिद्धं स्यात् विधेयहारकेनिमित्तेकं शास्त्रे वो
धम् । असिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च षष्ठस्य कोरित्यत्रेदं व्याख्यातं प्रयोजनेशेनैपित्वे शा
धिपधि शाहाविति शास्तेः शाभावः धुसोरित्यस्तेरभावः तयोरसिद्धत्वादोहार्यफलेतत्वं अग्न्याश्रुफंभ्यो हेर्दितिपिभावः वस्र
र

सि॰
च॰
५८

96

तोनेदंप्रयोजनं शाहाविमत्र शापहाविति हत्वयत्वलोपेः शासादेशस्यैव इत्ववापार्थं विधानात् यद्वा शाहाविति न्यासेन तङ्य
थायाः आकारस्य आत्वविधानात् यद्वा नहाविति सूत्रयित्वा इत्वमेव निषेधात् सर्वत्र धिवेतिसलोपे शाधीतिसिद्धेः मैवं
धिवेतिलोपापवादः धिसकारे सिचोलोप इति वक्ष्यमाणत्वात् समं शाधादिस्येवसत्रणीयं हुझल्भ्योहेर्धिरित्यत्र धाविस्य धिवे
नयं हुसंज्ञानां हाविवं यसोस्तु धादिति भाष्याभिप्रायः हिलोपइ चेकुरुइत्यत्र अनुतोहेरितिहिलोपेनसाः सिद्धत्वाद नङत्ता
वैधानकेइत्युवे नत्रसार्वधातुकग्रहणं सार्वधातुकमपित्पदं सामुपादानार्थमितिवक्ष्यमाणत्वाङ्गतार्थमेतत् नालिलो
पेणयणादेशाअडाह्वियो नलोपोऽलिलोपइणोयणादेशश्चेत्यर्थः अकारविधिहिं विणालुगितितकारलोपेनसासिद्ध
त्वाल्लुङ्निमित्तकावडाटौ आसन् आयन् अस्तोरल्लोपः इणोयण् नयोरसिद्धत्वादजादित्वलक्षणौ अड्‌ वस्तुतः अस्तोरः
लोपइत्यत्रतपरत्वंलोपाद्‌ आटौवलवत्त्वज्ञापनार्थं आटोलोपोमाभूदित्येतदर्थत्वात् आडुत्तरमेवलोपप्रवृत्तेः तेनचइणो
यणादेशोपिव्याख्यातः इकल्लापकस्यांगकार्यमात्रापेक्षया आटोवलवत्त्वमित्येतद्धिज्ञापकत्वाज्ज्ञाप्यादः इत्थमेवप्रवृत्तेः
परनेकाचइतिविभज्यइणोयणित्यनुवर्त्यअनेकाचइणइकारस्यैवयणितिव्याख्येयत्वात् यद्वाऽपदेशइत्यनुवर्त्यऽपदे
शपवस्थायामेवअडाटौभवतः यद्वातद्वियावाङ्गेधातुकइत्यनुवर्त्य अथवालङ्लङ्लङ्लङ्दात्तइत्यत्रदिलकारको
निर्देशः लकारादिष्वलुङादिषत्यर्थः उभयथापिलावस्थायामेवाडाटौइतिनालिलोपमादिप्रयोजनत्रयमप्यमथासिद्धम्
नुन्वेवमपिपेज्यत्तऔप्यतइतिनस्यात् लावस्थायांसार्वधातुकनिमित्तकस्ययकोदुर्लभत्वयासंप्रसारणाभावादाडजा
दीनामित्याटोदुर्लभत्वात् सत्यंअजादीनामटासिद्धमितिवार्तिकेआटपवप्रत्यासत्त्यासमानत्वात् अनुनासिकलोपे
हिलोपाल्लोपयोर्विभावश्च अनुनासिकलोपजभावौ अल्लोपहिलोपयोरित्युक्तोत्तयथासंख्यंस्यादितिनथाः
नोजहम् आगहि जहि गतः इत्यत्र अननासिकलोपेजभावेचकृते ॥ ॥

नयोरसिद्धत्वात् अतो हेः अतो लोप इति हि लोपाल्लोपेन वक्तव्यत्वल्लोपे उपदेश इत्यनुवर्तते न चोपदेशे अदंतायाः प्रकृतिस्तस्या
लोप इत्यर्थे पुनः कृतेन इति न स्यात् पित्विकृताचोर्यचेत्युपदेशानंतरमनुग्रहणे तेदितिवाच्यं उपदेशस्यार्द्धधातुके विशेषण
त्वात् आर्द्धधातुकोपदेशकाले यदकारांतमित्यर्थे दोषाभावात् प्रथमे साक्षान्निर्दिष्टमनंतरं नत्वकारांतकृष्टउप्रत्यय इति स्वी
कारात् उप्रत्ययोत्पत्तिवेलायां प्रकृतेरदंतत्वसद्भावात् जभावोपि न प्रयोजनं उतश्च प्रत्ययादिति विभज्य तस्मात् अतो हेः उ
तश्चेति योगद्वयशेषतया व्याख्यानात् अदंतादुदंताच्च प्रत्ययात्परस्य हेर्लुगिति योगद्वयार्थः आगहिंत्यन्वच प्रकृतेरेवा
दंतत्वात् ततः परस्य हेर्लोपप्रसक्त्यभावात् संप्रसारणमवर्णलोपे मघोनो मघवोनेत्यादौ संप्रसारणे कृते तस्यासिद्धत्वा
दसेति चेत्यल्लोपेन अन्यथा मघवद्धयमनर्थकं छंदसीवनिपौ वक्तव्यावित्ति वनिवं तत्वाद्धस्य संप्रसारणे अन्यत्र स्यानादि
त्वान्नसिन्यरेमघशाह्वस्य भसंज्ञत्वादकल्लोपप्रसंगात् मघवदित्यनुत्पन्ने प्रातिपदिकमिति वक्ष्यमाणत्वादिदमन्यथासि
द्धम् रेभावश्चाल्लोपे किं सिद्धमेर्थं प्रथमं दम्भप्रापः ॥ धाजोल्लिटि फस्य इरेच् ॥ दधारे रेश इति स्थिते रयो रेश इति रेशाह्वस्य रेभावः
तस्यासिद्धत्वात् आतोलोप इटि चेत्याल्लोपः अन्यथा कृतादि क्विदार्द्धधातुकपरत्वाभावात् दब्रह्मणेः इदमन्यथासिद्धं रेभा
वस्य चब्दे दस्तुमयश्चेति सार्वधातुकत्वस्यापि सत्त्वात् सार्वधातुकमपिदिति डित्वे श्नाभ्यस्तयोरात इत्यव्याल्लोपासिद्धेः नन्वेवम
सिद्धवचनस्य प्रयोजनाभावात्किमर्थमारंभ इति चेत् अत्र वार्तिके उक्तकृतः कथमेर्विनिवृत्तौ णोरपि चेदिति कथं विनिवृत्तिः
अनुवनस्तवयोगामिमस्यात्लुक विणानकथं नुनरस्य चे ॥ भगवान्कृतवांस्तु तदर्थं तेन भवेदिदिरेणोविनिवृत्तिः णेरपि
येचतथाप्यनुवृत्तौ विपालुक्चिक्लिन्नपवाहिलुक्स्यात् अयमर्थः एतत्सूत्रानारंभे कुर्वः कुर्मः कुर्यादिति न स्यात् लोपश्चा
स्यान्यतरस्यां म्वोः ये च इति विकरणस्य उकारस्य लोपे प्रत उत्सार्वधातुके इत्यकारस्य उत्वदोलोभ्यात् सार्वधातुकपरं यस्मान्न
हशोउकारे परे उल्लोपशास्त्रस्यासिद्धत्वे तु उकारपरत्वमस्येवेति न सिद्धिः तद्विधानात् कृञोऽकारस्याकारपरते लिङ्दि स्यादि

जिज्यादिना विषयभावे कारिष्यत इत्यत्र णेरनिटीति णिलोपो न स्यात् आर्द्धधातुकस्य इडादित्वात् इटोऽसिद्धत्वेन त्वनिडार्द्ध-
धातुके परतो स्येवेति णिलोपासिद्धिः एवमकारिता रामित्यादौ विणो लुगिति न च प्रत्ययस्य पिलुक् स्यात् असिद्धवदत्रा-
भे इत्त लोपस्यासिद्धत्वात् न च यो लोपः इति प्रश्नस्यार्थः वस्तुतो नैतान्यपि प्रयोजनानि शिवादिष्वस्य त्र वकारे रोलो णिलो-
पस्य विधानात् कारिष्यत इत्यस्य सिद्धेः अत इदिति सूत्रे येचेत्यत्र तत्राम कारवकारयकारे अपरे श्रुतं वमिति व्याख्यानात् अ-
यमस्यापि रात्नार्थत्वात् विणोलुगित्यत्रापि क्लिक्लु ग्रहणानुवृत्त्या क्लिमोष्टत पवलोपविधानेन न तस्य तदप्रसंगात् न च गा-
मह्नेति सूत्रे क्लितीत्यस्य समसेन तन्त्वात् कथं घटीलाभ इति वाच्यं विणा इति पंचम्याः सप्तम्याः षष्ठी व प्रकृतेः तस्मादित्त
नरस्येत्युक्त्वादिति द्वितीयवार्तिकार्थः अभ्युपेत्यत्वेनैतदुक्तं रंभेऽप्यते न तु पक्षः तस्युघ इत्यादौ वसोः संप्रसारणा
स्यासिद्धत्वादातो लोपो न स्यात् निमुघ इत्यादौ परनेकाच इति यणा न स्यात् ललुघ इत्यादौ अविक्रयातिस्वद्धुः स्यात् व
हिरंगलक्षणत्वादरासिद्धत्वात् वावोरिति अत्यादौ श्रावस्यासिद्धत्वाद्वस्वहल इति लोपश्च स्यात् मैवं समानाश्रयत्व एवासिद्धत्व
स्वीकारात् पपुघ इत्यादौ आकारलोपादीनां वसुप्रत्ययो निमित्तं संप्रसारणस्य तु शसादिरजादिविभक्तिरिति निमित्तभेदात् एव
मस्यत्रयोऽत्र नन्वेवमपि पनस्त्य च पपुष्का असिद्धवद्भावस्याश्रयत्वानुपहारेऽपि पपुघ इत्यादौ वहिरंगलक्षणमसिद्धत्वमस्त्ये
वेति कथमिष्टसिद्धिः मैवं अंतरंगवहिरंगयोर्युगपदवस्थाने सत्येव तत्प्रवृत्तेः वहिरंगात्तिःपतो अंतरंगस्य ह्लोपादेः प्राप्तिरेवा-
भावात् समानाश्रयत्वे चात्र ग्रहणेन लभ्यं न च विषयनिर्देशार्थं न दिति वाच्यं अधिकारादेव तदुपपत्तेः एतेन क्रमस्य पलोपा लोपाभ्या-
पादेशेस्यापि सिद्धवत्क्त्वाङ्ग्यापि निरस्तं तेषां णिनिमित्तं आदेशस्य तु विभक्तिनिमित्तभेदात् कुम्भकारु वस्तुणोः सिद्धो वक्तव्यो वस्त्रे वेत्यादौ
भुवो वुग्लुङ्लिटोरिति वुक् उपदिदीये इत्यादौ देङोऽयुङ्रिति युट् न पो रसिद्धत्वात् वभूवेत्यत्र उवङ् उपदिदीये ऽस्यत्र परनेकाच इति यणा व
प्राप्नोति लिटमात्राश्रय समानाश्रयत्वमत्वात् महारस्नार्थं सिद्धवचनारंभः अत्रभाष्ये अस्त्वक् भवो वुङ्लिटो रूपपाया इति सूत्राणीयं ॥

ननु भुवो वुगिति लुङ्लिटोः परयोर्भुव उपधाया ऊकारः स्यादित्यर्थः न चोवङादेशात्पूर्वं उपधाभूतस्य वकारस्यैव ऊत्वापत्ति
उवङ् तस्यैव ऊकारादेशप्रवृत्तेर्नोनियामकाभावादिति वाच्यं ओः सुपीत्यत उकारस्यानुवृत्तेः उकारस्य ऊकारविधानपर्यवः
सानात् नन्वेवं बभूवतुर्बभूवुरिति सिद्धं असंयोगाल्लिट् किदिति लिटः कित्त्वेन गुणवृद्ध्योरप्रवृत्त्या उवङ्प्रवृत्तेः बभूव बभूविथ
तिन्वतस्यात् पित्त्वाद्वचनान्नो कित्त्वाभावाद् उवङपवादयोर्गुणवृद्ध्योः प्रवृत्त्या उकारस्य ऊलभत्वात् मैवं इन्धिभवतिभ्यां चे
ति कित्त्वेन तत्रापि गुणवृद्धिनिषेधादुवङ्सिद्धेः वस्तुतस्त्वत्र कमाश्रित्य इन्धिभवतिभ्यां चेत्येव प्रत्याख्यातं तदुक्तं इ
न्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति न च तत्र कमाश्रित्य वुगेव प्रत्याख्यायतां विनि
गमकाभावादिति वाच्यं क्ङिति चेति निषेधस्य लक्षणगुणविधिप्रतियोगिकत्वमिति सिद्धान्तात् अचो ञ्णितीति वृद्धेश्चाऽ
च इति निर्दिष्टस्यानिकत्वेनातथात्वात् सत्यपि कित्त्वे बभूवेत्यत्र तस्या दुर्वारत्वात् न च कित्त्वविधानस्य सामर्थ्यं गुणनिषेधेन
तस्य चरितार्थत्वात् सार्वधातुकार्धधातुकयोरिति गुणस्य इग्लक्षणत्वात् तस्माद्वुग्विधिरावश्यक इति प्राभेउच्यते इन्धिभ
वतिभ्यां चेति कित्त्वं तु रुचेत्युभयमपि मास्तु न चैवं उवङपवादयोर्गुणवृद्ध्योरेव प्रसक्त्या पश्चादयवायावश्यवावादेशयोः
कृतयोर्भुवो लुङ्लिटोरुपधाया इति न्यासेनाप्यूत्वं न स्यात् उपधाया उवर्णस्यैव ऊत्वं विधीयत इति तदर्थादिति वाच्यं अवावो
रुपधाया अकाररूपाया एव तदुपपत्तेः न वाऽकारस्य तत्र कथमनुवृत्तिरोः सुपीत्यत्र उकारस्यैव प्रकृतत्वादिति वाच्यं
ओरित्यत्राविभक्तिकनिर्देशापररूपाभ्यां अकारस्यापि प्रश्लेषात् न च भयः पशेपत्यादावोः सुपीति यणप्रसंगः अतो
धातोरिति लोपस्य बाधकत्वात् न च कीलालपाविन्यादौ यणापत्तिः अविक्षया नड्भुवामित्यतो वोरित्यस्य तत्रानुवृत्तेः व
कारे परे योऽकार इति तस्माद्वुकः सिद्धत्ववचनं व्यर्थं एवं प्रतुष्टोऽपि तद्विधानसामर्थ्यादेव तत्सिद्धेः न च य्वकारद्वयश्रवणा
र्थं पुद्विधानं दिये इति नूपापनौ व्यञ्जनपरस्यैकस्यानेकस्याय कारस्योच्चारणे विशेषाभावात् स्यादेतत् आभादित्तिमयो

सि॰
म॰
८७

दायामाह॰ अभिव्याप्तौवा नाचः श्वनामघोनाइत्यत्राल्लोपस्य भूयान्इत्यत्रङेर्गुणस्यच प्रसंगात् नोत्यः पथषःपथ्यइत्यादा
वाल्लोपादीनामसिद्धेः संप्रसारणस्यासिद्धत्वे अनादित्वभावात् गौरीवलाकेत्यत्र अणनिमित्तकस्याःकारलोकस्याःसि
द्धत्वेस्मर्यानिष्यतियकारलोपस्यईकारेपरेविहितस्यानुपपत्तेश्च प्रेयान्स्थेयानित्यादौ प्रस्थाद्यादेशानामसिद्धत्वे प्रकृत्यै
काजितिप्रकृतिभावानुपपत्त्यायस्येतिचेत्यकारलोपप्रसंगाच अत्राभाष्ये उभयथाप्यदोषः तथाहिश्वनेत्यत्रतावद्
ल्लोपेकृतेपिनक्षतिः एवंत्वेनापितन्निहन्तेरावश्यकत्वात् नवाल्लोपेऽदात्तनिहतिस्वरापत्तिः नगोश्वन्इतितन्निषेधा
त्नवस्यावेकाचस्तृतीयादिरितिस्वरस्यैवसतिषेधइतिवाच्यं येनकेनविलक्षणेनप्राप्तस्यविभक्तिस्वरस्यैवसिद्धान्ता
त् तेनश्वनःपश्येत्यत्रतृतीयादिस्वरप्रसक्त्यभावेपिनविशेषः नचवकुत्सुनीत्यत्रोदात्तनिहतिस्वरापत्तिः गोणादिषु
श्वन्शब्दपाठेनश्वन्शब्देतदभावस्यज्ञाप्यत्वात् अन्यथानातलक्षणोङीपिउदात्तनिहतिस्वरेणैवांतोदात्तसिद्धौतद्
पठ्यणात् मघोनइत्यादावपिनदोषः मघवच्छब्दोऽव्युत्पन्नप्रातिपदिकमित्युक्तत्वात् भूयानित्यत्रापिनङेर्गुणप्रसं
गः दीर्घोच्चारणसामर्थ्यात् नचभूमेत्येतद्वर्णापत्तदितिवाच्यं उत्तरपदभूम्नीतिनिपातनादेवतत्सिद्धेः तस्मान्ना
धिकारस्सर्वमसिद्धाधिकारइतिपक्षोनिर्दोषः एवंतमभिव्याप्यत्वापितथा पथइत्यादौसंप्रसारणादियलोपपर्यं
तेषुसमानाश्रयत्वाभावादसिद्धत्वप्रसक्त्यभावात् प्रेयानित्यादावपिनदोषः असिद्धत्वेप्रकृतिभावस्येवटिलोपा
स्याप्यप्रवृत्तेः॥ श्नान्नलोपः॥ नेतिलुप्तषष्ठीकोनिर्देशः श्नमःपरस्यनस्यलोपःस्यात् हिनस्ति हिसिहिंसायां इदि
त्वान्नुम् रुधादिभ्यःश्नम् श्नमोनकारस्यानेनलोपः स्यादेतत् श्नमः शकारंपरित्यज्याऽत्रनान्नलोपइत्येवास्तु नचै
वंनन्दितानंदकइत्यादावतिप्रसंगः नान्नलोपोऽनिदितामितिसूत्रणीयत्वात् उत्तरत्राऽनिदितामित्यनुवृत्त्यैवोपप
त्तेः मैवं हिनस्तीत्यत्रनदसिद्धेः तस्येदित्वात् अनिदितामितिस्याऽत्रानुपादानेतुनंदनइत्यादौअतिप्रसंगात् नन्वत्र

क्ङितीत्यनुवर्ततीयमिति न तत्र दोषः न चैवं हिनस्तीत्यत्र लोपो न स्यात् सकारेणाव्यवधानादिति वाच्यं सति सप्तमीत्वस्वीकारात्
परसप्तमीत्वपक्ष एव निर्दिष्टपरिभाषाप्रवृत्तेः एवं नंदमान इत्यादौ प्रतिप्रसंगनादवर्ष्यात् सार्वधातुकमपिदिति शान
चो ङित्त्वात् श्यन्न शाह्वपवक्ङित्त्वेन विशेषणीयः एवं यत्तानां यत्नानामित्यत्रापि तिप्रसंगात् न ङो ङित्त्वात् न घ्नतामीति दीर्घे
णास्य बाधः अणपरत्वात् न च सत्यपि चेत्यस्यास्मादपि परत्वान्नैवं दीर्घ इति वाच्यं सन्निपातपरिभाषाविरोधेन तदप्रवृत्तेः॥
अनिदितां हल उपधायाः क्ङिति॥ हलन्तानामनिदितामंगानामुपधाभूतस्य नस्य लोपः स्यात् क्ङिति हल इत्यंगविशेषणं
तत्त्वात् तदन्तविधिः अनुवृत्तेन नकारे उपधायाश्च भेदेनान्वयः स्रंसु गतिध्वजनयोः अविगादिसूत्रेणाकिन् अनेन नकारलोपः
नकारजावनुस्वारपंचमौ झलि धातुस्थ इति सिद्धान्तात् न तनुगिद्वामिति तुम् इत्यादि प्राङ् प्रत्यङ् एवं नतो गन इत्यादि
स्रस्तध्वस्तध्वान्त्येरङ् अस्रसत् अध्वसत् अनिदितां किं हिंसेः क्विप् हिन् सम्प्रयोगान्नलोपः क्ङिति किं स्रंसति नमतीत्या॰
दि लंगिकंप्योरुपतापशरीरविकारयोरुपसंख्यानं विलगितः विकपितः क्ङित्त्वाभावादिडित्वाच्चाप्राप्ते आरंभः उप
तापेत्यादि किं विलंगितः विकंपितः वृंहेरच्यनिटीति वक्तव्यं निबर्हयति निबर्हकः अचि किं निबृंहते अनिटीति किं नि
बर्हिता निबर्हितं बृहं वृद्धौ वृहत्वतरत्वाभ्यां बृहः सिद्धमिति भाष्यं निबृहयते निबर्हिते इत्यादौ दर्शनात् निबर्हक इत्यादावदर्शनाच्च रंजे
र्णौ मृगरमणे उपसंख्यानं। रजयति मृगान् मृगेति किं रंजयति वस्त्रं चित्रगुणैर्वेति वक्तव्यं रंजेर्निर्णयेवरागी संप्रदादि॰
सूत्रे रंजर जेति निपातनान्नलोप इति भाष्यं न च यथानिर्देशो निपाताभ्युपगमे दशानः करणोऽपि त्रियत्रापि न लोपानि
पातात्पयोर्दंष्ट्रेति न स्यादिति वाच्यं तत्र दशेति शपा निर्देशेन लोपस्य नत्रिमित्तकत्वात्॥ दंशसंजस्वंजां शपि॥ नलोपः
स्यात् दशति सजति स्वजते शपि किं दङ्क्ष्यति दंशः सक्ष्यति संगः स्वङ्क्ष्यते स्वंग इत्यादि॥ रंजेश्च॥ शपि नलोपः स्यात्
रजति योगविभाग उत्तरार्थः। रजकरजनरजःसूपसंख्यानं रुचकंभवने शिर इति वदकादीनामौणादिकानां कित्त्वाद॰

भञ्जेश्च चिणि। वा नलोपः अभाजि अभञ्जि

निदितामित्येवसिद्धमितिभाष्यं ॥ घञिचभावकरणयोः ॥ रंजेर्नस्यलोपोभावार्थेकरणार्थेचघञिपरे रागः अनडुपधार्थइति
हडिः घनोवितिकुत्वं ॥ स्यदोजवे ॥ वेगेनलोपोनिपात्यते जवेकिं स्पंदः ॥ अवोदैधौद्मप्रश्रथहिमश्रथाः ॥ एतेनिपात्यंते उं
दीक्लेदने अवपूर्वोह्लजिनलोपः एधः इंधेर्घञिनलोपोगुणश्च नपातनलोपइतिलद्यपपद्यगुणनिषेधात् उद्मः उंदेरौणादिके
मप्रत्ययेनलोपोगुणाभावश्च श्रथः श्रंथेर्घञिनलोपवृद्ध्यभावौ अनडुपधायाइतिवृद्धेर्विल्लक्षणाभावेन नथा
नलोपइति निषेधानुपपत्तेः एवंहिमश्रथाः अपिबोध्यं ॥ नाञ्चेःपूजायां ॥ पूजार्थस्याञ्चतेर्नलोपोनस्यात् अंचुगतिपूज
नयोः अनिदितामितिप्राप्तस्यानिषेधः प्राङ् चस्यसंयोगांतलोपः नस्यकुत्वेनङत्वे ॥ क्त्विस्कंदिस्यंदोः ॥ स्कंदिर्गतिशोषणयोः
स्यंदूप्रस्रवणे अनयोर्नलोपोनस्यात्क्त्वाप्रत्यये स्कंत्वास्यंत्वाच इतिनेट् स्यत्वास्यंदित्वा ऊदित्वात्स्वरतिसूतीतिवेट् ॥ जांतन
शांविभाषा ॥ जांतानांनशेश्चनलोपोवास्यात्क्त्वाप्रत्यये भक्त्वा भंक्त्वा रक्त्वा रंक्त्वा नष्ट्वा नंष्ट्वा मस्जिनशोर्झलीतिनुम् रधा

न॰

दिभ्यश्चेतीट्पक्षे नशित्वा फलादावित्रिवाच्य नेह अंजित्वा पक्षे अक्त्वा अंक्त्वा ॥ शासइदङ्हलोः ॥ शासुअनुशिष्टौ अस्य उप
धायाइत्स्यादङिहलादौचक्ङिति सन्निशाल्तोपङ् अशिषत् शास्विसीतिषत्वंनिष्ठायांशिष्टः शिष्टवान् तसिशिष्टः सार्वधा
त्कमपिदितिङित्वं आशासःक्वावुपसंख्याने आशीः वोर्विधुपधायादीर्घः स्वत्रेशास्मिमाचयस्तो आशासेइत्यादौमाभूदितिक्व
क्वावेवेतिनियमार्थमेतत् माहवयीदङ् प्रकृतेरेवशासेर्ग्रहणात् आशास्तइत्यादाविवक्विप्यपिशास्याभावादिष्टसिद्धिम् नचशा
स्मिमाचयस्तोपिक्विलोपेहलादेः परत्वाभावादप्राप्तानियमानुपपत्तिः परत्वादित्वस्यलोपात्पूर्वंप्रवृत्तेः नियताह्लोप
सेवप्राथमिकत्वेपि प्रत्ययलक्षणेनसिद्धेः नचवर्णाश्रयेप्रत्ययलक्षणंनास्तीतिवाच्यं वर्णप्राधान्यएवतन्निषेधात् अत्रत्वप्र
त्ययस्येवप्राधान्यात् यद्वा क्वावितिउपसंख्याने आर्यशीः मित्रशीः नतुआङ् पूर्वोवेलुपसंख्याने आशास्यमानमित्यादौमा
भूदितिनियमार्थमेतत् वस्तुतस्तुङ् प्रकृतेरेवशासेर्ग्रहणं आशीरितितुत्याशीः प्रेषेषुतिङ का त्वमितिनिपातनात्सिद्धं ॥

का

शाहै ॥ शासः शाभावः स्यात् हौ असिद्धत्वात् एकलपरत्वेहेर्धिः शाधि ॥ हन्तेर्जः ॥ हन्तेर्जो देशो हौ जहि असिद्धत्वादतो हे
र्न लुक् प्रवृत्तिः ॥ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥ अनुनासिकेति लुप्तषष्ठीकं व
नतिभिन्नानां विशेषणं वनतेरनुनासिकान्तत्वव्यभिचाराभावात् अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति
परे यथासमनुनासिकलोप इति व्याख्याने तु यमेरपि नमिमन्योर्मिहन्तेश्च मस्तादीनां वानेप्यस्यापि लोपापत्तेः यमिरमिनमिग
मिहनिमन्यतयोनुनासिकान्ता अनुदात्तोपदेशाः तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनुइत्यनुनासिकान्तास्तनोत्यादयः
यतः रतः नतः गतः हतः इत्यादि निष्ठान्तापत्ते। नमिहमित्यादि सार्वधातुकमपिदिति ङित्व त्वापि चेति वक्तव्यं प्रसत्य प्र
तत्य वामइति वक्तव्यं अमेतानामित्यर्थः प्रयत्य प्रयम्य प्ररत्य प्ररम्य प्रणत्य प्रणम्य ॥ वाल्यपि ॥ अनुदात्तोपदेशव
नतितनोत्यादीनामनुनासिकलोपो वाल्यपि व्यवस्थितविकल्पोयं मान्तानिटां वा नान्तानिटां यमादीनां नित्यं आगत्य आ
गम्य प्रहत्य प्रमत्य प्रतत्य ॥ नक्तिचि दीर्घश्च ॥ अनिटां वनतितनोत्यादीनां क्तिचि परे दीर्घो नुनासिकलोपो न स्तः आनुना
सिकस्य क्वि झलोः क्ङिति दीर्घस्य अनुदात्तोपदेशे तिन्लोपस्य च प्रामाण्यं बेभः क्तिचक्तौ च संज्ञायामिति क्तिच् यन्तिः रन्तिः वन्तिः
यन्तिः ॥ गमः क्वौ ॥ अनुनासिकलोपः स्यात् अंगगत् ज्ञ्गस्येति तुक् गमादीनामिति वक्तव्यं परीतत् नहिहन्ती ति दीर्घः
संयत् सुनत् ऊढ गमादीनामिति वक्तव्यं चकाराह्लोपः सुयेरुः सुयेमुः ॥ विड्वनोरनुनासिकस्यात् ॥ अनुनासिकस्य
आकारः स्यादनयोः जोगडंअपनयने गास्य भावे अवादेशः अवावा अवावानो ॥ जनसनखनां सञ्झलोः ॥ आत्वंस्यात् नस
नि झलादौ प्रत्यये चेत्यर्थः उतझलादौ सनीति नाम्यः जिजनिषतीत्यादौ सेटि सन्यप्यापत्तेः नोन्त्यः जातइत्यादावनापत्तेः
मैवं आये अनुवृत्तेनेन झलासनो विशेषणीयत्वात् द्वितीये पि क्ङितीत्यनुवृत्तेः एवं च झलग्रहणान कर्तव्यं जनसनखनसना
मिति योगे झलादौ क्ङितीति व्याख्याय सनि चेति योगे झलादौ सनीति व्याख्यानादेव सिद्धेः सनोतेरनुनासिकलोपादात्व

न१

सि॰
घ॰
५५

११

विप्रतिषेधेन नत्वयं विप्रतिषेधो न संभवति अनुनासिकविधावात्वविधौ च सनोतेः पाठस्य निरवकाशत्वात् तथा च अनुना
सिकलोपस्य तनोत्यादौ आत्वस्य च जनादौ सावकाशत्वमिति द्वैविध्यत्वात् मैवं तनोत्यादिषु सनोतिपाठस्य जनादिषु सिस्तथा सो
रिमादौ ग्रहणार्थत्वेनाप्युपपत्तेः आत्वविधौ सनोतिनिर्देशस्य च ये विभाषेत्येतदर्थत्वात् अथ तथापि विप्रतिषेधानुपपत्तिः
असिद्धवदत्राभादिति द्वयोरप्यसिद्धत्वात् अत एव सर्वत्रासिद्धे नास्ति विप्रतिषेध इति सिद्धान्तः न त्वेकस्यैवासिद्धत्वाद्विप्रति
षेधाभावे त्वद्वयोरप्यसिद्धत्वे सतत्तोर्विप्रतिषेधो नैवाविरुध्यात् मैवं ञुमास्थागापाजहातिसां हलीति हल्ग्रहणेनाभीयासिद्ध
त्वे विप्रतिषेधोऽस्तीति ज्ञापितत्वात् तद्धि हलादौ क्ङिति ईत्वे तत्वजादौ गोदः केवलदञ्यादाविषेधेतदर्थं । यदि त्वत्र विप्रतिषे
धो न स्यात् तदा ईत्वे कृते पि तस्यासिद्धत्वादाकारलोपो भविष्यतीति हल्पदवैयर्थ्यं विप्रतिषेधसत्वे त्वातो लोपे वा पि वा परत्वा
दीत्वे कृते सकृद्गतिन्यायेन पुनरातो लोपो न स्यादत ईत्वाभावार्थं तया हल्ग्रहणसार्थक्यं न त्वईत्वे सतीयङ् स्यात् न च ईत्वम
सिद्धमिति वाच्यं धियो [illegible] स्मादेरसिद्धेः नच ध्यायतिर्धर्षयस्योः संप्रसारणे तन्वमीत्वमिति वाच्यं तथापि कावीत्वे विभक्तावि
यङ्कि नित्वाप्रयत्नादसिद्धत्वानुपपत्तेः अतो जादिव्यावृत्त्यर्थमेव हल्ग्रहणमिति चेन्न आतो लोप इटि च ञुमास्थागापाज
हातिसाम् इटि अजादौ क्ङिति च परत्वादातो लोपः स्यात् ईत्वबाधनार्थं चेदं ईत् आर्न ईत्वे स्यात् इको त्वमन्तर्यः अ[illegible]दो ञुमा
स्थेति लोपोऽस्यापवादः इति ञुमास्थेति सूत्रे गाईत्वविधाय हल्ग्रहणस्य सार्थक्यत्वात् यलिङि वान्यस्य संयोगादेः न ल्यपि म
यतेरिदन्यतरस्यां यति [illegible] यति परे ईत्वे स्यात् इति न्यासे नैवोपपत्तेः हल्ग्रहणस्यैवाक्यार्थज्ञापकताया सम्भवात् ॥ ये वि
भाषा ॥ जनसनखनामात्वं वा यादौ प्रत्यये जायते जन्यते यङि जाजायते जंजन्यते इत्यादि ॥ तनोतेर्यकि ॥ आकारोऽन्तादे
शो वा तायते तन्यते, सनः क्तिचि लोपश्चास्यान्यतरस्यां, सनोतेः क्तिचि आत्वे वा न लोपश्च वा स्यात् घञुदाने संत्तायो क्तिच
सनुनादिति सतिः सातिः आत्वनलोपयोरभावे अनुदात्तोपदेशेति न लोपः इहान्यतरस्यांग्रहणं शक्यमकर्तुं सनः

ज़

पियो

ज़

क्विलोपः आत्वं च विभाषा अपरआह सूत्रमेवेदं व्यर्थं आत्वलोपविभाषाणां प्रकृतत्वात् न चापि संबंधमात्रे कर्तव्ये सतः
क्विलोपस्य आत्वे वा विभाषेति ॥ आर्द्धधातुके ॥ अपिकारोपं अतो लोपो यलोपस्य णिलोपस्य प्रयोजनं आल्लोपईत्वमेत्वव
धेडतान्या इयातुके विएवज्ञावस्य सीयुटीति भाष्यं ननु चिकीर्षतीत्यत्र सनो ऽकारस्य लोपेपि शपो ऽकारस्य श्रवणोपपत्तिः
नवशवकारस्यैवलोपापत्तिः आदिप्रभृतिभ्यः शपोलुग्विधानेन तद्भावस्य ज्ञाप्यत्वात् न च तत्र अ ऽतो लोपेन तस्य स्थानिव
द्भावाद्धिनोम्रृष्टइत्यादौ च निषेधत्वादिकं न स्यात् लाक्षितन लक्ष्मता गस्येति तन्निषेधान्नस्मिडिरिति कथं ज्ञापकत्वमिति वाच्यं।
एवमपि याति वान्यश्रीनास्य हादिपाठस्य ज्ञापकत्वात् तस्मादतो लोपो नार्द्धधातुकापि कारप्रयोजनमिति चेन्न। हृतस्यैमा
दौन्तहारणार्थत्वात् वेभिदितेत्यादावि वेविभेयते इत्यादौ न यलोपः पाच्यते इत्यादावि वपावयतीत्यादौ न णिलोपः य
यतुरित्यादावि वयानीत्यादौ नातो लोपः दीयते इत्यादावि वप्रदानामित्यादौ न ईत्वं स्थेयादित्यादावाशीर्लिङी वस्थापादि
त्यादौ न एत्वं कारिषीष्टेत्यादावि विक्रियेतेत्यादौ न विएवज्ञावः न चात्र यकाव्यवधानान्नाप्राप्तिरतः अस्तु बीतेत्येवोदाहार्थ
मिति वाच्यं क्रियेतेत्यत्र यकएव विएवज्ञावोमाभूदिति तस्यापुदाहरणत्वात् सति विएवज्ञावे हडोआदेनलक्षणस्य प्रकः
प्रसंगात् ॥ भ्रस्जोरोपधयोरमन्यतरस्यां ॥ भ्रस्जपाके अस्यरेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्द्धधातुके स्थानषष्ठी
निर्देशाद्रेफोपधयोर्निवृत्तिः पाठचपेत्वयैवागमत्वात् संबंधिभेदे देशागमत्वयोरविरोधात् न चादेशस्य स्थानिसमानदे
शत्वानियमात् रेफसकारस्थानिकस्य रमागमस्य कथमकारोत्तरदेशत्वं सकारसमानदेशत्वे रेफेण सह भिन्नदेशत्वादिति
वाच्यं मित्वाद्विरोधेनतथात्वात् स्थानषष्ठीसामर्थ्यादेशभेदेपि रेफनिवृत्तिसिद्धेः न तस्थानिभेदादादेशभेदापत्तिः विधेय
गतैकत्वस्य विवक्षितत्वात् रोपधयोरितिहि तस्य स्थानिनावच्छेदकत्वयान तद्भेदाभावाच्च भारद्वाजीयास्तु पठंति भ्रस्जोरो
पधयोर्लोप आगमो रमन्यतरस्यामिति प्रत्याधिः एवंतरस्त्वान्नलोपान्तुहस्याभ्रस्जोरोपधयोर्लोपः स्यान्नरमागमस्येति

नी

सि॰
ध॰
५॰

१००

सूत्रार्थः॥ उभयथापि भ्रस्जेरयमस्थाने भर्जेतिसिद्धं बभर्ज बभर्जतुरित्यादिपक्षे च भ्रज्ज बभ्रज्जतुरित्यादि क्ङितिरमागमसंप्र
सारणयोः प्रसक्तौ संप्रसारणमेव भृज्ज्यात् किदाशिषीति किंत्वे एवं भृष्टः भृष्टवानित्यादि तदुक्तं भ्रस्जादेशात्संप्रसारणं वि
प्रतिषेधेनेति भर्ष्टास्यो भ्रज्जनीत्यादौ वमावकाशयोरमादेशसंप्रसारणयोर्भृष्ट इत्यादौ युगपत्प्रसंगे परत्वादमादेशप्र
सक्तौ पूर्वविप्रतिषेधोयमारभ्यते अथ रेफसकारयोरिकारयवादेशात्सक्त तदुक्तं रमोर्वर्ववचनात्सिद्धमिति वा ऋकारव
चनादित्यर्थः तथा च ऋकारादेशेपि भृष्ट इत्यादौ रूपभेदाभावात्पूर्वविप्रतिषेधेनारभ्य इति लाघवे सूत्रभाष्ये ऋवचनेपि
सिद्धिहेत्वं भ्रस्जादेशः पूर्वविप्रतिषेधेनेति वक्तव्यमेव परमात्मविहङोकृतायां हि भ्रष्टादीति रूपं स्यात् बभार्ज्जीदिति
तथा चोक्तं भाष्ये लाघवेनालिसूत्रे विभियत इति यथान्यासमेवास्तु पूर्वोक्तपूर्वविप्रतिषेधोपि नावश्यकः नित्यत्वादेवतत्र
संप्रसारणप्रवृत्तेः नचशाह्मांतरप्राप्त्यानदनित्यं कृताकृतप्रसंगित्वमात्रेणापि नित्यत्वस्वीकारात् नचसंप्रसारणे कृतेपि
ऋकारैकदेशस्य रेफस्य रेफग्रहणेन ग्रहणात्तस्य सकारस्य च रमादेशप्रसंगः सोपि नित्यएवेति वाच्यं वर्णैकदेशा वर्णग्रह
णेन न गृह्यन्त इति सिद्धान्तात् ग्रहणपक्षेप्यत्रोपदेशानुवृत्तेः उपदेशे यो भ्रस्जे रेफस्तस्यैव रमादेशविधानात् वरीभृज्यत
इत्यत्र रीगागमसंबंधिनोपि रेफस्य भ्रस्जावयवत्वात्तस्यापि रमादेशो न निवृत्तिवारणायोपदेशानुवृत्तेरावश्यकत्वात्
अत्रतरदन्तः भ्रस्जो रमन्यतरस्यामिति सूत्रे प्रोक्तं रेफाकारसकारात्मकसमुदायस्य ऋअमादेशः स्यादित्यर्थः गुणेकृते
बभर्ज भर्जको भर्जनमित्यादि ऋकाराभावपक्षे भ्रज्जको भ्रज्जनं बभ्रज्जेत्यादि क्ङिति तु ऋकारपक्षे गुणनिषेधे भृष्टिः भृज्या
दित्यादि तदभावे संप्रसारणात्तदेव रूपं एवं च पूर्वविप्रतिषेधस्योपदेशानुवृत्तेश्चानाश्रयणे लाघवमित्याह तत्र प्रसव
निष्पन्ने रेफसकारयोर्ऋकारादेश इति वदता वार्त्तिककृतैव शोकितप्रायमेतत् अकारमात्रस्यापि कस्मान्न ऋरदन्तेनस्याति
कोटौ प्रवेशितत्वात् किंतु सूत्रे विभियत इति वदता भगवता च बहवो दोषाः सूचिताः तथाहि घपि लिटि बभर्जतुः बभर्जु

पि॰

तिस्यादिरूपं तत्र ग्रसेर्यो मा भूदिति किं ब्राहुणानिषेधे वभ्रजतुरित्यादि स्यात् एवं सति विभर्जतीति निरुच्यते सनीवंतेति इट् किं कस्मा
त् उक्तरीत्यान्न विभ्रज्जतीत्यादि स्यात् हलंताच्चेति सनः कित्वात् लिङ्सिचोसडिं भर्ज्जीष्ट अभर्ष्टेतीष्यते तत्र भ्रज्जीष्ट अभ्रष्टे
ति स्यात् लिङ्सिचावात्मनेपदेष्विति कित्वात् एपनाच्चडि अबभर्जदितीष्यते तत्राऽबीभ्रजदिति च स्यात् उक्तं दितिकृत्स्वभ
हत्तेः तस्य ह्रस्वाभपवादत्वात् सत्वद्भावे रूत्वे वदीर्घो लघोरित्यस्य प्रवृत्तेः उक्तं दिमस्यैव कालिकत्वयापत्ते अबभर्जदिति
स्य सिद्धावपि पत्ते अबीभ्रजदित्यस्यानिष्यमाणस्यापि प्रसंगात् ननु भ्रस्ज्जी भर्जेने इत्यस्य तादृशो रूपमिष्टमेवेति अ
स्त्ररूपितरापत्तिर्न दोषाय भर्जनस्य पाकविशेषात्मकत्वेप्यवांतरार्थभेदस्याऽविवक्षितत्वात् सत्यं तथापि प्रागुक्तदोष
तादवस्थ्यं दुर्वारत्वात् नरेष्यमाणानां रूपाणां भर्जिमादायाप्यसिद्धेः तस्याप्युक्तरीत्या गुणनिषेधात् आत्मनेपदित्वाच्च
उदात्तत्वेन ततः परेषां सलिङ्सिचामिडागमस्य ततश्च सत्वाच्च एतेन भ्रस्जे भर्जिभाव एव विधीयतामिति शंकापि निरस्ता
किं चात्र पक्षे लुक्यपि को दोषः वधादेशवत्स्थानिवद्भावेऽपि भ्रस्ज आदेशो पुनर्हि तस्य डल्लभत्वात् स्थानिवद्भावेऽनभ्यासस्येति व
डुब्रीहिणानत्रिषेधात् ग्रस्भुपेस्यापि हम्मः हलिग्रीणायामाडुवीराः यावंतरे तेषामाविश्यपकत्वेपि वा भर्जिता वा भर्जिष्यती
त्यादिरूपाणि निर्वक्तव्यानामसिद्धेः स्थानेऽन्तरतमो व्याश्रयणोब्रसोरत्यन्तरसामित्यस्य रस्य इति सम्प्रदायस्य भ्रशादेशः स्यादित्यर्थः
तत्र न कश्चिद्दोषः इति दिक् अत्रेदं वक्तव्यं नैते दोषा भाष्यकारेणाविवक्षिता: ॥ अतो लोपः ॥ आर्द्धधातुकोपदेशकालेऽप
दकारांतेन तस्य लोपः स्यात् अलोन्त्यपरिभाषया अकारस्य लोपः चिकीर्षकः चिकीर्षिता इत्यादि उपदेशेति किं गत इत्यादौ मा
भूत् कप्रत्ययोत्पत्तिवेलायामातत्त्वात् णिल्लोपादिवत् यणगुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धं णिलोपस्यावकाशः का
रितवत्यादि अयङ् श्रियाविद्यादिः एतनवदित्यत्रोभयप्रसंगे पूर्वविप्रतिषेधेन णिलोपः आटिटदित्यत्र यणं वाधित्वा णि
लोपः परत्वेकावढ इत्ययणोनित्यत्वे दित्यादौ सावकाशत्वात् कारणमित्यादौ गुणं वाधित्वा णिलोपः कारकः इत्यादौ वृद्धिं वाधि

ज१

सि·
ध·
१०१

101

णाणिलोपः अचो ञ्णितीति वृद्धेः सावाय इत्यादौ सावकाशत्वात् कार्यते इत्यादौ दीर्घं वाधित्वा णिलोपः अकृत्सार्वधातुकयो
रिति दीर्घस्य सीयते श्रूयते इत्यादौ सावकाशत्वात् अत्र केचित् णिलोपस्य इयङ्ङाद्यन्यतमानिर्मुक्तविषयाभावात्कथं विप्रति
षेधः अतः पाक्षिकित्वादिक्रियेनेत सावकाश इति वार्तिकाभिप्रायः तिन्न चेति न तत्रैवानिषेधात् वस्तुतोऽनेकेऽप्युक्तिसाम
र्थ्यात्क्रि चाभिन्नमध्याइ धातुके तस्य विषयः अन्यथाणोरित्यवस्थानां आर्द्धधातुके परे विहितस्य णिलोपस्य सर्वविषयेऽ
यङ्-यणादिभिर्वाधितस्य परिशेषादेव क्रिन्मात्रविषयकत्वसिद्धावुक्तिरीत्यस्य वैयर्थ्यात् तथा च इयङ्ङादीनामपवादत्व
णिलोप इति उत्सर्गापवादयोर्विप्रतिषेधो न संभवत्येवेत्याहुः तच्चिन्त्यं वालनीन्यायेन अन्यैकं सावकाशत्वसत्त्वात् यदाये
न समं विप्रतिषेधस्याङ्गीन्नेव काशस्य सलभत्वात् कार्यतं इत्यत्र अकृदिति दीर्घप्रसक्तिसत्त्वेऽपि तत्र इयङ् प्रसक्त्यभावा
त्तत्र तत्परिहारेणाचरितार्थस्य णिलोपस्य अततनत्तादित्यत्र इयङा समं विप्रतिषेधस्य भाष्यप्रदर्शितत्वात् अकृतमव
सरामः अथात्र यणादयः प्रवर्तेरंस्तर्हि स्थानिवद्भावेन तेषामेव णिग्रहणेन ग्रहणे णिलोपसंभवात् अतः पूर्वविप्रतिषेधोऽय
मेः अत्र भाष्ये एवं सति इयङादेशे लोपपरिभाषया यकारमात्रस्य लोपप्रसंगः नवगुणवृद्ध्योरप्ययं दोषः कृतेनोक्तः
तथाप्यनन्तरंगत्वात् इयायादेशयोः कृतयोर्यलोपप्रसंगसत्त्वादिति वाच्यम् वार्णादाङ्गं बलीय इति न्यायात् यायोर्वाधित्वा णि
लोपस्यैव प्रवृत्तेः अतो लोपस्य वृद्धिदीर्घाभ्यामेव समं विप्रतिषेधः इयङ्गुणगुणानां तत्र प्रसक्त्यभावात् विकीर्षकः वि
कीर्षेत अचो ञ्णितीति वृद्धिं अकृत्सार्वेति दीर्घं च परत्वात् बाधित्वाऽतो लोपः णाव इत्यादौ स्पेनायत इत्यादौ च वृद्धिदी
र्घयोः सावकाशत्वात् विकीर्षितेत्यादौ चाऽतो लोपस्य चरितार्थत्वात् ॥ यस्य हलः ॥ हलः परस्य यस्य लोपः स्यात् आर्द्ध
धातुके स्वस्येति संघातग्रहणं आदेः परस्येति व्यंजनमात्रस्य लोपः अकारस्यातो लोपः सोसूय्यते रामिकृत्वो प्रयोगः
सोसूवाचक्रे इत्यादि यद्वा यस्येति वर्णमात्रग्रहणे न चैवमरुर्यीदमयीदित्यादावतिप्रसंगः तङ्कं यलोपे वर्णग्रहणे

वेद्यान्तं तस्य प्रतिषेध इति चेन्न अंगस्य यो यकार इत्यंगसंज्ञानिमित्तत्वेन यकारस्य विशेषणत्वात् ॥ क्यस्य विभाषा ॥ हलः परयोः क्यच्
क्यङोर्लोपो वा स्यादार्धधातुके समिधिता समिध्यिता अतो लोपस्य स्थानिवत्त्वान्न लघूपधगुणः क्यस्येति क्यचोपि ग्रहणमिति केचि
त् तन्न तत्र ककारानुबन्धस्य भाष्ये प्रत्याख्यातत्वात् ॥ णेरनिटि ॥ अनिडादावार्धधातुके णेर्लोपः स्यात् कमेर्णिङो णिचश्च णेरिति ग्रह
णम् अचीकमत अचकमत चङः आर्धधातुकत्वात् णिङो लोपः एवं काम्यते कार्यते इत्यादि अनिटि किं कारयिता अत्र भा
ष्ये अनिटीति न कर्त्तव्यं निष्ठायां सेटीति नियमेन कारयितेत्यादिसिद्धेः सेटि निष्ठायामेव णिलोपो नार्धधातुकान्तरे इति तदर्थो
त् यद्वा निष्ठायां सेटि जनिता मंत्रे शमिता यज्ञे अयामन्तेत्यत्र अयपूर्व इति योगविभागः णेः सेटीत्यनुवर्तनेनैरयादेशः सेटि आर्ध
धातुके इत्यर्थः णेरनिटि लोपस्यापवादोयं ततश्चामन्तेत्यादि अयिरनुवर्तत इति सिद्धं ॥ निष्ठायां सेटि ॥ णेर्लोपः स्यात् सेटि निष्ठा
यां भावितो भावितवान् ननु सेटीति व्यर्थं व्यावर्त्याभावात् णेः तस्यास्तस्या निष्ठाया अनिट्त्वानुपपत्तेः न च ज्ञपेः सनीवन्तेति विक
ल्पितेट्त्वात् ज्ञप्तिः यस्य विभाषेति इट्प्रतिषेध इति वाच्यं तत्र एकाच इत्यनुवृत्तेः अन्यथा दरिद्रितः इत्यत्रापत्तेः
दरिद्रातेः सनि इटो विकल्पस्योपसंख्यानात् ज्ञपेश्चानेकाच्त्वात् यस्य विभाषेति निषेधाभावात् अत्र सिद्धान्तः इड्भावार्थं तत्
त्रिमितत्वाल्लोपस्येति अयमर्थः निष्ठायामित्येवोच्यमाने इटः पूर्वमेव णिलोपः स्यात् तथा च ज्ञप इत्यस्य एकाच्त्वादेकाच इति
निषेधप्रवृत्त्याविट् न स्यात् सेटीत्युक्ते तु इटं विना लोपाभावादनेकाच्त्वाद्यस्य विभाषेति निषेधो न प्रवर्तते इट् कृते तु णिलोपा
देकाच्त्वेपि न क्षतिः इटः पूर्वमेवोपपन्नत्वात् ननु सेटीत्युक्तौ सत्यपि णिलोपेन तस्य पूर्वस्माद्विधौ स्थानिवद्भावात्कर्थं एकाच्
उपदेशादिति निषेधः प्रवर्तेतेति चेन्न अपूर्वस्माद्विधौ स्थानिवत्त्वमनित्यमित्यस्य ज्ञापकत्वात् तथा च ह्वरदन्तः अनित्यः पूर्वस्माद्वि
धौ स्थानिवद्भावः निष्ठायां सेटीति सेट्कृत्यादिति अत्र भाष्ये छन्दस्येव दृष्टमानिति णेरध्ययने वृत्तमिति निपातनेन नियमार्थं एवैव
णेर्निष्ठायां लोपो नान्यत्रेति न च वर्तितमन्यामित्यादौ अतिप्रसंगः अध्ययने चेह निर्वर्तित इति तद्व्याहतेः इषिरमिस्थभस्रधीनाम्

पर्स्यध्याने सार्वधातुके णिलोपस्याऽप्राप्तावारंभः वर्ईन्तद्वास्तृहस्रुतयः वर्ईयेतित्यर्थः बृहस्पतिश्वासम्नेरमाणान्तरमयत्वित्यर्थः अग्रेश
ईमहहनेसौभगाय शर्ईयेत्यर्थः वस्तुतस्तु छंदस्युभयसंज्ञत्वान्सिद्धमितिभाष्यं ॥ जनितामंत्रे ॥ णिलोपोनिपात्यते निहाभित्रे सेटि
आर्धधातुकेतस्याऽप्राप्तत्वात् योनःपिताजनिता जनयितेत्यर्थः ॥ शमितायज्ञे ॥ शृतंहविःशमिता मेत्रास्त्यस्यानुहन्तिरितिहन्तिः
अतएवविवरणाचाकोशमयितेत्यर्थइतिणिलोपोगोऽभिप्रज्ञानां ॥ अयामंताल्वाय्येत्न्विष्णुषु ॥ एषुणेरयादेशःस्यात् णिलोपस्या
पवादः कामयांचक्रे कारयामास कारयत्यादितिणिचंतादाम् गंडयंतः मंडयंतः स्तम्भूवहिवसिभासिसाधिगंडिमंडिजिनंदिभिश्च
योणादिकोऽकच् कोंतइत्यंतादेशः स्पृहयालुः स्पृहिगृहीत्यालुः स्पृहयाय्यः श्रुदक्षिस्पृहिगृहिभ्य आय्यइत्यौणादिकआय्यःस्तन
यित्नुःस्तनिहृषिपुषीत्यौणादिकइत्नुः वीरुधः पारयिष्णवःणेश्छंदसीतिइष्णुच् ननुणेरनिटीतिणिलोपप्रवृत्तेर्निषिध्यतो गुणाया
देशयोः कृतरूपाणांसिद्धेःनैवं इत्नुरर्थमयादेशस्यावश्यकत्वादुत्तनिषेधविधानेगौरवात् ॥ ल्यपिलघुपूर्वात् ॥ लघुपूर्वात्पर
स्यणेरयादेशोल्यपि विगणय्य प्रणमय्य नन्वत्रणौकृतस्यानोलोपस्यपूर्वस्माद्विधौस्थानिवत्त्वाल्लघुपूर्वात्परोणिर्नास्ति अका
राये ल्यपाणकारस्यैवपूर्वत्वात् नचारंभसामर्थ्यं अनुगमय्येत्यादौमित्त्वचरितार्थत्वात् नत्राल्लोपाभावात् मितांह्रस्वइतिह्रस्वप्रा
वृत्तेश्च तत्रमकारात्परोणिः मकारात्पूर्वोऽकारइतिअयादेशस्यालभ्यात् नैवं पूर्वस्माद्विधौस्थानिवद्भावस्याऽनित्यतायाज्ञापकत्वा
त् तत्प्रत्याख्यानाच्च ननुतथापिप्रणमय्येत्यादौमितांह्रस्वस्य प्रवेभिदय्येत्यत्रयङ्लोपस्यविषयस्यहल इतियलोपस्यविगणय्येत्यादौ
णिनिमित्तकस्याल्लोपस्यचाऽभीयत्वेनासिद्धत्वात्स्थानिवत्त्वेलघुपूर्वात्परत्वंदुर्लभमेवेतिचेत् नैवं व्याश्रयत्वात् ह्रस्वादीनांणिर्निमित्तं अया
देशस्यतुल्यबितिनदग्धहन्तेः ॥ विभाषापः ॥ आपोणेरयादेशोवाल्यपि प्रापय्य प्राप्य अप्राप्तविभाषेयं एतेनअधिगमय्यवाप्यदिवः
ल्यप्यन्तेइतिनैषधेयंव्याख्यातं तेनतत्रोनभीवितएएर्थतामाश्रयेनोतिरस्ता अध्याप्येत्यत्रतुनभवति लाक्षणिकत्वात् ॥ युप्लुवो
दीर्घः छंदसि ॥ ल्यपिपरेऽनयोर्दीर्घःस्यात् विप्रूय विप्लूय ॥ क्षियः ॥ क्षियोल्यपिदीर्घःस्यात् प्रक्षीययोगविभागोऽच्छंदसीत्य

प १

स्यानन्वयार्थः ॥ निष्ठायामण्यदर्थे ॥ ण्यदर्थो भावकर्मणी तद्भिन्नेऽर्थे निष्ठायां क्षियो दीर्घः स्यात् क्षीणः क्षीणवान् क्षियो दीर्घादि
ति तस्य नत्वं भावकर्मणोस्तु क्षितं तेन क्षितः कामो मया नन्वयाऽर्थेऽप्यादौ करणत्वमपि ण्यदर्थ इति वाच्यं तयोरेव कृत्यक्तखलर्था इ
ति सूत्राद्रूपानयोरेवार्थयोस्तत्र भेदप्रतियोगित्वेनोपादानात् ॥ वाक्रोशदैन्ययोः ॥ क्षियो वा दीर्घो निष्ठायामाक्रोशे दैन्ये च गम्ये क्षी
णायुर्भव क्षितायुर्वा क्षीणोऽयं तपस्वी क्षितो वा समभिव्याहाराद्दकार्यप्रतीतिः ॥ इति श्रीसिद्धान्तसुधानिधौ बृहत्सप्तचतुर्थे द्विती
यमाह्निकम् ॥ श्रीः ॥ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ॥ इहार्धधातुकस्य तदुत्तमं सीयु
टो विशेषणं न तु स्यादीनां व्यभिचारात् अत एव तन्त्रोक्तं चिण्वद्भावश्च सीयुटीति न च सीयुट आगमत्वादार्धधातुकस्य च प्रत्य
यमात्रधर्मत्वात्तद्भाग्यन्वयानुपपत्तिरिति वाच्यं सीयुडित्यपदस्य तद्धटितलिङ्लाक्षणिकत्वात् ननु भावकर्मवाचिनो ये स्यादयस्तेष्वित्यर्थः
उत भावकर्मवाचिनि परतो ये स्यादय इति नाद्यः सीयुटा समं तदन्वयेऽपि स्यादिभिरनन्वयापत्तेः सीयुटो लाद्यवयवत्वादाख्या
तस्य च लः कर्मणि च भावे चेति भावकर्मणोर्विधानात् स्यादीनां च तद्याणां प्रत्ययत्वेन तदवयवत्वाभावाद्भावकर्मणोरुक्तेषाम
विहितत्वात् न द्वितीयः स्यादीनां तथात्वेऽपि सीयुटो तथात्वात् भावकर्मवाचिलकारावयवत्वेन तत्परत्वाभावात् मैवं तथाहि
नाद्यो दोषः भावकर्मणोरित्यत्र स्यसिच्तासीयुट्स्वपि तेषामपि तदर्थकत्वस्वीकारात् नापि द्वितीयः भावकर्मवाचिपरत्वस्य सी
युटि बाधाद्भावकर्मवाचिनि सीयुटि परे कार्यविज्ञानात् उपदेश इत्येतच्च पदविशेषणं न तु हेतुनिर्दिष्टानामपि हनादीनां व्यभिचा
राभावात् चिण्वदिति समर्पिता वृत्तिः तासिष्वित्यपमेये सप्तमीनिर्देशात् अतो नादयः कार्यभाजः षष्ठीनिर्देशात् चिण्वद्भावो
विधेयः प्रथमानिर्देशात् इट् तत्संनियोगशिष्टः चकारश्रवणात् तदर्थं वा कार्यः उपदेशे योऽच् तदन्तानां हनादीनां चेयानां
चिणीव कार्यं स्याद्भावकर्मणोश्च गम्यमाने स्यादीनामिडागमश्चेति ननु चिणागमस्येव इडागमः प्राप्नोति स्यादीनां समभ्यनन्तया आग
मित्वस्य उलभत्वात् लुङ् लृङ् लङ् लुङुदाहरणमित्यादिवत् न च भावकर्मणोरिति षष्ठ्यन्तद्वाच[illegible]नां स्यादीनामागमित्वं बोध्यतामि

का

तिवाच्यं भावेकर्मणोश्चार्थे इति सप्तम्यन्तत्वात् सत्ये निर्दिष्टपरिभाषया भावकर्मणोरिति सप्तम्या स्यादिति सप्तम्याः षष्ठीत्वप्र
कॢप्तेः अर्थेन यौर्वापर्यानुपपन्नावपि शब्दद्वारकस्यान्तस्योपपत्तेः न चैवमपि सीयुटोनस्यादिति वाच्यं आर्द्धधातुकस्येडिति योग
विभागपक्षे सर्वेष्वार्द्धधातुकस्येति व्याख्यानात्तस्यापीडागमार्द्धधातुकावयवत्वसिद्धेः स्तादिभ्यः सार्वधातुक इत्यत्राविशेषविधा
नात्तदोषः नन्वेवं स्यादीनामिडिति व्याख्याने चिण्वद्भावोऽन्यत्रापि स्यात् मैवं उभयत्रापि तदन्वयात् चिण्वद्भावे निमित्तत्वयाइ
टिकार्थित्वयेति परं विशेषः अथ प्रयोजनान्याह वार्तिककारः चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति इह
वासिद्धत्वेनमेलप्स्यन्ते णिनित्यग्रायेवलन्निमित्तेविधानी वृद्धिर्यथा भाविष्यते अवभाविषाता भाविषीष्ट वायिष्यते वेष्यते
अवोढ्ढिणीतीति वृद्धिः युगपथ्या ग्लायिष्यते ग्लास्यते आतो युक् चिण्कृतोरिति युक् घानिष्यते होहन्तेर्ञ्णिन्नेष्विति कुत्वेन घत्वं
शामिष्यते शमिष्यते तामिष्यते तमिष्यते विभाषा लोरिति दीर्घविकल्पः कारिष्यते हारिष्यते एषेनानां कर्मणि लृटि असेट
आभीयत्वादसिद्धत्वे णेरनिटीति णिलोपः नन्वत्र वलादिलक्षणएव इडस्तपरत्वात् स च नासिद्ध इति चेन्न असकृताकृत
प्रसंगित्वेन नित्यत्वात् वलादिलक्षणे इटि कृतेपि चिण्वद्भावस्ये नियोगाशिष्टस्याप्राप्तिसत्वात् नस्य चासिन्कृतेप्राप्त्यभा
वात् वलादित्वव्याघातात् एवं च सेटामपि धातूनां चिण्वद्भावस्थलेऽयमेव इट् न तु वलादिलक्षण इति सिद्धं चिण्वद्भावाभा
वपक्षे तु सेटां वलादित्वादिलक्षण इट् अनिटां तु न कश्चिदिति विशेषः स्यादेतत् एवं तर्हि चिण्वद्भावपक्षे उपलंभः उपदेश
भावात् न च विशिष्टस्याउपदेशोऽपि णिरुपदेशसत्त्वाद् उपदेशे योऽनुदात्त इत्यनुदात्तत्वमस्तीति वाच्यं आरिता सारितेत्यादौ परत्वनित्य
त्वाभ्यां सार्वधातुके निगुणे रपरत्वे च कृते चिण्वद्भावानुपपत्तेः रेतनपदशायां उपदेशे योऽनुदात्त इत्यनुदात्तत्वाभावात् मैवं उपदेशग्र
हणसामर्थ्यादेव तत्र ग्रहणेः यद्वा तदंतविधुत्तरं उपदेश इत्यस्यान्वयः उपदेशोपदर्जेनेनतस्यैतदर्थः न चैवमपि णेरपतेःव्या
प्तिनादवस्थ अंगस्येत्यधिकरणषष्ठीस्वीकारात् अंगावयवस्योऽपदेशे जनतस्यैतदर्थः ण्यन्तप्रकृतिके कारिष्यत इत्यादौ

वद्यपदेशिवद्भावेन सिद्धेः यत्तु प्रसादकृतोक्तं उपदेश इति किं भाविष्यते अङ्गुणा वादेशयोः कृतयोर्न स्यादिति तच्चिंत्यं स्थानिवदि-
ति षष्ठ्येव लादिलक्षणस्य रुटोः प्रवृत्तेः स्थानिनिमित्तकत्वमात्रसत्वेपि यातोरजंतत्वानपायात् अस्वरत्वाभावाद् वादेशस्य ड्लेर्भवत्वा-
त् तस्मादकारेण स्थलपरत्वउपदेशग्रहणप्रयोजनं तदुक्तं स्थानिवद्भावउपदेशवचने अकारग्रहणस्य वलीयस्त्वात् इति इकाराद्ये-
नेतद्गुणे सत्यप्यजंतत्वसद्भावात् यत्तु एषपनवेनाः जंतत्वाच्छ्विणवदिडिति प्राचां ग्रंथव्याख्यायामुक्तं एषेनेयान्वेतरेतदुपदेशव-
स्थायां भवत्ययमजंतइति तत्रांगावयवस्याजंतस्येति व्याख्यानमभिप्रेतं तस्यदेनाणिचः परामर्शात् यावंतरमिष्यनेनणिजंत-
स्योपदेशो नास्तीत्युक्तं तेन तथापत्स्योपदेशाभावाद्दिस्यादिहृषणमलग्नकं बोध्यं वधिभावात्सीयुटि स्थानिवद्भावो विप्रतिषेधेन वधा-
देशस्यावकाशो वध्यादित्यादिः स्थानिवद्भावस्य तु वानिध्यतेत्यादि स्थानिषीष्टेत्यादावुभयप्रसंगे परत्वात् स्थानिवद्भावः नच तदुप-
देशवधादेशापत्तिः सकृद्गतिन्यायात् स्थानिवद्भावाभावपक्षे भवत्येव वधादेशः वधिषीष्टेत्यादेर्भाष्यादावुदाहृतत्वाद्धाथकाभा-
वाच्च वार्तिके चेदं द्वैपाठिवादमात्रे हनो वधलिङीति परसप्तमी स्यश्चिवल्लेआर्द्धधातुकइत्यस्यानंतु हंतिं च स्वीकृत्य प्रवृत्तत्वात्
विषयसप्तमीपक्षेहि प्रत्ययोत्पत्तेः प्रागेव लिङि वधभावविधानात् तस्मादंतरंगत्वे लिङ्नेनरोत्पत्तिकसीयुण्णिमित्तकस्य स्थानिवद्भावस्य
च बहिरंगत्वमित्यंतरंगबहिरंगयोर्विप्रतिषेधायोगात् नन्वेवं वानिषीष्टेति रूपमेव तस्मात् अत्राहः वधादेशस्यापवादो येवि
स्थानिवद्भावः यद्यपि लुङ्लिङोरपि वैकल्पिकतया येन नाप्राप्ति न्यायो नास्ति तथापि आशीर्लिङ्सामान्यविशेषन्यायात्तथा लि-
ङीति हि पदद्वयसामानाधिकरण्यात्सामान्ये आर्द्धधातुके सीयुडिति विशेषणात्तु हंतेरित्युभयत्राप्यविशिष्टे आत्मनेपदमात्रवि-
षयकत्वात् एतेन प्रतिपदविधित्वात् स्थानिवद्भाव इति कैयटो व्याख्यातः यत्तु विवरणकारैरुक्तं यद्यपि वधादेशोपि प्रतिपद-
विधिस्तथापि विप्रतिषेधात् स्थानिवद्भाव इति कैयटस्याशय इति यदपि प्रकाशकारैरुक्तं यद्यपि परादप्यंतरंगे वलीयस्तथापि
परशब्दस्येष्टवाचित्वात् स्थानिवद्भावेन व्यवस्थेति विवरणकाराशय इति तन्न सर्वथाप्येदं विप्रतिषेधानुपपत्तेः स्पष्टत्वात् ननु

चिण्वद्भावे हन्तग्रहणस्य चानिष्पन्ने इत्यादौ सीयुटो ग्रहणस्य कारिषीष्ट इत्यादौ सावकाशत्वात् कथं वधादेशबाध इति वाच्यं हन्तेः
सीयुटि परे यश्चिण्वद्भावविधानं तस्यानवकाशत्वादिति कौस्तुभकाराः। न चैवं वक्तव्यं हन्तेः सीयुटि चिण्वद्भावो विधीयते इत्यत्र प्र-
माणाभावः सति तु तस्मिन् पूर्वत्र हि धानसंभवात् न वा जेतादीनां त्रयाणां स्यादिचतुष्टये परे चिण्वद्भावविधानात्तदन्तर्गतस्य हन्-
तेरपि तथात्वमस्त्वित्यमिति वाच्यं तत्र बाधकसत्त्वात् न हि तस्य निर्दिष्टानां मध्ये प्रत्यन्तमान्वयिनः सर्वान्वयित्वनियमोऽस्ति एव
लोपाविषयः यण्गुणवृद्धिदीर्घत्वेभ्यश्च णिलोपस्य इयङादिभिः सर्वैः समं विप्रतिषेधः अतो लोपस्तु वृद्धिदीर्घाभ्यामे-
वेति भाष्यकारैरेवोक्तत्वात् स्थलहरेत्यादौ च व्यभिचारस्य स्फुटत्वात् यत्तु चिण्वदिट् चेति चकारेण हन्तेः सीयुटि परे चिण्व-
द्भावो विधीयते तस्यानवकाशत्वमेव प्रतिपदविधित्वं न च तस्यानुक्तसमुच्चयार्थत्वे मानाभावः एवं भगवान् कृतवांस्तु तत्-
दर्थमिति भाष्यकृतैवोक्तत्वात् तद्विधेस्तावतापि प्रतिपदविधित्वादिति कैयटफक्किकाया असामंजस्यात् तस्मादु-
पात्तविषयत्वरूपस्यैव प्रतिपदोक्तत्वस्य विवरणादौ प्रसिद्धत्वात् एवं भगवानित्यत्र च प्रसिद्धवत्सूत्रप्रत्याख्यानाय णिलोपसमुच्चयार्थ-
तायाएवोक्तत्वात् हन्तेः सीयुटि चिण्वद्भावसमुच्चयार्थताया भाष्यकारादिभिरनुक्तत्वात् स्वेच्छया तदर्थतायाश्चावेचत्वात् अन्यथेत्यत्र
हन्तग्रहणवैयर्थ्याच्च सीयुटीव स्यादिष्वपि चकारेणैव हन्तेश्चिण्वद्भावसिद्धेः भवदुक्तार्थस्य तावतैव सिद्धेः यदप्युक्तं प्रसिद्धं बहिरं-
गमित्यनेनान्तरंगं बलवदित्यस्य प्रत्याख्यानात्तस्य च तद्ग्रहणेनानिष्पन्नत्वापनादिह लक्ष्यानुरोधेन न्यायाप्रयुक्तो विप्रतिषेधपर-
ति तदपि चिन्त्यं अन्तरंगपरिभाषाया निरपवादा प्रसिद्धपरिभाषात्वनाज्ञानेन तयैरिति सापवादा इति कौस्तुभे स्वयमेव व्यवस्थापितत्वात्
यदप्युक्तं लिङीति परसप्तम्येवास्तु परनिमित्तकत्वसाम्यादन्तरंगबहिरंगभावाभावे परत्वाच्चिण्वद्भाव इति तदपि चिन्त्यं इदं हि वार्तिकम-
तमाश्रित्य भाष्यमते वा नाद्यः भाष्यमते चिण्वद्भावोपपादनस्यैव प्रकृतत्वात् वार्तिकमते ऽकारीत्यादि चिण्वद्भावस्य पूर्वमेवोपपादितत्वा-
त् प्रतिपदविधित्वाच्चिण्वद्भाव इति कैयटग्रंथस्य भाष्यमतमधिकृत्यैव प्रवृत्तेः स्वयमपि तन्मध्ये व लिखितत्वाच्च नाहि

नीयः लिड्रीत्यादीनां विषयसप्तमीत्वस्य साक्षादेव भाष्यकृता लिखितत्वेन तत्कल्पनायाबाधितत्वात् नत्वकस्तर्हि कैयटस्या
यं इति चेत्सत्यम् चानिषीष्टेति भाष्योदाहरणसामर्थ्यादिनीत्यवेद्धि स्यादेतत् हनिणिङ्कादेशप्रतिषेधश्चवक्तव्यः [illegible]नूङ्गार
ङ्ग्रस्वादेशावयगागाङ्स्तेषामित्यर्थः वानिष्यते आयिष्यते अध्यायिष्यते अत्र भाष्ये अंगाधिकारीयमेव कार्यमिहातिदिश्य
ते अतिदेशस्यांगाधिकारीय[illegible]त्वात् ङ्कादेशानो चतद्बहिर्भूतत्वात् एतेन द्वितीयाध्यायस्थमार्द्धधातुकाधिकारं परित्यज्य
षाष्ठस्यवार्द्धधातुकाधिकारे तत्रत्यवचनानि पठितव्यानि व्याख्यानवशादेवक्वचिद्विषयसप्तमी क्वचित्परसप्तमीत्युपपन्ने
रितितत्रत्यकौस्तुभग्रंथोपिनिरस्तः ङ्कादेशानामप्यंगाधिकारीयत्वापत्तौ उक्तभाष्यविरोधात् अतत्रत्यवचनान्येवतत्राधि
कारे पठनीयानीति नैतत्तेवनिरस्तम् असिद्धत्वानुपपत्तेरितीति दिक्॥ दीङोयुडचिक्ङिति॥ दीङः अजादेरे अस्मात्परस्याजा
देःक्ङितःआर्द्धधातुकस्य युडागमः स्या[illegible]त् दिदीये असंयोगादितिलिटःकित्व अजादेःकिं देदीयते इत्यादौ माभूत् ङिती
स्वत्रार्थे अस्मात्तदभावात्॥ आतोलोपइटिच॥ आकारस्य लोपः स्यादिटि क्ङित्यजादावार्द्धधातुके च गोदः कंबलदः इटिच
पा यायिथ पपिथ क्रादिनियमादिट् असंयोगादितिकित्वस्यापि द्वचनेक्षप्रग्रहणेः [illegible] तेन देजैधेत्ययेइत्यत्रनिर्दिष्टस्य
लोपेनैनैव सायात्॥ वात्यस्य संयोगादेः॥ घुमास्थादिभिन्नस्य संयोगादेर्धातोरात एत्वंवास्याद्यार्द्धधातुकेकितिलिङि॥ ग्ले
यात् ग्लायात्॥ नल्यपि॥ घुमास्थादीनां ल्यपिपरे ईत्वं न स्यात् स्थानिवद्भावेन किद्वत्वात्प्राप्तिः॥ प्रदाय प्रधाय प्रमाय प्रस्थाय
प्रगाय प्रपाय निपीयेतितुपीङ्पानेइतिदैवादिकस्य रूपं॥ मयतेरिदन्यतरस्यां॥ मेङः ल्यपि आदेशो वास्यात्ल्यपि॥ अपमि
त्यापत्ते॥ अपमाय॥ उदीचांमेङोव्यतीहारे इतिलिङ्॥ पदेर्यायविमाश्रपमयते॥ लुङ् लङ् लृङ् लुङ्दात्तः॥ एषुपरेष्वङागमः स्यात्
उदात्तः स्यात्तद्यानः अभूत् अभवत् अभविष्यत् अमाङ्गाङ्योगेनुदात्तत्वाभावे उदात्तविधाने॥ आडजादीनां॥ अजादीनामाट्
स्यात्॥ लुङादिषु अटोपवादः ऐधिष्ट ऐधत ऐधिष्यत आटश्चेतिवृद्धिः॥ छंदस्यपि दृश्यते॥ हलादीनामपीत्यर्थः॥ ह्रहचा)

हे॰

दीङ् क्षये॰

सि॰ घु॰ १०५

105

यद्यपि वोप्यादिकमप्युदाहार्यं किंत्वेष्यणादित्वाभावात् सार्वधातुके चादीप्याईधातुकाधिकारादुपसंख्यानं आङ्‌ हुवोदात्त अत
मैकवचने इट् इयमृजं महमित आदिष्टं त्रेहिकुदिति विशेष्यं अवीति विशेषणं अन्यथा अजादित्वमिटो विशेषणं न ल
भ्येत न च यावर्णाभावः दासीय पासीय इत्यादेस्तथात्वात् अत्र भाष्यं। हेदमुभयथेष्याईधातुकत्वात् स्यापीटः सूत्रेणैव
सिद्धं ॥ ईद्यति ॥ यति ईत्वं स्यात् यति परे देयं। धेयं। सार्वधातुकाईधातुकयोरिति गुणः ॥ घुमास्थागापाजहातिसां हलि ॥ घु
संज्ञानां मादीनां चात ईत्वं स्यादिडलादौ क्ङित्याईधातुके दीयते धीयते स्थीयते गीयते पीयते हीयते सीयते हलादौ किं
गोदः क्ङिति किं दास्यति पास्यति आईधातुके किं प्रदानो अधाता सार्वधातुकमपिदिति ङित्त्वं ङिति पेपीयते हुस्यासुदा
हार्यं अध्यगीष्ट विभाषा लुङ्‌ लृङोरिति इङो गाङादेशः गाङ्कुटादिभ्य इति सिचः ङित्त्वमेव अध्यगीष्यत। चकारे प्रतिषे
धो वक्तव्यः। हूतेः हूतपावानः पिबतः वसोः वसापावानः पिवत पीवरी पीवरीति तु प्याय्यः संप्रसारणे बोध्यं वस्तुतः पावा
नइति वनि वेन स्य रूपमिति भाष्यं ॥ एर्लिङि ॥ घुसंज्ञानां मास्थादीनां च एत्वं स्यादाईधातुके लिङि किति देयात् धेयात्
मेयात् स्थेयात् गेयात् पेयात् हेयात् सेयात् अमा स्यैति सूत्रे साइति घोन्तकर्मणीति दैवादिकस्योपादानं। आव्याना
त्। स्यातिजहातीनि वा करणात् नरविर्देशाच्च तेन दैजैषेत्त्वं इत्यत्र निर्दिष्टस्य स्यायतेर्नैत्वं सायात् ॥ वान्यस्य संयोगादेः ॥
घुमास्थादिभिन्नस्य संयोगादेर्धातोरात एत्वं वा स्यादाईधातुके किति लिङि। ग्लेयात् ग्लायात् ॥ न ल्यपि ॥ घुमास्थादीनां
ल्यपि परे ईत्वं न स्यात् स्थानिवद्भावेन कित्त्वात्प्राप्तिः। प्रदाय प्रधाय प्रमाय प्रस्थाय प्रगाय प्रपाय निपीयेति तु पीङ्‌ पा
नेइति दैवादिकस्य रूपं ॥ मयतेरिदन्यतरस्यां ॥ मेङः इकारोन्तादेशो वा स्यात् ल्यपि। अपमित्य याचते। अपमाय। उदीचां मे
ङो व्यतीहारे इति ल्यप्। पठेयाचित्वा अपमयते ॥ लुङ्‌ लङ्‌ लृङ्‌ क्ष्वडुदात्तः ॥ एषु परेष्वङ्गस्याडागमः स्यात्स चोदात्तः
अभूत् अभवत् अभविष्यत् आगमस्यानुदात्तत्वप्राप्तौ उदात्तविधानं ॥ आडजादीनां ॥ अजादीनामाट् स्यात् । लुङादि

षु अटोपवादः । पेपिष्ट पेपन पेपिष्यन्त आटश्चेति वृद्धिः ॥ छन्दस्यपि दृश्यते ॥ हलादीनामपीत्यर्थः । सुरुचो वेन आ
वः आपृणक् ॥ न माङ्योगे ॥ अडाटौ न स्तः । मा भवान् भूत् मा स्म भवत् मा पपिष्ट मा स्म पपत । नन्वाटप्ययं प्रतिषेधः
प्राप्नोति सन्निहितत्वात् मैवं अटोऽप्यनुवृत्तेः न चाडजादीनामित्यत्रापि तदनुवृत्तौ अजादीनामटोऽप्यापत्तिः पुनरा
ड्ग्रहणं भवादिष्वापत्तेः न चाऽकार्षीदित्यादावप्याडापत्तिः अजादीनामित्युपादानसामर्थ्याद्वृद्धिरेकेऽसौ वयेऽग्रजाद
य इति व्याख्यानात् अन्यथाऽटिकृते सर्वेषामप्यजादित्वात् आवर्णाभावात् उपदेश इत्यनुवृत्तेर्वा यद्वा लावस्था
यामेवाट् आर्द्धधातुकाधिकारात् अट्टिर्योर्हि लकारकनिर्देशाद्वा लकारादिषु लुङादिषु योजादिरित्यर्थः नन्वे
वं पेज्यत औप्यत इत्यादि न स्यात् संप्रसारणस्य लादेशोत्तरप्रवृत्तिकत्वात् लावस्थायामजादित्वाभावात् अत्र वा
र्त्तिके अजादीनामटा सिद्धं वृद्ध्यर्थमिति चेदटः अस्य पोहस्तीत्यत्र यानोर्वृद्धिमटः स्वरेत्य परत्वं गुणेनाट् ओमा
ङोर्हसितत्वमे छन्देर्दोषे वक्तुलेदीर्घमित्यस्य पारेतरेगतः अयमर्थः आडजादीनामिति नारभ्यं तेषामप्यटैव सिद्धेः
नन्वेवमाटश्चेति वृद्धिर्न स्यात् सत्यं अटश्चेत्येव तत्र सूत्रणीयत्वात् आण्नद्या इत्यत्राप्याटेव विधेयत्वात् नन्वेवं
अस्य पोहस्तीत्यत्र दोषः न त्वत्र हि अ[illegible]गालवयोरिति सावेयान कस्याऽऽगमः इत्यश्चेति सिपइकारलोपः स
परुत्वं हापिवेति रोहत्वं तथा च अडिपरेतस्याप्यटो वृद्धिः स्यात् मैवं धातोपरे अटो वृद्धिविधानात् उपसर्गाद
तीत्यत्र धाताविति योगविभज्य तस्योभयशेषत्वया व्याख्यानात् नन्वेवमपि आर्टीदित्यादौ अतो गुण इत्यटः पर
रूपं स्यात् मैवं गुणोपरेऽटः पररूपं नेति वाच्यत्वात् न च तादृशवचनारंभे गौरवं आटश्चेत्यत्र चकारेणैव तदुप
पत्तेः अनपवर्ग ओमाङश्चाटः प्रतिषेध इति तत्र प्रत्याख्याने न वस्त्राऽऽपूतगन्याघ्रेय आङावश्यक इति वाच्यं वा
ऽलकेन[illegible]दसाटपवदीर्घोपपत्तेः एरुध इत्यादिवत् नन्वेवमप्यायन् आसन्नित्यत्र इणो यणादेशो स्वलेरह्लो

सि॰
ध॰
१९

106

पेचकृतेऽप्रवृत्ताभावाददट्श्चेतिहृहिर्नस्यादितिवाच्यं नञोऽनन्तरगत्वाद्धृहेरेवसर्वैः प्रवृत्तेः तस्मादाडप्रत्याख्यानः॥ ब
हुलंछन्दस्यमाङ्योगेऽपि॥ अडाटौमाङ्योगाभावेऽपिक्वचिन्नस्तः क्वचित्तुमाङ्योगेऽपिस्त इत्यर्थः जनिष्ठाउग्रः सह
से अजनिष्ठा इत्यर्थः मावः क्षेत्रे परबीजान्यवाप्सुः अप्ताकेमायौयापरबीजान्युप्तानिमाभूवन्नित्यर्थः इदं वहृतिका
रीमोदाहृतं वाक्षरित्यसवपद्युमानत्वादित्याहुः गामिमातिप्रादीमीतेस्द्धीमपमादितिहृहृदाराप्रकृप्रयो
गस्तदाहार्यं॥ इरयोरे॥ काटेशस्यइरेवः छंदसिरेभावः स्यादहूले रघ्रथापः दधिरेइत्यर्थः रेभावस्याऽसिद्धत्वाद
जादिवमस्तीतिश्नातोलोपः रेभावेकृतेवलादिवादिट् तस्याभीयत्वाभावादसिद्धत्वानुपपत्तेः ततइरेइत्यस्या
पिरेभावः इत्यभिप्रायेणाइरयोरितिद्विवचनांतंसूत्रेप्रयुक्तमित्याहुः॥ अचिश्नुधातुभ्रुवांय्वोरियङुवङौ॥ य्वो
रितीकारोकारपरंव्याख्यानात् तच्चधातोरेवविशेषणं श्नुभ्रुवोरुकारांतत्वव्यभिचाराभावात् नचश्नुप्रभृती
नामवयवयो रिवर्णोवर्णयोरितिस्थानिनिर्देशएवस्यादितिवाच्यं अंतादेशार्थस्यइयङुवङोर्ङित्वस्यवैयर्थ्या
पत्तेः व्यधिकरणषष्ठीत्वप्रसंगाच्च क्षियति अयुतत् दिदिवतः अयवतरित्यादौ अनेनयोरपीवर्णोवर्णयोरि
यङुवङ्प्रसंगाच्च अचिपरेयोरिवर्णोवर्णौ इतिव्याख्यानेतुगौरवात् तदयमर्थः श्नुप्रत्ययांतस्यइवर्णोवर्णां
तधातोश्चभ्रूइत्येतस्यचांगस्यइयङुवङौस्तोऽजादौप्रत्ययेपरे अंगाक्षिप्तप्रत्ययस्यविशेष्यतायांतदाचोऽस्यविशे
षणत्वे यस्मिन्विधिस्तदादावल्ग्रहणेइतितदादिविधिः ङिच्चेत्यंतादेशः स्थानेऽन्तरतम्यादिकारस्यइयङ्
उकारस्यउवङ् धियति वियति अशिश्रियत् अनुडुवत् भुवति भुवौभ्रुवः तन्वादीनांछंदसिबहुलमुपसं
ख्याने तन्वं पुषेम तनुवंपुषेम विष्वःपश्य विसुवःपश्य स्वर्गलोकं सुवर्गलोकं त्र्यंबकंयजामहे त्रियंबकं
यजामहे॥ अभ्यासस्यासवर्णे॥ अभ्यासावयवयोरिवर्णोवर्णयोरियङुवङौस्तोऽसवर्णेऽचिपरे इयेष

लिटि द्विवे हलादिशेषः लघूपधगुणः इयङ् इयेष उषगतौ उवङ् उवोष असवर्णे किं ईयतुः ऊषतुः असंयोगा
दिति लिटः कित्त्वे गुणाभावात्सवर्णपरत्वाच्च अभ्यासात्परस्य इति नोक्तावादेशौ असवर्णग्रहणमत्र वाणीदं गावलीपद इति
ज्ञापनार्थं तेन ह्रस्वग्राणो वोक्तं ॥ स्त्रियाः ॥ स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे स्त्रियौ स्त्रियः इत्यादि ॥ वाम्शसोः ॥ पूर्वेण
प्राप्ते विभाषेयं स्त्रीशब्दस्य पक्षान्तरजादौ प्रत्यये परे स्त्रियं स्त्रीं स्त्रियः स्त्रीः इयङ् भावे क्रमेण अमि पूर्वत्वं प्रथमयो
रिति पूर्वसवर्णदीर्घत्वं ॥ इणो यण् ॥ इण् गतौ अस्य यण् स्यादजादौ प्रत्यये धातुत्वात्प्राप्तस्य इयङोऽपवादः यंति ॥
एरनेकाचोऽसंयोगपूर्वस्य ॥ धात्ववयवसंयोगो यस्मात्पूर्वो न भवति तादृशो य इवर्णस्तदन्तो यो धातुस्तदन्तस्याने-
काचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे नप्यादि श्रविक्षु पाविति सूत्राज्ञातमात्रस्य हानुहृतिः अभ्रुवोरिकारस्य वाधि
त्वात् धातुग्रहणं च संयोगे अङ्गे च विशेषणं न चोपसर्जनस्य विशेषणत्वयानुपपत्तिः अनुवृत्तिसामर्थ्यान्न
ह्युपपत्तेः न च इवर्णविशेषणार्थं धातुग्रहणे अधातुसंबन्धिन इकारस्य इकोऽयणचीति यण इष्टत्वात् आध्येयव
यवावयविभावः संसर्गः द्वितीयेन त्वभेदः स च धात्वात्तदन्तविधिः प्रथ्यौ प्रथ्यः अनेकाचः किं नियौ नियः इत्यादौ मा
भूत् असंयोगेति किं सुश्रियौ यवक्रियौ इत्यादौ माभूत् धात्ववयवत्वेन संयोगविशेषणं किं उन्न्यौ उन्न्यः इत्यादौ य
था स्यात् संयोगे धात्ववयवत्वाभावेऽपि धात्ववयवसंयोगपूर्वत्वाभावस्य सत्त्वात् धात्वङ्गविशेषणं किं हरिं हरि
रीतित्यादौ माभूत् अन्यथा धात्ववयवसंयोगपूर्वत्वाभाववदिवर्णान्तत्वस्याङ्गे सत्त्वात् पूर्वत्वं पूर्वसवर्णदीर्घत्वं
च बाधित्वा तत्र यणः प्रसंगात् वस्तुतस्तु धातुना संयोगं विशेषयिष्यामः इत्यादिभाष्यस्वारस्याद्धातुनाङ्गेन वि
शेषणीये भाष्यानुक्तत्वात् न चोक्तदोषः धात्ववयवत्वविशिष्टविशेषणानां संबन्धेन उक्तपूर्वत्वाभावस्य
इकारे विशेषत्वात् यद्वा उवर्णव्याहृत्यर्थमिकारस्यात्र ग्रहणमुपादानेऽपि तत्र इकारस्य धात्ववयवस्यैव ग्रहणादित्या

पितृणामित्यत्र इति भाष्याभिप्रायः अन्यथा धातुना[?]कारविशेषणनिरासानुपपत्तेः गतिकारकपूर्वस्यैवेष्यते तेन सुश्रु
इतियौ परस्मानियौ न चैवं नियन्त्रित्यादौ न स्यादिति वाच्यं गतिकारकेतरपूर्वस्य न भवतीति विवक्षितत्वात् एते
नङ्गर्थिय इति व्याख्याने तु स्थितायौ यवाभिमर्थे धी शाब्दप्रतिगतित्वाभावात् अत एवं वृश्चिकभियेति न स्यात् वृ
श्चिकाद्भीरिति पंचमीसमासे कारकपूर्वत्वसत्त्वात् नैवं वृश्चिकस्य भीरिति षष्ठीसमासात् वृश्चिकस्येव
यिनी भीरिति मध्यमपदलोपाद्वा अन्यत्रागतौ वोक्तं ॥ ओः सुपि ॥ धात्ववयवसंयोगपूर्वत्वाभाववदुवर्णान्तधा
त्वन्तस्यानेकाचोऽङ्गस्य यणस्यादजादौ सुपि उवङोऽपवादः खलप्वौ खलप्वः सकृल्वौ सकृल्वः अनेकाचः किं लुवौ लु
वः धात्ववयवेति किं उल्लौ असंयोगेति किं कटप्रुवौ गतिकारकपूर्वस्यैव परमलुवौ सुपि किं लुलुव
तुरित्यादौ मा भूत् ॥ वर्षाभ्वश्च ॥ अस्योवर्णस्य यणस्यादजादौ सुपि वर्षाभ्वौ वर्षाभ्वः न भूसुधियोरिति वक्ष्य
माणनिषेधादप्राप्तावारंभः वर्षाभ्वः पुनर्भ्वश्चेति वक्तव्यं भाष्यकारस्त्वाह अनर्थकमिदं वच्यते वर्षादृन्का
रपुनःपूर्वस्य भुवश्चेति वक्तव्यं दृन्भ्वौ दृन्भ्वः कारभ्वौ कारभ्वः करशब्दात्स्वार्थे प्रज्ञाद्यण् करभूशब्दस्तत्र
द्वेव अन्यस्य विकारत्वाभावादेकदेशविकृतन्यायाप्रवृत्तेः पुनर्भ्वौ पुनर्भ्वः ग्रे दृन्भूः जम्बूकः फेल्लूकः करभूः आदि विभू
६ श्रुणादौ निपातितो दृन्भूशब्दः दृन्भीयं अस्मात् अन्यये नु मा या मा निपातम् इति व्याख्यातत्वात् अत्रानूकारो धात्ववयवो न भ
वतीत्योः सुपीत्यस्य न प्रवृत्तिः किं तु कोयणवीति यण् तस्याभिद्धंबः प्रथमयोः पूर्वसवर्णस्यापवादत्वात् श्रामिशासिवदृन्भू
दृन्भूरिति बोध्यं प्रकृतेस्तु दृन्भिनिहिंसार्थैनौतेऽव्ययेऽपपदे मुवः क्विप् नञोः सपीति यणा नभूसुधियोरिति नवाप्यतत्वाद
प्राप्तो दृन्कामेतिपत्वं दृन्भ्वौ दृन्भ्वः अन्ये तु दृन्भूशब्दे उपपदे मवतेः कृत्प्रत्ययः दृन्भूशब्दस्य स्वादेशाः दृन्भू रम्यादि सूत्रेणानि
पात्यन्त इत्याहुः दृन्भितिनौ मंसनिवहत्वंमातमिति केचित् दृगितिगानपाठस्तु पेशो भाष्यविरोधात् ॥ न भूसुधियोः ॥ अनयोर्य
णसा

ष्वपि अचीत्यस्यानेनैवाव्याप्तिः हलादेशयणः असत्त्वाभावात् स्वभुवौ स्वभुवः सुधियौ सुधियः सुधियि किं सुष्ठु पाठ इत्या
दौ निषेधो मा भूत् ॥ छंदस्युभयथा ॥ भूसुधियोः छंदसि यण् स्यादियङ्वङौ च वनेषु चित्रं विभ्वं विभुवं वा सुध्यो नव
मग्ने सुधियो वा ॥ हुश्नुवोः सार्वधातुके ॥ जुहोतेः श्नुप्रत्ययान्तवदनादेशयणस्यानेकाचोऽसंयोगपूर्वोवर्ण
स्य सार्वधातुके परे यण् स्यात् जुह्वति सुन्वन्ति अन्वंति असंयोगपूर्वस्योवर्णविशेषणात् किं आप्नुवन्तीत्यादौ मा भूत् सार्वेति किं
जुहवामास जुहुवतुरित्यादौ मा भूत् श्नुप्रत्ययस्य तु सार्वधातुकपरत्वविधानात् स्यादेतत् हुश्नुवोरिति व्यर्थम् परि
शेषादेव सिद्धेः ॥ तदुक्तं हुश्नुग्रहणमनर्थकमन्यस्याभावादिति तथा हि न तावत् यान्तीत्यादावतिप्रसंगः श्नुणी
त्यनुवृत्तेः नापि वान्तीत्यादौ अचीत्यनुवृत्तेः नापि यान्तीत्यादौ य्वोरित्यनुवृत्तेः नापि धियन्तीत्यादौ धातोरित्यनुवृत्तेः ना
पि स्तुवन्तीत्यादौ अनेकाच इत्यनुवृत्तेः नाप्यक्ष्णुवन्नित्यादौ अटोऽसिद्धतयाऽपकाच्त्वात् नापि प्राप्नुवन्तीत्यादौ अ
संयोगपूर्वस्येत्यनुवृत्तेः नापि योयुवतीनामित्यादौ यङ्लुगन्ते तस्य छंदोमात्रविषयकत्वात् तत्र च छंदस्युभय
थेत्यार्द्धधातुकत्वादेवाव्याप्तेः अत्र भाष्यम् भाषायामपि यङ्लुगस्तीति ज्ञापनार्थमेतत् तेन बेभिदीतीत्यादेर्य
था प्रयोगं भाषायामपि साधुत्वं सिद्धं ॥ भुवो वुग्लुङ्लिटोः ॥ भूधातोर्वुक् स्याल्लुङ्लिटोरचि परे असति त्वस्मिन् गुणवृद्धि
बाधः अभूवन् बभूवेत्यादि अचि किं अभूत् अभूः न चात्र वलि लोपेन निर्वाहः परत्वाद्धल्ङ्याब्भ्यो दिलोपापत्तेः न च व
लि लोपस्यान्तरंगत्वं भवधातोर्यङ्लुकि लङि तिप्सिपोरबाभूत् अबाभूः इति रूपसमापत्तावादिरसिद्धत्वादिति वाच्यं न
थापि हल्ङ्याब्भ्यो दिलोपवद्वुकोऽपि बहिरंगत्वेन तयावहिरंगत्वादन्तरंगे वलि लोपे कर्त्तव्ये असिद्धतया वलि लोपस्य ड

शि० वृ० ९८

108

अगुण

लोपवत्त्वात् ॥ ऊदुपधाया गोहः ॥ गुह संवरणे [illegible]स्योपधाया ऊत् स्यात् गुणनिमित्ते ऽजादौ प्रत्यये परे निगूहति निगूहको
निगूहनं विषयार्थमयादेशप्रतिषेधार्थं च गृहश्चुकेहि निजगूहतुरित्यादावगुणे स्यात् गोहस्तु केतयत्र गुणस्तत्रो
त्वविधानात् प्रसंगः असंयोगादिति अपि लिटः कित्त्वेन गुणाभावात् एवं ऊकारस्य ऊत्वविधाने ऊत्वस्यासिद्धत्वान्निग
हानग्दस्य तत्स्यापि लघूपधादिति गोयादेशः स्यात् ओकारस्य तद्विधाने तु ऊत्वस्यासिद्धत्वेपि लघूपधत्वाभावान्न दो
षः अत्र भाष्ये विषयनिर्देशार्थं विकृतनिर्देश इति न युक्तं दीर्घोच्चारणं ऊत्वस्याप्युकारस्य प्रश्लेषात् ऊत्वस्यावकाशः
निजगूहतुः गुणस्य निगोढ्यादि निगूहयतीत्यादौ परत्वाद्गुणे सत्युभयप्रसंगे अन्तरङ्गत्वादेवः स्यान्नेह्यि मात्र ऊ
कारः ॥ द्वितीयमपि व्यर्थं ऊत्वस्य गुणनिमित्ते ऽयादेशस्यत्वविति समानाश्रयत्वाभावादसिद्धत्वानुपपत्तेः ॥ दोषो
णौ ॥ दुष वैकृत्ये कृतगुणस्यास्य ऊत्वं स्याण्णौ परे दूषयति अयादेशप्रतिषेधार्थं विकृतनिर्देशः इदमपि पूर्ववद्व्य
र्थमिति भाष्यं ॥ वा चित्तविरागे ॥ चित्तविकारार्थस्य दुषेर्णेरूत्वं वा स्यात् चित्तं दूषयति कामः दोषयति वा ॥
मितां ह्रस्वः ॥ मितामुपधाया ह्रस्वः स्याण्णौ परे अयमत्र संग्रहः घटाद्याद्गणे घटप्रभृतयो मितः ज्ञपादयश्च
फणान्ताः प्रविशन्ति स्म प्रभृतयोप्यमितः मन्तःपत्रेवाच चुरादिषु ज्ञपमम्यत्वाः स्वार्थे णिचि मितो ह्रस्वा विहि
विस्फुलपर्यन्ता जनीजृषक्नसुरञ्जोऽमन्ताश्च अस्यार्थः घटयादसमारभ्य फणपर्यन्ता नान्तो धातुपाठे मित्संज्ञा विहिता फणेः
प्राचीनानामेव मित्त्वमिति केचित् स्मप्रभृतयोपि चरादौ ज्ञेयाः जनीजृषक्नसुरञ्जोऽमन्ताश्च नित्तत्रोक्तत्वात् चुरा
दिमध्ये ज्ञपमारभ्य यत्र वा तवो मित्संज्ञाः ज्ञपमिच्चेत्युक्तान्येमितो हेनाविस्तुक्तत्वात् तेनशमादीनाममन्तत्वप्र

प्रो॰

नौ १

प्रकृतं मितं नेतित्तेयं मितस्य फलेत्व मितो ह्रस्वः विस्मलो रितिदीर्घविकल्पश्चेति श्लोकस्यार्थः किंच यस्यापरत्रप
ठितस्य घटादिपाठस्यानस्य मित्वनियमार्थमिहार्थभेदः यानु घटादिगणपठितपठने यस्यार्थमन्यमपिबोधय
तोस्तिमित्वं अन्यत्रपठितस्यापिधानोरर्थविशेषप्रस्कारेण घटादिष्वपठितस्यापि मित्वार्थे मित्वं नत्वर्थांतरेवर्तमान
स्य घटादावेवोपदिष्टस्यान्तउपसर्गादिवशादर्थान्तरवृत्तित्वेऽपि मित्वमित्यर्थः इदंच न्यासादिषु स्पष्टम् अन्यस्यच्छायामि
तोयानवउपन्यस्तंते घटवेष्टाये घटने घटयति विघटयतीत्यपि बोध्यम् ककुप्रक्रेः। कमलवनोद्घाटनेइत्यादयो घटसे
यानइतिचौरादिकस्य प्रयोगाः न वनसेवार्थविशेषेमित्वार्थमवबोधयमिति वाच्यं। नान्येमितोऽहेनाविति ज्ञपादिये
वकाभिज्ञानेऽस्यार्थे गाविमित्वनिषेधात् व्यथभयसंचलनयोः व्यथते व्यथयति प्रथप्रख्याने। प्रथते प्रथयति प्रस
विस्तारे प्रसयति म्रद मर्दने स्खद स्खदने स्खदने विद्रावणे क्षजिगतिदानयोः इदित्वान्नुम् अस्य उपधाह्रस्वात्नुप
धारेऽपि उज्जरस्तत्रेण विस्मलो दीर्घविकल्पः न चनु मित्कन्नेप्रकारस्यानुपधात्वात्कथमेवमिति वाच्यं मित्वपाठ
सामर्थ्यादनुपधाया अपि वृद्धिप्रहृत्वेः न चनुमेव वाध्यतामिति वाच्यं विनिगमकाभावादुभयत्रापि वाधे इदित्वैवैय
र्थ्यापत्तेः प्रदंगजि प्रदांजि दंजे दंगे दांजे दांजम् दहगतिहिंसनयोः हडि शैथिल्ययोः एवं पठितस्यास्यागात्पाठयर्थहृदये
मित्वं विधातुमनुवादः क्रपक्रपायां गतौ कदिक्रदिक्लदि वैक्लव्ये आह्वाने रोदने वो क्रानामेषां मित्वार्थमात्मनेपदा
र्थे चेह पाठः वैकल्यइत्येके त्रयोऽप्यनिदित इत्यन्ये कदिक्रदिक्लद इति पाठ इत्यन्ये जिवरासंभ्रमे त्वरते त्वरयति आ
दित्वमात्मनेपदमात्रार्थं न त्वादित इति निष्ठायामिटो निषेधार्थं रुषमत्वर इति निष्ठायामिटोविकल्पविधानात् च

सि० बृ० १०९

दादयष्षन्त्यर्थेताः षितः तत्फलं तु षिद्भिदादिभ्योऽङ् इत्यङ्. अथ फणान्ताः परस्मैपदिनः ज्वर रोगे गड सेचने हेड वेष्टने
अनादरे आत्मनेपदिषु पठितस्यास्य ऋकाररहितस्यात्र पाठः हेडति ज्वरादिभ्यः प्रागेवानुवादे कर्त्तव्ये परस्मैपदिष्व
नुवादसामर्थ्यान्न तङ्. एवं च अग्रस्थादेशो हिडयति वट भट परिभाषणे वेष्टने भृतौ चक्रमात्स्वेव पठितावेतौ परिभाष-
णमित्यार्थमिहानूद्येते नट नृत्तौ ननु पूर्वमप्यस्मिन्नेवार्थे स्यपाद इति चेत्सत्यं तत्र वाक्यार्थाभिनयरूपं नाट्यमर्थः अ
त्र तु पदार्थाभिनयरूपं नृत्यं गात्रविक्षेपमात्ररूपं नृत्तं वार्थः तथा च तत्र नाटयतीति रूपं अत्र नटयतीति विशेषः अ
त्र नतौ विस्थर्थे पाठ इति केचित् गतावित्यन्ये ष्टक प्रतीघाते चकन्तौ तृप्तिप्रतिघातयोः पूर्वं पठितस्यास्य प्रतिघातमात्रेभि
नार्थीयमनुवादः परस्मैपदिष्वनुवादसामर्थ्यात्परस्मैपदं कखे हसने रगे शङ्कायां लगे सङ्गे ह्रगे ह्लगे षगे ष्ठगे संवर
णे कगे नोच्यते क्रियासामान्यार्थत्वादनेकार्थ इति केचित् अनेकार्थत्वादित्यन्ये। एषामेदित्त्वं ह्म्यन्तक्षणेति णिचि ह्रादि
निषेधार्थं अक अग कुटिलायां गतौ कण रण गतौ चण शण श्रण दाने च शण गतावित्यन्ये श्रथ क्नथ क्रथ
क्लथ हिंसायां जासिनि प्रहणनिष्वुरेक्राथेति निर्देशादस्य न ह्रस्वः मित्वं तु ज्वरत्वरविषये चरितार्थं अ
कथि क्राथि कथं २ क्राथं २ वन च हिंसायामिति शेषः वनु च नोच्यते अमय चार्थे यातनेत्वनानादिक
स्यानुवादः उदित्करणसामर्थ्यात् क्रियासामान्यमस्यार्थः प्रवनयति अनुवद
हेमित्त्वविकल्पस्य वक्ष्यमाणत्वात् ज्वल दीप्तौ णाग्रय
पार्थपठितस्यास्य मितार्थमनुवादः प्रज्वलयति ह्न

लक्ष्मल चलने प्रक्कलयति प्रक्ष्मलयति स्मर आध्याने सोत्कंठं स्मरणमाध्यानं चिंतार्थे वक्ष्यमाणस्यास्या
ध्यानेमित्त्वार्थमनुवादः स्मारयति दृ भये विदारणे आदिषु पठितस्य भयेमित्त्वार्थमनुवादः धातूनामेवेति केचि
न्दरयति अन्यत्रदारयति भिदयतीत्यर्थः केचित्तु दृ भये इति ह्रस्वं पठित्वा प्रत्यस्य दरयतीति स्त्रैवपि ह्रस्वमेव पेठुः

धा०

अन्येत्वाहुः स्त्रैह्रस्वपाठो निर्मूलः दृ विदारणे इत्यस्य नत्रयाख्यानाभिरूपमासात् स्मृ दृ भये चेति दणाते ह्रस्वविकल्प
वैयर्थ्याच्च दरुहनुर्निसस्य ह्रस्वाने न दद्रतुरित्यस्य तद्दीर्घाने नैव सिद्धेः धातूनामनेकार्थत्वया ऽर्थभेदस्यापि
दुर्वचत्वादिति नॄ नये आदेरनुवादः नरयति अन्यत्र नारयति श्रा पाके श्रायते: श्रातेश्चानुकरणमेतत्
लविकरणलत्तणमतिपदोक्तपरिभाषयोः परस्परविरोधादप्रहमेः श्रपयति विक्लेदयतीत्यर्थः अन्यत्र श्रापय
तिस्वेदयतीत्यर्थः मारणतोषणनिशामनेषु ज्ञा पर्षर्थे ज्ञाधातो: कैयादिकस्य मित्त्वार्थमनुवादः पशुं संज्ञपय
तिमारयतीत्यर्थः विसंविज्ञपयति तोषयतीत्यर्थः निशामनं चाक्षुषज्ञानं शाम आलोचने इति धातोर्निशामनपद
सिद्धेः आलोचनपदेन च पश्यार्थे ज्ञानालोचनइत्यत्र चाक्षुषस्य हृनिकारादिभिर्व्याख्यातत्वात् न ज्ञापयत्याचार्यः
विज्ञापनामस्त्वसिद्धिमेतीत्यादिप्रयोगाश्चेति केचित् अन्येतनिशामनेज्ञानमात्रे श्राज्ञरुद्र स्यति स्त्रीतीप्सम
नोवाधयितमिष्टइत्यस्य सर्वैरेव व्याख्यानात् ज्ञापयते: सनि ज्ञप्साप्सलोपादेरभावात् ज्ञापयतीत्यादेश्च धातू
नामनेकार्थत्वयात्ताति घोग इति चौरादिके न स्साधत्वादित्याहुः नत्वाथमनेतीप्समानो बाधयितुमिष्टइ
ति ग्रंथविरोधोऽस्त्वीर इति चेद्याहुः ज्ञप मिच्चेति चुरादिपठितस्य ज्ञापनमारणाद्यर्थस्य तद्रूपोपपत्तेः केचित्तु
चनिशानेति पाठत्वात् निशानं तीक्ष्णीकरणमिति व्याचख्युः कंपने चलिः ज्वलादिरयं चलयति शाखां
अन्यत्र चालयति शीलं अन्यथाकरोतीति केचित् हरनीमत्ते त्वत्र चालयतीत्यस्य संतपतीत्यर्थः छदिरूर्जने छ

सि.स्त.
।।।न्नू
केचित्तु
।।।

इदितीकानिर्देशः छदअपवारणे उजादिः स्वार्थे ◌ जभावे ऊर्जनार्थे मित्वार्थो ऽनुवादः छदंतं प्रयुंक्ते छदयति बल
वंतं प्राणवंतं वा करोतीत्यर्थः अन्यत्र छादयति स्वार्थे णिचि छादयति बलवान् भवति प्राणवान् भवति अपवारयति वे
त्यर्थः जिह्वा ◌ थ्ये न लडिः विलासे पठितस्य मित्वार्थमनुवादः जिह्वाया उन्मथनं तापनमिति कर्मषष्ठ्यंतेन समासः
लडयति जिह्वां तृतीयासमासे तु लडयति जिह्वया जिह्वापदेन प्रापोरलाद्वाणिकं समाहारे च द्वंद्वः लडयति शत्रु
दपि वेत्यादि अन्यत्र लाडयति ७ ब, मदी हर्षग्लेपनयोः दैवादिकस्यायमनुवादः मदयति हर्षयति दैन्यं करोति वेत्यर्थः
अन्यत्र मादयति चित्तविकारं जनयतीत्यर्थः ध्वन शब्दे ध्वनयति घंटां अन्यत्र ध्वानयति अस्पष्टाक्षरमुच्चारयतीत्यर्थः दलि
वलि स्खलि रणि ध्वनि त्रपि क्षपयश्चेति भोजः तेषां च क्रमेण विदारणे संवरणे वलने लज्जार्थे च पठितानामनुवादः त्रपयति दै
न्यं यः त्यक्षरश्च एवमिति विशिष्टस्येति विशेषः दलयतीत्यादि स्वन अवतंसने शब्दार्थस्यायमनुवादः स्वनयति अन्य
त्र स्वानयति घटादयो मितः मितसंज्ञा इत्यर्थः जनी जृष् क्नसु रंजो ऽमन्ताश्च मितसंज्ञा इत्यर्थः ज्वषिति षित्निर्देशो जरणा
तीति कैयादिकस्याहरणार्थः तेन दैवादिकस्य जरयति न स्यजारयति केचित्तु क्नसोः स्याने ◌ सू इति पठितं ◌ सु इति र
स्तेन इति दिवादि मुह्य जसू ऽमन्ता यथा रमयति श्रमयति संक्रामयतीत्यत्र तु वा चित्तविरागे इत्यनेनैव मनुहान स्यापव
स्यात विकल्पार्थं तया व्याख्यानादिति हृत्तिः एतेन विश्रामयति इत्यादि व्याख्याते ज्वल ह्वल ह्मल नमामनुपसर्गाद्वा
उपसर्गरहितानामेषां मित्वं वा ग्लास्नाविभाषेयं ज्वलयति ज्वालयतीत्यादि सोपसर्गाणां तु नित्यमित्वं प्रज्वलयति प्रज्वा
लयति ज्वामयतीत्यादिके तु घं नाना तत्करोतीति णिच् वाध्यं ग्लास्नावनुवमां च अनुपसर्गाद्वेत्यनुवर्तते आ ग्योरस्या
मेश्चं स्ययोः ग्लास्नाविभाषेयं न कम्यमि चमां ।। अमंतत्वात् प्राप्तो निषेधो ऽयं कामयते आमयते चामयति शमो दर्शने शा
मयति दर्शने शाम्यति दर्शने मित्वं स्यात् निशामयति रूपं अन्यत्र प्रणयिनो निशामय वधूः कथाः निशामयतऽत्यानिमिति

अपकारयंतं प्रभु
न्नेरित्यर्थः

तं

स्मा

त्वशमस्यालोचने इति चौरादिकस्य रूपं यात्वनामनेकार्थतया श्रवणार्थत्वसंभवात् न च तस्याकुस्मीयत्वादात्मनेपदित्वाप्र
सङ्गादनुपपत्तिरिति वाच्यं स्वार्थण्यन्तादेहमसि विनिज्यते: निहृत्तप्रेषणत्वमाश्रित्या ऽर्थभेदस्य समपरिहृतत्वात् यमोः
परिवेषणे । यद्वा तिर्भोजनमित्रेऽर्थे भिन्नस्यात् आयामयति द्रावयति व्यापारयति वेत्यर्थः भोजनेन त्वयमयति ब्राह्मणान्
पर्यवसितेन नियमयत्रिति नैयायिकप्रयोगस्तु नियमव्यक्त्वाशैवाधः स्वदिरयपरिभ्यांचं ॥ अपाच परिभ्यश्चेति न्यासः
एतत्सर्वस्य स्वदेर्मित्वं न स्यात् आपस्वादयति अवस्वादयति परिस्वादयति [illegible] अत्र स्वामी शम इत्यादि सूत्र
त्रयेन नमनमनुवर्त्य शमोदर्शन इत्यत्र अदर्शन इति छित्त्वा यमोः परिवेषणे इति वचनेऽमित्वविध्यर्थतया व्याख्याय सो
पसर्गस्य स्वदेश्छेदवादिपूर्वस्येति नियमात्स्वादयतीति व्याचख्यौ तदीतानि यमयत्रिति तु स्यं एवं च पूर्वमते
यमेर्भोजने मित्वं न त्वन्यत्र अपादिपूर्वस्य स्वदेर्न मित्वं एतन्मते तु भोजनमित्रेऽर्थे मित्वं अवादिपूर्वस्य मित्वं न त्वन्योप
सर्गपूर्वस्येति उदाहरणप्रत्युदाहरणयोर्वैपरीत्यं बोध्यं अत्र वदंति स्वामिव्याख्याने हरिन्यासविरोधाउपेक्ष्य नपाद
मीति सूत्रे आयामयते इत्युदाहृत्य यमोः परिवेषण इति मित्वप्रतिषेधः इति हरिग्रंथे व्याख्यानेन कम्पमीत्यत्र स्वत्रे तेन्स
नुवर्त्तत इति न्यासकारेण कृतत्वात् मैत्रेयादिभिरपि निषेधपरतयैव व्याख्यानात् न कम्पमीत्यनेऽनुवृत्तंरोधाव स्वारस्याच्च
ग्रन्थ्यानतः पूर्वमेवैतत्त्रिसूत्रीपाठापत्तेः फणगतौ अत्रानेनस्यनाद्वृत्तिः मित्त्वप्रसक्त्यभावात् न च निषेधात्पूर्वमेवा
स्य पाठोऽस्त्विति वाच्यं फणादिकार्यानुरोधात् ह्वल ह्मलादिगणः समाप्त इत्यर्थः केचित्तस्मात्पूर्वमेव ह्वलत्करणमिम्य
ऊः तत्र फाणयतीति बोध्यं ज्ञपमिच्चेति चुरादौ ज्ञपयति यम च परिवेषणे चान्मित्त्वदित्यनुवृत्तिः परिवेषणं वेष्टनं यम
यति चंद्रं वेष्टयतीत्यर्थः चह परिकल्कने चहयति चपेत्येके रह त्यागे इत्यन्ये बल प्राणने बलयति चिञ् चयने चपयति
नान्ये मिताः ह्रहैतौ स्वार्थे णिचि नयाः [illegible] पंच भिन्नामितोन स्युरित्यर्थः तेन शमादीनां चुरादिपठितानामसंनतेऽपि न मित्त्व
हि

६
सि·ह्र·
११२
११२

अत एव निशामयतेरुत्पत्तिमित्तिशमेरञ्जोरादिकस्येति व्याख्यानम् ॥ चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ चिण्णमुल्परे
यस्मात्तादृशे णौ परे मितामुपधाया दीर्घो वा स्यात् अशमि अशामि शमंशमं शामंशामं ननु ह्रस्व एवात्र विकल्प्यतां
प्रकृतत्वात् किं दीर्घग्रहणेनेति चेन्मैवं एवं तर्हि विकृतेनैव चिण्णमुलोः कृतयोरुपधासिद्धेः अचः परस्मिन्पूर्वविधौ इति
प्रथमणिलोपस्य स्थानिवद्भावे मित्प्रकृतिकणिजपेक्षया चिण्णमुलोः परत्वाभावात् द्वितीयणिजपेक्षया तयोः पर
तेपि तस्य एवंतत्प्रकृतिकतया मित्प्रकृतिकत्वाभावात् दीर्घविधाने तु न परोऽनेनेति दीर्घविधौ स्थानिवत्त्वनिषेधादि
ष्टसिद्धेः न च तथापि णिलोपस्याभीयत्वादसिद्धत्वं स्यादिति वाच्यं व्याश्रयत्वात् तदप्रवृत्तेः ननु भाष्यकारमते हि वि
चनादीति वरेयलोपस्वरवर्जमिति सिद्धान्तात्र दीर्घग्रहणप्रत्याख्यानाद्दीर्घग्रहणे कृतेपि स्थानिवत्त्वं दुर्वारं सर्वत्रा
सिद्धेन स्थानिवदित्यस्यात्र प्रवृत्त्यभावात् अत्राहुः णित्वजात्येकं गृहीत्वा एवं तर्हि न दोष इति नन्वेवमपि यङ्.ता
न्णिचि चिण्णमुलोरशंशमि अशंशामि शंशमं २ शंशामं २ इति न स्यात् तत्र यस्य हलः अतो लोप इत्यकारयकार
योर्लोपेऽल्लोपस्य स्थानिवद्भावे चोक्तदीर्घस्य दुर्लभत्वात् अकारणिचोश्च विजातीयतया जात्येकस्य दुर्वचत्वा
त् अत्राहुः अशंशामीत्यादिकं यङ्.लुगन्तात्सिद्धं रूपं तत्र यङ्.लुकः समुदायप्रतियोगिकत्वमिति सिद्धान्ता
त्पृथग्लोपानंगीकारेण स्थानिवद्भावप्रसक्त्यभावात् रूपस्य वा विशेषाभावात् एतेन चिण्णमुलोर्णिच्युपेता
न्तायङ्.लोपे चोपसंख्यानमिति वार्तिकमप्यपास्तं उक्तरीत्यैवोभयत्र सिद्धेः नन्वेवात्र ह्रस्वविकल्पविधानेने
व सिद्धौ दीर्घग्रहणं वैयर्थ्यमिति चेन्न दीर्घविकल्पविधाने हि हेडृ अनादरे इति घटादिषु पठितस्य अहिडि
अहीडीत्यादि रूपं ह्रस्वविकल्पविधाने तु अहिडि अहेडीत्येव स्यात् इति दीर्घविकल्पस्यैव युक्तत्वात् यङ्.तान्
णिचि भाष्यमतेऽप्यशंशामयतीत्येव रूपं तत्र पृथग्लोपस्वीकारेण तस्य स्थानिवद्भावे णिच्परत्वाभावा

२।

उपधाह्रस्वैरप्रहृतेः ॥ खचिह्रस्वः ॥ ण्यंतस्योपधायाह्रस्वः स्यात्खचिपरे द्विषंतंतापयतीतिद्विषंतपः द्विषत्परयोस्तापेरिति

खच् ॥ ह्लादोनिष्ठायां ॥ उपधायाह्रस्वः स्यान्निष्ठायां प्रह्लन्नः ॥ छादेर्घेऽद्व्युपसर्गस्य ॥ अद्विप्रभृत्युपसर्गस्येतिवक्तव्यं नचवि

श्वादीनां द्वित्वसामानाधिकरण्ये नियमात्तेनाप्राप्तिरितिवाच्यं द्विपुत्रग्रामीयनामिसूत्रे त्रिपुत्रस्य कार्यान्वयात् द्विप्र

भृत्युपसर्गरहितस्य छादेर्ह्रस्वः स्यात्घप्रत्ययेपरे ध्याद्युपसर्गाभावस्य द्वेधा विशेष्याभावाद्विशेषणाभावाच्च आ

द्योयथा दंताः छाद्यंतेनेनेति दंतच्छदः अत्रोपसर्गस्यैवाभावात् द्वितीयोयथा प्रच्छदः अत्रोपसर्गसत्त्वेपितत्रद्वि

त्वाभावात् द्वित्वविशिष्टोपसर्गाभावः एकोपसर्गस्येतितु नोक्तं दंतच्छदश्चपादेरसिद्धेः ॥ कुसिसंतायामितिच ॥

अद्धीतिकिं समुपच्छादः समयाभिच्छादः ॥ इस्मन्त्रन्क्विषुच ॥ एषुछादेर्ह्रस्वः स्यात् छादतीतिछदिः अर्चिशु

चिहुसृपिछादिछर्दिभ्यइसिः पटलंछदिरित्यमरः सांतंस्त्रियां चैतत्छदिः स्त्रियामेवेति लिंगानुशासनसूत्रात् छा

दयतिआशायतीतिछद्म सर्वधातुभ्योमनिन् छत्रं सर्वधातुभ्यःष्ट्रन् क्विप्यथा तनच्छत् ॥ गमहनजनखनघसांलो

पः क्ङित्यनङि ॥ एषामुपधायालोपःस्यादजादौक्ङिति जग्मतुः जघ्नतुः जज्ञे चख्नतुः जक्षतुरित्यादि अनङि

किं अगमत् अघसत् लृदित्वादङ् अजादौकिंजगम्य क्ङितिकिं गमिष्यति ॥ तनिपत्योश्छंदसि ॥ अनयोरुपधाया

लोपःस्यात् अजादौ क्ङिति वितत्निरेकवयः शाकुनाइवपप्तिम ॥ घसिभसोर्हलिच ॥ उपधालोपःस्यात् सग्धिश्चमे

अदेः क्तिन् बप्सलंछदसीतिघस्लादेशः उपधालोपः कलोकलीतिसलोपः झषस्तथोरितिधत्वं घसजश्त्वेनग

कारः समानस्यछंदसीतिसादेशः बब्धांतेहरीधानाः भसेर्लोट् तसस्ताम् श्लुः उपधालोपस्यपरत्वनित्यत्वयोर

पिवाधकत्वयमप्रसक्तावितिवित्वं ततउपधालोपः अभ्यासभकारस्यजश्त्वेनबत्वं सलोपधत्वे द्वितीयभकार

स्यजश्त्वेनवत्वं अत्रवार्तिके हल्ग्रहणमनर्थकमन्यत्रापिदर्शनात् अजादावपीत्यर्थः अग्निर्विनानिवप्सतिएवं

६
सि॰ह
११३
११३
वोन

च हलि चेति वकारपाठो निर्मूल इति बोध्यं ॥ झयल्पो हो र्ढिः ॥ जहातेर्झलंते भप्रत्यय परस्य हेर्धिः स्यात् जहधि विहि प
यिशाधीत्यत्र धत्वपिभावयोरसिद्धत्वाद्धिभावस्यादेशाविमुक्तं इटः प्रतिषेधो वक्तव्यः रुदिहि स्वपिहि आगमास्तद्गुणी
भूता इति इट् हि शिष्टस्यापि हेर्धित्वप्राप्तौ निषेधारंभः वस्तुतो हलीत्यस्यानुवृत्त्यैव सिद्धे नत्रप्रत्याख्यानस्यात्र हल इति ष
ष्ठीत्वोपपत्तेः झयल्प इति पंचम्या हलीति सप्तम्याः षष्ठीत्वप्रकल्पनेनाप्र निर्दिश्यमानस्यादेशा भवंतीत्यनेन सिद्धेऽप्र न
च हि मात्रस्यापत्तिः इत्याद्यवधानात् ननु भिंधकीत्यादौ धिभावः स्यात् हकारेकारयोर्मध्ये अकजुत्पत्त्यास्यानिनोहीत्येव
रूपत्वाभावात् व्यंजनमात्रस्य वा निर्दिश्यमानत्वात् मैवं धिभावोत्तरं तत्राकच् प्रवृत्तेः धिभावस्य परत्वात् शंकांतरस्या
प्याकचोः नित्यत्वात् यद्वा हेरित्यत्र न समुदायस्य स्थानित्वं किं तु हकारमात्रस्य इकारस्योभयत्राप्युच्चारणार्थत्वात् ॥
श्रुशृणुपृकृवृभ्यश्छंदसि ॥ हेर्धिः स्यात् शृण्वेव मत्य श्रुधीहवं शृणुधी गिरः रायस्पूर्धि उरुणस्कृधि अपावृधि ॥
अङितश्च ॥ हेर्धिः स्यात् रारंधि रमेर्व्यत्ययेन परस्मैपदं शपः श्लुः तुजादित्वादभ्यासदीर्घः पित्वेन हेरङित्वं अस्मे प्रय
न्धि युयोध्यस्मज्जुहुराणमेनः युयोधि पृथक् कुरु इत्यर्थः यु मिश्रणामिश्रणयोरित्य मिश्रणार्थो यौतेर्व्यत्ययेन श्लुः ॥
चिणो लुक् ॥ तग्रहणं कर्तव्यं चिणः परस्य तस्य लुक् अकारि चिण्भावकर्मणोरिति चिण् तशब्दस्य लुक् वस्तुत
स्तु चिन्नस्त शब्दे परे विहितत्वात्तस्यैव लुक् न च अकारितरामित्यत्र तरपोपि लोपापत्तिः तत्र तरप् समुदायस्याप्रत्ययत्वाभा
वात् प्रत्ययस्य लुक्श्लुलुप इति वचनात् न च तलोपो तरमापत्तिः तलोपस्याऽसिद्धत्वात् न च तस्यासिद्धत्वेन तस्यासि
द्धत्वं दुर्लभमिति वाच्यं लक्ष्यभेदेन लक्षणभेदाश्रयणात् तदुक्तं चिणोलुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वा
त्तलोपस्यासिद्धत्वादिति कृतीमन्नु हन्तस्य चिणा इति पंचम्याः कृ तइति षष्ठीत्वकल्पनाच्चिणः परस्य ङितः प्रत्ययस्य
लुगिति व्याख्यानाद्वा ॥ अतोहेः ॥ अतः परस्य हेर्लुक् स्यात् भवजहीत्यत्र जभावस्याऽसिद्धत्वात् नेत्युक्तं ॥ उतश्च प्र

यं

स्याद्संयोगपूर्वात् ॥ असंयोगपूर्वो यः प्रत्ययसंबंधी उकारस्तदंतादंगादुत्तरस्य हेर्लुक् धिनु धिन्विकृण्व्योरचेति शव[?]पवा
द उप्रत्ययः कृणु कुरु इत्यादि छंदसि चेति वक्तव्यं अवस्यैतन्नुहिज्यानाञ्ञनोधिनुहि यज्ञं धिनुहि यज्ञपतिं उत्परेत्ववा
वचनं कर्तव्यं उत्तरत्रान्यतरस्यामिति मास्तु इत्याहुः नेचाः संयोगपूर्वत्वं प्रत्ययस्यैव विशेषणमस्त्विति वाच्यं अक्ष्णुही
त्यादावतिप्रसंगात् प्रत्ययस्य संयोगपूर्वत्वमसत्त्वात् ॥ लोपश्चास्यान्यतरस्यां म्वोः ॥ असंयोगपूर्वो यः प्रत्ययोकारः त
दंतस्यांगस्य लोपो वा स्यान् मकारवकारयोः परयोः धिन्वः धिनुवः धिन्मः धिनुमः सिपित्परत्वाद्गुण एव धिनोमि
असंयोगपूर्वत्वेन उकारविशेषणं किं अश्नुवः इत्यादौ मा भूत् ॥ नित्यं करोतेः ॥ प्रत्ययस्योकारलोपः स्यात् म्वोः कु
र्वः कुर्मः पूर्वविकल्पापवादः ॥ ये च ॥ कृञ उकारस्य लोपः स्यात् यादौ प्रत्यये कुर्यात् ॥ अत उत्सार्वधातुके ॥ क
रोतेरकारस्य उत्वं स्यात् सार्वधातुके परे यस्मात् तस्मिन् ह्रस्वे उकारे परे कुरुतः कुर्वंति तनादिकृञ्भ्य उः सार्वधातुकार्द्धेति
गुणः रपरत्वं अकारस्यानेन उत्वं न च करोतीत्यत्र प्रसंगः तत्र परत्वात् प्रत्ययोकारस्य गुणप्रवृत्तेः तस्मादोत् ङित्वेन
तदभावात् सार्वधातुके किं संचस्करतुरित्यादौ मा भूत् नन्वकारस्य कुतो लाभः न च करोतेरिति प्रत्ययविशि
ष्टग्रहणादिति वाच्यं तस्य निर्देशमात्रार्थत्वात् अन्यथा संस्कर्तेत्यादौ सुटेः प्रसंगात् करोताविव स्यात् तत्रास्यु
पादानात् मैवं उतश्च प्रत्ययात् तो नुवृत्तेः तेन करिष्यतीत्यादौ नोत्वं नन्वेवं सार्वधातुकग्रहणं व्यर्थं संचस्करतुरित्यादावु
कारविरहादेवानापत्तेः मैवं उत्तरार्थत्वात् तेन श्नसोरल्लोपश्चार्द्धधातुके न भवति न च तत्र भ्वभावविधानादेव ना
पत्तिरिति वाच्यं अनुप्रयोगे भ्वभावविरहात् नन्वीं[?]मासतुरित्यादौ अल्लोपे कृते द्विर्वचनस्य स्थानिवद्भावेन सिद्धिः
कृते हि त्वपरस्याकारस्य लोपे पिस्भ्यासाकारस्य अंतग्यादेरिति दीर्घेण रूपसिद्धेः न च लस्य परत्वापत्तिः दीर्घ
स्य तद्बाधकत्वात् न च श्नाभ्यस्तयोरित्यत्रास्योपयोगः अः धातुकत्वात् सार्वधातुके परे आकारांताभ्यस्तभावाच्च याया

हा॰

सार्व

६
सि.कौ.
१८

वरस्स्यप्रत्ययांतत्वात् ईहल्यघोरित्यत्रापि श्नाभ्यस्तयोरित्यनुवर्त्तते: एवमन्यत्रापि योज्यं अत्र भाष्यं सार्वधातुकमपि न शर्वमात्रे उक्तं यथा स्यादित्येवमर्थं तत् तेन कुरु इत्यादौ हि लोपो प्युक्तं असिद्धवदित्यस्य प्रत्याख्यानात् ॥ श्नसोरल्लोपः ॥ श्नस्यास्तेश्चाकारस्य लोपः स्यात् सार्वधातुके क्ङिति रुंधः रुंधंति स्तः संति क्ङिति किं रुणद्धि अस्ति पिन्नात् ङित्त्वं तपरः किं आसन् आटो लोपो माभूत् ॥ श्नाभ्यस्तयोरातः ॥ लोपः स्यात् क्ङिति सार्वधातुके जानते क्रीणते मिमाते मिमते ॥ ईहल्यघोः ॥ श्नाभ्यस्तयोरात ईत्स्यात् हलादौ क्ङिति सार्वधातुके अघोरिति अभ्यस्तविशेषणं लोपस्यापवादोयं क्रीणीतः मिमीते अघोः किं दत्तः धत्तः अत्रातो लोप एव क्ङिति किं क्रीणाति हलादौ किं क्रीणंति ॥ इद्दरिद्रस्य ॥ दरिद्रातेरिकारः स्यात् हलादौ क्ङिति सार्वधातुके जक्षित्यादयः षडित्यभ्यस्तसंज्ञत्वात् सर्वेण श्नाभ्यस्तयोरित्यस्यापवादः दरिद्रितः क्ङिति किं दरिद्राति हलादौ किं दरिद्रति अत्रातो लोपः दरिद्रातेरार्द्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति वक्तव्यं दरिद्रिता सिद्धवचनं किं दरिद्र इत्यत्र आकारांतलक्षणः श्यप्रत्ययो माभूत् न दरिद्रायके लोपो दरिद्राणे च नेष्यते दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा सनि शर्वेण श्नाभ्यस्य एवं लिङ्लुङि प्रत्ययतत्त्वं चेति वक्तव्यं वाचनिषेधः लुङि च विकल्पः अदरिद्रीत् अदरिद्रासीत् ॥ भियोन्यतरस्यां ॥ ञिभी भये अस्य वा इत्स्यात् हलादौ क्ङिति सार्वधातुके श्नाभ्यवि भाषेयं बिभितः बिभीतः क्ङिति किं बिभेति हलादौ किं बिभ्यति ॥ जहातेश्च ॥ इद्वा स्यात् हलादौ क्ङिति सार्वधातुके जहितः ओहाक् त्यागे जहातेरित्यादिः पदे श्नाभ्यस्तयोरितीत्वं जहीतः क्ङिति किं जहाति हलादौ किं जहति ॥ आ च हौ ॥ चकारादीतोरनुकर्षणार्थः जहातेर्हौ परे आ इत् ईत् इत्येते स्युः जहाहि जहिहि जहीहि ॥ लोपो यि ॥ जहातेरातो लोपः स्यात् यादौ सार्वधातुके जह्यात् आर्द्धधातुके लिङि तु हेयात् एर्लिङीत्येवं ॥ घुमास्थेत्याद्यभ्यासलोपश्च घुसंज्ञानां अस्य हैरे परे एत्वं स्यात् घुसंज्ञानामभ्यासलोपश्च तेन घु पदं दाज्यात् परमिति पर्यवसन्नं अन्येषामभ्यासाभावात् विकरणव्यवधानेनेहः परत्वाभावाच्च देहि धेहि एधि अ

स.२

८

अलोन्त्यपरिभाषयास्यस्यएत्वं अकारस्यश्नसोरिति लोपः एत्वस्यासिद्धत्वात्कृतेनत्वलत्वंणत्वंविधेयम् नन्वभ्यासलोपोप्यन्त्यस्यस्यात्
मेवं नानर्थकेलोन्त्यविधिरिति निषेधात् नचानभ्यासविकारइति निषेधः विकारशब्देनभावरूपस्यैवग्रहणात् लोपस्यत्वभा
वरूपत्वात् नन्वपरिभाषाप्रत्याख्यानपक्षेनलोपश्चेति द्विशकारको निर्देशः आद्योलोपशब्दोत्तरविभक्तिसकारस्यश्चुत्वेन नि
ष्पन्नः द्वितीयः सर्वादेशार्थः नन्वनर्थकस्यसंज्ञित्वात्कथंशित्वेनसर्वादेशः आदेशोनर्थकशित्वस्यैवतथात्वात् लोपशब्दस्यवा
नादेशत्वात् सत्यं संज्ञायांशित्वस्यप्रयोजनाभावेनलोपपदवाच्येऽर्थेसर्वादेशत्वसिद्धेः ॥ अतएकहल्मध्येनादेशादेर्लि
टि ॥ एकपदमसहायार्थे आदेशोलिटिनिमित्तकोग्राह्यः लिटिनिमित्तक आदेशोयस्यागमस्यादौनास्तितदवयवस्याः संयुक्त
हल्मध्यगतस्यैकारस्यएत्वंस्यादभ्यासलोपश्च किति लिटि पेचतुः पेचुः दयेदेधातेर्देयिरे दयधारणेभ्वादिः अतः किं रासे
एकेत्यादि किं ततसरतुः अनादेशादेः किं चकणतुः आदेशस्यलिटिनिमित्तकत्वेनविशेषणंकिं नेमतुः नेमुः सेहे सेहा
ते इत्यादि अत्रनत्वसत्वयोरादेशयोरादौसत्वेपितयोर्लिटिनिमित्तकत्वाभावात् ननुलिटीत्यादेशविशेषणमनुपपन्नं
पक्षापक्षइत्यादिव्याहुसमर्थत्वान्नेत्येतिचेन्न अभ्यासलोपसंनियोगेनविधीयमानस्यएत्वस्य अभ्यासाभावस्यलेप्रसक्ते
रेवाभावात् नचपापच्यतेइत्यादिव्याहुसमर्थंतदिति वाच्यं दीर्घोकितइतिदीर्घस्यैवतत्रबाधकत्वात् ननुनामामेष्वभ्यासविका
रेष्वारभ्यमाणमेत्वमेवनहादकंस्यात् मैवं फलस्वहलादिशेषोहृस्वस्यापि तदपवादोपत्वंदीर्घत्वंच अपवादविप्रतिषेधेपर
त्वाद्दीर्घस्यैवप्रवृत्तेः नन्वतथापिबभणतुरित्यादावेत्वाभ्यासलोपौस्यातां जशत्वस्याःसिद्धत्वयातदादित्वाभावसत्वात् मैवं
फलिभजोरेत्वविधानेनएत्वंप्रतिअभ्यासविकारस्यसिद्धत्वज्ञापनात् अन्यथाःतेनैवसि[illegible]त्वेहैयर्थ्यात् अथैवं पेचतुर्दम
तरित्यादावपिप्रकृतिचरांप्रकृतिजशांचनादृशादेशविधानादेत्वंनस्यात् मैवं वैरूप्यसंपादकस्यैवादेशस्यात्रग्रहणात्
अत्रचलिंगसंसिद्धयोरेत्वप्रतिषेधवचनं अन्यथालिट्कृताभ्यासविकारादित्वात् दम्भोनिषेधवैयर्थ्यात् दंभएत्वंवक्तव्यं

६ सि.सु. ११५
115

त्तुदंभने देभतुः देभुः न च नलोपे कृते एकहल्मध्यस्थत्वात्तत्रैव सिद्धमिति वाच्यं नलोपस्यासिद्धत्वात् श्रन्थिग्रन्थिदम्भि
स्वञ्जीनां लिटः कित्त्वं चेति व्याकरणे नेदं सूचितत्वात् संयोगान्तस्यापि लिटः कित्त्वं कित्त्वाभावपक्षे ददंभतुरित्यादि अस्य
कित्त्वस्यापि दर्शितत्वात् साधारण्यात्त्रिष्वपि पक्षे देभे देभिथ देभेति रूपान्तरमिति केचित् न्यासकारादयस्तु अपिद्विषयकमेव कि
त्वमित्याहुः युक्तं चैतत् देभतुरित्यादेरेव भाष्यकारैरुदाहृतत्वात् अन्यथा प्रथमपरिहारे कारणाभावाद्देभेत्यप्युदाहृतं
स्यात् अत एव सूत्रे ऽपि नेमेकवचनमप्युदाहृतं तस्माद्देभेत्यादिकमेव युक्तं श्रथि शैथिल्ये ग्रथि कौटिल्ये इत्यात्मनेपदिनो
नेह ग्रहणं नकारस्य लाक्षणिकत्वात् किन्तु श्रथ ग्रथेत्यनयोः परस्मैपदिनोः नकारस्याप्रतिपदोक्तत्वात् श्रेथतुर्ग्रेथतुरिति का
शिकादावुदाहृतत्वात् तेन श्रथ ग्रथेति शैथिल्यकौटिल्यार्थयोरनिदितोर्ग्रहणमिति माधवः भाष्ये तु श्नसोरल्लोप इतित
परत्वेन असिद्धवदत्रेत्यसिद्धस्यानित्यत्वं ज्ञाप्यते अन्यथा सिद्धत्वादेव आतो लोपानुपपत्त्या तस्य वैयर्थ्यात् तेन नलोपस्य
सिद्धत्वे दंभ एत्वं नारभ्यमित्युक्तं तदुक्तं असिद्धत्वान्नलोपस्य दंभ एत्वं न सिध्यति श्नसोरत्त्वेन कार्येण ज्ञाप्यते त्वशासनं क्व
दस्य मिपचोरलिटि एत्वं वक्तव्यं वेमाने अमेर्विपूर्वाद्व्यानशे आगमशासनस्यानित्यत्वात् ऋदन्तत्वाद्वा नुगभावः पेचिरन्
पेचिम पेचरन् पचेमेत्यर्थः वकारो मकारस्य पकारस्यापि ऋकारादेशो ऽस्त्वः यजिवयोश्च निवक्तव्यं आयेजे आवेपे ह्लादसत्त्वादात् ॥
थलि च सेटि ॥ इट्येवोक्तेस्यात् पेचिथ शेकिथ क्रादिनियमादिट् किन्तु विरहाद्यथासंभवारंभः अथ थलीति व्यर्थं सेटीत्यने
नैव अक्रिडर्थत्वसिद्धेः वमयोः कित्वाभावेऽपि सिद्धौ ऽन्येषां अजादित्वात्पत्त्वे पर्यवसानात् ॥ तॄफलभजत्रपश्च ॥ तॄ स्
वनतरणयोः फलतिः निष्पत्तौ ञिफला विशरणे भज सेवायां त्रपूष् लज्जायां एषामेत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि
च तेरतुः तेरिथ फेलतुः फेलिथ भेजतुः भेजे त्रेपे न च निरनुबन्धकग्रहणपरिभाषया फलतिः निष्पत्तावित्यस्यैव ग्रहणं
स्यादिति वाच्यं तस्याः प्रत्ययग्रहणविषयकत्वादिति केचित् ॥ अन्ये तु ह्रस्वदीर्घकालयोरिव सामान्यग्रहणार्थं क्रियमा

५४

णत्वजहाते: किन्त्वात्परिभाषायाः प्रत्ययग्रहणमात्रविषयकत्वेपि प्रकृतस्त्वेवकारेण विशरणार्थस्य संग्रहस्त्वादः ॥
राधोहिंसायां ॥ एत्वाभ्यासलोपौस्तः किंनिलिटि सेटिथलि च राधसाधसंसिद्धौ स्वादिः अत इति तपरकरणान्नृवीभ्यास
श्रामावारेभः रेधतुः रेधुः रेधिथ राधदेवादिकेनास्य प्रवृत्तिः तस्याकर्मकत्वात् राधोऽकर्मकाद्वृद्धावेवेति वार्त्तिकेः तस्य
रराधतुः रराधिथेत्येव नन्वत्रस्थानेनिर्देशः कर्तव्यः अत इत्यंशस्य वाधितत्वात् एवमप्यत्रत्रपिप्रथायो रायोजेनत्वेपकहल
मध्यस्थस्येत्येनेननिर्वाहः त्रेसतु रिमादेरेफाकारसमुदायस्यएत्वप्रसंगात् नचालोन्त्यपरिभाषयानिर्वाहः तस्याः प्र
त्याख्यानात् अत्रभाष्ये त्रेसतरिमादावतइत्यनुवृत्तेरेवनदोषः राधेस्तस्याभ्यासलोपावित्यतआत इत्यनुवृत्तेराद्यः स्यादिति
यद्याप्रसोरलोपस्त्वत्रतपरत्वप्रत्याख्यानात् तदनुवृत्त्याप्रसिद्धं नचैवमत्वेपकहलमध्य स्याप्रायितदनुवृत्तौरराससेइत्यादा
वतिप्रसंगः अस्याऽतइत्यत्रतएवअकारेणविशेषणीयत्वात् अत इत्युपादानसामर्थ्याद्वारराधइत्यादौत्वप्र इतिनिवृत्ते
रस्येत्यनुवर्तितइतिनदोषः ॥ राजभ्रमत्रसां ॥ उक्तविषयेएत्वाभ्यासलोपौवास्यातामः जजेरतुः जेरतुः स्कृत्ववृत्ता
मितिगुणः वभ्रमतुः वभ्रमतुः त्रेसतुःतत्रसतुः त्रेसिथ तत्रसिथ ॥ फणांचसप्तानां ॥ एत्वाभ्यासलोपौवास्तः शर्वविषये
फणगतौ राजृदीप्तौ सवितेनत् टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ स्यमुस्वनशब्दे फेणतुः पफणतुः फेणिथ
पफणिथ रेजतुः रेजे रेजाते भ्रेजे वभ्राजे भ्रेशे वभ्राशे भ्लेशे वभ्लाशे स्येमतुः सस्यमतुः स्वेनतुः सस्वनतुरित्यादि ॥
नशसददवादिगुणानां ॥ शसुहिंसायां ददददाने वादयोवकारादयः गुणोगुणशब्देनविहितोऽकारः एषामेत्वाभ्या
सलोपौनस्तः शसुहिंसायां शशसतुः दददेददतेत ववमतुः ततरतुः स्कृत्ववृत्तामितिगुणः केचित्तशपोनिपठि
त्वाशशप्तुर्न [illegible] तोविनिधानेः शशशतु रित्युदाजहुः तन्नभाष्यादिविरोधात् उपदेशनत्वेवमप्र केचिड्डयितइत्यादी
नांकाराणितिरितिवेत् अत्रकेचित् वेत्यकारान्तसमुदायग्रहणादेवसिद्धेआदियहणमुपदेशेयोर्व्वकारादिरित्येताह

६
सि॰ स्तु॰
११६
११७

शार्थप्रतिपत्त्यर्थं वमतेस्त्रोपदेशे टकारादित्वादनुवंधानां च विवक्षितत्वान्न निषेध इत्याहुः अन्ये तु वकारात्पूर्वं तत्र लोपो व्यो
रिति लोपेन यकारप्रश्लेषादुपदेशे वकारादित्वं नास्तीत्याहुः ननु गुणशब्देन भाविनस्य योऽकार इत्यवयवावयविभावस्य
षष्ठ्यर्थत्वादनन्तरत्वादित्यादेः सिद्धावपि ललविधेस्त्वादावेत्वाभ्यासलोपौ ऊर्वी रौ तत्र गुणशब्देन ओकारस्यैव विहितत्वान्न त
कारस्य तस्यावादेशावपवत्वात् मैवं परंपरासाधारणस्य भावितत्वस्याश्रयत्वात् गुणशब्देन भावितस्य त्वर्थे च लिंगावा
तृभ्रस्त्रसामिति जीर्यतेरेत्वविधानं अन्यथा तपकरस्त्वमध्ये इत्यनेनैव सिद्धे॥ अर्वणस्त्रसावनञः॥ नञ्रहितस्या
र्वन् शब्दस्यांगस्य त्र इत्यादेशः स्यान्न तु सौ अलोन्त्यपरिभाषया नकारस्यादेशः न च अनेकाल्त्वात्सर्वादेशप्रसंगः
नानुबन्धकृतमनेकाल्त्वमिति सिद्धान्तात् ऋकारस्योपदेशो ज इति श्लं त्ताउगित्वान्नुम् अर्वन्तौ अर्वन्तः असौ किं अर्वा अन
र्वाः किं अनर्वाणौ अनर्वाणः इत्यादौ माभूत् ननु ऋधातोर्विचि गुणे अर् इति रूपं तस्मान्मतुपि अर्वत्वाविस्यादि वेदे च तस्मा
त् छन्दसीवनिपौ इति वनिपि अर्वेति सिद्धं लोके पि ऋधातोः कृत्वन्नेवनिपितल्सिद्धं तत्किमनेन सूत्रेणेति सत्यं अर्वान्
अर्वन्तौ इत्यादि प्रयोगवारणार्थत्वात् त्रवत्क्रोष्टु इत्यादिवत्॥ मघवा बहुलं॥ त्र इत्यस्यानुवृत्त्यात् त्वप्रत्ययमघवे
ति षष्ठ्यर्थे प्रथमा छान्दसत्वात् मघवन् शब्दस्य त्र इत्यादेशो वा स्यात् उगित्वान्नुम् प्रथमैकवचने सौ रूपे विशेषति
पत्तिः तत्र केचित् सौ हल्ङ्यादिलोपे संयोगान्तस्येति नकारलोपे च तस्याः सिद्धत्वात्तत्त्वं नास्तीति सर्वनामस्थाने चा
संबुद्धाविति दीर्घस्य दुर्लभत्वान्मघवन्निति रूपं इत्यादौ तु अत्वसंतस्येति दीर्घस्य नुमः प्रागेव प्रवृत्तिर्विमृश्य त्वा
त् अत एव दीर्घस्त्वामितोऽग्रमप्यनुवृत्तिस्तत्र निपातितस्य मघवन्नित्यस्य त्रादेशो दीर्घाभावान्मघवन्निति अपरे त्वाहुः व
हुलग्रहणस्य क्वचिदप्रवृत्तेर्वेति संबन्धकत्वादनेनैव दीर्घः अत एव अर्वणस्त्रसावनञ इत्यत्र नञ् शिष्टत्वात् संहितत् मघवत्यादि वि
धानाच्च छन्दस्युभयदर्शनादिति भाष्यवार्तिककाराभ्यामेतन्मत्रं प्रत्याख्यातं यदि हि सत्रारंभे मघवन्निति रूपं स्यात्

दात्तन्नसंगच्छेत मतुवंतस्य मघवानिति रूपेण वैषम्यात् फलभेदे प्रत्याख्यानासंभवात् नच मतुवंतेपि छांदसत्वान्न दीर्घ इत्येव
भाष्याशय इति वाच्यं मतुवंतस्य छांदसत्वे मानाभावात् अतएव सोच मघवान्मघवा वेति कातंत्रसूत्रे विचारचिंतामणौ च पु
न्नं मघवानेव मघवेति काशिकायामपि दीर्घस्योदाहृतत्वात् मविष्णु मघवान्साविति भट्टिप्रयोगाच्च छंदसीवनिपाविति
वार्तिकव्याख्यायां सूत्रं दत्त्विति निपातनान्मघशब्दान्मतुपा च शब्दद्वयस्य सिद्धत्वादिति कैयटोक्तेश्च अतएव मघोन इ
त्यपत्यायमघवेत्युक्तं वकाराकारस्य दीर्घो भवतीति ज्ञापनार्थत्वात् बहुलग्रहणमप्येवमुपपन्नं अन्यथा चेत्येव सूत्रा
त्रू अतएव मघवाऽजीषीत्यादौ वेदेपि दीर्घः पठ्यमानत्वाच्च। किंच मघवन्निति रूपस्य छंदसीष्टत्वे सूत्रप्रत्याख्यानविरो
धः छांदसशब्दसाधनार्थप्रवृत्तानां सर्वेषां सूत्राणां प्रत्याख्यानापत्तेः नचेष्टापत्तिः वैदिकशब्दानामप्यनुशासनस्य
भाष्यकृतैव प्रतिज्ञातत्वात् इति दिक् अत्रेदमवधेयं एवमपि फलभेदो दुर्वारः श्वन्नुक्षन्निति सूत्रे हस्य च तं प्रत्युगागमः क
निप्रत्ययश्चेति निपातितस्य मघवन् शब्दस्य प्रत्ययस्वरेणांतोदात्तत्वं इति तस्यादेशो मघवानित्यत्र वकाराकारस्योदात्तता
न् मघवानित्यस्य मतुवंतत्वे तु वकाराकारस्योदात्तत्वेन च कृत्स्वनुदात्तमतुविति वकाराकारस्यैवोदात्तत्वमिति वाच्यं न
गोश्वन्साववर्णेति प्रतिषेधात् यत्तु बहुलग्रहणेन त्रादेशेपि वकाराकार उदात्त इति तदाग्रहमात्रं उभयपरत्वे प्रमाणा
भावात् नच फलभेदे प्रत्याख्यानासंभवात्प्रत्याख्यानमेव प्रमाणमिति वाच्यं मतुवंतस्य दीर्घो न भवतीत्येतेनापि तदुप
पत्तेः नच तत्रापि स्वरसाम्यमपेक्षितमेवेति वाच्यम् एकागारिकट् चौरे इत्यत्र स्वरवैषम्येपि निपातनप्रत्याख्यानस्य भा
ष्यकैयटादौ प्रसिद्धत्वात् न बहुव्रीहाविव च रूपवैषम्येपि तत्पाततोच्च भाष्यकारस्यास्वान्तेप्येण लक्ष्यदर्शितयातल्ल
नप्रत्याख्याने फलसाम्यवैषम्ययोरप्रयोजकत्वात् एवं च मतुवंतेन न दीर्घ इति कल्पनमभ्युपेत्यवादमात्रं यत्तु मतुवंत
स्य छांदसत्वे मानाभावादित्युक्तं तदुपेक्ष्यं मतुवंतस्य मघवबहुलस्य छंदसि दीर्घो नेत्यर्थात् मतुवंतस्य छांदसत्वमित्यत्र दोषा

गा॰
म॰

६
सि॰सु॰
११८
117

पन्नामस्य ः भृत्वं न त्वात् मघवानित्यादीनां च भाषायामनुवं नानामेवोपपत्तेः आदेशांतस्य दीर्घ इत्यत्र साधकत्वाभावा
त् मघवान् जीषीत्यादीनां च लोकवेदेव सिद्धेः पाक्षिकदीर्घाभावाभ्युपगमेनैव तदभिमतप्रत्याख्यानोपयोगित्वप्रसाम्यला
भात् उक्तं कैयटेन ग्रन्थस्य तु नकारांतकारांतशब्दद्वयसिद्धिमात्रपरत्वेन आदेशपक्षे दीर्घप्रसङ्गदासीनत्वात् एतेन ग्रन्थस्य तत्र
मघवन् शब्दे प्रकृत्स भाषायामप्यस्य प्रयोगो न दृष्ट इति भाष्यग्रन्थोपि व्याख्यातः केचित्तु मतंतस्य छांदसत्वात् दीर्घइ
त्यस्यान्यथा तात्पर्यमाहुः मघवा बहुलमिति सूत्रं छांदसेव प्रवर्तते वनिवंतस्यात्रस्यानित्वात् वनिप्रत्ययमतवर्थं छांदसे
वविधानात् तस्य च आदेशो मघवन्निस्यैव रूपं तच्चोक्तरीत्या मतं वंतस्यापि तत्साधं इति प्रत्याख्यानं युक्तं लोके तु दीर्घो
भवत्येवेति यत्तु आदेशः छांदसेवेत्यत्र मानाभावः वनिवंतस्य मघोदात्तत्वात् अत्र वांतोदात्तस्यैव स्यानित्वात् एवं
णस्तन मघोनश्चेत्यत्र संप्रसारणदर्शनेन तथानिर्णयात् वनिवंते संप्रसारणाप्रसक्तेः संप्रसारणेपि यस्येति अकारलो
पप्रसङ्गान्मघोन इति रूपाभावात् अस्तिद्धवदत्राभादिति अन्तरङ्गमित्यस्य नाजानंतर्ये इति निषेधात् नाप्याभीयत्वादसिद्धत्वं व्याश्रयत्वा
त् इति नचैवं वनिवंते संप्रसारणं नास्तीत्यत्र बीजाभावात् नच श्वयुवमघोनामित्यत्र संप्रसारणनिर्देशो मानमिति वाच्यं
ग्रहणाभावे संप्रसारणाभावः संप्रसारणाभावे च ग्रहणाभाव इत्यन्योन्याश्रयात् वनो र चेति सूत्रे तिग्मुनीत्यतिपूनीत्य
त्रानर्थकत्वादिति प्रसंगपरिहारस्य वनिवंते मघवन् पाहेवनोऽर्थवत्वदितिमघोनीत्यत्र रत्वस्यादृष्टमिति भाष्ये तत्रापि संप्रसारण
स्यादर्शितत्वाच्च नचैवमपि मघवन्शब्दान्मघोनीति रूपसिद्धावपि वतिवंतस्य रत्वं दुर्वारमेवेति वाच्यं बहुलं छांदसि
ङीपो बहुल व्याविति वार्तिकोक्तेः छांदसि विपरीतप्रयोगस्यानापाद्यत्वात् इति तत्रत्यभाष्याभिप्रायात् एतेन आदेशस्य छां
दसत्वे तत्र मानाभाव इत्यपि निरस्तं श्वयुवेति सूत्रे नकारांतग्रहणमिति वार्तिकप्रत्याख्यानपरभाष्यविरोधात्
लोकेपि आदेशप्रसङ्गे मघवन्तामघवतीत्यादौ संप्रसारणवारणाय वार्तिकस्यावश्यकत्वात् तत्प्रत्याख्यानम

संगतं स्यात् यत्तु मघवेति प्राकारोच्चारणं आदेशपदे सौ दीर्घलाभार्थमिति तदुपेक्ष्यं वैयधिकरण्यात् एकमात्राधिक्याच्च
मघवा बहुलमित्येव सूत्रन्यासापत्तेश्च अनन्तरूपस्यस्यानित्यादेशेपि गौवर्भो[illegible]पपत्तेः मध्योदात्तस्यापि निपातनेनैवोपपत्तेः य
थान्यासापेक्षया लाघवस्य स्पष्टत्वात् यदप्याहुः वनिर्वन्तं मध्योदात्तं छन्दस्येव अन्तोदात्तं तु लोकेपि यद्यपि स्वन्नुक्षन्निर
णादिसूत्रे कनिन्नन्तादेव इत्युज्ज्वलदत्तादिग्रन्थादाद्युदात्तत्वं प्रतिभाति तथापि तत्सूत्रोपात्तानां श्वादीनां उदात्तस्वद्रोष्म
णः स्वपणोः इत्यादावन्तोदात्तदर्शनात्कनिप्रत्ययपयवयुक्तः अतएव वनिविधायकवार्त्तिकगततृर्वोपन्यस्तकैयटस्य
अर्वणस्तृ मघोनश्च नशिष्यत्र सवार्त्तिकगतभाषायामसाधुरिति कैयटोक्त्या सह न विरोधः विषयभेदात् एतेनोक्तवार्त्ति
कप्रामाण्यादर्वन् मघवन् शब्दयोर्भाषायामसाधुत्वमेवेति हरदत्तग्रन्थोपि निरस्तः वाजिवाहार्वगन्धर्वेत्यमरोक्तेः वाहे
दलप्यनसहस्तहगर्वगर्वइतिश्रीहर्षप्रयोगाच्चेति तदेवं वक्तव्यम् अर्वन्मघवन् शब्दयोस्त्रादेशो न विधेय इति प्रतिज्ञा
यां छान्दसं हितदितिहेतोर्भाष्यएव योजितत्वात् अर्वणस्तृ इति सूत्रस्यापि प्रत्याख्यानलाभात् मघवन्निर्देशेणादिक
स्यापि छान्दसत्वलाभाच्च अन्यथा तदर्थं सूत्रावश्यकत्वेवनिर्वन्तमघवन्शब्दविषयकत्वेपि दोषाभावादनिर्वन्तमात्रवि
षयकत्वनिरासस्यासंभवदुक्तिकत्वात् स्वयुवेतिसूत्रेनकारान्तग्रहणमितिवार्त्तिकप्रत्याख्यानपरभाष्यविरोधाच्च उ
णादिकमघवन्शब्दस्यापि त्रादेशविधानेन तद्वार्त्तिकस्यावश्यकत्वात् नचमतुपः सर्वत्रविधानादृयानोर्वनिपालोकेपि
विधानाच्चमतुब्वेर्योर्विधानाच्चेति वार्त्तिकस्यमतुब्वनोरित्यपि छन्दसि विधीयेते इति भाष्यस्य [illegible]ः संगतत्वमिति वाच्यं
मतुप्साहचर्येण तदर्थकस्यैव वनेर्विवक्षितत्वात् सतत्वेशापि प्रत्ययतायोग्यस्य वक्षे छन्दस्येवाभिमतत्वात् एतेन मघवाव
हुलमिति सूत्रप्राप्तिविषयीभूतवैदिकोदाहरणस्यायोरिति मतुब्वनोर्विशेषणं त्वात्तयोपाख्येयमित्यपास्तम् उक्तभा
ष्यासंगतेरपरिहारात् ॥ मघवेतिसूत्रस्य तद्दीत्यात्मोणादिकमघवन्शब्दविषयकतयोक्तविशेषणस्यबाधितत्वाच्च

ला
चा
म

६
सि॰सु॰
११८
118

अर्वणइतिसूत्रप्रत्याख्यानाभावेच इमान्यर्वणःपदानि अनर्वाणंवृषभंमंद्रजिह्वमित्युदाहरणदर्शनपरभाष्यविरोधाच्च
यत्तुअनञइतिसूत्रपदेोक्तंतयाअनर्वाणमित्यत्रदोषाभावेनतदुदाहरणमनुपपन्नमेवेति तच्चिंत्यं नञ्रहितेप्यर्वन्श
ब्देत्रादेशादर्शनेनअनञइत्यस्यापिवैयर्थ्यमित्यभिप्रायात् नचार्वणःपदानीत्येतदुदाहरणेनन्वसिद्धिरितिवाच्यं
अनञइतिविशेषणमव्यापकंनतत्संभवोतिदर्शनार्थं अनर्वाणमित्यस्याप्युदाहृतत्वात् यथाश्रुतसूत्रव्याख्यान
स्यापिप्रकृतत्वात् यत्तु अनर्वाणमित्यनञइत्यस्यप्रयोजनोक्तिः अर्वणःपदानीतितुवनिपिदृष्टान्तइति तद्रूपेष्टस्यव
निविधानेविवादाभावेनदृष्टान्तस्यानपेक्षितत्वात् अनर्वाणमित्यनेनतस्यापिसिद्धेश्च मघवन्शब्देवनिप्मतर्थी
यःअर्वन्शब्देतुकृतस्तत्रइतिवैषम्याच्च नचविजन्ताद्यातोःछंदसीवनिपाविमवणिनवत्रविवक्षितइतिवाच्यं यत्नसम
त्वापत्तेःअर्वणस्त्रसावित्यस्यछांदसत्वप्रसंगापरिहाराच्च। तदुक्तंलौकिकप्रयोगास्तुपतिपथीत्यादिवद्यथायोगंसम
र्थनीयाइतिदिक्॥ भस्य॥ अधिकारोयं॥ इतिश्रीसिद्धान्तसुधानिधौषष्ठस्यचतुर्थेतृतीयमाह्निकं ॥ पादःपत्॥
पादुक्तांहान्तस्यभस्यांगस्यपदादेशःस्यात् द्विपदःपश्य संख्यासुपूर्वस्येत्यकारलोपःव्याघ्रस्यैवपादावस्यव्याघ्रपात्
पादस्यलोपोहस्त्यादिभ्यइत्यकारलोपः तस्यापत्यंवैयाघ्रपद्यः गर्गादित्वाद्यञ् यादिपरत्वात्तस्यभसंज्ञा ननुअत्र
पाद्भूतस्यापपाद्भस्यपदविधीयतेउक्तरीत्यासर्वस्यांगस्यपदादेशापत्तेःमैवं निर्दिश्यमानस्यादेशाभवन्तीतिस्वी
कारात् नचविनिगमकाभावः प्रयोजनान्तरार्थंउक्तपरिभाषायाआवश्यकत्वात् अन्यथाअमायाविद्वांसर्वस्यामि
त्यादौआद्गुणादस्यादिशिष्टस्यैवउ.रामसंगात् अथाऊढीनाशांहातस्यप्राप्तवविधिरित्यतित्यत्वान्नान्वाधित्वात्प्रथम
मामादेशः परत्वान्नित्यत्वाच्चेतिनेदंप्रयोजनमितिचेत्सत्यंतथापिपस्येनसैइत्यादौस्यादसहितस्यउ.स्यायादेशःस्या
त्. नचतत्रउ.मात्रस्यस्यायादेशोऽङ्गवीरइतिवाच्यंस्यादाव्यवधानात् पदंक्रियास्त्वामित्यादौयाशब्दसहितानामेवतसा

नै॰
व॰
८

हृदित्यादि

दीर्घान्तामाङ्याद्देशाः स्युः अभु[illegible]स्यादौ तत्रत्यान्तरंगत्वादिट् शर्वमेव तामाङ्याद्देशा इति न तत्र परिभाषोपयोगः अतिसृज्य मतिवय
मित्यादौ न समुदाय स्ययुष्मदस्मदादेशाः स्युः अतिम अत्यसाविस्यादौ न समुदायस्य त्यदोः स त्वे परमक इस्य त्र[illegible]कादेः स्या
त् उदस्यानामित्यादौ अटू सहितस्य शर्वसवर्णः स्यात् स्यादुस्य सान्त अटा व्यवहितत्वान्नापत्तिः इयं च परिभाषा षष्ठी स्थाने
योगे त्येतन्त्र लभ्यते ति प्रागेव व्याख्यातं ॥ वसोः संप्रसारणं ॥ वस्वंतस्य भस्यांगस्य संप्रसारणं स्यात् विदुषः पशुष विदेः शा
तुर्वसुः ईयुषः तस्थुष इत्यादि । ननु विदेः शातुरिति श्रावादेशस्येव वसोः ग्रहणं स्यान्न तु लिडादेशस्य कसोः निरनुबंध
कग्रहणे न सानुबंधकस्येति न्यायात् मैवं विदेः शातुर्वसुस्समासेनम्र्वै कोल्प वि[illegible] संहितया पाठे स काल प्रश्लेषेण
वसस्तु इत्यादेशविधाने न तस्यापि सानुबंधकत्वाद विशेषेणोभय ग्रहणमिति वक्ष्यमाणत्वात् ॥ वाह ऊठ् ॥ वाहं तस्य भस्या
गस्य ऊठ् स्यात् न च हित्वादाद्यवयवत्वापत्तिः संप्रसारणस्य यणः स्थानिकत्व नियमात् वस्मा तस्तुठिदयं च र्वेन टकार
निर्देश इति प्राञ्चः नत्वेवं वाहइत्येवसूत्रमस्तु संप्रसारणस्य प्रकरणाद्विधेयतेनान्वयोपपत्तेः वस्य उकारे आकार
स्य पूर्वरूपे प्रश्रय लक्षणेन लघूपदलक्षणो गुणेन च हृदिश्चैवास्येनेनह्यैप ष्ठैोह इत्यादि सिद्धेः तत्र क्तं वाह ऊहृवनानर्थ
हृ^ कं संप्रसारणान्तत्वादिति अत्र भाष्यं असिद्धं वहिरंगमन्तरंगे इति परिभाषाज्ञापनार्थम् आरंभः सत्यांहितस्मान्नतरंगेगु
णेकार्येयोवहिरंगस्य लघूपदगुणस्यासिद्धत्वेन प्रसिद्धिः स्यष्ठैवेति ऊठि धानस्यार्थक्य नेन पचावेद मित्यादौ गुणस्याः
सिद्धत्वादेनपूर्वत्वं न स्यादेनन यत्राकारान्तमुपपदं नास्ति यत्र वा अकारान्ता मपसर्गरूपमुपपदमस्ति तदर्थम् ऊठि धा
हृ^ नमस्तु वार्योष्ठेह इत्यादौ यथान्येनन्तुणेन सिध्यतीति कथं ज्ञापकत्वमिति चेत् अत्राहुः तादृशास्थले ऊठ् दसिएवनी
स्यभिधानात् ज्ञापकत्वोपदर्शक भाष्यस्यैव चत्त्र प्रमाणत्वात् योक्तवेदृशेह इति प्रयोग ऊहृतेः किपान्निवाह्यधातू ना
मनेकार्थत्वादिति तच्चिन्त्यं अनेकार्थाहि धातवो न तु सर्वार्थाः इत्य तत्रस्त्वयमेवोक्तत्वात् अनकारान्तोपपदे इति कैयटहृद

सि॰ सु॰ ११९

दृष्टादिग्रंथविरोधाच्च ननु वाह्यते: किं पि संप्रसारणे गुणे च वार्योहद्वयमस्तु मेवं वाहेर्णिविधानेन लोके वेदे च वाह्यते: कि
ब्रासीतिज्ञापकत्वात् अन्यथा वाह ऊडित्यत्र तस्यैव वाहो ग्रहणसंभवेन तद्वैयर्थ्यापत्तेः नच णिलोपस्य स्थानिवत्त्वाद्वा [illegible] ना
पत्तिः कौलुमंनस्थानिवदिति निषेधात् नाप्यर्थभेदः णिजर्थस्याविवक्षितत्वात् ॥ श्वयुवमघोनामतद्धिते ॥ श्वन् [illegible]
[illegible] युवन् नकारांतयोर्मघवन्शब्दस्य भसंज्ञानां संप्रसारणं स्यादतद्धिते परे संप्रसारणाच्चेति पूर्वरूपं शुनः शुना
यूनः यूना अत्र सवर्णदीर्घः मघोनः मघोना अत्र गुणः अतद्धिते किं माघवनं नांतस्य किं मघवती स्त्रियां मघवती अ
त्रादेशापत्ते लिंगविशिष्टपरिभाषया युवतीरित्यादौ च माभूत् तदुक्तं श्वादीनां संप्रसारणे नकारांतग्रहणमनकारां
तप्रतिषेधार्थमिति श्वादीनामिमनङ्गुणसंवित्तानेवऊवीह्रिः तत्रव्यभिचाराभावेन विशेषणवैयर्थ्यात् भाष्य
कारस्त्वाह: मघवन्शब्दस्य कोदसमत्वात्सिद्धं युवतीरित्यत्रापि विभक्तौ लिंगविशिष्टाग्रहणमिति वक्ष्यमाणत्वात् ॥
अल्लोपोनः ॥ भसंज्ञानिमित्तप्रत्ययपरो यो न् तदवयवस्याकारस्य लोपः स्यात् पतत्त्वष्टड. संप्रसारणमित्यत्र
सप्रयोजनं व्याख्यातं राज्ञः राज्ञा अंगावयवस्येत्युविशेषणं तु प्रकरणानुरोधमात्रेण प्रयोजनाभावात् ॥ षपू
र्वहन्धृतराज्ञामणि ॥ षपूर्वो यो न् तस्य हनो धृतराज्ञश्च तेषां भसंज्ञानामतो लोपः स्यादणि तात्क्ष्णः औक्ष्णः धृतराज्ञो
पत्यं धार्त्रराज्ञः अनितिप्रकृतिभावे प्राप्तेऽयमारंभः तदुक्तं षपूर्वादीनां पुनर्वचनमल्लोपार्थमिति ननु नस्तद्धितेऽर
तिटिलोपस्यैव प्रकृतिभावो वाधको न त्वल्लोपस्य अतो नियमार्थमेवैतदस्तु इति चेन्मैवं षपूर्वादीनामेवाणि
अल्लोप इति नियम उत षपूर्वादीनामण्येवेति किं वा उभयतः नाद्यः षपूर्वादिभिन्नानामणि अल्लोपवा [illegible] सिद्धाव
पि षपूर्वादीनामणभिन्ने तदसिद्धेः तौ तक्ष्णपद इत्यत्राल्लोपापत्तेः सेनान लक्षणकारिभ्यश्चेति कारिलक्षणो ण्यः न
द्वितीयः षपूर्वादीनामणभिन्ने अल्लोपवारणेऽपि षपूर्वादिभिन्नानामणि तन्निषेधाभावात् सामनो वैमन इत्यादाव

लोपापत्तेः नत्तृतीयः सामन्योवैमन्यइत्यादौतथाप्यल्लोपस्यबहिरङ्गत्वात् तस्मादन्निनिमित्तकृतिभावो॰ लोपटिलोपयोर्द्वयोरपिवा
धकइतिषष्ठ्यैवतस्यप्राप्ति अल्लोपविधायित्वमेवेतिसिद्धम् ॥ विभाषाङिश्योः ॥ भसंज्ञानिमित्तप्रत्ययःपरोयस्मात्तद
ग्रोयोऽन् तदकारस्यलोपोवास्यात् ङौश्यांचपरतः राज्ञि राजनि अह्नी अहनी नपुंसकाद्धेश्योङः शीभावः ॥ नसंयो
गाद्वमन्तात् ॥ वकारोमकारोवान्तेयस्यतादृशात्संयोगात्परस्याऽनोऽकारस्यलोपोनस्यात् यज्वनः ब्रह्मणः वमन्तात्किं
तक्ष्णइत्यादौयथास्यात् ॥ अचः ॥ लुप्तनकारस्यांचतेर्भस्याऽवयवोयोऽकारस्तस्यलोपःस्यात् प्राचः प्राचा प्रतीचः प्रतीचा
समीचः समीचेत्यादि अनिदितामितिनलोपः अनेनाल्लोपः चावितिदीर्घः भस्येतिकिं प्राचः जसिमाभूत् तथ[illegible]त्र
स्नावणुश्चेनेनलोपस्यजातत्वात् ॥ उदईत् ॥ लुप्तनकारस्यभस्यांचतेर्नकारस्यईत्स्यात् लोपापवादः उदीचः उदीचेत्या
दि ॥ आतोधातोः ॥ आकारान्तधात्वन्तस्यभस्याऽऽतस्यलोपःस्यात् अलोमपस्य विश्वपः विश्वपेत्यादि समासेनञ्पूर्वेक्तोल्य
प् हलः॥ इत्यादौनिपातनात्सिद्धं अनापइतिवक्तव्यमितिवार्तिकरीत्यातुक्त्वायाइदम्प्रतिषेधइत्यत्रनिपातनाल्लोपा
भावइतिविशेषः यद्वायथाग्नोसंज्ञातइतियोगंविभज्यक्त्वइत्यादिसिद्धं हाहाशब्दस्यत्वधातुत्वात् हाहानित्येव
रूपं कौमाराः तुजहातीतिक्रियाशब्दत्वादातोलोपइत्याऽऽ ॥ मन्त्रेष्वाङ्यादेरात्मनः ॥ आत्मन्शब्दस्यादेर्लोपःस्या
दाङिपरे मन्त्रे आङि तृतीयासंज्ञाभावादात्मनादेवेषुविविदेमितद्रुः आतइत्यस्यप्रकृतत्वादादिग्रहणंनकर्तव्यं वस्तुतः
त्त्वमपिव्यर्थं त्मन्यासमंजन् इत्यादावन्यत्रापिलोपदर्शनात् नचाङीत्यपहायप्रत्ययमात्रेलोपोविधेयइतिवा
च्यं आत्मनएवतिर्मिमीह्रितादावभावात् ॥ तिविंशतेर्डिति ॥ डितिप्रत्ययेपरेभसंज्ञविंशतिशब्दसंबन्धिनस्तिश
ब्दस्यलोपःस्यात् आसन्नाविंशतेरासन्नविंशाः संख्ययाव्ययासन्नेतिबहुव्रीहिः बहुव्रीहौसंख्येयेइतिसमासान्तो
डच् त्रिंशच्छब्दस्यानेननलोपः यस्येतिचेत्यकारलोपः एवंविंशकः विंशतित्रिंशद्भ्यामितिड्वुन् ननुशब्दो[illegible]नोपादेयः तथा

ति

ति.स्व. ६
१२०
120

लोंत्यपरिभाषयाइकारमात्रलोपापत्तिः यस्येतिलोपेनैवतत्सिद्धावारंभवैयर्थ्यात् मैवं आरंभसामर्थ्यादलोंत्यपरिभाषा
याअगेसर्वस्यैवविंशतिशब्दस्यैवलोपप्रसंगात् तिकारमात्रलोपेवीजाभावात् नचतिग्रहणेकृतेप्यंत्यमात्रलोपाप
त्तिःआरंभसामर्थ्यात् निर्दिश्यमानस्यादेशाभवंतीतिचसर्वलोपानापत्तेः ॥ टेः ॥ डितिपरेभस्यटेर्लोपः स्यात् क
तरत् अड्डु नरादिभ्यइतिक्वमोरङ्गुलदेशः एकादशाधिकाअस्मिन्नेकादशंगोशतं तदस्मिन्नधिकमितिदशान्ताड्डः
ननूपसरजोमेडरज इत्यादौसमप्याजनेडइतिडस्यस्वादिषु नतभीवान्नस्मिन्परेभसंज्ञाविरहाहिलोपोनस्यात् मै
वडित्वसामर्थ्याद्भसंज्ञाविरहेपिप्रवृत्तेः तदुक्तं डित्वभस्याप्यनुबंधकरणसामर्थ्यादिति एवंचभस्यत्येतदिहापरंज
कमात्रं आवर्तीभावात् ॥ नस्तद्धिते ॥ नांतस्यभस्यटेर्लोपःस्यात्तद्धिते उपराजं अनश्चेतिसमासांतष्टच् उडुलोमन्नाय
त्यंऔडुलोमिः शारलोमिः बाह्वादित्वादिञ् अग्निशर्मायणः नडादित्वात्फक् नांतस्यकिं ओपमन्यवः विदादित्वादञ् सौ
मनसायनः अश्वादित्वात्फञ् तद्धितेकिं राज्ञीत्यादौमाभूत् सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलि
लांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानंनांतापेत आद्याप्तानेनवानामिनलोपनपत्येतेनोदयाश्र
भन्निति अणिप्रकृतिभावस्यैतदपवादत्वादप्रामावारंभः साब्रह्मचाराः पैठसर्पाः कालापाः कौथुमाः तैतिलाः जा
जलाः लांगलाः शैलालाः शैखंडाः सौकरसद्माः सौपर्वाः चर्मणः कोशइतिवक्तव्यं चार्मः कोशः चार्मणोन्यः अश्मनोविकारे
इतिवक्तव्यं आश्मः आश्मनोन्यः श्वनः संकोचेइतिवक्तव्यं शौवः संकोचः शौवनोन्यः अव्ययानांभमात्रेटिलोप
इतिवक्तव्यं सायंप्रातिकः पौनः पुनिकः शाश्वतेः प्रतिषेधोवक्तव्यः शाश्वतं शाश्वतिकइत्यत्रयेषांचविरोधःशाश्व
तिकइतिनिपातनात्सिद्धेः ॥ अह्नष्टखोरेव ॥ टिलोपःस्यात् नियमोयं द्व्यहः त्र्यहः राजाहः सखिभ्यइतिटच् अ
ह्नीनः ख्वः कृतसमाहृते नियमः किं अयोरह्नोर्भवो ह्नकः अत्रटिलोपोमाभूत् तेनाह्नोपपद्यत ॥ ओर्गुणः ॥ उवर्णांतस्यभ

१२

अङ्कः ८

स्य गुणः स्यान्नहिते वाहृवाहवि नत्रतेनेदमितिवक्तव्रीहिः इच कर्मव्यतिहारे इति समासान्त इच् औपगवः तस्यापत्यमित्य
ण् वाहविः वाह्वादिभ्यश्च बाभ्रव्यं वाभ्रुतः पित्रु[illegible] इति यत् ओः किं औक्षात्रं उक्षात्रादित्वादञ् भस्य किं वायुमान् तद्धिते
किं वाय्वोः ओदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्य इति ज्ञापनार्थं तेन स्वायंभुव इत्यादौ न गुणः ॥ ढे लो
पोऽकद्र्वाः ॥ अवर्णान्तस्य कद्रूभिन्नस्य भस्य ढे परे लोपः स्यात् गुणापवादः मकंडोरपत्यं मार्कंडेयः जारत्कारेयः शुभ्रा
दित्वात् ढक् कमंडलोरपत्यं कामंडलेयः चतुःपाद्भ्यो ढञ् अकद्र्वाः किं काद्रवेयः अत्र गुण एव यथा स्यात् ढे
किं वाभ्रविर्जारत्कारवश्च त्यादौ मा भूत् ॥ यस्येति च ॥ इकाराकारयोः समाहारद्वंद्वे यणि यस्येति षष्ठ्यन्तं भस्य इवर्णा
वर्णयोर्लोपः स्यादीकारे तद्धिते च परे जामदग्न्यः कौण्डिन्यः कुण्डिनीजमदग्निशब्दाभ्यां गर्गादित्वाद्यञ् दौलेयः नै
देयः इतश्चानिञ इति ढक् रौहिणेयः रौक्मिणेयः शुभ्रादित्वात् ढक् स्वम्पूर्यः राजस्वस्रादिति यत् उदधेः दिगादित्वा
द्यत् कुमारी वयसि प्रथमे इति ङीप् दाक्षिः अत इञ् गांगः शिवादित्वादण् गांगेयः शुभ्रादित्वाड्ढक् ननु इकारस्य
ईकारे परे लोपस्य किमुदाहरणं अथ दत्तस्यापत्यं स्त्री दाक्षी ततो दाक्षि. दाक्ष्याः दाक्षेयः यद्यपि इकारलोपान स्था
नद्वापरस्य संवृद्धिकृत्स्वेयणादेशो लोपे चक्रमेणकृते न पूर्वस्य इकारस्य श्रवणं स्यात् मेवं सवर्णदीर्घेणैव सिद्धेः अ
त्र भाष्यं सखीमतिक्रान्तः अतिसखिः अतिसखेरागतं अतिसखेः स्व सखिशब्दाद्ध्रस्वः [illegible] परे यदि यकारलोपान स्या
त्तदा अतिसखिशब्दे उपसर्जनत्वे स्त्रीत्वेऽसखीति घि संज्ञानिषेधः स्यात् लोपेन तत्र सखिशब्दो नास्ति इकारस्य
स्त्रीप्रत्ययावयवत्वादिति न निषेधः ओरुः शृणप्रतिषेधो वक्तव्यः काद्रेसौर्व नाम हिमवतः शृंगे गोशी निषेधयोर्ह
यारपि प्रकृतत्वात् शृणं नेत्यभिसंबंधमात्रं कार्यमिति भाष्यं इयङुवङ्भ्यां लोपो विप्रतिषेधेन इयङुवङे
... वकाद्याः श्रियोऽश्रवौ लोपस्य कामंडलेयो भा... वाभ्रेयः वात्स्यो योलेवाभ्रव्यः स्त्वश्रोभयप्राप्तौ

3

ग्रणहीवृ...

६
सि॰ कौ॰
१२१
121

परत्वाद्यस्येतिलोपः एवंचयत्नंचायकारस्मादावियङुवङौ बाधित्वा गुणवृद्धी वक्ष्यत इत्यत्र गुणवृद्धीचेति न वक्तव्यं मध्येऽपवा
दन्यायेन इयङुवङोर्गुणप्रत्येव बाधकत्वात् गुणवृद्ध्योः स्वस्यत्वात् ॥ सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ सू
र्यादीनामंगस्य च षष्ठ्यन्तत्वादभेदान्वयो वाच्यः स च बाधितः अनेन तानामंगानां सूर्यादिशब्दभिन्नत्वात् न च यस्येति अ
कारलोपे कृते एकदेशविकृतन्यायात् अभेद इति वाच्यं स्थानिवद्भावेदोषत्वाद् वस्थानात् न च यलोपेन निषेध इति
वाच्यं तथाप्युपधाग्रहणवैयर्थ्यात् ङकारीत्याय कारस्यानन्त्यत्वसंपत्तेः मैवं भाधिकारमभिव्याप्याः सिद्धत्वमितिप
देऽयकारलोपस्याः सिद्धतया यकारस्यानन्त्यत्वाभावात् न च तथाप्युपधाग्रहणमास्तु अंगस्य यलोपो भवति स चेत्सू +
+ र्यादेस्य चेत्सूर्यादीनां यकार इति नन्वेवमपि सूर्यचरी सङ्घातिप्रसंग इति चेन्न परिगणनस्यावाच्यत्वात् सूर्यमत्स्ययोर्ङ्यामि
ति वक्तव्यं सौरी मात्सी सूर्यागस्त्ययोश्छे च ङ्यां चेति वक्तव्यं सौरी सौरीया आगस्ती आगस्तीयः तिष्यपुष्ययोर्नक्षत्राणि
लोपो वक्तव्यः तैषं पौषं अन्तिकस्य तसिकादिलोप आद्युदात्तत्वं च वक्तव्यं अन्तितोऽन्तमः अन्तितमेऽन्तमवरोहति न
मीत्येषन वक्तव्यो दृष्टो दाशानये पिदि अन्तिषत् येन्त्यदस्य येन्तियेच हरके ॥ हलः परस्यापत्यस्य तद्धितयका
रस्य लोपः स्यादीति परे गार्गी यञश्चेति ङीप् यस्येति चेत्यकारलोपोऽनेन यकारलोपः ॥ आपत्यस्य च तद्धितेऽनाति ॥
हलः परस्योपधात्रपस्यापत्यार्थकतद्धितयकारस्य लोपः स्यात् यस्मिन्नाकारआदिर्न भवति तादृशे तद्धिते परे वा
मरथ्यस्यछात्रावामरथ्याः कण्वादिभ्यो गोत्र इत्यण् वामरथ्यस्य कण्वादिवत्सर्वं स्वरवर्जमिति अतिदेशात् अकारलो
पे सत्यनेन यलोपः गौदमेयैरपत्यं स्त्री गौदमेया तस्याश्छात्रा गौदमेयाः अण्योरनार्षयोरितीञः ष्यङादेशः स्यादिति
वद्भावेन तस्यापत्यत्वं अनातीति किं गार्ग्यायणः यञिञोश्चेति फक् ॥ क्याच्च्यौश्च ॥ हलः परस्यापत्ययकारस्य लोपः स्या
त् क्यौ च्वौ च परतः केति क्यच् क्वच्च ग्रहणं भाष्ये क्यषः ककारस्य प्रत्याख्यानात् गार्ग्यमात्मन इच्छति गार्गीयति गार्ग्य

+ यादीनां यकार इति व्याख्यानात् मैवं। सूर्यचरीत्यत्र लोपापत्तेः तद्यमर्थः अगस्त्यापधायायस्य लोपः +

+ हलस्तद्धितस्य +

१२

इत्याचरति गार्ग्गीयते ॥ बिल्वकादिभ्यश्छस्य लुक् ॥ एभ्यः परस्य छस्य लुक् स्यात् नडादयं नड्गणो बिल्वादिः तत्र नडादीनां कुक् च
तेन तदस्मिन्नस्तीत्यर्थे चातुरर्थिकः छप्रत्ययस्तत्सन्नियोगेन कुगागमश्च बिल्वकीयायां भवा बैल्वकाः वेत्रकीयायां भवा वै
त्रकाः ननु छग्रहणं व्यर्थं न च बिल्वकेभ्य इत्यत्र भ्यसो लुग्मा भूदिति भस्यानुवृत्तेः नापि बिल्वकायेनत्र बिल्वकस्य मत
दापत्तेः नापि बिल्वकस्य विकारोऽवयवो वा बैल्वक इत्यत्र तद्धिते इत्यस्यानुवृत्तेः नापि बिल्वकीयायां भवो बैल्वकः
तस्य किंचिद् बैल्वकीयमित्यत्र तस्य बिल्वकादिप्रकृतिकत्वाभावात् अत्र भाष्यं सन्नियोगशिष्टानामन्यतराभावे उभयोर
प्यभाव इति परिभाषाज्ञापनार्थं तेन सत्यां च तस्यां छस्य सन्नियोगशिष्टस्य कुकोऽपि निवृत्तिर्माभूदिति छग्रहणसार्थक्या
परिभाषायाः फलं तु पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र लुक् तद्धितलुकीति ङीप्रत्ययनिवृत्तौ तत्सन्नियोगशिष्टस्यानु
कोऽपि निवृत्तिरित्यादि न च लोपपदानुवृत्त्यैव सिद्धौ लुग्ग्रहणं व्यर्थं लोपस्यालोन्त्यपरिभाषया यकारमात्रप्रतियो
गिकत्वापत्तेः लुक् तु प्रत्ययप्रतियोगिकत्वात् सर्वलोपः ॥ तुरिष्ठेमेयस्सु ॥ तृ इति तृन्तृचोर्ग्रहणं तस्य लोपः स्या
त् इष्ठ इमनिच् ईयस्सु इति च परे तुश्छन्दसीति तृन्तृचोरिष्ठनीयसुनौ सर्वलोपोऽयं अन्त्यमात्रस्य लोपे प्रयोजनाभावात्
न च तदर्थं लुगनुवर्तनीय इति वाच्यं विजयिष्ठः करिष्ठ इत्यादौ गुणानुपपत्तेः न लुमतेति प्रत्ययलक्षणनिषेधात्
अयमेषामतिशयेन जेता विजयिष्ठः कर्ता करिष्ठः एवं विजयीयान् करीयान् कर्तृभावः करिमेत्यादि इयमन
योरतिशयेन दोग्ध्री दोहीयसी धेनुः भस्याढे तद्धिते इति प्रत्ययात् प्राग् गोवत् पुंवद्भावः णाविष्ठवत् प्रातिपदिकस्ये
ति वक्तव्यं पुंवद्भाव रभाव टिलोप यणादिपरार्थम् पटीमाचष्टे पटयति भस्याढे इति पुंवद्भावः पृथुमाचष्टे
प्रथयति र ऋतो हलादेरिति रभावः पटुमाचष्टे पटयति स्थूलमाचष्टे स्थवयति स्थूलदूरेति लकारादकारसमु
दायलोपः ऋकारस्य गुणश्च न च गुणे सत्यचो ञ्णितीति वृद्धिप्रसङ्गः अङ्गवृत्तपरिभाषया प्रातिपदिकाङ्गत्वे

पृं॰

६
सि·सु·
१२२
१२४

इति वक्तव्यग्रहणाद्वाह्रेडसमहत्तेः एवं ह्रस्वमाचष्टे ह्रसयति ह्रसयतीत्यादौ तु ह्रस्वमततीति भस्याढे इति पुंवद्भावः ति ह्रस्व
माचष्टे इति व्याख्येयं उपलक्षणं चैतत् तथा च भारद्वाजीयाः पठंति णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटि
लोपयणादिपरार्थादिविन्मतोर्लुग्विध्यर्थमिति प्रियमाचष्टे प्रापयति प्रियस्थिरेत्यादिना प्रादेशः एवं स्थिरमा
चष्टे स्थापयतीत्यादि स्रग्विणमाचष्टे स्रजयति दंडवंतं दंडयति विन्मतोर्लुक् न च बहुमाचष्टे भावयतीत्यत्र
इष्ठस्य यिट् चेति यिडागमापत्तेः स्यादिति वाच्यं इष्ठवदिति सप्तम्यंताद्वतिनिर्देशेनेष्ठे परे यत्प्रातिपदिकस्य
कार्यं तस्यैवातिदेशात् यिटश्चेष्ठकार्यत्वात् भावयतीति रूपं कैयटमतेनोक्तं हरदत्तादयस्तु बह्वयतीति म
तांतरत्वेन तदुपन्यस्तमेव रूपमभिमन्यन्ते यिडभावे सन्नियोगशिष्टपरिभाषया भूभावस्याप्यभावात् अयमेवेष्ठका
र्यातिदेशस्य प्राथम्यादनेनैव वार्त्तिकेन णौ भूभावो विधीयते न त्वेतदतिदिष्टेन इष्ठस्य यिट् चेति शास्त्रेण त
था च सन्नियोगशिष्टत्वाभावाद्भावयतीत्येव युक्तमित्याहुः वस्तुतस्त्विष्ठस्य कार्यातिदेशत्वेपि यादृशं कार्यमिष्ठ
निर्दिष्टं तेनेष्ठवातेन विधेयं तथा च यिडागमनिर्मुक्तभूभावस्यातिदेशो न युक्तः कैयटस्य त्वयमभिप्रायः
कात्यायनवार्त्तिकस्य प्रयोजनपरिगणनार्थत्वाभावेपि भारद्वाजीयवार्त्तिकस्य तत्परिगणनार्थत्वात् तत्र प्राद्या
देशसमभिव्याहारादागमनिर्मुक्तादेशमात्रस्यायमतिदेश इति । प्रादेयापि हीष्यते इत्युक्त्वा भाष्ये भारद्वाजीयाः
पठंतीति प्रक्रमप्राप्तप्रादेशस्य विन्मतोर्लुकश्चाधिकस्योक्तत्वेपि तस्योपलक्षणत्वे मानाभावात् इष्ठनि दृष्टं स
र्वमतिदिश्यत इत्यस्य च भाष्यकारैरनुक्तत्वात् न चैवं भसंज्ञापि नातिदिष्टेति वाच्यं टिलोपस्य प्रयोजनत्वेनोक्त
त्वात् तेन श्वानमाचष्टे शावयति नस्तद्धिते इति टिलोपः इष्ठवदित्यतिदेशेन भसंज्ञायां श्वयुवेति संप्रसारणं स्यान्न चा-
तद्धित इति पर्युदासापत्तिः णेस्तद्धितत्वाभावात् तद्धितसंप्रसारणेन तन्निषेधस्य वाऽप्रसिद्धतयातिदेशानर्हत्वात्

ति

१२

नच प्रकृत्यैकाजिति प्रकृतिभावः येन नाप्राप्तन्यायेन टेरिति लोपं प्रत्येव तस्य बाधकत्वात् भत्वात्संप्रसारणं अत्रे
त्युनस्तु ङित इत्यस्यानेहातिदेशः इष्टनि तस्यादृष्टत्वात् ब्रलिष्ठ इत्यादौ परत्वात् टेरित्यस्यैव प्रवृत्तेः तेन संप्रसार
णोऽप्युन्नयति इत्येवरूपमित्याहुः वस्तुतस्तु सकार्यातिदेशात्वादनेनैव टिलोपविधानं तत्र च भसंज्ञायां नात
त्वस्य चाप्रनपेक्षितत्वात् प्रथयतीत्येवरूपं युक्तं एतेन विदुयतीति व्याख्यातं यत्तु संप्रसारणे हृस्वावादेशे च विदाव
यतीति केचित् यत्तु नित्यत्वात् टिलोपात्प्राक् संप्रसारणं अंतरंगत्वात्सवर्णरूपं तेन न टिलोपः विदयतीत्यन्ये तदुभ
यमप्युपेक्ष्यं भसंज्ञातिदेशे प्रमाणाभावात् एवं कार्याणां वचनावशेषैरेव विधानस्यांगीकार्यतया पकस्यैव
शास्त्रातिदेशत्वं कार्यातिदेशत्वं चेति वैरूप्यं उभयत्रावरभावेतिप्रातिस्विकरूपेण प्रयोजनाक्ति परभाष्यवार्ति
कविरोधश्च नच भसंज्ञापि शास्त्रीयं कार्यमिति कार्यातिदेशत्वमेवेति वाच्यं शास्त्रान्तरप्रवृत्त्युपपादकातिदेश
स्यैव कार्यातिदेशपदार्थतया तावतापि तदनपायात् कर्मवत्कर्मणेत्यत्र यादृक्शास्त्रातिदेश इति सर्वै
रभ्युपगमात् कर्मकर्त्रादिपरस्मैपदवारणाय माकरेयत्तस्य कृतत्वाच्च तथा च वाह ऊठ् शाहाद्वाहशाद्वादालो
विटिलोपे च वाह ऊठ् इत्यस्य प्रसंगः नचेष्टापत्तिः तस्यासिद्धपरिभाषाज्ञापकत्वभंगप्रसंगात् अत्र संप्रसारणे
न निर्वाहाभावाद् ऊठो विधानस्यावश्यकत्वात् न च वाह इति एवं प्रत्ययान्तस्यैव निर्देश इति वाच्यं नियामकाभा
वात् अचः परस्मिन्निति सूत्रे औदवाहोरित्यत्र ऊठो भाष्यप्रोक्तत्वाच्च स च टिलोपस्याभीयत्वादसिद्धत्वं तत्रस्था
नित्वान् परभाष्यविरोधात् ध्रुवान्तं ध्रुवतिवाच्याचष्टे एयवयती तत्र संप्रसारणस्यातथ्यापि दुर्वारत्वात् न चेष्टापत्तिः
स्वपरग्रन्थविरोधात् न च तत्र नकारान्तग्रहणमिति वार्त्तिके न निर्वाहः टिलोपस्यासिद्ध तयानान्तत्वानपायात्
तस्मात् पिभाष्यप्रमाणान्नात्र अण्भसंज्ञानिमित्तकं यत्कार्यं इष्ठे तदिष्ठवत् तस्यैवायमतिदेशः संप्रसारणं च न तत्र

दृष्टं अनङ्गितः इति पर्युदासात्वादिति चेत् मैवं भसंज्ञानातिदिश्यते इत्येवं पर्यवसानात् भसंज्ञाया भसंज्ञानिमित्तकत्वाभा
वात् ननु भत्वातिदेशानङ्गीकारे पटयतीत्यादौ जसन्तं स्यात् मैवं कर्मसमर्पकात्प्रातिपदिकादेव णिजुत्पत्तिरिति सि-
द्धान्तात् ननु सर्वत्र नान्तरङ्गत्वात्प्रवृत्तिरिति हरदत्तादिमते अन्तर्वर्तिविभक्तिमादाय पदसंज्ञा दुर्वारा स्यादिति तन्मिति पदसं
ज्ञायाः सर्वत्र हि नित्ययोगकार्यत्वाभावेन नत्वलम्मतेति निषेधानुपपत्तेः सत्यं इष्टनिर्देशस्य भत्वाभावस्य शास्त्री
यस्याप्यतिदेशात् काममतिदिश्यतां वा सत्त्वासत्त्वापि नेह भावोस्तीति न्यायस्य तुल्यत्वात् ॥ पटयति प्रथयतीत्यादि
भाष्यस्य च तत्र प्रमाणत्वात् एतेन संप्रसारणमपि निरस्तं अन्यथा पदसंज्ञातिदेशस्यापि दुर्वारत्वात् यद्वस्य संज्ञा
भवतीति व्याख्यायां भसंज्ञायाः पदविधित्वस्य च पदान्तसूत्रगतेन भाष्यादौ प्रसिद्धत्वात् पदसंज्ञाप्रहृष्टस्तनं त्वेकसं
ज्ञाधिकारान्नहायं दोषः इत्यन्यदेतत् न त्विष्टं तिसंप्रसारणविरहेन बाधकशास्त्रप्रयुक्तः किं तु प्रापकप्रमाणाभावप्र
युक्तः अनङ्गितः इत्यस्य पर्युदासत्वात् भसंज्ञात्वशास्त्रप्रयुक्त इति वैषम्यमिति चेत् सत्यं प्रापकप्रमाणाभावप्रयु
क्तस्याप्यतिदेशो बाधकाभावात् पटयतीत्यत्रोपपद्यते अभावस्यैवमेव सर्वैरुपपादितत्वात् न च स्थानिवत्त्वेन
अत्रेष्ट वत्त्वमिति विशेषस्य तत्प्रयोजकत्वात् पदसंज्ञातिदेशो बाधकस्यानुक्तत्वाच्च न चेष्टति यदपदान्तं
ष्टतस्यातिदेश इति वाच्यं संप्रसारणस्यापि दुर्लभत्वात् पदसंज्ञायाः एकसंज्ञाधिकारादनुपपन्नं संप्रसारण
स्य तु अनङ्गितः इति पर्युदासादित्यवधिविशेषः तत्र भावप्रसञ्जितप्रतियोगिकाभावत्वस्योभयत्र साम्यात् इत्या
स्तं विस्तरः टेः लोपः स्यादिष्ठेमेयस्सु प्रथिष्ठः प्रथीयान् प्रथिमेत्यादि ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां य
णादिपरं पूर्वस्य च गुणः ॥ एषां यणादि परभागो लुप्यते अवशिष्टभागसंबन्धिनः इको गुणश्च इष्ठादिषु
परेषु स्थविष्ठः दविष्ठः यविष्ठः ह्रसिष्ठः क्षेपिष्ठः क्षोदिष्ठः एवं ईयसुनि स्थवीयानित्यादि अन्तानां यणाम् एषु

दित्वादिमनि चिकृसिमा देपिमा दोदिमा लोपे कृते इष्ठा यानां त्रयाणां परस्य हणां पुवकृ स्त्वयोर्यकारेफावारभ्यलो
पवारणार्थ उकारान्तत्वात् ओर्गुणः दिप्रदन्तइयोस्तु हलन्तत्वात् पूर्वस्य च मध्वत्वा काशो धेणगुणः अत एव शाव
यती मध्य ओर्गुणमाशंकात्संप्रसारणं दिलोपयोरसिद्धत्वादिति समादधते वृद्धस्ते लोपसंनियोगशिष्टत्वाद
नेनेव पंचस्त्वपि गुणः अन्तरंगत्वात्परत्वाच्च ॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फ
वर्बंहिगर्वर्षित्रप्द्राघिवृन्दाः ॥ प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः गरिष्ठः वर्षि
ष्ठः त्रपिष्ठः द्राघिष्ठः वृन्दिष्ठः एवमीयसु सुनि प्रेयानित्यादि प्रियोरुबहुलगुरुदीर्घाणां ष्ठ्याद्वित्वादि मनि च प्रे
मा इत्यादि ॥ बहोर्लोपो भूश्च बहोः ॥ बहुशब्दात्परयोरिमेयसोर्लोपः स्यात् बहुशब्दस्य भूभावश्च आदेः परस्य
ति इकारमात्रलोपः भूयान् भूमा न चाप्य ओर्गुणापत्तिः भाधिकारमभिव्याप्य सिद्धिकार इति पदे ते असिद्धत्वा
न्नतः प्राप्नोतीति पदे च दीर्घोच्चारणसामर्थ्यादिमुक्तत्वात् ॥ इष्ठस्य यिट् च ॥ बहोः परस्य इष्ठस्य यिडागमः स्यात् ब
होर्भूभावश्च भूयिष्ठः इहलोपस्याप्यनुवृत्तेरिष्ठनः इकारलोपे पि ति इकार विशिष्टस्य यकारस्यागमत्वे त
दभावे न यिरीकारउच्चारणार्थः यकारमात्रस्यागमत्वमिति भाष्यं ॥ ज्यादादीयसः ॥ ज्यात्परस्येयस आत्वं
स्यात् आदेः परस्य सवर्णदीर्घः प्रयमनयोरनिष्पाद्येन प्रशस्यस्य हृद्धो वा ज्यायान् ननु ज्यादीयस इ स्येव सूत्रयित्वा
प्रकृतो लोप एव विधीयतां किमात्वविधानेन न आदेः परस्येति ईकारलोपे प्रकृत्या वधानु कयोरिति दीर्घेणैव रू
पसिद्धेः सत्यं अंगवृत्ते पुनर्वृत्तावविधिरिति परिभाषाज्ञापनार्थं तत् एवं ज्ञातो णेरज्ञाभावविधानमपि
ज्ञापकं वदन्ते तेन णिचादेशस्यानलघूपधगुणप्रसंगः कस्मिंश्चिदंगाधिकारीयकार्ये कृते सत्येव यदंगाधिका
रीयकार्यं प्राप्नोति तन्न भवतीत्यर्थः णिचादेशव्यतिरेकेण धातोर्लघूपधगुणस्य सत्त्वाभावात् एवं कृत्वा

सि. सु. ६

१२४

मत्राप्लुतो ऽमरग्रहणंतिकोन लघूपधगुणः शेषे लोपोऽन्त्यलोपः अवसो अवमिति चवमादेशः इति पदेऽगुणक्ष अवमित
त्रवक्रवचनेकत्वीत्येवं नेमादित्येयं ग्रंगहणे इतिचसम्प्रमंतमिति केचित् वाकोरंगहणे रिति पंचमंतेनिर्दिष्ट
स्येति चपरिभाषणेपठंति तत्रायमर्थः अंगकार्यग्रहणंत्रिरूपादेतोः परिनिष्ठितस्यप्रयोगार्हस्यांगस्यपुनरंग
कार्यग्रहणे रविधानं प्रतिःपतिः हृताविति समम्याष ष्याभ्यांगीकारात् इत्याहः मनुईकारलोपेकथंपसिद्धिः
ग्रहणंकारवेस्यत्र किट् तोत्परंग्रहणेनः सत्यं तदभावस्त्रीहरूपत्ताय कत्वोक्तेः ॥ यञ्चतोह स्लादेर्लघोः ॥ हलादेरितिव
हुव्रीहिः इत्यादिषु त्रिषु परेषु हलादेरंकारस्य रत्वं स्यात् प्रथीमः प्रथीयान् प्रथिमेत्यादि ननु अत्र हलाद
रित्यंगस्य विशेषणं ग्रहणं रूकारस्य नाद्यः प्रप्रथीयानित्यादेरसिद्धेर्नांत्यः प्रान्तचीयानित्यत्रातिप्रसंगात्
प्रथमनयोरतिशयेनप्रान्तरवान् इत्यर्थः विग्रहेतोर्लकुसमं प्रथीयपष्टात्रे बुप्रत्ययतोनन्समासइत्याद्य
दोषाभावात् नचसमासेऽनन्तरंतद्धितोत्पत्तौ दोषः बहुव्रीहिणैव तद्धितार्थाभिधानेमहुमरंतदनुत्पत्तेः न
एषुरएषु रितितस्मरूपस्य चगुणवचनत्वाभावादिष्टय ष्टुनोरप्रहणेः नचाऽप्यथवोस्य संत्वएषुमात्
ततइष्टयत्नेनोत्तरादानस्यादिति वाच्यं अप्रएषुपदपव बहुव्रीहिणा सिद्धमज्ञानतरूपान्तरं मत्वर्थीयानंगीका
रात् ननु मानयितारमाचष्टे मानयतीत्यत्रत्वज्ञकारस्य रत्वं स्यात् नरिष्टतिलोपान्नरत्वाद्वत्वस्यपूर्वोरत्वात्
नचाऽवशिष्टस्यरत्वविधेयंच कृतयतीत्यत्रापत्तेः अत्रभाष्ये एषुमहत्कृशवदंपरिहृतानामितिवक्तव्यं परि
गणनान्नात्यत्रप्रसक्तिः ॥ विभाषर्जोश्छंदसि ॥ ऋजुशब्दसंबंधिनकारस्यरत्वं वास्यात् हलादित्वाभावादप्रा
प्तावारंभः त्वंरजिष्ठमनुनेषि पंथा ऋजिष्ठमितिवा ॥ प्रकृत्यैकाच् ॥ एकाच् प्रकृत्यास्यादिष्ठादौ भसंज्ञानिमित्ते
स्यादेनत् प्रेष्ठ इत्यादि प्रममेमावेःयप्रकृतिभावः उतइष्ठादिग्रयपद नाद्यः यद्यपिस्वमस्यास्ति स्वीमत्रनापत्तिः

२२

१५

॥

पकादन्तादितिनिवृत्तेर्विधिविरत्वात् शौचमित्यत्रापिपरत्वात् स्वनशाब्दस्यपुंगागमे कृते तस्य नेकाचत्वेन प्रकृतिभावस्य न प्र
सक्तिः अप्रपुनाः इत्यत्र च प्रकृतिप्रत्ययसमुदायस्य अधुनेति निपातनात् तद्धिं तथापि द्वौ विकारो द्वय मित्यत्र प्रसंगात् नच
अर्थेति चेत्येनदारभ्य लोपविधिनिर्यस्य लोपस्य प्रसक्तिस्तस्यायं निषेधइति वाच्यं श्रियेहितः श्रीयः हालादेवतास्य हः
स्थालीपाक इत्यादावतिप्रसंगात् नद्वितीयः श्रेयान् श्रेष्ठ इत्यादावादेशस्यासिद्धत्वात्तस्य व्याख्यानपदत्वपुरस्कारेण
सामर्थ्याद्देवलोपप्रसक्त्यभावात् अत्र सिद्धान्तः विन्मतोर्लुगर्थमिति तथाहि अयमनयोरेषां वा अतिशयेन
स्रग्वी स्रजिष्ठः स्रग्वांस्तु स्रजीयः स्रजिष्ठः विन्मतोरिति यथायोगं तयोर्लुक् अत्रावशिष्टभागस्य टेरि
ति लोपो मा भूदित्येतदर्थं प्रकृतिभावारंभः नाप्यत्र टिलोपे अस्य भागस्य पदत्वाद्दोषः तक्कौ डिस्यायेन स्र
पिस्तं भवेवाधनं भवती सभ्युपगमात् न च टिलोपवत्तस्तद्धित इत्यस्यापि विन्मतोर्लुग्विधायनेन बाधः स्यादिति वाच्यं
नहि विषये टिलोपस्येव नस्तद्धित इत्यस्य नियतप्रसक्त्यभावात् परत्वादपवादत्वाच्च नन्वेवमतिशयेन पयस्वी
पयिष्ठ इति न स्यात् विन्मतोर्लुका टिलोपस्य बाधितत्वात् अत्र भाष्ये यथालक्षणमप्रयुक्ते इति पयसिष्ठ
इत्येवरूपमित्यर्थः एतेन करिष्ठ इत्यादौ टलोपे सति टिलोपाभावोपि व्याख्यातः टलोपस्यापि नाप्यत्र टिलो
पे प्रारभ्यमाणत्वात् प्रकृत्याकेराजन्यमनुष्ययुवानः इति वक्तव्यं राजन्यकं मानुष्यकं यौवनकं आपत्ययोरा
पत्यस्य च तद्धितेना तीति यलोपे अनेन नस्तद्धित इति टिलोपे च प्राप्ते अयमारंभः आपत्ययोः समूहेर्थे गोत्रोक्षो
ष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् अनेन नमनोष्मादित्वाज्ञाद्वे ।। इनण्यनपत्ये ।। अपत्याभिन्ना
र्थे अणि परे इन् प्रकृत्या स्यात् नस्तद्धिते इति टिलोपस्यापवादः गार्भिणो नाम समूहो गार्भिणामसा इति
थुंज्ञवः अणीति किं हस्तिनां हस्तिनीनां वा समूहो हास्तिकं अनपत्ये किं कामिनोपत्यं कामः ।। गाथिविदथि

६
सि॰द्द
१२५
125

केशिगणिपणिनश्च ॥ एतेऽणि प्रकृत्या स्युः अपत्यार्थे पर्युदासादिन्द्रेण प्रकृतिभावाप्राप्तावारंभः गाथिनोऽप
त्यं गाथिनः वैदथिनः कैशिनः गाणिनः पाणिनः तनोतृनिश्च पाणिनिः नचएव तत्रियाष्ट्रिनोरिति लु
गणिनो विति लुगापत्तिः गोत्रग्रहणेन शतिपदोक्तस्यञः ग्रहणाप्रवृत्तत्र ग्रहणादित्यञ्कृत्वात् ॥ संयोगादिश्च ॥
संयोगादि आदौ यस्य तादृश इन्नणि प्रकृत्या स्यात् शांखवदारंभः चक्रिणोऽपत्यं चाक्रिणः ॥ अन् ॥ अन्नणि
प्रकृत्या स्यात् राज्ञोऽपत्यं राजनः क्षत्रियत्वाभाववत्यां स्त्रियां क्षत्रियाउत्पन्न इत्यर्थः तस्यापत्यमित्यण् राज
श्वशुराद्यत्र जातावितिविवक्षितत्वात् अर्थविशेषमपेक्ष्य न आगमोऽयं प्रकृतिभावः यतः यश्वपलादयन्न
भुवः सौत्रामणीनां दृशामिति निपातितः ॥ येचाभावकर्मणोः ॥ भावकर्मभिन्नार्थे यादौ प्रत्यये अन् प्रकृत्या स्यात्
राजन्यः सामन्यः वेमन्यः तादृशएव अभावे इति किं राज्ञो भावः कर्म वा राज्यं इह नस्तद्धिते इति टिलोपाय यत्स्यात् ॥
आत्माध्वानौ खे ॥ प्रकृत्या स्तः आत्मने हितमात्मनीनं आत्मन्विश्वजनेति खः अध्वानंगच्छत्यध्वनीनः खे किं आ
त्मीयः इत्यादौ टिलोप एव ॥ नमपूर्वोऽपत्येऽवर्मणः ॥ अपत्यार्थे अणि परे वर्मान्यशब्दसंबंधी मपूर्वोऽन् प्रकृ
त्या न स्यात् अन् इति प्राप्तस्यापवादः भद्रसाम्नोऽपत्यं भाद्रसामः अवर्मणः किं चक्रवर्मणोऽपत्यं चाक्रवर्मनः म
पूर्वः किं सुत्वनोऽपत्यं सौत्वनः अपत्ये किं चार्मणो रथः परिवृत इत्यण् मपूर्वान्नप्रतिषेधे वाहितनाम्न इति वक्त
व्यं हैतनामनः हैतनामः ॥ ब्राह्मोऽजातौ ॥ अत्र ब्राह्म इति योगो विभज्यते अनपत्ये अण्ययं प्रकृतिभावः ब्राह्मो ह
विः ब्रह्मदेवत्यमित्यर्थः अजातौ अपत्ये इत्यनुवर्तते अपत्ये जातावणि ब्रह्मणा टिलोपो न स्यात् ब्रह्मणोऽपत्यं ब्रा
ह्मणः ॥ कार्मस्ताच्छील्ये ॥ कर्मशीलमस्य कार्मः छत्रादिभ्यो ण इति णः नन्वणि विहितस्य प्रकृतिभावस्यात्र प्रस
क्त्यभावात् टिलोपनिपातनं व्यर्थमिति चेन्न ताच्छीलिके णेऽपि अण्कार्यं भवतीत्यस्य ज्ञापकत्वात् तेन चौरीति सिद्धं चु

१५

ताशीलमस्याः इति छत्रादित्वाण्णः ताच्छीलिके किं मांसशीला मांसकामा मांसभक्षिता शीलिकामिभक्षाचरिभ्यो णः
आत्ताचारिणी भक्षाचारी हन्ति भ्यो णः अत्र ङीप् न भवति ॥ औक्षमनपत्ये ॥ उक्षण इदं औक्षं पदं निपातनाट्टिलो-
पः अनपत्ये किं उक्ष्णोऽपत्यमौक्ष्णः अन्नित्प्रकृतिभावः ॥ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशि-
नायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ एतानि शब्दरूपाणि निपात्यन्ते दण्डिनो हस्तिनश्चापत्यं दाण्डि-
नायनः हास्तिनायनः नडादित्वात् फक् निपातनाट्टिलोपाभावः नडादौ दण्डिन्हस्तिनशब्दयोः पाठाभावपक्षे तु फ-
क् अपि निपातनाद्बोध्यः अथर्वाणमधीते आथर्वणिकः जिह्माशिनो वाशिनश्चापत्यं जैह्माशिनेयः वाशिनायनिः
अपत्ये शुभ्रादित्वात् ढक् अत्र इञ् दीर्घश्च हृदादिति किं न भ्रूणहत्या भावो भ्रौणहत्यं धीवरस्य भावो धैवत्यं भावे ष्यञ् निपातना
त्तादेशः निपातनादत्र प्रकृतं तत्वात् धात्वः कति पितृमातृस्थ नीत्वेव धीवत्नुशाहः सरस्वतोभवं सारस्वतं इक्ष्वाक अणि
पूर्वस्यैवच निपातनाद्वादेशः इक्ष्वाकोरपत्यमैक्ष्वाकः अङ्गेतस्याः अन्तस्यच उकारलोपो निपात्यते एकस्यापा
बेन हयोरपुपादानात् मित्रयोरपत्यं मैत्रेयः ढकि निपातनात् युशब्दलोपः हिरण्यस्य विकारो हिरण्मयः यो
कारााकारसमुदायलोपः ननु भ्रौणहत्यैतादेश निपातनं व्यर्थं हनस्तोः चिण्णलोरिति एव सिद्धेः न च टिलोपाभा
वपवाद निपातः परत्वान्नित्यत्वाच्च तादेशस्यैव प्रसङ्गे नापि दुपधात्तु हि निषेधार्थमेतन्न् आदिह दोषवत् तद्यथा
न् नापि ध्वाजेजा जित्वात्याम स्कुत्वस्य निषेधार्थं नकारादेरिति अत्रेति योगविभागादेव तत्सिद्धेः संज्ञानाः स
रूपग्रहणेन तन्मध्ये कार्यविज्ञानमिति परिभाषाज्ञापनार्थत्वात् तत्र इति भावत्वरूपनिर्देशेन विशिनष्टि ता
देशस्य धात्वाय कारविहित प्रत्ययपरत्वप्रसङ्गे तेन भ्रौणघ्नो वार्त्रघ्न इति सिद्धं एवं तत्रस्य हस्तं तदस्मामि

सि.सु.
१२६

स्यादौ सृजिदृशोरिति अम् न गिरो गिर इत्यादौ अचि विभाषेति लत्वं न अभ्यां मभ्यामित्यादौ मस्जिनशोरिति नुम
के चित्तु प्रत्यये परे धातुनिर्देशेन कार्यमुच्यमानं तत्प्रत्यय एव भवतीति नियम विभाषास्त्र रूपमित्याहुः सीर्षदेवाद
यस्तु धातोः कार्यमुच्यमानं तत्प्रत्यय एव भवतीति येतु धातोः स्वरूपग्रहणे इति पाठेन तु हृतस्मभ्यामि
त्यादौ अनुदात्तस्य चर्दुपधस्यान्यतरस्यामित्यमागमः स्यात् तथा धातुस्वरूपस्यानुपादानादित्याहुः ननु
हृष्यत्र इत्यादौ हो ढः इति ढत्वं न स्यात् हनेरिति धातुग्रहणादिति चेन्न प्रत्यये परे विहितं यत्कार्यं तत्रैवोक्त
परिभाषाप्रवृत्तेः तत्र कुत्वस्य तु नकारे परे विहितत्वात् नन्वेवमपि तन्भ्यां नङ्भ्यां सतेत्र नशेर्वेति कुत्ववि
कल्पो न स्यात् भ्यामादिप्रत्ययपरत्वं विना पदान्तत्वाभावात् धातुस्वरूपोपादानाच्च मैवं पदसंज्ञोपपादक
त्वेपि भ्यामादेः साक्षान्निमित्तत्वाभावात् ॥ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि छंदसि ॥ एषु एकं सव
धमाच षट्कं सवानयती त्यत्र णिचो धातोरित्येवमविहितत्वात् कुत्वं नत्वेन स्यातामिति चेन्नसत्य ओप्योनात्क
त्वात्तदावच्छ इति वार्तिकस्य धातुरेव केवलाण्णिच् कर्तव्य इत्यर्थक तया तत्रापि तन्सिद्धेः निपात्यते ऋतौ भ
वं ऋत्व्यं उकारस्य वत्वं वास्त्वमित्यत्रापि एवं वास्त्वमित्यत्र प्रत्यययकारस्य लोपोपि माध्वीनः सन्त्वोषधीः
मधुशब्दादणि स्त्रियां यणा हिरण्ययाः पंथानः अत्र मयटो मकारात्काकारसमुदायस्य लोपः तवा कृतसा
वैतिरीयोपातिः अंगग्रहणपरिभाषया तदभावात् यद्वा मकारमात्रस्य लोपः प्रकृत्यकारस्य तु यस्येति लोपः इति लो
पइतिदिक् ॥ इति श्री सिद्धान्तसुधानिधौ वैयाकरणस्य चतुर्थे चतुर्मासिके पादे पाणिनीयस्यायं समाप्तः ॥ सहृदस
दवाकमानन्निगमागमपारपारंगमश्रीलक्ष्मीधरलब्धबोधजनमुषाविमलमस्तरेणादिते श्री सिद्धान्तसुधानिधौस्यि

र्य.

षणैरध्यायमध्यायतंध्यायंध्यायमिह्राभियेषमधुनाश्रोधायधींधीयनाम् ॥ ॥